तृतीयस्कंध ३

॥श्रीगणेशाय नमः॥ अथ भगवान् बादरायणिः पूर्वस्कंधांते यथा पुरस्ताद्व्याख्यास्यामो पाद्मकल्पमथो शृणु इति प्रतिज्ञातमर्थं प्रतिपिपादयिषुः स्वप्रतिपिपादयिषितस्य प्रामाणिकत्वप्रख्यापने विदुरमैत्रेयसंवादं प्रस्तौति भगवतो हरिर्मैत्रेयोपि विदुरेण पृष्टः इत्याह श्लोकद्वयेन एवमिति वः पांडवानां मंत्रकृद्दौत्यकर्ता अखिलेश्वरः पुमान् सदंशभूतो भगवान् विदुरः आत्मसात्कृतं स्वकीयत्वबुद्ध्या परिगृहीतं पौरवेंद्रगृहं पौरवेंद्रो धृतराष्ट्रस्तस्य गृहं हित्वा यत्का यद्वा यदा वा प्रविवेश वनमिति शेषः तदा ऋद्धिमत्संपन्नं स्वगृहं त्यक्त्वा वनं प्रविष्टेन क्षत्त्रा विदुरेण भगवान् मैत्रेयो मित्रासूनुः कौषारविः एतद्वक्ष्यमाणं पृष्टः एवं भवदीयप्रश्नानुसारेण पुराणं पृष्टः त्यक्त्वा स्वगृहमिति पौरवेंद्रगृहं हित्वेति च कापि कोमानसप्रत्यागो विवक्षितः अतो न पौनरुक्त्यं गृहस्य ऋद्धिमत्त्वेंतु तद्यत्र भगवानखिलेश्वर इति श्रीकृष्णस्य पौरवेंद्रगृहप्रवेशकथनप्रसंगतं तदुक्तं

श्रीमन्नारायणाय नमः श्रीशुक उ० एवमेतत्पुरा पृष्टो मैत्रेयो भगवान्किल क्षत्त्रा वनं प्रविष्टेन त्यक्त्वा स्वगृहमृद्धिमत् १ यद्वा अयं मंत्रकृद्वो भगवानखिलेश्वरः पौरवेंद्रगृहं हित्वा प्रविवेशात्मसात्कृतं २ राजोवाच कुत्र क्षत्तुर्भगवता मैत्रेयेणास संगमः कदा वा सह संवाद एतद्वर्णय नः प्रभो ३ न ह्यल्पार्थोदयस्तस्य विदुरस्यामलात्मनः तस्मिन्वरीयसि प्रश्नः साधुवादोपबृंहितः ४ सूत उवाच स एवमृषिवर्योऽयं पृष्टो राज्ञा परीक्षिता प्रत्याह तं सुबहुवित्प्रीतात्मा श्रूयतामिति

हृष्य भगवन्निग्रहविषयतया विनंक्ष्यमाणत्वेन भगवत्स्वेच्छेनेकृद्धिमत्त्ववर्णनात् संगत्यादिदित्वे तिपद्यस्तारस्यात्र १ २ अत्र लब्ध प्रश्नावसरो राजा पृच्छति कुत्रेति कुत्र प्रदेशे मैत्रेयेणास हभगवतो क्षत्तुर्विदुरस्य संगमः संगतिरासबभूव कदा कस्मिन्काले वा तेन सह संवादोभूदेतत्तु हे प्रभो श्रीशुक नोऽस्मभ्यं वर्णय ३ स्वस्य प्रश्नौचित्यमाविः करोति नहीति महात्मनः भगवत्स्वरूपविज्ञस्य सतः धीमतो यः प्रश्नः वरतर्जन्महिमगुणोत्कृष्टे मैत्रेये प्रश्नः अल्पार्थोदयः अल्पस्यार्थस्योदयो यस्मात्स प्रश्नः [illegible] प्रयोजनोदयः न हि भवति कथंभूतः प्रश्नः साधुवादोपबृंहितः साधूनां सतां वादेन च पवित्ररूपेणवादेन उपबृंहितः विस्ततः अतस्तद्वृत्तांतं मया श्रोतव्यमिति भावः ४ एवमापृष्टो राज्ञा मुनिराहेति सूत आह स इति राज्ञा परीक्षितैवमापृष्टः सा कल्पेन पृष्टः सुबहुवित्सुबहुवेत्तीति स मुनिः श्रीशुकः प्रीतात्मा समीचीनप्रश्नेन संतुष्टचित्तः श्रूयतामित्यमं प्रति राजानं प्रत्याह ५ एवं राज्ञा पृष्टो मुनिस्तमेव संवादं प्रस्तुत्य सुस्थानाद्विदुरस्य पौरवेंद्रगृहत्यागे निमित्तमाह ॥ ॥ ॥ ॥

तृ८
राम:
१

श१ ति० तो०

भा० तृ० टी०

एवं किमाहेत्यत आह अजातशत्रोरिति त्रिभिः दुर्विषहं सोढुमशक्यं तवागः अपराधं तितिक्ष[illegible]तः अजातशत्रोर्दायं प्रतियच्छ असमर्पयितारं त्वां तिरस्येव भवितव्यमित्यत आह सहेति अनुजैः अनुजैरर्जुनादिभिः सहितः वृकोदरः भीमः स एवाहिः रुषा श्वसन् यत्राजातशत्रुसंनिधौ वर्तते यद्यस्माद्वृकोदरात्त्वमलं नितरां बिभेषि यं त्वमित्यपि पाठः तदा यं प्रति बिभेषीत्यर्थः ११ भगवत्तोषणां पार्थानां बलीयस्त्वं किमु वक्तव्यमित्याह पार्थानिति देवः भगवान्समग्रज्ञानशक्त्यादिसंपन्नः मुकुंदः श्रीकृष्णः पार्थान्गृहीतवान् मम प्राणा हि पाण्डवा इत्यभिमानविशेषेण परिगृहीतवान् गच्छतु भगवान्दूरतोऽपि किमित्यत आह स भगवान् सक्षितिदेवः ब्राह्मणा तेषां देवः ब्राह्मणैः इत्यर्थः यत्र भगवान्ब्राह्मणैर्वर्तते तत्र श्रीर्विजयो भूतिरिति न्यायेन तत्रैव विजय इत्यर्थः दूरस्थेन भगवतापि किं

विदुर उ० अजातशत्रोः प्रतियच्छ दायं तितिक्षतो दुर्विषहं तवागः सहानुजो यत्र वृकोदराहिः श्वसन्रुषा यत्त्वमलं बिभेषि ११ पार्थांस्तु देवो भगवान्मुकुन्दो गृहीतवान्सक्षितिदेवदेवः आस्ते स्वपुर्यां यदुदेवदेवो विनिर्जिताशेषनृदेवदेवः १२ स एष दोषः पुरुषद्विडास्ते गृहान्प्रविष्टो यमपत्यमत्या पुष्णासि कृष्णाद्विमुखो गतश्रीस्त्यजाश्वशैवं कुलकौशलाय १३

भवितव्यं इति मा वोचद् इत्याह स्वपुर्यामेवास्ते आस्तां स्वपुर्यां तथापि केन तेन किं इत्यत आह यदुदेवदेवः यदुश्रेष्ठाः सात्यकिप्रद्युम्नानिरुद्धादयः तेषां देवः प्रभुः यादवास्तत्संनिधाने वसन्ते इत्यर्थः पाण्डवतुल्या योद्धारो मत्संनिधावपि संतीत्यत आह विनिर्जिताशेषनृदेवदेवः विनिर्जिता अशेषा नृदेवाः राजानः ये तेषामपि देव इत्यर्थः समस्तदिग्विजेतृणामपि प्रभुः १२ एवं भगवत्सहायानां पाण्डवानामजेयत्वमभिधाय स्वकुलविनाशको भगवद्द्वेषी त्वत्पुत्रो निर्वास्यतामित्याह यद्दुर्योधनमपत्यमत्या त्वं पुष्णासि स एष दुर्योधनः दोषप्रचुरः त्वदीयया परशरीरापत्यरूपेण मूर्त्तः सन् गृहान्प्रविष्टः कुतः यतः पुरुषद्विड्भगवद्द्वेषी आस्ते कथंभूतः पुष्णासि कृष्णाद्विमुखः अत एव गतश्रीः अत आश्वशैवममंगलमेनं दुर्योधनं कुलकौशलाय त्यजेदेकं कुलस्यार्थे इति न्यायेन स्वकुलानिष्टनिवृत्तये त्यज जहाति आश्वयैनं आश्वसेद्यमित्यपि पाठः आश्वेनं दुर्योधनमाशु त्यजेत्यर्थः असेवममंगलमाशु त्यजेत्यर्थः १३ ॥ ॥ ॥ ॥

र्थः

के

यदेति यदा राजा धृतराष्ट्रः विदुरस्य कनीयसो भ्रातुः पांडोः सुतान् विविधं धूर्त्तितः नानुधिष्ठिरादीन् लाक्षाभवने जतुगृहे प्रवेश्य
विषान्कृत्वा ददाह दग्धवान् तदा स विदुरः अपासरत् इत्येकद्वित्रिक्रियासंबंधः एवमुत्तरत्रापि कथंभूतो राजा विनष्टदृष्टिः सुम
विषयकं ज्ञानं चक्षुश्च यस्य सः अत एवाधर्मेण साधून् खलान् स्वसुतान् पुष्णन् एवंभूतो ददाहेत्यन्वयः ६ यदा च नृपः धृतराष्ट्रः स
भायां कुरुदेवस्य युधिष्ठिरस्य देव्या द्रौपद्याः केशाभिमर्शरूपं गर्हितं निंदितं सुतकर्म पुत्रकर्तृकं कर्म न वारयामास तदायादि^
दे४५ स्यान्वयः कथंभूतायाः कुरुदेव्याः आत्मनः स्नुषायाः स्वास्रैः स्वीयैरश्रुभिः कुचकुंकुमानि स्वस्तनगतकुंकुमानि हरंत्याः अप
हरंत्याः ७ द्यूत इति तमोजुषा एणः तमःप्रधानो राजा यदा समयेन प्रतिज्ञातस्य रेखा दायं दिव्यं याचतोऽजातशत्रोः नादान्न ददौ
तदायादित्यर्थः कथंभूतस्याजातशत्रोः वनाद्यागतस्य सत्यावलंबस्य सत्यं धर्मराजं बलंबं आश्रयो यस्य तस्य सा

श्रीशुकउ० यदा तु राजा स्वसुतानसाधून् पुष्णन्नधर्मेण विनष्टदृष्टिः भ्रातुर्यविष्ठस्य सुतान् विबंधून् प्रवेश्य लाक्षाभवने ददा^
ह ६ यदा सभायां कुरुदेवदेव्याः केशाभिमर्शं सुतकर्म गर्ह्यं न वारयामास नृपः स्नुषायाः स्वास्रैर्हरंत्याः कुचकुंकुमानि ७।
द्यूते त्वधर्मेण जितस्य साधोः सत्यावलंबस्य वनागतस्य न याचतोऽदात्समयेन दायं तमोजुषाणो यदजातशत्रोः ८।
यदा च पार्थप्रहितः सभायां जगद्गुरुर्यानि जगाद कृष्णः न तानि पुंसाममृतायनानि राजोरु मेने क्षतपुण्यलेशः ९ यदोपहूतो
भवनं प्रविष्टो मंत्राय पृष्टः किल पूर्वजेन अथाह तन्मंत्रदृशां वरीयान् यन्मंत्रिणो वैदुरिकं वदंति १०

धोः साधुलक्षणलक्षितस्य द्यूते त्वादिभिरधर्मेणाधर्मरूपेण द्यूतेन वा जितस्य पराजितस्य ८ यदेति पार्थेन युधिष्ठिरेण प्रहि
ग तः जगतां गुरुः धर्मोपदेष्टा भगवान् श्रीकृष्णः सभायां यानि हितसामभेदादीनि अमृतायनानि अमृतत्वप्रापकाणि वचांसि जगाद तानि वचांसि यस्य
राजा धृतराष्ट्रो नो समेने न बहु मेने तदा याहीत्यन्वयः कथंभूतस्य राज्ञः क्षतः नष्टः पुण्यस्य लेशो यस्य सः ९ यदेति^
यदा पूर्वजेन धृतराष्ट्रेण मंत्राय उपहूतः उपसमीपे हूतः आहूतः भवनं प्रविष्टः मंत्रदृशां मंत्रविदां मध्ये वरीयान् श्रेष्ठो वि
पृष्टः मंत्रमालोचनं प्रति पृष्टः मंत्रदृशां मंत्रविदां मध्ये वरीयान् विदुरः अथ प्रश्नानंतरमुवाच मंत्रवि त्वमेवाह यत् यतः वैदुरि
कं विदुरोक्तं एवं मंत्रिणः इतरे सचिवा मंत्रिणः वदंति १०

भा. तृ. टी.

३

पुरेषु पुण्यान्युपवनानि चाद्रयश्च कुंजानि च तेषु तेष्वपंकानि निर्मलानि तोयानि येषु तेषु सरित्सु सरःसु च तेषु अनंतस्य भगवतो लिंगैर्मूर्तिभिः समलंकृतेषु तीर्थायतनेषु अनन्यः अनन्यभक्तिः भगवदेकनिष्ठः चचार पर्यटत् १८ गां भूमिं पर्यटन्मेध्या विविक्ता वृत्तिर्जीविका सा च स्वयं निर्मिता दुर्वेष्टिता द्विभिर्ज्ञातिराजीविका यस्य सः सदा आप्लुतः स्नातः अधः शयनं यस्य सः अवधूतः असंस्कृतदेहो नातिदेहसंस्काररहितः स्वैः स्वदेहसंबंधिभिरलक्षितः अदृष्टः अवधूतो नानावेषो वल्कलाजिनधारणादिरूपो यस्य सः हरितोषणानि हरिसंतोषकारीणि एभिरिति हरितोषणानि व्रतानि चेरे अचरत् १९ इत्थमिति भारतवर्षमेव इत्थं व्रजन्पर्यटन्कालेन यावद्यावत्ता कालेन प्रभासं प्रभासतीर्थं प्रतिगतवान् विदुरस्तावत्कालं पार्थो युधिष्ठिरः अजितेनार्जुनेन साकं श्रीकृष्णेन हेतुना वा एकातपत्रां एकमातपत्रं छत्रं यस्यां तां एकचक्रां एकस्यैव चक्रं सैन्यं यस्यां तां क्षितिं शा

पुरेषु पुण्योपवनाद्रिकुंजेष्वपंकतोयेषु सरित्सरःसु अनंतलिंगैः समलंकृतेषु चचार तीर्थायतनेष्वनन्यः १८ गां पर्यटन्मेध्यविविक्तवृत्तिः सदाप्लुतोऽधःशयनोऽवधूतः अलक्षितः स्वैरवधूतवेषो व्रतानि चेरे हरितोषणानि १९ इत्थं व्रजन्भारतमेव वर्षं कालेन यावद्गतवान्प्रभासं तावच्छशास क्षितिमेकचक्रामेकातपत्रामजितेन पार्थः २० तत्राथ शुश्राव सुहृद्विनष्टिं वनं यथा वेणुजवह्निसंश्रयं संस्पर्धया दग्धमथानुशोचन्सरस्वतीं प्रत्यगियाय तूष्णीं २१ तस्यां त्रितस्योशनसो मनोश्च पृथोरथाग्नेरसितस्य वायोः तीर्थं सुदासस्य गवां गुहस्य यच्छ्राद्धदेवस्य स आसिषेवे॥

शास अनुशिष्टवान् २० तत्रेति अथ प्रभासतीर्थप्रतिगमनानंतरं तत्र प्रभासतीर्थे समीपस्थः सुहृदां यादवानां परस्परसंघर्षेण कलहेन कृष्णकौरवादीनां विनष्टिं शुश्राव अन्येन परस्परसंस्पर्धया विनाशे दृष्टांतः वेणुभ्यो जातो यो वह्निस्तस्य संश्रयमाश्रयं वनं यथा दग्धं तद्वत् अथ सुहृद्विनष्टिश्रवणानंतरमनुशोचन् प्रत्यक् पश्चिमाभिमुखं सरस्वतीं नदीं प्रति तूष्णीमियाय गतवान् २१ तस्यां सरस्वत्यां त्रितस्य त्रितेन सेवितं तीर्थमित्यर्थः श्रीतादीनामेकादश तीर्थानि तत्तन्नाम्ना प्रसिद्धानि आसिषवे आसेवितवान् २२ अन्यानीति द्विजदेवा ऋषयस्तैर्देवैश्च कृतानि निर्मितानि विष्णोरायतनानि बहुविधानि स्थानानि यद्दर्शनात् येषामायतनानां दर्शनात् कृष्णमनुस्मरति कृष्णस्मारकानीत्यर्थः प्रत्यंगान्यायुधानि तेषां मुख्यं चक्रं सुदर्शनं तेनांकितानि मूर्तिरूपाणि हेमकुंभेषु चिह्नितानि मंदिराणि येषु तान्यन्यानि वर्तीयांसि सिषेवे इति पूर्वेणान्वयः २३

३

इत्थमूचिवान् विदुर इति शेषः अथैतस्य गृहत्यागं वक्ष्यन्नेतस्मिन्साक्षात्तिरस्कृताभिमत्वमाह तत्र विदुर इत्येव मुख्य
माने प्रवृद्धकोपस्फुरिताधरेण प्रवृद्धः कोपः तेन स्फुरितश्चञ्चल अधरोष्ठो यस्य तेन सकर्णानुजसौबलेन कर्णदुःशास
नशकुनिसहितेन सुयोधनेन सत्स्पृहणीयशीलः यस्य सः सतां असत्कृतः तिरस्कृतः १४ तिरस्कारप्रकारमेवाह क इ
ति दास्याः सुतं जिह्मं कुटिलात्मानमेनमत्र सभायां क उपजुहाव आहूतवान् किंभूतं यद्बलिना यस्य ममैव बलिनान्नेन
नैव पुष्टः संवर्द्धितः तस्मिन्नपि प्रतीपः प्रतिकूलः परकृत्ये परेषां शत्रूणां कृत्ये कार्ये प्रथमान्तत्वे अधिकरण [illegible] हि
शत्रुकार्ये इत्यर्थः आस्ते वर्तते अतः श्वसानः प्राणमात्रावशेषं यथा भवति तथा श्वसानं एनं पुरात् निर्वास्यतां निर्धार्यतां
१५ स विदुरः अत्युल्बणैः कठिनैः भ्रातुः पुरः कर्णयोर्बाणवद्दायकैः वाक्यैः तैः मर्मसु ताडितोऽपि स्व

श्रीशुक उ॰ इत्यूचिवांस्तत्र सुयोधनेन प्रवृद्धकोपस्फुरिताधरेण असत्कृतः सत्स्पृहणीयशीलः क्षत्ता सकर्णा
नुजसौबलेन १४ दुर्योधन उ॰ क एनमत्रोपजुहाव जिह्मं दास्याः सुतं यद्बलिनैव पुष्टः तस्मिन्प्रतीपः परकृत्य आ
स्ते निर्वास्यतामाशु पुराच्छ्वसानः १५ श्रीशुक उ॰ स इत्थमत्युल्बणकर्णबाणैर्भ्रातुः पुरो मर्मसु ताडितोऽपि स्व
यं धनुर्द्वारि निधाय मायां गतव्यथोऽयादुरु मानयानः १६ स निर्गतः कौरवपुण्यलब्धो गजाह्वयात्तीर्थपदः पदा
नि अन्वाक्रमत्पुण्यचिकीर्षयोर्व्यामधिष्ठितो यानि सहस्रमूर्तिः १७

गतव्यथः पंक्तिन्यायेनास्य ते पुरूपसर्गस्य सुकरी यातगतव्यथः अनेन च वस्य प्रज्ञा... गतव्यस्त्रीयामिति पाठे धनुर्विशेषणं ध
नुः शरीरं शानं द्वारि निधाय तत्र मायां निधाय मायां सर्वजनमोहिनीं भगवन्मायां उरुमान
यानः आत्मनः मायामाहात्म्यमिति बहु मन्यमानः अयात् निर्गतः गतवानित्यर्थः १६ एवं गृहत्यागे हेतून्त्यागं चाभिधाय तस्य
तीर्थाटनप्रकारमाह स इत्यष्टभिः कौरवपुण्यलब्धः स विदुरः गजाह्वयात् हस्तिनापुरात् निर्गतः कौरवपुण्यैर्लब्धः इत्यनेन तेषां
भाग्यं तेन रूपेण निर्गतमिति सूचितं तीर्थपदः तीर्थं गंगा पादं यस्य तस्य हरेः पदानि स्थानानि पुण्यं कर्तुमिच्छया अन्वाक्र
मदनुचचार कानि पदानि उर्व्यां भूम्यां यानि पदानि सहस्रमूर्तिः सहस्राणि बहूनि मूर्तयो रंगेशादिके देशे हस्तीश्वराचलादि
पार्थसारथ्यादयो यस्य तथाभूतो भगवान् अधितिष्ठ

सांबं पृच्छति हे सौम्य रथिनां रथिकानामग्रणीः श्रेष्ठः हरेः श्रीकृष्णस्य सुतः सदृक्षः हरिसमानः सांबः साधु यथा स्यात्तथा कच्चित् जांबवती व्रताढ्या व्रतनिष्ठा सती देवं गुहं पूर्वजन्मनि कार्तिकेयं सांबं असूत जांबवती यं गुहः अग्रे पूर्वजन्मनि अंबिकया भवान्या धृतः गर्भे इति शेषः ३० सात्यकिं पृच्छति क्षेममिति युयुधानः सात्यकिः क्षेमं कुशलं यथा स्यात्तथा कच्चित् यः युयुधानः फाल्गुनादर्जुनात् लब्धं धनूरहस्यं धनुर्वेदो येन सः अधोक्षजस्य श्रीकृष्णस्य सेवयैव तदीयां अधोक्षजसंबंधिनीं यतिभिर्दुरापां गतिं अंजसा अनायासेनैव लेभे प्राप्तवान् ३१ अक्रूरं पृच्छति बुधः विज्ञानवान् अत एवानमीवः अपापः भगवंतं शरणंगतः श्वफल्कपुत्रः अक्रूरः स्वस्ति कुशलं यथा स्यात्तथा कच्चित् यः श्वफल्कपुत्रः कृष्णस्य पादाभ्यामंकितैः चिह्नितैः यो मार्गस्तस्य पांसुषु रजःसु प्रेम्णा कृष्णपादांकितमार्गदर्शनजनितप्रीत्यतिशयेन विभिन्नधै-

कच्चिद्धरेः सौम्य सुतः सदृक्ष आस्तेऽग्रणी रथिनां साधु सांबः असूत यं जांबवती व्रताढ्या देवं गुहं योंऽबिकया धृतोऽग्रे ३० क्षेमं स कच्चिद्युयुधान आस्ते यः फाल्गुनाल्लब्धधनूरहस्यः लेभेंऽजसाधोक्षजसेवयैव गतिं तदीयां यतिभिर्दुरापां ३१ कच्चिद्बुधः स्वस्त्यनमीव आस्ते श्वफल्कपुत्रो भगवत्प्रपन्नः यः कृष्णपादांकितमार्गपांसुष्वचेष्टत प्रेमविभिन्नधैर्यः ३२ कच्चिच्छिवं देवकभोजपुत्र्या विष्णुप्रजाया इव देवमातुः या वै स्वगर्भेण दधार देवं त्रयी यथा यज्ञवितानमर्थं ३३ अपिस्विदास्ते भगवान्सुखं वो यः सात्वतां कामदुघोऽनिरुद्धः यमामनंति स्म हि शब्दयोनिं मनोमयं सत्त्वतुरीयतत्त्वं ३४ अपिस्विदन्ये च निजात्मदैवमनन्यवृत्त्या समनुव्रता ये हृदीकसत्यात्मजचारुदेष्णगदादयः स्वस्ति चरंति सौम्य ३५

र्यः सन् सः अचेष्टत व्यलुंठत ३२ देवकीं पृच्छति देवकनाम्नो भोजस्य तस्य पुत्र्याः विष्णुः श्रीकृष्णः प्रजा अपत्यं यस्यास्तस्याः देवक्याः देवमातुः अदितेरिव शिवं कुशलं कच्चित् या देवकी स्वगर्भेण देवं भगवंतं दधार तत्र दृष्टांतः त्रयी वेदः यज्ञवितानमर्थं यथा प्रकाशकतया बिभर्ति तद्वदित्यर्थः ३३ अनिरुद्धं पृच्छति अपीति सात्वतां भक्तानां वो युष्माकं कामदुघः अभीष्टप्रपूरकः भगवाननिरुद्धः सुखमास्ते अपि स्वित् अपिस्विदादयः कच्चिदर्थकाः यमनिरुद्धं शब्दं शब्दयोनिं शास्त्रप्रमाणकं सत्त्वतुरीयतत्त्वं सत्त्वं मनस्तस्य तुरीयं तत्त्वं चतुर्थं शमामनंति शब्दयोनित्वं कुतः मनोमयं योगपथे शुद्धमनोग्राह्यं लौकिकप्रमाणाविषयं इत्यर्थः ३४ अन्यान् सर्वान् यादवानां कुशलं युगपत्पृच्छति निजात्मदैवं स्वकीयात्मदैवतं भगवंतमनन्यवृत्त्या एकांतभक्त्या समनुवर्तंते ये हृदीकादयः ते सर्वे हे सौम्य स्वस्ति कुशलं चरंतापि स्वित् ३५ ॥

नामु

ततः सरस्वत्याः कूलं समृद्धं सुराष्ट्रदेशं सौवीरांश्च देशान् अतिक्रम्य यावद् उद्धवः आस्ते तावत् स्वयमपि कालेन यमुनामुपेत्य तत्र यमुनातीरे भा-
गवतं उद्धवं ददर्श २४ सः विदुरः वासुदेवानुचरं वासुदेवस्य अनुचरं येन येन याता गच्छति तु क्रमं अनुक्रमं वर्तते भगवदार्यस्ति स्थि-
तिप्रवृत्ति शमं तं शमदमादिसंपन्नं बृहस्पतेः सकाशात् अध्ययनं प्राप्तो नयो नीतिर्येन तं प्रतीतं प्रख्यातं उद्धवं प्रणयेन गाढं यथा तथा
आलिंग्य स्वानां स्वसंबंधिनां भगवत्प्रजानां भगवतः प्रजानां पुत्रपौत्रादीनां मध्ये येषां तेषां च भद्रं कुशलं अपृच्छत् २५ प्रथ-
मं तावद् रामकृष्णयोः कुशलं पृच्छति कच्चिदिति कुशलप्रश्ने पुराणौ किं भवतां स्वस्य नाभौ भवः स्वनाभ्यः स चासौ पाद्मः पद्मसंभवः ब्र-
ह्मा तस्यानुवृत्त्या प्रार्थनया इह भूर्लोके अवतीर्णौ पुराणौ पुरुषौ उर्व्याः कुशलं सुखं विधाय कृत्वा कृतक्षणौ कृतः उत्सवो याभ्यां तौ शूरगेहे वसु-
देवगृहे कुशलं सुखं कच्चिद् आसाते किल २६ वसुदेवस्य कुशलं पृच्छति कुरूणां नः परमः सुहृत् भामः भद्रः पूज्यो वा यः भगिनीभ्यः

ततस्त्वतिक्रम्य सुराष्ट्रमृद्धं सौवीरमत्स्यान्कुरुजांगलांश्च कालेन तावद्यमुनामुपेत्य तत्रोद्धवं भागवतं ददर्श २४ स वासु-
देवानुचरं प्रशान्तं बृहस्पतेः प्राक्तनयं प्रतीतं आलिंग्य गाढं प्रणयेन भद्रं स्वानामपृच्छद्भगवत्प्रजानां २५ विदुर उ० कच्चि-
त्पुराणौ पुरुषौ स्वनाभ्यपाद्मानुवृत्त्येह किलावतीर्णौ आसात उर्व्याः कुशलं विधाय कृतक्षणौ कुशलं शूरगेहे २६ कच्चित्कुरूणां
परमः सुहृन्नो भामः स आस्ते सुखमंग शौरिः यो वै स्वसॄणां पितृवद्ददाति वरान्वदान्यो वरतर्पणेन २७ कच्चिद्वरूथाधि-
पतिर्यदूनां प्रद्युम्न आस्ते सुखमंग वीरः यं रुक्मिणी भगवतोभिलेभे आराध्य विप्रान्स्मरमादिसर्गे २८ कच्चित्सुखं सात्वत-
वृष्णिभोजदाशार्हकाणामधिपः स आस्ते यमभ्यषिंचच्छतपत्रनेत्रो नृपासनाशां परिहृत्य दूरात् २९ ॥ ॥ ॥ ॥

तो देवकी पाण्डोर्भगिनीति लोकस्य अवतारः सः प्रसिद्धः शौरिः शूरस्यापत्यं वसुदेवः अंग हे उद्धव सुखमास्ते कच्चित् कथंभूतः शौरिः
वदान्यो उदारः स्वसॄणां भगिनीनां वरतर्पणेन वराणां तत्पतीनां तर्पणेन मिष्टकरवस्तुजातप्रदानेन सह वरान् अभीष्टानर्थान् पि-
तृवद् ददाति २७ प्रद्युम्नमापृच्छति यदूनां वरूथाधिपतिः सेनापतिः वीरः प्रद्युम्नः सुखमास्ते कच्चित् हे उद्धव कथंभूतः प्रद्यु-
म्नः रुक्मिणी विप्रान् आराध्य आदिसर्गे पूर्वजन्मनि स्मरं कामं सन्तं यं प्रद्युम्नं भगवतः सकाशात् अभिलेभे लब्धवती २८ उग्रसेनं पृच्छति
सात्वतादीनामधिपतिः स उग्रसेनः सुखमास्ते कच्चित् शतपत्रनेत्रः पुंडरीकाक्षो भगवान् स्वयं नृपासनस्याशामभिलाषं दूरात् परि-
हृत्य यमुग्रसेनमभ्यषिंचत् अभिषिक्तवान् २९

मा

ना

पतिः

भा. त. टी.

५

धृतराष्ट्रमनुशोचामि हे सौम्य उद्धव परेताय परलोकं गताय भ्रात्रे पाण्डवे यो विदुद्रुहे तत्पुत्रैर्द्रोहं कारयन् न तस्मादेव द्रोहं कृत
वानित्यर्थः अत एवाधः नरके पतन्तं धृतराष्ट्रमनुशोचे येन धृतराष्ट्रेण सुहृत्स्वपि अहं स्वपुर्याः निर्यापितः येन कथंभूतेन स्वस्य
पुत्रान् दुर्योधनादीन् समनुव्रतेन स्वपुत्रानुसारिणेत्यर्थः ४१ एवं यादवपाण्डवकौरवाणां कुशलं पृष्ट्वा मध्ये स्वस्थानप्रकारमा
ह सोऽहमिति सोऽहं तेन निर्यापितोऽहं मर्त्यविडंबनेन ऐश्वर्याच्छादकमर्त्यानुकारेण नृणां दृशः दृष्टीश्चित्तवृत्तीः चालयतः भ्रामयतः
विधातुर्जगन्नियन्तुर्हरेः श्रीकृष्णस्य प्रसादात् अनुग्रहात् तद्वीत विभूतिं जगत् पश्यन् तत एव गतविस्मयः निवृत्ताश्चर्यः अत्र भूतले अन्ना
उपलक्ष्यः अलक्षितः चरामि ४२ ननु यं श्रीकृष्णो विधाता भक्तानुग्राही तावत् किमिति पार्थान् स्वभक्तान्नानुजग्राह किमिति वा कौ
रवान् स्वस्मिन् द्वेषिणो न निगृहीतवानित्यत आह नूनमिति त्रिमदः अभिजनवित्तविद्यामदः यद्वा धनैश्वर्यसेनामदः तेनोत्पथा

सौम्यानुशोचे तमधः पतन्तं भ्रात्रे परेताय विदुद्रुहे यः निर्यापितो येन सुहृत्स्वपुर्या अहं स्वपुत्रान् समनुव्रतेन ४१ सोऽहं ह
रेर्मर्त्यविडंबनेन दृशो नृणां चालयतो विधातुः नान्योपलक्ष्यः पदवीं प्रसादाच्चरामि पश्यन् गतविस्मयोऽत्र ४२ नूनं नृ
पाणां त्रिमदोत्पथानां महीं मुहुश्चालयतां चमूभिः वधात्प्रपन्नार्तिजिहीर्षयेशोऽप्युपैक्षताघं भगवान् कुरूणां ४३ अ
जस्य जन्मोत्पथनाशनाय कर्माण्यकर्तुर्ग्रहणाय पुंसां नन्वन्यथा कोऽर्हति देहयोगं परो गुणानामुत कर्मतन्त्रं ४४ ॥

5

नां उद्धतानां चमूभिः सेनाभिः महीं पुनः पुनश्चालयतां नृपाणां वधात् तैः प्रपन्नानां पाण्डवानामार्तिः पीडा तां जिहीर्षया हर्तुमि
च्छया ईशोऽप्यघसमपराधं हन्तुं समर्थोऽपि भगवान् कुरूणामघमपराधं उपेक्षत तदानीमेव तेषां वधे असहपृष्टिराजन्यवधो
न स्यादिति साक्षात् येन प्रतीक्षितवानित्यर्थः नूनं निश्चितं ४३ ननु जगन्नियन्तुर्भगवतः किं मर्त्यविडंबनेन प्रयोजनमित्यत आ
ह अजस्येति अजस्याकर्मणोऽपि जन्मोत्पथस्थितानां अहितस्य जन्म अकर्मणोऽप्यनाद्याप्राकृतैः क्रियते किं कर्तव्यं विग्रहरूपं जन्म उत्पथानां नाशनाय अकर्तुः
कर्माधीनकरणाय अन्यथा पारक्षितस्य कर्माणि पुंसां ग्रहणाय लोकसंग्रहायेत्यर्थः अन्यथा दुःकृतविनाशाद्यर्थं जन्मा
दिकं न चेन्ननु हे उद्धव गुणानां सत्वादीनां परः नियन्ता गुणावश्य इत्यर्थः देहं कर्मकृतं देहं कर्मतन्त्रं कर्मविस्तारं च कोऽर्हति अतो
न कर्मजन्मकर्मादिकं अपि तु सर्वनाशाद्यर्थमित्यर्थः ४४

पत्रं १

राम

५

एवं यादवानां कुशलं पृच्छन् पांडवानां तत्पृच्छति अपीति स्वदोर्भ्यां स्वभुजतुल्याभ्यां विजयाच्युताभ्यामर्जुनकृष्णाभ्यां सहायं
मो युधिष्ठिरः धर्मेण वेदशास्त्राविरोधेन सेतुं वर्णाश्रमादिमर्यादां परिपालयन्नपि स्थितः यः सभायां यस्य युधिष्ठिरस्य सभायां वि
जयोऽर्जुनस्तत्कर्तृकया अनुवृत्त्या सेवया तया हेतुभूतया या साम्राज्यलक्ष्मीस्तया दुर्योधनोऽतप्यत यमनुवर्तते विजयस्तमेव सा
म्राज्यलक्ष्मीरप्यनुवर्ततेऽतिवृद्धातप्यतेत्यर्थः ३६ किं वेति कृतानेकदुष्कृत्यतया शत्रुषु तत्कृतः मध्यमपराधं कथंभूतं दीर्घतमं व
ज्ञकालानुसंचितमहिवदसमर्थो सहिष्णुर्भीमो व्यमुंचत् किं वा अमर्षमिति शेषः अमर्षमसहनं किं इत्यर्थः यस्य भीमस्यांघ्रिपा
तं पादाघातं रणभूर्न सेहे कथंभूतस्य गदायाः विचित्रं मार्गं गतिं चरतः गदां विचित्रं भ्रामयत इत्यर्थः ३७ कच्चिदिति रणयूथ
पानां मध्ये यशोधाः कीर्त्तिधारकः उपरतानि हतान्यरयो यस्मात्स उपरतारिः गांडीवधन्वा आस्ते कच्चित् यस्य गांडीवधन्वनः श

अपि स्वदोर्भ्यां विजयाच्युताभ्यां धर्मेण धर्मः परिपालितसेतुं दुर्योधनोऽतप्यत यत्सभायां साम्राज्यलक्ष्म्या विजयानुवृत्त्या ३६
किं वा कृताघेष्वघमत्यमर्षी भीमोऽहिवद्दीर्घतमं व्यमुंचत् यस्यांघ्रिपातं रणभूर्न सेहे मार्गं गदायाश्चरतो विचित्रं ३७ कच्चि
द्यशोधा रथयूथपानां गांडीवधन्वोपरतारिरास्ते अलक्षितो यच्छरकूटगूढो मायाकिरातो गिरिशस्तुतोष ३८ यमावुत
स्वित्तनयौ पृथायाः पार्थैर्वृतौ पक्ष्मभिरक्षिणीव रेमात उद्दाय मृधे स्वरिक्थं परात्सुपर्णाविव वज्रिवक्त्रात् ३९ अहो पृथा
पि ध्रियतेऽर्भकार्थे राजर्षिवर्येण विनापि तेन यस्त्वेकवीरोऽधिरथो विजिग्ये धनुर्द्वितीयः ककुभश्चतस्रः ४० ॥ ॥ ॥

रकूटेन बाणसमूहेन गूढः संवृतः अतीवेतरैरलक्षितः मायाकिरातः मायया किरातवेषधरः गिरिशो रुद्रस्तुतोष संतुष्टः ३८ नकु
लसहदेवौ पक्ष्मभिरक्षिणीवेति पार्थैर्युधिष्ठिरभीमार्जुनैः पक्ष्मभिरक्षिणीव वृतौ रक्षितौ अक्षिणी वर्त्मग्रहत्वाभावमार्षः
पृथायाः कुंत्याः स्तनयौ स्तनं पीतवंतौ यमौ युगपज्जातौ नकुलसहदेवौ मृधे युद्धे स्वरिक्थं स्वधनं परात् शत्रोः सकाशादादाय रेमाते उत स्वित्
पराख्यातिभ्यां वाभेदः सात्तः वज्रिवक्त्रात् इंद्रमुखात्सुपर्णाविव पक्षिराजावमृतं गरुडवत् मानवपीतात् दृढितार्थः अमृतोपमेयं ३९ पृथा
या कुशलं किं पृच्छ्यं यत्सुता पांडुना विना प्राणान्धारयते अर्भकार्थे इत्याह अहो इति तेन प्रसिद्धेन राजर्षिवर्येण पांडुना विनापि अर्भ
कार्थेऽर्भकपोषणार्थं पृथा कुंती ध्रियते जीवति एते अहो इत्याश्चर्ये यस्तु पांडुरेकवीरः असहायवीरः धनुरेव द्वितीयं यस्य सः अतिरथः
एवंभूतश्चतस्रः ककुभः दिशः विजिग्ये जितवानेवंभूतेन पांडुना पृथाया जीवनमप्याश्चर्यमेव ४० ॥ ॥

५
भा. स्कं. ३.

भा० त० टी०
६

पुलकैर्नरोमांचैरुद्भिन्नानि सर्वाण्यंगानि यस्य सः मीलद्दृशा निमीलद्दृष्ट्या शुचः आनंदाश्रूणि मुंचन्स्नेहप्रसरसंप्लुतः भगवति प्र
सक्तस्य प्रसरेणाप्लावः संप्लुत आर्द्रचित्तः उद्धवस्तेन विदुरेण पूर्णार्थः कृतकृत्यः लक्षितः ५ शनकैरिति भगवानेव लोकस्तस्मान्नृलो
कं देहानुसंधानं शनकैः पुनरागतः नेत्रे विमृज्य संमृज्य उत्स्मयन् भगवदाराधकस्य लोकस्य ज्ञातत्वात् हर्षस्य प्राप्तत्वात् ईषद्धसन् विदुरं प्रत्याह ६
लाभाभावात ६ कृष्णेत्यादि कृष्ण एव द्युमणिः सूर्यस्तस्य निम्लोचे अस्तमये सत्यजगरेण कालरूपेण महासर्पेण गीर्णेषु गृहेषु दुर्भगाः यदवस्तु नितरामपि दुर्भगाः येषु संवसंतः श्रीकृ
कुशलं तत्र पानां कुशलमहं किं ब्रूयां ७ दुर्भग इति बतेति खेदे अयं लोकः जनः दुर्भगः यदवस्तु नितरामपि दुर्भगाः यथा मीना ह्युडुपममृतमपि क
ष्णेन सह संवसंतोपि हरिं भगवंतं न विदुः किंतु स्वसदृशं मन्यमपीति विदुः तत्र दृष्टांतः मीना मत्स्या उडुपं चंद्रमिव मीना ह्युडुपममृतमपि क

6

पुलकोद्भिन्नसर्वांगो मुंचन्मीलद्दृशा शुचः पूर्णार्थो लक्षितस्तेन स्नेहप्रसरसंप्लुतः ५ शनकैर्भगवल्लोकान्नृलोकं पुनरा
गतः विमृज्य नेत्रे विदुरं प्रत्याहोद्धव उत्स्मयन् ६ उद्धव उ० कृष्णद्युमणिनिम्लोचे गीर्णेष्वजगरेण ह किं पुनः कुशलं ब्रू
यां गतश्रीषु गेहेष्वहं ७ दुर्भगो बत लोकोयं यदवो नितरामपि ये संवसंतो न विदुर्हरिं मीना इवोडुपं ८ इंगितज्ञाः पुरुप्रौ
ढा एकारामाश्च सात्वताः सात्वतामृषभं सर्वे भूतावासममंसत ९ देवस्य मायया स्पृष्टा ये चान्यदसदाश्रिताः भ्राम्य
ते धीर्न तद्वाक्यैरात्मन्युप्तात्मनो हरौ १०

श्रीकाले चरईत्ति ज्ञानतिनं तिनन्नतारणहेतुरयमिति एवं यदवो यायं श्रीकृष्णः स्वाश्रितदुरितान्यपहरन्संसारपारं तारयतीति निजानं
ति किंतु कश्चिद्यादवो बलवानेवेति ८ एतदेवाह इंगितज्ञा इति इंगितज्ञाः परचित्तवृत्तिज्ञाः अत एव पुरुप्रौढाः बहुनिपुणाः एकारामाः
एकस्थानवर्तिनश्च सात्वताः यादवाः सर्वे सात्वतामृषभं यादवानां श्रेष्ठं श्रीकृष्णं भूतावासं सेवनंभूतेवामंसत ९ न केवलं यादवा एव भू
तावासं श्रीकृष्णममंसत किं त्वन्येपीत्याह देवस्येति भगवतो मायया स्पृष्टा मोहिताः अत एवासद्देहादिकं भोग्यत्वेनाश्रिताः आ
न्ये च शिशुपालादयः ते सर्वेपि भूतावासममंसतेति पूर्वेणान्वयः तर्हि भवदादयोपि मायास्पर्शाविशेषात्तज्जानीयुरित्यत आह
भ्राम्यत इति आत्मनि परमात्मनि हरौ उप्तात्मनां समर्पितमनसां मादृशानां धीः तद्वाक्यैर्भगवन्मायामोहितानां जीवानां वाक्यैर्न
दिवाक्यैर्न भ्राम्यते दृढाभिवृद्धिप्रयोगं तयेन मामुपयातीति तत्र इति भगवत्तेव गीनत्वादिनि भावः १० ॥ ॥ ॥ ॥ ॥ ॥ ५ ॥

राम
६

एवं साधुपरित्राणाय धर्मं अवतीर्णस्य श्रितवात्सल्यजलधेः वार्त्तां कथयेति वदन्नुपसंहरति तस्येति स्वलोकीयेऽनुशासने आज्ञायाम
वस्थितानामाज्ञानुवर्तिनामित्यर्थः प्रपन्नायेऽखिललोकपालाः इन्द्रादयस्तेषामर्थाय प्रयोजनाय यदुषु जातस्यावतीर्णस्याज
स्य कर्माणि नोऽस्माकं अन्यस्य तीर्थकीर्तेः पवित्रकीर्तेः तस्य भगवतः श्रीकृष्णस्य वार्त्तां हे सखे उद्धव कीर्तय कथय ४५ इति श्रीभा
गवते तृतीयस्कंधव्याख्यायां श्रीवीरराघवलिखितायां प्रथमोऽध्यायः १ एवं विदुरेण पृष्टे उद्धवे तस्य भगवतोऽवतारप्रभृति तत्समा
वधि ... वर्णनस्य मुहूर्तं वचसा उद्धवस्य भगवद्विरहोत्कण्ठावेशेन प्रतिवचनासामर्थ्यमाह बादरायणिरिति सप्तादि
षड्भिः सत्रा विदुरेण प्रियाश्रयां भगवद्विषयां वार्त्तां प्रति पृष्टः भागवत उद्धवः श्रीकृष्णानुस्मरणविशेषात् स्मारितः ईश्वरः
श्रीकृष्णो यस्य सः प्रतिवक्तुं उत्तरं वक्तुं न चोत्सेहे न समर्थोऽभूत् १ एतदेवोपपादयति स इति द्वाभ्यां पंचहायनः पंचवर्ष

तस्य प्रपन्नाखिललोकपानामवस्थितानामनुशासने स्वे अर्थाय जातस्य यदुष्वजस्य वार्त्तां सखे कीर्तय तीर्थकी
र्तेः ४५ इति श्रीतृतीयव्याख्यायां श्रीवीरराघवलिखितायां प्रथमोऽध्यायः १ श्रीशुकः इति भागवतः पृष्टः क्ष
त्रा वार्त्तां प्रियाश्रयां प्रतिवक्तुं न चोत्सेहे औत्कण्ठ्यात्स्मारितेश्वरः १ यः पंचहायनो मात्रा प्रातराशाय याचितः त
न्नैच्छद्रचयन्यस्य सपर्यां बाललीलया २ स कथं सेवया तस्य कालेन जरसं गतः पृष्टो वार्त्तां प्रतिब्रूयाद्भर्तुः पादा
वनुस्मरन् ३ स मुहूर्त्तमभूत्तूष्णीं कृष्णांघ्रिसुधया भृशं तीव्रेण भक्तियोगेन निमग्नः साधु निर्वृतः ४ ॥ ॥

य उद्धवः मात्रा जनन्या प्रातराशाय प्रातर्भोजनाय याचितः प्रार्थितः सन् प्रातराशं नैच्छत् कथंभूतः सन् अस्य श्रीकृष्णस्य सप
र्यां पूजां बाललीलया रचयन् बालक्रीडया श्रीकृष्णं कंचित्परिकल्प्य कल्पिते तस्मिन् धनैः परिचर्यां कुर्वन्नित्यर्थः २ एवं बाल्यप्र
भृति तस्य भगवतः सेवया कालेन जरसं जरां वृद्धत्वं गतः प्राप्तः स उद्धवः वार्त्तां इति पृष्टः भर्तुः श्रीकृष्णस्य पादावनुस्मरन् कथं प्रति
ब्रूयात् एवं प्रसूनोत्साममर्थ्यमभिधाय यत्तस्य परिपूर्णभक्तियोगेन परवशत्वमहत्तात्पर्येणेन सामर्थ्यमाह स मुहूर्तमिति कृ
ष्णांघ्रिसुधया साधुयुक्त्या निर्वृतः प्रशमसंततीव्रेण भक्तियोगेन निमग्नः परवशः सन् मुहूर्तं मुहूर्तमात्रं तूष्णीमभूत् ४

भा० तृ० टी० ८

नन्वीदृशं भुवनसंस्थितं वपुः किमर्थमंतर्धापितवानिती मामाशंक्य वपुः परिग्रहनिमित्तं वपुषः स्वरूपं चाह प्रशांतरूपेष्विति अनेन
जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति नामरूपयोर्निर्वहितात्वे पदं त[illegible] तद्वत्सर्वान्तेषु च तत्र भवदित्यादिश्रुतेः
त्मा सर्वाणि सत्वप्रचुराणि रजस्तमःप्रचुराणि च रूपाणि स्वस्यैव शरीराणि तत्र प्रशांतरूपेषु सत्वोत्तरेषु रूपेषु इतरैः स्वरूपैर्घोरमा
नेषु पीड्यमानेषु सत्सु अनुकंपितात्मा आत्मा चित्तं यस्य सः सत्वोत्तरेष्वनुकंपापरः परावरेशः सत्वाधिपतिः भगवानजोपि कर्मप
तंत्रोपि अग्निर्यथा महदंशयुक्तः महतांशेन बलरामरूपेण युक्तः अकर्मायत्तस्यापि जातो यथा प्राकृतस्येव रूपविशेषो वह्नीर्गृह्य
र्षः यथाग्निः सर्वदारुष्वाविर्भवन्स्वस्वभावमजहन्नेवाविर्भवति तथा [illegible] यमपि भगवान्देवमनुष्यादियोनिष्वाविर्भवन्नि
रस्तानिखिलदोषनवधिकातिशयासंख्येयकल्याणगुणात्मकत्वस्वभावमजहन्नेवावतीर्ण इति दृष्टान्ताभिप्रायः १५ अजह

प्रशांतरूपेष्वितरैः स्वरूपैरभ्यर्द्यमानेष्वनुकंपितात्मा परावरेशो महदंशयुक्तो ह्यजोपि जातो भगवान्यथाग्निः १५
मां खेदयत्येतदजस्य जन्मविडंबनं यद्वसुदेवगेहे व्रजे च वासोरिभयादिव स्वयं पुराद्व्यवात्सीद्यदनंतवीर्यः १६ दुनो
ति चेतः स्मरतो ममैतद्यदाह पादावभिवंद्य पित्रोः तातांब कंसादुरुशंकितानां प्रसीदतं नोऽकृतनिष्कृतीनां १७ ॥ ॥

7

स्सर्वसत्त्वसत्यसंकल्पत्वज्ञानशक्त्यादिस्वभावस्यैव [illegible] पुनर्मर्त्यलीलानुकारेणैश्वर्याच्छादकानि कर्माण्यन इत्याह मामिति द्वये॰
न अजस्य भगवतः वसुदेवगेहे बंधनागारे यज्जन्म तो विडंबनं मनुष्यकरणं ननु न खिद्यत्वं कस्मादाविर्भावः पश्चात्स्वयमपि
तवीर्यः कंसभयादिव व्रजे च वासः कालयवनादिभयादिव पुरान्मथुरायाः व्यवात्सीत् प्रोषितवानिति च यदेतन्मां खेदयति मद्वित्तं
व्यामोहयति एतत्सर्वमैश्वर्याच्छादकमेवेत्यर्थः १६ दुनोतीति पित्रोर्देवकीवसुदेवयोः पादावभिवंद्य नम[illegible]स्कृत्य हे तात पितः
हे अंब मातः कंसादुरु[illegible]धिकं शंकितानां भीतानामकृतनिष्कृतीनामकृतशुश्रूषाणां नोऽस्माकं युवां प्रसीदतं प्रसादं कुरुतमिति य
दाह एतत्स्मरतो मम चित्तं कर्म दुनोति खेदयति १७ एवं तर्हि नेश्वर एवायं किं न स्यादित्याशंक्यापरिहारायमर्त्यलीलामनुकुर्वन्नपि पुनः
पुनरैश्वर्यमपि प्रकाशितवानिति वदन्विरक्तिशय्यवात्सल्यादिगुणवतस्तस्य विरहो नितरां दुःसह इत्याह सप्तभिः ॥ ॥ ॥

राम
८

भवत्वेवमजस्य वार्त्ता सखे कीर्त्तय तस्य किमुत्तरमित्यत आह प्रदर्श्येत्यादिना यः भगवानतप्ततपसां ये तेषामवितृप्ता दृशः येषां नृ
२ लो० णां लोकलोचनं कैरवलोकनीयं कर्म मिल्लुः अतिसुन्दरं स्वस्य बिंबं वपुः प्रदर्श्य पित्वा आदाय स्वविदं गच्छति तर्ह्यन्तर्दधे
आदायान्तरधादित्यनेन स्वविवेन सहैव गमनमङ्गीकृतवानिति सूचितं ११ लोकलोचनमित्यनेन सूचितमेव वपुषः सौन्दर्यं विवृणु
ते त्रिभिः यदिति मर्त्यलीलास्य मनुष्यलीलाया औपयिकं योग्यं स्वस्य या योगमाया अघटघटनशक्तिः तस्या बलं दर्शयता लोकस्येति
शेषः गृहीतमुपात्तं स्वस्य स्वस्यापि विस्मापनमाश्चर्यकरं सौभगर्द्धेः सौभाग्यसम्पदः परं पदं परा काष्ठाभूतं भूषणानां भूषणानि अङ्गानि भूष
भूषणाङ्ग णानि कौस्तुभादीनि भूषयन्त्यलं कुर्वन्तीति भूषणानि अङ्गानि यस्य नियमितस्त्वदेव भूतं यद्वपुः तदादायान्तरधादिति पूर्वे

प्रदर्श्यातप्ततपसामवितृप्तदृशां नृणां आदायान्तरधाद्यस्तु स्वबिंबं लोकलोचनं ११ यन्मर्त्यलीलौपयिकं स्वयोगमा
याबलं दर्शयता गृहीतं विस्मापनं स्वस्य च सौभगर्द्धेः परं पदं भूषणभूषणांगं १२ यद्धर्मसूनोर्बत राजसूये निरीक्ष्य दृक्
स्वस्त्ययनं त्रिलोकः कार्त्स्न्येन चाद्येह गतं विधातुरर्वाक्सृतौ कौशलमित्यमन्यत १३ यस्यानुरागप्लुतहासरासली
लावलोकप्रतिलब्धमानाः व्रजस्त्रियो दृग्भिरनुप्रवृत्तधियोऽवतस्थुः किल कृत्यशेषाः १४ ॥ ॥ ॥ ॥ ॥

णान्वयः १२ यदिति धर्मसूनोर्युधिष्ठिरस्य राजसूये यज्ञे त्रिलोकः त्रिभुवनस्थो लोकः दृशां स्वस्त्ययनं परमानन्दकरं यद्वपुर्नि
रीक्ष्य विधातुर्ब्रह्मणः अर्वाक्सृतौ अर्वाचीनमनुष्यसृष्टौ यत्कौशलं नैपुण्यं तत्कार्त्स्न्येन साकल्येन इह वपुषि अद्य इदानीं गतं पर्य
वसितमित्यमन्यत मेने विधातुः कौशलं कार्त्स्न्येनास्मिन्नेव वपुषि पर्याप्तं नातः परं तस्य कौशलमस्तीत्येवं मेने इत्यर्थः तद्वपुरादि
धात्रिस्थलेपि लोकदृष्टिप्रियमुक्तः १३ यस्येति यस्य भगवतः अनुरागेण प्लुतः हासो हसनं रासः क्रीडा लीलावलोकः एतैः साधनैः प्र
तिलब्धः मानो बहुमानो याभिस्ता व्रजस्त्रियः दृग्भिः सह मनः प्रवृत्तधियः अनुप्रवृत्ता गच्छन्तमेवानुगमनधियो यासां ताः भगवद्गृह
गृहं संततरवादिहिङ्कृतया इत्यर्थः अत एव स्खलितकृत्यशेषाः स्खलितः कृत्यस्य शेषो यासां ताः कृत्याकृत्यविवेकशून्याः सं
तोऽवतस्थुः किलकृत्यशेषा इत्यपपाठः १४ ।

पुनरैश्वर्यं दयालुतां चाह अहो इत्याश्चर्ये इयं बकी पूतना स्तनकालकूटं स्तनयोः संभृतं कालकूटं जिघांसया हन्तुमिच्छया पाययदेवम
साध्वी दुष्टापि यशोधात्र्या धात्र्याः उचितां संबंधिनीं गतिं लेभे प्राप्तवती एवमपराधवत्या अपि मुक्तिं यो दत्तवान् ततो भगवतोऽन्यं
दयालुं कं पुरुषं शरणं भजेम व्रजेम २३ ननु नात्मनः पंथा विधीयते येनापि इति भगवतः भक्तियोगप्राप्यत्वमवलोक्य मुदासीनो हि
षतां च मुक्तिं प्रापयति किमुत भक्तं इत्याह मन्य इति अधीशे त्रिलोकेशे भगवति ये संरंभमार्गाभिनिविष्टचित्ताः संरंभः क्रोधावेशः
तेन मार्गेण अभिनिविष्टचित्तं येषां ते ये च संयुगे युद्धे प्राणांस्त्यक्ष्यन्तः तार्क्ष्यपुत्रस्यांसे स्कंधे भुजे आपतन्तमधिष्ठितं सुनाभं
चक्रमायुधं यस्य तं सुनाभायुधं चक्रायुधधरं भगवन्तमचक्षत अपश्यन् तान् सर्वान् असुरान् दैवसंपत्संजातान् भागवतान्

५२

अहो बकी यं स्तनकालकूटं जिघांसयापाययदप्यसाध्वी लेभे गतिं धात्र्युचितां ततोऽन्यं कं वा दयालुं शरणं भजेम २३ मन्ये
सुरान् भागवतांस्त्र्यधीशे संरंभमार्गाभिनिविष्टचित्तान् ये संयुगेऽचक्षत तार्क्ष्यपुत्रमंसे सुनाभायुधमापतन्तं २४ वसुदे
वस्य देवक्यां जातो भोजेन्द्रबंधने चिकीर्षुर्भगवानस्याः शमजेनाभियाचितः २५ ततो नंदव्रजमितः पित्रा कंसाद्विबिभ्यता
एकादश समास्तत्र गूढार्चिः सबलोऽवसत् २६ परीतो वत्सपैर्वत्सांश्चारयन्व्यहरद्विभुः यमुनोपवने कूजद्द्विजसंकुलितांघ्रिपे २७

8

भगव इत्यनेनैव मन्ये न कामात्केनाप्युपायेन मनः कृष्णे निवेशयेदिति वत्समतां रीत्या भक्तियोगानन्तरं तुल्या एव द्विषः
प्राप्नुवन्तीति भावः २४ अथावतारप्रभृति हरेश्चरितानि संक्षेपेण वर्णयति वसुदेवस्येत्यादिना भोजेन्द्रः कंसस्तस्य बन्धने का
रागृहे वसुदेवस्य तत्पत्न्यां देवक्यां जातः प्रादुर्भूतः कथंभूतः भगवान् समग्रज्ञानशक्तिबलैश्वर्यादिसंपन्नः अजेन ब्रह्म
णाभियाचितः प्रार्थितः अस्या भूमेः कं सुखं चिकीर्षुः कर्तुमिच्छुः एवंभूतोऽवतीर्ण इत्यर्थः २५ कंसाद्विबिभ्यता अतिभीतेन पित्रा
वसुदेवेन निमित्तभूतेन नंदव्रजमितः गतः एकादश समाः संवत्सरान् नंदव्रजे गूढार्चिरनभिव्यक्ते म
र्चिः सबलः सरामः अवसत् उषितवान् २६ किं कुर्वन्नवसदित्यत आह परीत इति वत्सपैर्वत्सपालकैः सह वत्सान् रक्षितवा
रयन् कूजद्भिः शब्दं कुर्वद्भिर्द्विजैः संकुलिताः आघ्राः अंघ्रिपा वृक्षा यस्मिन् यमुनायाः नद्या उपवने प्रान्तवने व्यहरद्विभुः सर्वान् तर्पयामास २७

सुदेव २

राम
८

द्वि २

कइति अमुष्य श्रीकृष्णस्याङ्घ्रिसरोजरेणुं विजिघ्रन् को वा पुमान् विस्मर्तुमीशेत शक्नुयात् यः कृष्णः भ्रूरेव विटपः लता विस्फुरंश्च
लता भ्रूविटपः तेन भ्रूभङ्गानुवर्तिना कृतान्तेन मृत्युना भूमेर्भारं तिरश्चकार पृष्ठतवान् भ्रूभङ्गेन भूभारापहरणमेव मुख्यं मुकारके
घ२ १९ दृष्टेति राजसूये कृष्णं द्विषतोऽपि चैद्यस्य शिशुपालस्य सिद्धिर्भगवत्प्राप्तिर्भवद्भिर्दृष्टा ननु कथंभूता सिद्धिः यां सिद्धिं योगिनः भ
क्तियोगनिष्ठाः सम्यग्योगेन एकान्तभक्तियोगेन संस्पृहयन्ति वाञ्छन्ति तत्स्य द्विषतोऽपि निरन्तरं शापपुरुषार्थरूपमुक्तिप्रयच्छतो वा स्वभ
निधेः श्रीकृष्णस्य विरहं कः सहेत १९ न केवलं द्विषतां भजतामपि स्वपदप्रापकः उदासीनाम यीत्याह तथैवेति आहवे युद्धे नयना-
नेर भिरामं नयनानन्दकरं श्रीकृष्णमुखकमलं नेत्रैः पिबन्तोऽनुभवन्तः पार्थस्यार्जुनस्यास्त्रैः पूताः पवित्रिताः अन्येऽपि राजानः अस्य भ म०
गवतः परं स्थानमापुः प्रापुः २० एवं मर्त्यलीलामनुकुर्वतो भूभारावतरणमुक्तिप्रदत्वादिकमैश्वर्यप्रकाशकमभिहितं पुनरै-

को वा अमुष्याङ्घ्रिसरोजरेणुं विस्मर्तुमीशेत पुमान्विजिघ्रन् यो विस्फुरद्भ्रूविटपेन भूमेर्भारं कृतान्तेन तिरश्चकार १८ दृष्टा भ-
वद्भिर्ननु राजसूये चैद्यस्य कृष्णं द्विषतोऽपि सिद्धिः यां योगिनः संस्पृहयन्ति सम्यग्योगेन कस्तद्विरहं सहेत १९ तथैव चान्ये नरलो-
कवीरा य आहवे कृष्णमुखारविन्दं नेत्रैः पिबन्तो नयनाभिरामं पार्थास्त्रपूताः पदमापुरस्य २० स्वयं त्वसाम्यातिशयस्त्र्यधी-
शः स्वाराज्यलक्ष्म्याप्तसमस्तकामः बलिं हरद्भिश्चिरलोकपालैः किरीटकोट्येडितपादपीठः २१ तत्तस्य कैङ्कर्यमलं भृतान्नो वि-
ग्लापयत्यङ्ग यदुग्रसेनं तिष्ठन्निषण्णं परमेष्ठिधिष्ण्ये न्यबोधयद्देव निधारयेति २२ ॥ ॥ ॥ ॥ ॥ ॥

श्वर्यप्रकाशयतो मर्त्यलीलानुकृतिमाह स्वयमिति त्र्यधीशः असाम्यातिशयः साम्यातिशयरहितः अत एव त्र्यधीशः प्रकृतिपुरुषका-
लानामीशः यद्वा त्रिलोकाधिपतिः सत्त्वादिगुणेशो वा अतः स्वाराज्यलक्ष्म्या स्वरूपानन्दलक्ष्म्या आप्ताः समस्तकामाः तस्य भावः स्वाराज्यं तेन पालनमै- २
मा३ श्वर्ययशः आदिसंपत्तिस्तया आप्ताः समस्ताः कामा यस्य सः नित्यं सन्निहितभोग्यभोगोपकरणभोगस्थानसमृद्ध इत्यर्थः बलिं पूजां प३
हरद्भिः चिरलोकपालैः चिरं लोकपालवद्भिः किरीटानां कोटिभिरीडितः सेवितः पादपीठो यस्य सः २१ स्वयमेवंभूतोऽपि भगवानस्म- र१
जोहितिर परमेष्ठिधिष्ण्ये सार्वभौमसिंहासने निषण्णमुपविष्टमुग्रसेनं प्रतिस्थाय प्रतिष्ठन् हे देव निधारयावधारयेति यः अबोध- र३
यद्विज्ञापितवान् तद्विज्ञापनवचः तस्य भवतः कैङ्कर्यं किंकरभावः अस्माकं भृत्यानां परमन् अलं भृतान् इति पाठे पूर्वमेवार्थः अस्मान्
ग विग्लापयति विस्मारयतीत्यर्थः २२ ॥

भा॰त॰टी॰

८

तत्र मथुरायां कृतानि भगवच्चेष्टितान्याह ततइति द्वाभ्यां स्वपित्रोर्देवकीवसुदेवयोः शं सुखं चिकीर्षया कर्तुमिच्छया बलदे
वेन संयुतः ततः व्रजात् पुरीं मधुपुरीमागत्य ततस्तेनेति शेषः रिपुयूथनाथं शत्रुसमूहनायकं कंसं व्यसुं गतप्राणं ओजसा
बलेन तुङ्गात् उच्चमञ्चात् भूमौ निपात्य व्यकर्षत् हतानां विस्मापयन्निति भावः १ सान्दीपनेरुपाध्यायात् सकृत्प्रोक्तं सविस्तरं
षडङ्गोपेतं ब्रह्म वेदमधीत्य तस्मै सान्दीपनये मृतं पुत्रं मृतपुत्रप्रदानरूपं वरं पञ्चजनोदरात् पञ्चजनो नाम कश्चिद्दैत्यः समुद्रे

दा॥ तद्विदारणेन यमपुरीं गत्वा ततः पुत्रमानीय प्रादात् २ द्वारकाचेष्टितान्याह समाहुता इति श्रियः लक्ष्म्याः सवर्णेन समान
रूपेण तां बुभूषयेति शेषः भीष्मककन्यया रुक्मिण्या निमित्तभूतया तद्विवाहार्थं ये शिशुपालादयः समाहुताः सम्यगाहूताः

उद्धव उ॰ ततः स आगत्य पुरं स्वपित्रोश्चिकीर्षया शं बलदेवसंयुतः निपात्य तुङ्गाद्रिपुयूथनाथं हतं व्यकर्षद्व्यसुमो
जसा भुवि १ सान्दीपनेः सकृत्प्रोक्तं ब्रह्माधीत्य सविस्तरं तस्मै प्रादाद्वरं पुत्रं मृतं पञ्चजनोदरात् २ समाहुता भीष्मकक
न्यया ये श्रियः सवर्णेन बुभूषयैषां गान्धर्ववृत्त्या मिषतां स्वभागं जह्रे पदं मूर्ध्नि दधत्सुपर्णः ३ ककुद्मिनोऽविद्धन
सो दमित्वा स्वयंवरे नाग्नजितीमुवाह तद्भग्नमानानपि गृध्यतोऽज्ञान् जघ्नेऽक्षतः शस्त्रभृतः स्वशस्त्रैः ४ ॥ ॥ ॥

कन्यामिभिरिति शेषः तेषां चैद्यादीनां मिषतां पश्यतां मूर्ध्नि पदं दधत् दधानः तानभिभूयेत्यर्थः गान्धर्ववृत्त्या परस्परसंकेतरू
पया वृत्त्या बुभूषया भवितुमिच्छया सुवर्णः शोभमानवर्णः स्वभागं रुक्मिणीं राघवत्वेऽभवत् सीता रुक्मिण्यां कृष्ण
जन्मनि अन्येष्वप्यवतारेषु विष्णोरेषानपायिनी भास्करस्य प्रभा यथैव त्वां प्रभुश्रीः तां त्वां शोभनां निमानपायिनीं जह्रे हृ
तवान् ३ ककुद्मिन इति अविद्धनसः अच्छिद्रनासिकान् ककुद्मिनः वृषभान् दमित्वा छिन्ननासिकांश्च कृत्वा
नाग्नजितीं नग्नजितो राज्ञः कन्यां स्वयंवरे उवाह उदवहत् तद्भग्नमानान् तेन ककुद्मिदमनेन भग्नः मानः बलिनो वयमित्यभि
मानो येषां तानपि गृध्यतः कामयमानान् नाग्नजितीमित्यर्थः अज्ञानेवाज्ञान् मूढान् शस्त्रभृतः शस्त्रधारिणो राज्ञः स्वशा
स्त्रैः स्वस्य शस्त्रैः सुदर्शनादिभिरायुधैः स्वयमक्षतः अक्षतवृत्तिः सन् जघ्ने हतवान् तान् विजित्य नाग्नजितीमुद्वहदित्यर्थः ४

राम

८

व१

कौमारीवनवासिनां अङ्गुलीयांत्रेणां दर्शयन्स्वयं हसन्नेव रुदन्निव मुग्धः कंसरोवालसिंहः तस्य वीलोकनं यस्य सः च
हरदा क्रीडदिति श्लोकद्वयमेकान्वयं २८ प्रयुक्तानिति भोजराजेन कंसेन प्रयुक्तान्प्रेषितान्मायिनः वंचकान्का
नू२ रूपिणः स्वेच्छानुरूपवेषधारिणः तान्सर्वान्शकटधेनुकारिष्टादीन्व्यनुदहनत् बालः क्रीडनकमिव लीलयासेहे
तः क्रीडनकानु क्रीडार्थं स्वकल्पितान्पर्णकरणानीव सर्पः ३० विपन्ना[illegible]निति विषतोयेन कालीयह्रदजलेन विपन्ना
नापन्नान्मूर्छितान्सर्वाः दृष्टिवृष्टिपोषः भुजगाधिपं कालियं निगृह्य विपन्नानुत्थाप्य प्रकृतिस्थितान्स्वस्य विषतो
नू६ यं कालियह्रदजलं गाः अपाययत्स्नानमकारयत् ३१ अयाजयदिति गुरुभारस्य वृषभारस्य संभृतस्य वित्तस्य सद्व

कौमारीदर्शयंश्चेष्टां प्रेक्षणीयां व्रजौकसां रुदन्निव हसन्मुग्धबालसिंहावलोकनः २८ स एव गोधनं लक्ष्म्या निके
तं सितगोवृषं चारयन्ननुगान्गोपान्रणद्वेणुररीरमत् २८ प्रयुक्तान्भोजराजेन मायिनः कामरूपिणः ली
नू२ लया व्यनुदत्तांस्तान्बालः क्रीडनकानिव ३० विपन्नान्विषपानेन निगृह्य भुजगाधिपं उत्थाप्यापाययद्गावस्तत्तो
यं प्रकृतिस्थितं ३१ अयाजयद्गोसवेन गोपराजं द्विजोत्तमैः वित्तस्य चोरुभारस्य चिकीर्षन्सद्व्ययं विभुः ३२ व
र्षतीन्द्रे व्रजः कोपाद्भग्नमानेऽतिविह्वलः गोत्रलीलातपत्रेण त्रातो भद्रानुगृह्णता ३३ शरच्छशिकरैर्मृष्टं मान
यन्रजनीमुखं गायन्कलपदं रेमे स्त्रीणां मण्डलमण्डनः ३४ इति श्रीमद्भा० तृतीयस्कन्धे विदुरोद्धवसंवादे बाललीला

यं समीचीनोपयोगं चिकीर्षन्प्रभुः द्विजोत्तमैः सहितः गोसवेन गोसवाख्ययागेन गोपराजं नन्दमयाजयत् ३३ वर्षती
ति भग्नमाने इन्द्रे व्रजे इन्द्रे कोपाद्वर्षति स[illegible]ति हेभद्र विदुर अतिविह्वलः असौ पन्नः व्रजः अनुगृह्णता गोत्रं पर्वतम्
त२ लीलातपत्रं कृत्वा त्रातः रक्षितः ३३ शरदिति शरत्काले पूर्णचन्द्रमास्तस्य करैः किरणैर्मृष्टं उज्ज्वलं रजनीमुखं प्रदोषमा
नयन्कृतार्थतां तस्यापादयन्स्त्रियः स्त्रीणां गोपीनां मण्डलमिव स्वयं तीनिमण्डलमण्डनः क[illegible]लानां यस्मधुरालाप
ना नम्रस्य तां गांसमन्त्रमूर्तिः तन्नता गायन्रेमे रमत ३४ इति तृतीये द्वितीयः २ उद्धवेन व्रजे वृन्दावने वसति कृष्णेनहतानि वृ
त्रिम्लानि[illegible]लिवर्णयित्वा अथ व्रजान्मथुरागमनं भगवता कृतानि तत्तो दयकंचे समकृतानि[illegible]

मंडल२ नू४

कालेत्यादि कालः कालयवनः मागधो जरासंधः कालप्रभृतीननीकैः सैन्यैः पुरीं धृतः आवृण्वतः स्वयमजीघनत् घा
तितवान् स्वपुंसां भीमार्जुनादीनां दिवा स्वीयं तेजः आदिशन् दत्तवान् भीमादिद्वारा स्वयमेव तेषां सामर्थ्यप्रदानेन हतेत्य
र्थः १० एतदेवाह शंबरं हिडिंबं वल्वलं नैन्यानपि कंसादीन् प्रद्युम्नादिभिर्घातितवान् अंडभावं आर्थः घातितवान् घात
यन्निति वा पाठः हतं वक्रादीन् स्वयमेवावधीत् ११ अथेति तेन वभ्रात्रा पांडुधृतराष्ट्रयोर्येपुत्रा युधिष्ठिरादयो दुर्योधना
दयश्च तेषां पक्षयोः पतिताः प्राप्ताः नृपान् घातयद्भिः अनुषज्यते कथंभूतान् नृपान् येषां कुरुक्षेत्रे प्रसादपततां नया
नां बलैः सैन्यैर्भूः सर्वापि भूमिश्च चाल चलितवती १२ एवं स्वयं निहत्य घातयित्वा च स्वकुलं संजिहीर्षुः तस्मान्पुत्र तस्य
ह पातितानां च वधेन न भुवो भारः स पितः इति स भगवान् कर्णादीनां कुत्सितमंत्रयाकेन स्वानिसावहालोचनेन फलेन

कालमागधशाल्वादीननीकै रुंधतः पुरीं अजीघनत् स्वयं दिवा स्वपुंसां तेज आदिशन् १० शंबरं हिडिंबं बाणं मुरं
वल्वलमेव च अन्यांश्च दैत्यवक्रादीनवधीत् कांश्च घातयत् ११ अथ तेभ्यस्तत्पुत्राणां पक्षयोः पतितान् नृपान् चचा
ल भूः कुरुक्षेत्रे येषामापततां बलैः १२ सकर्णदुःशासनसौबलानां कुमंत्रपाकेन हतत्रियायुषं कथाधर्मसानुच
रं राजानं भग्नोरुमुर्वीं ननंद दृष्ट्वा पुनः १३ कियान् भुवो यं स पितो रुभारो यद्द्रोणभीष्मार्जुनभीममूलैः अष्टादशा
क्षौहिणिको मदंशैः आस्ते बलं दुर्विषहं यदूनां १४ मिथो यदैषां भविता विवादो मध्वामदाताम्रविलोचनानां नैषां वधोऽ
हताश्रीसंपदा पुष्टय स्याद्भग्नानुरूपस्य तं भग्नोरुं अवीभूम्यां शयानं सानुचरं दुर्योधनं पुत्रयज्ञेऽपि न नंद संतोषं न प्राप
१३ असंतोषहेतुं वदंस्तत्प्रकारमेवाह कियानिति मदंशो मत्कलीरभूतैः द्रोण भीष्मार्जुनभीमाः मूलमादिर्येषां तैर्मदंशै
र्भीमार्जुनादिभिरष्टादशाक्षौहिणी संख्यापुरुषः सपितः निरस्तः स चासौ उरुभारश्च स पितो रुभारोऽयं कियान् स्वल्प इ
त्यर्थः भीष्मादिद्वारा समयाभूभार निःशेषो नावनाशितः कुतः यद्यस्मात् दुर्विषहं सोढुमशक्यं यदूनां बलमास्ते तिष्ठति
१४ एवमभिनं घुस्वकुलं संहृतौ उपायं संचिंतयन्नित्याह मिथ इति माध्वामाः सुरायाः मदात्ताम्रे लोहिते विलोचनानि येषां
तेषां एषां यदूनां मिथो विग्रहायपरिजिहीर्षया प्रभासतीर्थं गमनं तत्र विवादो भविता तदा उपाये नेषां वधो पादः नान्यो
स्ति कोसावित्येतच्चाह मयि स वति रात्मनि सर्वसंहर्तरि मायि अशुक्ते ममक्षोकं गतु मुमुक्षे सति स्वयमेवैते विवादेनात्तदृधते
इति दृष्टोपायं ज्ञात्वा तिस्माति १५

प्रमक्षिति स्वयंप्रभुः स्वतंत्रोपि वशगामी इव स्त्रीपरतंत्र ग्रामजन इव प्रियायाः प्रियं विधित्सुः कर्तु मिच्छुः द्युतरुं पारिजात
मार्च्छत् हृतवान् कथंभूतं यदर्थे यस्य पारिजातस्यार्थे निमित्ते तत्र हि मोक्षनायेत्यर्थः वज्री इंद्रः सगणः सरुजगणसहितः रुषा क्रोधे
नांधः तत्पाधिज्ञानापहतः सन् तं भगवंतं प्रत्याद्रवत् अभिलीयुद्धमभिमुख्यमापन्नः तथाभूतमित्यर्थः स्मात्लोकस्य शोचना
मजानाना नस्त्रीपरतंत्र वज्रिणो नेदर्शित अयं वज्री वधूनां स्त्रीणां क्रीडामृगः क्रीडार्थं संपादितं मृग इव भगवं रूपं तीविग्न सो
ति कुसुमरी स्वार्थं इत्र श्रीष्मत्वात् तस्य शेषभूत पारिजातापहरणं पुरुषमेव ने ताव तावत्स्त्रीपारतंत्र्यं मदृइस्य त्वनात्मनात्मबुद्धि
र्या आस्वं स्वामि तिया मतिर्विधित्सुः श्रीसां पारिजातेस्व तमभिमन्यतां ज्ञानमेवेति भावः ५ अथ महापिरिदेव बेषितमाह सुतमि
ति मृधे युद्धे वपुषा स्वमंतरिक्षं ग्रसंतं इव स्थितं सुनाभेन चक्रेण युधेन उन्मथितं भिन्नं स्कंधं नरकं दृष्ट्वा धरित्र्या आमंत्रितो भूम्या आम

प्रियं प्रभुर्ग्रामिइव प्रियाया विधित्सुरार्च्छद्द्युतरुं यदर्थे वज्र्याद्रवत्तं सगणो रुषांधः क्रीडामृगो नूनमयं वधूनां ५ सु
तं मृधे खं वपुषा ग्रसंतं दृष्ट्वा सुनाभोन्मथितं धरित्र्या आमंत्रितस्तत्तनयाय शेषं दत्वा तदंतःपुरमाविवेश ६ त
त्राहृतास्ता नरदेवकन्याः कुजेन दृष्ट्वा हरिमार्तबंधुं उत्थाय सद्यो जगृहुः प्रहर्षव्रीडानुरागप्रहितावलोकैः ७ आ
सां मुहूर्त एकस्मिन्नानागारेषु योषितां सविधं जगृहे पाणीनुनुरूपः स्वमायया ८ तास्वपत्यान्यजनयदात्मतुल्यानि
सर्वशः एकैकस्यां दशदश प्रकृतेर्विबुभूषया ८

त्रितः आर्थितः तत्र तनयाय नरकस्य सकलाय शेषं स्वस्य पारिजातहीनानां चत्रिरं तं कोशराज्यादिकं दत्वा तस्यांतःपुरमाविवेशप्र
विष्टवान् ६ तत्रेति तत्रांतःपुरे कुजेन भूमिपुत्रेण नरकेणापहृता आनीतास्ताः प्रसिद्धाः नरदेवकन्याः राजकुमार्यः आर्त
बंधुं हरिं दृष्ट्वा सद्यः तदैवोत्थाय प्रहर्षश्च व्रीडा चानुरागश्च तैः प्रहिताः प्रेरिताः ये अवलोकास्तैर्जगृहुः स्वीकृतवत्यः ७ आसां
स्वीकृतवतीनां योषितां स्त्रीणां पाणीन् नानागारेषु प्रतियोषित् भिन्नेषु गृहेषु एकस्मिन्नेव मुहूर्ते समा यथा स्वीयस
कलोनस्वयमपि तदनुरूपः सविधं जगृहे गृहीतवान् ८ तासु गृहीतपाणिषु स्त्रीषु एकैकस्यां भार्यायां सर्वशः सर्वप्रकारे
णात्मनातुल्यान्यपत्यानि दशदश प्रत्येकं जनयत् उत्पादयामास किं कर्तुमिच्छया प्रकृतेर्विबुभूषया विभवितुमिच्छया एतस्या
रूपेणार्थः मन्निर्मायायाः प्रकृतेः सृष्टिर्दृश्येति प्रकाशयितुमिच्छयेति यावत् ८ ॥

एतदेव कैमुत्यन्यायेनाह दैवाधीनेष्विति योगेश्वरं योगफलप्रदं भगवन्तं भक्तियोगेनानुव्रतः सेवमानः स्वयं दैवाधीनः दैवाय
त्तः कः पुमान् दैवायत्तेषु कामेषु विस्रंभेत न कोपीत्यर्थः किमुत भगवान्न विश्वसेदित्यभिप्रायः २३ अथास्य कुलसंजिहीर्षितो
भगवतोऽभिप्रायानुसारेण विप्रशापप्रवृत्तिं यदुकुलसंहृतिं च संग्रहेणाह पुर्यामिति पुर्यां द्वारकायां कदाचिद्वृष्णिवत्सकु
लसंजिहीर्षितरकाले क्रीडद्भिः यदुभोजकुमारकैः कोपिताः कोपं प्रापिताः मुनयः भगवन्मतकोविदाः भगवदभिप्राय
भिज्ञाः शेपुः शापं दत्तवन्तः २४ ततः शापानन्तरं कतिपयैर्मासैः नानाविधारिष्टदर्शनानन्तरं वृष्ण्यादयो दैवविमोहिताः अतएव
वत्सलहृष्टाः [illegible] रथैः सह प्रभासं ययुः २५ तत्र प्रभासे स्नात्वा तदंभसा प्रभासांभसा पित्रादीन् तर्पयित्वा बहुगुणाः पयः
शीलादिबहुगुणोपेताः गावः गाः विप्रेभ्यो ददुः २६ हिरण्यादीन् वृत्तिकरीं धरां भूमिं च ददुरिति पूर्वेणान्वयः यद्वा दत्ते सुत

दैवाधीनेषु कामेषु दैवाधीनः स्वयं पुमान् को विस्रंभेत योगेन योगेश्वरमनुव्रतः २३ पुर्यां कदाचित्क्रीडद्भिर्यदुभोजकु
मारकैः कोपिता मुनयः शेपुर्भगवन्मतकोविदाः २४ ततः कतिपयैर्मासैर्वृष्णिभोजान्धकादयः ययुः प्रभासं संहृष्टा रथैर्दे
वविमोहिताः २५ तत्र स्नात्वा पितॄन् देवान् ऋषींश्चैव तदंभसा तर्पयित्वाथ विप्रेभ्यो गावो बहुगुणा ददुः २६ हिरण्यं रजतं
शय्यां वासांस्यजिनकंबलान् यानं रथानिभान् कन्या धरां वृत्तिकरीमपि २७ अन्नं चोरुरसं तेभ्यो दत्त्वा भगवदर्पणं
गोविप्रार्थासवः शूराः प्रणेमुर्भुवि मूर्द्धभिः २८ इति श्री० तृतीयस्कंधे भगवल्लीलावर्णनं नाम तृतीयोऽध्यायः ३ अथ पतेन

ऽन्वयः २७ चारुरसं मधुरसमन्नं तेभ्यो विप्रेभ्यो भगवदर्पणं यथा भवति तथा दत्त्वा भगवत्प्रीणनकरमन्नं दत्त्वेति वा गोविप्रार्था
सवः गोविप्रार्थं प्राणाः शूरा यदवः मूर्द्धभिर्विप्रेभ्यः भुवि प्रणेमुर्नमस्कृतवन्तः २८ इति तृतीयटीका ३ अथ स्नानदानाद्यनन्तरं ते
यदवः तदनुज्ञाताः विप्रैरनुज्ञाताः भुक्त्वा वारुणीं पीत्वा मदिरां पीत्वा तया वारुण्या वृष्णिसंमिश्रज्ञानाः विभ्रमद्दृष्टयः विभ्रान्ताः सं
तोऽतिरूक्षैः मर्मभिर्मर्मस्पृग्वचनानि परस्परमूचुः १ ततः मैरेयस्य मद्यस्य दोषेण मदेन विषमीकृतानि विभ्रान्तानि चेतांसि येषां तेषां य
दूनां रवौ सर्वे निम्लोचत्यस्तं गच्छति सति वेणूनामिव मर्द्दनं परस्परसंघर्षणमासीत् २

22

११

एवमिति एवमुक्तरीत्या संचिन्त्य भगवान् स्वराज्ये स्वस्य धर्मराजस्य राज्ये तस्मिन् धर्मजं युधिष्ठिरं स्थापयित्वा साधूनां
वर्णाश्रममर्यादां दर्शयन् स्वानुष्ठानेन लोकमनुशासयन् सुहृदः नन्दयामास १६ उत्तरायामिति अभिमन्युना
स्वभार्यायां उत्तरायां पूरोर्वंशः साधु धृतः पूरोर्वंशवर्द्धकः परीक्षिदुत्पादितः स वै परीक्षित् तस्यां गर्भस्थः द्रौणेरस्त्रं तस्मात्
उत्पन्नं ब्रह्मशिरोऽस्त्रं तेन संप्लुष्टः पुनर्भगवता श्रीकृष्णेन धृतः १७ अयाजयदिति सोऽपि धर्मसुतोऽपि कृष्णमनुव्रतः से
वमानः अनुजैः सह क्ष्मां पृथिवीं रक्षन् रेमे १८ भगवानिति विश्वात्मा विश्वस्यात्मा अन्तः प्रविश्य धारकः भगवान् श्रीकृष्णोऽपि
लोकवेदपथानुगः श्रौतस्मार्तधर्मानुवर्त्तमानः द्वार्वत्यां पुर्यां कामान् सिषेवे केवलं भुक्तः सांख्यं सम्यग्बुद्धितत्त्वमास्थितः सां

एवं संचिन्त्य भगवान् स्वराज्ये स्थाप्य धर्मजं नन्दयामास सुहृदः साधूनां वर्त्म दर्शयन् १६ उत्तरायां धृतः पूरोर्वंशः सा
ध्वभिमन्युना स वै द्रौण्यस्त्रसंप्लुष्टः पुनर्भगवता धृतः १७ अयाजयद्धर्मसुतमश्वमेधैस्त्रिभिर्विभुः सोऽपि क्ष्मामनु
जै रक्षन् रेमे कृष्णमनुव्रतः १८ भगवानपि विश्वात्मा लोकवेदपथानुगः कामान् सिषेवे द्वार्वत्यामसक्तः सांख्य
मास्थितः १९ स्निग्धस्मितावलोकेन वाचा पीयूषकल्पया चारित्रेणानवद्येन श्रीनिकेतेन चात्मना २० इमं लो
कममुं चैव रमयन् सुतरां यदून् रेमे क्षणदया दत्तक्षणस्त्रीक्षणसौहृदः २१ तस्यैवं रममाणस्य संवत्सरगणान् बहू

ख्यं मुमुक्षूपास्यं स्वात्मानमास्थितः स्वानन्दमेवानुभवन्नित्यर्थः अत एवासक्तः शब्दादिष्वनासक्तः अत्र कामांस्तु इति कामाः
कल्याणगुणास्तान् सिषेवे स्वकीयकल्याणगुणसंशीलनपरो बभूवेत्यर्थः ननु शब्दादिविषयानुभवो विवक्षितः यद्वा
कामाननुभवन्नपि वासनारहित इत्यर्थः १९ तदेव प्रपंचयति स्निग्धेत्यादिना स्निग्धं स्मितं च पुष्कलं यस्मिन् स्मितावलोकः म
न्दहासयुक्तावलोकः तेन पीयूषममृतं तत्तुल्यया वाचा अनवद्येन निर्दुष्टेन चारित्रेण श्रियो लक्ष्म्या निकेतेन आत्मना
स्वशरीरेण च २० इमं लोकममुं च उपरितनलोकं च रमयन् अस्मिन् लोके पदं [illegible] सुतरां रमयन् क्षणदया रात्र्या दत्तक्षणा
नां स्त्रीणां ईक्षणसौहृदं येन सः दत्तक्षणस्त्रीक्षणसौहृदः रेमे २१ तस्येति इत्थमनासक्तया बहून् संवत्सरगणान् रममा
णस्यास्य भगवतः गृहमेधेषु गृहस्थाश्रमप्रयुक्तेषु योगेषु विरागः उपसंजिहीर्षया अनादरः समजायत सम्यक् जातः २२

तस्येति प्रमोदेन भगवद्दर्शनजनितसंतोषेण भावेन भक्त्या आनतः कंधरा यस्य तस्यानुरक्तस्य भगवत्यनुरागयुक्तस्य तस्य मु
नेर्मैत्रेयस्य शृण्वतः सतः मुकुंदो भगवाननुरागहाससमीक्षयानुरागहासान्वितावलोकनेन विश्रमयन् श्रममहानिज
नप्रश्नं मां प्रत्युवाच १० भगवदुक्तिमेवाह द्वयेन वेदेति हे वसो उद्धव पूर्वजन्माभिप्रायेणेदं संबोधनं विश्वसृजां प्रजापती
नां वसूनां च सत्रे पुरा पूर्वजन्मनि मत्सिद्धिकामेन मत्प्राप्तिकामेन त्वयाऽहं इष्टः सम्यगाराधितः अतस्ते तवांतर्मनसि
तः करणेन ईप्सितं यत्तद्ददामि नाम्यैरनाराधितमस्तुरणो दुरवापं दुःखेनापि वासुमशक्यं तदहमिदानीं दास्यामि ११
स इति हे साधो उद्धव भवानां जन्मनां स एष भवः चरमः अंतिमः कुतः यद्यस्मात्ते त्वया मदनुग्रहः आसादितः लब्धः य
स्मात्त्वं पुनः नृलोकान्मर्त्यलोकान् रहस्येकांते उत्सृजंतं मर्त्यलोकाद्वैकुंठं गच्छंतं मां विशदानुवृत्त्या एकांततया दृष्टवान् १२

तस्यानुरक्तस्य मुनेर्मुकुंदः प्रमोदभावानतकंधरस्य संशृण्वतो मामनुरागहाससमीक्षया विश्रमयन्नुवाच १०
श्रीभगवानुवाच वेदाहमंतर्मनसीप्सितं ते ददामि यत्तद्दुरवापमन्यैः सत्रे पुरा विश्वसृजां वसूनां मत्सिद्धिका
मेन वसो त्वयेष्टः ११ स एष साधो चरमो भवानामासादितस्ते मदनुग्रहो यत् यन्मां नृलोकान्रह उत्सृजंतं दिष्ट्या
दृदृश्वान्विशदानुवृत्त्या १२ पुरा मया प्रोक्तमजाय नाभ्ये पद्मे निषण्णाय ममादिसर्गे ज्ञानं परं मन्महिमाव
भासं यत्सूरयो भागवतं वदंति १३ उद्धव उ॰ इत्यादृतोक्तः परमस्य पुंसः प्रतीक्षणानुग्रहभाजनोऽहं स्नेहोत्थरोमा
स्खलिताक्षरस्तं मुंचन् शुचः प्रांजलिराबभाषे १४ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

ष्टवानसि एतद्दुर्लभं जातमित्यर्थः १२ किं तदासीत्तमेवोपदेशं निर्दिशति पुरेति आदिसर्गे सृष्ट्युपक्रमे नाभ्ये नाभिजे
पद्मे निषण्णाय उपविष्टाय अजाय ब्रह्मणे पुरा पूर्वकल्पे मया प्रोक्तं मम महिमाऽवभास्यते प्रकाश्यतेऽनेनेति मन्म
हिमावभासं यद्देव सूरयो भागवतमिति वदंति तत्परमं ज्ञानं ददामीत्यनुषंगः १३ एवं भगवतोक्तो मैत्रेय उक्तमित्याह इती
ति इतीत्थमादृतोक्तः आदृतमाभाष्य उक्तः परमस्य पुंसः परमपुरुषस्य प्रतीक्षणं कृपावलोकः अनुग्रहस्तस्य भाजनः
पात्रभूतः स्नेहोत्थरोमा स्नेहेनोद्धानि पुलकितानि रोमाणि यस्य सः स्खलिताक्षरः गद्गदवाग्भद्रुच आनंदाश्रूणि मुंचन् प्रां
जलिः तं भगवंतं प्रसाद भाषे आभाषितवानित्यर्थः १४

१२

12

भगवानात्मनो मायायाः स्वकर्मसंकल्पस्य गतिं फलरूपां स्वकुलसंहृतिमवलोक्य सरस्वतीमुपस्पृश्य सरस्वत्यां स्नात्वा वृक्षमूलमश्वत्थवृक्षमूलं आविशत् ३ अहमिति प्रपन्नार्तिहरेण स्वकुलं संजिहीर्षुणा भगवता त्वं बदरिकाश्रमं प्रति प्रयाहीत्युक्तः ४ तथापि तदभिप्रेतं स्वकुलसंहारादिकं जानन् हे अरिंदम विदुर भर्तुर्भगवतः पादविश्लेषणे अक्षमः तमेव पृष्ठतोऽन्वगमम् अन्ववर्तं ५ एवमनुगच्छन्नहं तमेव विचिन्वन् मनसा चिंतयन् अद्राक्षं च कीदृशं दृष्टवानस्मि कथंभूतं एकं असहायं दयितं पतिं रतिप्रियं प्रियतमं पतिं निरुपाधिकशोभिषणं श्रीनिकेतं ...... श्रीनिवासं सरस्वत्यां सरस्वतीतीरे कृतकेतं कृतनिवासं स्वतः अनिकेतमनाश्रयं तस्यैव सर्वाश्रयत्वादिति भावः ६ श्यामावदातं नीलस्वच्छवर्णं विरजं निर्मलं प्रसन्नारुणलो

भगवान्स्वात्ममायाया गतिं तामवलोक्य सः सरस्वतीमुपस्पृश्य वृक्षमूलमुपाविशत् ३ अहं चोक्तो भगवता प्रपन्नार्तिहरेण ह बदरीं त्वं प्रयाहीति स्वकुलं संजिहीर्षुणा ४ अथापि तदभिप्रेतं जानन्नहमरिंदम पृष्ठतोन्वगमं भर्तुः पादविश्लेषणाक्षमः ५ अद्राक्षमेकमासीनं विचिन्वन् दयितं पतिं श्रीनिकेतं सरस्वत्यां कृतकेतमकेतनं ६ श्यामावदातं विरजं प्रशान्तारुणलोचनं दोर्भिश्चतुर्भिर्विदितं पीतकौशाम्बरेण च ७ वाम ऊरावधिश्रित्य दक्षिणांघ्रिसरोरुहं अपाश्रितार्भकाश्वत्थमकृशं त्यक्तपिप्पलं ८ तस्मिन्महाभागवतो द्वैपायनसुहृत्सखः लोकाननुचरन्सिद्ध आससाद यदृच्छया ९

...... पीतकौशेयाम्बरेण च विदितं तल्लक्षितं इति ७ दक्षिणपादसरोरुहं चरणपद्मं चतुर्भिर्दोर्भिर्भुजैः पीतकौशेयाम्बरेण च ...... पीतकौशेयाम्बरेण च विदितं तल्लक्षितं ...... दक्षिणपादसरो रुहं वामे ऊरावधिश्रित्य उपरि स्थापयित्वा उपाश्रितः पृष्ठतो यस्य अर्भको बालः कोमलो अश्वत्थो वृक्षो येन तं त्यक्तपि[ष्पलं] ...... [इति] ८ ...... तस्मिन्निति तत्र भगवत्स्थले त्यक्तं कर्मफलं अत एवाकृशं कर्माय ...... आदिराहित्ये ८ ...... महाभागवतः ...... द्वैपायनस्य सुहृत्सखः द्वैपायनो व्यासः तस्य सुहृत्सखा ...... भयमपि विवक्षितं भागवतगुण निधो द्वैपायनसुहृत्सखः ...... मैत्रेयः लोकाननुचरन् यदृच्छया भगवदिच्छया आससाद आगतो भूदित्यर्थः ९ ॥ ॥
एषः अत एव सिद्धः कृतकृत्यः सः मैत्रेयः

भा॰ तृ॰ टी॰
२३

एवमुक्त्वा हार्दमपि निवेदितवानस्मीत्याह ज्ञानमिति स्वात्मनस्तत्त्वरहस्यं याथात्म्यं तस्य प्रकाशकं परं ज्ञानं तद्बोधे मुख्यं प्रधानभूतं स
मग्रं गोपितं यज्ज्ञानं भगवान् पूर्णो बाहुलेयो भवान् कस्मै कृपया ब्रह्मणे सर्वनामत्वमार्षं प्रोवाच दिव्यवान् तज्ज्ञानं हे भर्तः स्वा
मिन्नोऽस्माकं गृहाण अनुगृहाण तु समं योग्यमपि चेदहं यद्यस्मादहं जिनं दुःखात्मकं संसारमंजसा सुखेन तरेमाति त
म १९ एवं स्वाभिप्रायेनिवेदिते मह्यं स भगवांस्तत्त्वमुपदिदेशेत्याह इतीत्थमावेदितं निवेदितं हार्दमभिप्रायं येन तस्मै
मह्यं स भगवान् अरविंदाक्षः आत्मनः स्वात्मनः परमां परां ज्ञानयोगमानयस्थां संपरमां ज्ञानयोगान्तरं हितां स्थितिं याथात्म्या
वगतिमादिदेश उपदिदेश ...... १९ उपसंहरति स इति आराधितयोर्दत्तीर्थानि तीर्थप्रदः पावनपावनी आरा
धितपवित्रपादः प्रसिद्धतमः यस्यपादेत्तीर्थं यस्य सः आराधित आराधितस्पर्शो पादतीर्थं यत्र तस्माद्गुरुतः एवमधीततत्त्वात्मविबो
धमार्गः तत्त्वात्मकपरमात्मावगतिरूपो बोधः सम्पद्यते यस्मिन् लप्तेऽनेनेति तत्त्वात्मविबोधमार्गः आत्मयाथात्म्यावग

23

ज्ञानं परं स्वात्मरहःप्रकाशं प्रोवाच कस्मै भगवान्समग्रं अपि क्षमं नो ग्रहणाय भर्तर्वदांजसा यद्वृजिनं तरेम १८ इत्या
वेदितहार्दाय मह्यं स भगवान्परः आदिदेशारविंदाक्ष आत्मनः परमां स्थितिं १९ स एवमाराधितपादतीर्थादधी
ततत्त्वात्मविबोधमार्गः प्रणम्य पादौ परिवृत्य देवमिहागतोऽहं विरहातुरात्मा २० सोऽहं तद्दर्शनाह्लादवियोगार्तियुतः
प्रभो गमिष्ये दयितं तस्य बदर्याश्रममंडलं २१ यत्र नारायणो देवो नरश्च भगवानृषिः मृदु तीव्रं तपो दीर्घं तेपाते लोक
भावनौ २२

तिप्रकाशकं शास्त्रं अधीतः तत्त्वात्मविबोधमार्गः येन सोऽहं पादौ भगवन्नमस्कृत्य प्रणम्य देवं श्रीकृष्णं परिवृत्य प्रदक्षिणीकृ
त्य तद्विरहे भगवद्विश्लेषेण आतुरः खिन्नः आत्मा चित्तं यस्य सः एवंभूतः सन् इहागतोऽस्मि २० इतो गतस्त्वं क्व गमिष्यसीत्य
त आह स इति सोऽहं तद्दर्शनेन प्रयाताह्लादो हर्षो हि तस्य भगवतः दर्शनेन यो मम आह्लादः वियोगेनार्तिः ताभ्यां युतः सन् हे प्रभो भगवतः
तस्य दयितं प्रियं बदर्याश्रममंडलं प्रति गमिष्ये २१ आश्रमं प्रस्तौति यत्रेति यत्र बदर्याश्रममंडले ऋषिः सर्वज्ञो नारायणो नर
श्च मृदु लोकानां क्षेमं सुखस्यादिकरं तीव्रं दुश्चरं दीर्घं आकल्पान्तं तपस्तेपाते चक्राते कथंभूतौ तेपाते लोकभावनौ लोकानुग्राहकौ
लोकानुग्रहार्थं तस्य तपश्चरणमिति भावः २२

राम
२३

किमाभाषितवानसीत्यत आह क इति हे ईश ते तव पादसरोजभाजां त्वत्पादकमलं भजमानानां इह पुरुषार्थानां चतुर्ष्वप्यर्थेषु धर्मार्थकाममोक्षेषु कोऽनु दुर्लभः न कोऽपि दुर्लभ इत्यर्थः तथापि पुरुषार्थचतुष्टयस्य सुलभत्वेऽपि हे भूमन् हे विभो नाहं प्रवृणोमि पुरुषार्थचतुष्टयमिति शेषः कथंभूतोऽहं भवत्पदाम्भोजयोर्निषेवणे औत्सुक्यं यस्य सः १५ तेषां ज्ञानीत्ययुक्तं विधिज्ञानामहं नित्ययोगाविरोधिनं धर्मादिकं न वृणोमि किंतु घटितघटनासामर्थ्यरूपां भवदीयां शक्तिं स्मरतो चित्तं वारंवारं खिद्यतीत्याह कर्माणीति अनीहस्य निष्कामस्य तव कर्माणि अभवस्य जन्मरहितस्य भवः जन्म कालात्मनः कालस्वरूपस्य दुर्गाश्रयः समुद्रस्य जलदुर्गा[illegible]श्रयः अरिभयात्कालयवनभयात्पलायनं स्वात्मनि रतेः प्रमदायुताश्रयः षोडशभिः

कोन्वीश ते पादसरोजभाजां सुदुर्लभोऽर्थेषु चतुर्ष्वपीह तथापि नाहं प्रवृणोमि भूमन्भवत्पदांभोजनिषेवणोत्सुकः १५
कर्माण्यनीहस्य भवोऽभवस्य ते दुर्गाश्रयोऽथारिभयात्पलायनं कालात्मनो यत्प्रमदायुताश्रयः स्वात्मन्रतेः खिद्यति
धीर्विदामिह १६ मंत्रेषु मां वा उपहूय यत्त्वमकुंठिताखंडसदात्मबोधः पृच्छेः प्रभो मुग्ध इवाप्रमत्तस्तन्नो मनो मोहयतीव देव १७

सहस्रैः स्त्रीभिर्युक्तः यत्र आश्रय इति च यद्विहास्मिन् विषये विदां विदुषामपि धीः खिद्यति पारवश्यं याति १६ किंच मंत्रेषु गुप्तमंत्रेषु सत्सु मां मामुपहूय वै आहूय वै अहो पृच्छेः पृष्टवानसि कथंभूतस्त्वमकुंठिताखंडसदात्मबोधः अकुंठितः आवरणरहितः अखंडः अपरिच्छिन्नः सन्सत्यरूपः आत्मनः स्वस्य बोधः यस्य सः अनावृतत्वादपरिच्छिन्नत्वात्सत्यज्ञान इत्यर्थः अत एवाप्रमत्तः स्वयमेवंभूतोऽपि मुग्ध इव मूढ इव यत्पृष्टवानसि तन्नो मनो मोहयतीव मोहं प्रापयतीव वर्तते इव शब्देन परमार्थेन एतत्सर्वं उपपन्नमेवेति सूच्यते तथाहि १७ कर्मादि यन्न कि[illegible]यया लीलया कर्माणि अकर्मापि भवस्य स्वकोपात्ताप्राकृतदेहस्य मंगलस्य इति गृहपरिग्रहरूपो भवश्च उपपद्यते दुर्गाश्रयादिकं मर्त्यलीलया उपपद्यते यो वै बालोऽके एतेषां पुरुषाणां कर्तव्यं स्याच्चेत्तत्कर्म अजायमानो बहुधा विजायते लोकवल्लीलाकैवल्यमिति सत्यादिभाः ॥ ॥ ॥ ॥ ॥ ॥ ॥

अत्रोद्धवविषये किं विरराज एकश्च तिनिधनमिति वृष्णिभोजेषु निधनं ब्रह्मशापेन नाशमुपगतेषु सत्सूद्धवस्तु कथमव
शेषितः अस्यापि विप्रशापविषयत्वादित्यभिप्रायः किमुद्धवस्य दुष्ट्वादयो निधनमुपगता इति एषुतः अतिरथानां
यूथपास्तेषां यूथपाः तेषामपि ये मुख्याः अधीशः लोकत्रयेशः हरिरप्याकृतिं मनुष्यसजातीयदेह
निवेशं ततस्त्यजेति रोधापयामास अत्र भूतागत्य यद्विवक्षितः सर्वेनिस्त्याः शापभूताश्च देहास्तत्यमहात्मन इति स्मरणात्
२८ विप्रशापादेः सर्वस्य भगवत्संकल्पानुविधायित्वात्तत्संकल्पेनायं शापविषयो नोद्धव इत्याह द्वास्यामिति इदमुत्तरमाह हैया
सकिः ब्रह्मशापो हि ब्रह्मशापापदेशेन विप्रशापव्याजेन कालेनामोघवाञ्छितं यस्य सः सत्यसंकल्प इत्यर्थः एवंभूतो भगवा
न् स्वकीयं समस्तं स्वकुलं संहृत्य देहं स्वदेहं त्यक्ष्यन् तिरोधापयिष्यन्निदमचिन्तयत् २८ चिन्तामेवाह अस्माल्लोकादुपरते

परीक्षिदुवाच निधनमुपगतेषु वृष्णिभोजेष्वधिरथयूथपयूथपेषु मुख्यः स तु कथमवशिष्ट उद्धवो यद्धरिरपि त्यत्
याज आकृतिं त्र्यधीशः २८ श्रीशुक उ० ब्रह्मशापापदेशेन कालेनामोघवाञ्छितः संहृत्य स्वकुलं नूनं त्यक्ष्यन् देहमचि
न्तयत् २९ श्रीभगवानुवाच अस्माल्लोकादुपरते मयि ज्ञानं मदाश्रयं अर्हत्युद्धव एवाद्धा सम्प्रत्यात्मवतां वरः ३० नोद्धवोऽणु
र्वपि मन्न्यूनो यद्गुणैर्नार्दितः प्रभुः अतो मद्वयुनं लोकं ग्राहयन्निह तिष्ठतु ३१ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

स्वलोकं गते सति मदाश्रयं अहमाश्रयो विषयो यस्य तत् मदाश्रयं मद्विषयं ज्ञानं संप्रतीदानीमुद्धव एवाद्धा तत्त्वेन साक्षादर्हति स्वं
यं गृहीतुमन्यान् ग्राहयितुं च उद्धवं योग्यः न त्वन्य इत्यर्थः यतो भूतत्वा उद्धवः आत्मवतां स्वात्मपरमात्मयाथात्म्यज्ञानवतां मध्ये वरः मु
ख्यः ३० नद्धे वा हन्तेति उद्धव अणवल्पोऽपि मन्न्यूनः मत्तः न्यूनो न भवति निरंजनः परमं साम्यमुपैति जगद्व्यापारवर्जं भोगमात्र
साम्याल्लिंगाच्च मम साधर्म्यमागता इत्यादि श्रुतिस्मृत्यादिप्रतिपन्नं भोगसाम्यं विवक्षितं मुक्तो मया सह समानभो
ग इत्यर्थः कुतः यद्यस्माद्गुणैः रजस्तमोमिश्रसत्त्वैस्तत्कार्यशब्दादिविषयैर्नार्दितः न पीडितः अजस्त्रवप्रभुः स्ववशीकृतेन्द्रियः अ
नेन मुनिसाधन संपत्तिः सूचिता अत अस्मादेव हेतोर्मद्वयुनं मद्विषयं ज्ञानं लोकं ग्राहयन्मर्त्यलोके तिष्ठतु मुक्तिपर्यन्तमिति शेषः ३१

राम.
२५

एवमुद्धवादुपश्रुत्य तां तस्य स्वसुखस्थितिप्रकारमाह श्रीशुकः श्लोकद्वयेन इतीति क्षत्ता विदुरः बुधः विद्वानित्युक्तप्रकारेणोद्ध
व मुखाच्छ्रुत्वा नो दुःसहं सोऽहमशोक्यमसंततदुःखजनकमित्यर्थः वधं नाशमुपाकर्ण्य श्रुत्वोत्पतितमुत्पन्नं शोकं ज्ञानेन स्वात्मपर
मात्मयाथात्म्यज्ञानेनाशमयत् २३ स इति स कौरवर्षभः विदुरः व्रजन्तं व्रजिष्यन्तं बदर्याश्रमं प्रतीति शेषः महाभागवतं भागवते
ग्र्यं मुद्धवं विस्रम्भाद्विश्वासादिदमभ्यधत्तानुसंहितवान्निश्चितवानित्यर्थः किं कृष्णपरिग्रहे कृष्णानुग्रहे यमुद्धवो मुख्य इति हे
कृष्णपरिग्रहविषयाणां मध्ये त्वमुख्य इति विश्वासपूर्वं निश्चितवानित्यर्थः २४ अथ श्रुतभगवद्वृत्तान्तः तदुपदिष्टतत्त्वजिज्ञा
सुः सन्नाह ज्ञानमिति योगेश्वरः योगफलप्रदः ईश्वरो भगवान् आत्मरहःप्रकाशपरस्य ज्ञानमाह तज्ज्ञानं भवान् नः अस्मा

श्रीशुक उ० इत्युद्धवादुपाकर्ण्य सुहृदां दुःसहं वधं ज्ञानेनाशमयत् क्षत्ता शोकमुत्पतितं बुधः २३ स तं महाभागवतं व्रजं
तं कौरवर्षभः विस्रम्भादभ्यधत्तेदं मुख्यं कृष्णपरिग्रहे २४ विदुर उ० ज्ञानं परं स्वात्मरहःप्रकाशं यदाह योगेश्वर ईश्वर
स्ते वक्तुं भवान्नोऽर्हति यद्धि विष्णोर्भृत्याः स्वभृत्यार्थकृतश्चरन्ति २५ उद्धव उ० ननु ते तत्त्वसंराध्य ऋषिः कौषारवोऽन्तिके
साक्षाद्भगवतादिष्टो मर्त्यलोकं जिहासता २६ श्रीशुक उ० इति सह विदुरेण विश्वमूर्तेर्गुणकथया सुधया प्लावितोरु
तापः क्षणमिव पुलिने यमस्वसुस्तां समुषित औपगविर्निशां ततोऽगात् २७

भ्यं वक्तुमर्हति यद्यस्माद्धि विष्णोर्भृत्याः स्व
भृत्यार्थकृतः स्वभक्तप्रयोजनकारिणश्चरन्ति हि २५ तत्त्वजिज्ञासुना पृष्टं उद्धवः आह नन्विति ननु हे विदुर ते त्वया ऋषि
सत्तमः कौषारवो मैत्रेयः तत्त्वसंराध्यः तत्त्वोपदेशाय आराधनीयः पूज्यः न त्वहं कथंभूतः कौषारविः मर्त्यलोकं जिहासता
त्यक्तुमिच्छता भगवता मे मत्समीपे साक्षादादिष्टः आज्ञप्तः त्वं मां प्राप्तं भवन्तमुपसन्नाय सन्तत्त्वमुपदिशेत्यादिष्ट इत्यर्थः २६
विदुरोद्धवसंवादमुपसंहरति श्रीशुकः इतीति विदुरेण सह विश्वमूर्तेः विश्वशरीरस्य भगवतो गुणकथारूपया सुधया आ
प्लुतैः निरस्तः उरुः तापो यस्य सः औपगविरुद्धवः यमस्वसुर्यमुनायाः पुलिने तटे तां निशां रात्रिं क्षणमिव समुषितः सम्य
ग्भगवद्गुणकथया तां रात्रिं क्षणमिव नीत्वा ततः यमुनाया अगात् बदरीकाश्रमं प्रतीति शेषः २७ ॥ ॥ ॥ ॥

भा. टी.   द्वारीति द्युनद्या गंगायाः द्वारि हरिद्वारे आसीनं निषण्णमगाधबोधमगाधोपारः बोध आत्मपरमात्मविषयज्ञानं श्रोत्रियं ब्रह्मनिष्ठं
१५   दृष्ट्वा गुरुत्वाचार्यत्वसंपन्नत्वं निश्चितमिति भावः । एवंभूतं मैत्रेयं उपसृत्य समीपं गत्वा मे वाभिगच्छेत् समित्पाणिरित्याद्युक्तरीत्या उपसमीपे गत्वा अच्युता
पप्रच्छ कथंभूतः सन् अच्युतभावः परमात्मभक्तिः तेन शुद्धः निर्मलचित्तः अनेन प्रश्नं तच्चिन्तापरमात्मान्वितायेत्यस्यार्थ उक्तः सौ
शील्यगुणाभितृप्तः सौशील्यं महतो मंदैः सह नीरंध्रेण संश्लेषस्वभावत्वं मैत्रेयस्य सौशील्यं गुणेनाभितृप्तः सत्यार्जवदयादानाहिंसादीनां मूलसत्वं एतेन आचार्यत्वपूर्त्तिरभिप्रेता १ किं पृष्टवानित्यपेक्षायां तावत्सरीसृप्य लोकानि मस्यापेक्षं सूचयंस्तत्र प्रश्नमेवाह
सुखायेत्यादिना लोकः जनः सुखाय सुखप्राप्त्यै दुःखनिवृत्त्यै च इत्यर्थः कर्माणि कृष्यादीनि लौकिकानि श्रौतस्मार्तानि च करोति तैः क
र्मभिः सुखं वा निरतिशयसुखं वा अन्यस्य दुःखस्य उपारमं मामांतिकनिवृत्तिं वा न विंदेत न विंदते । किंतु ततः तैः कर्मभिः पुनः पुनः
दुःखमेव विंदेत अत्र निरतिशयसुखप्राप्ती आत्यंतिकदुःखनिवृत्ती च साधनत्वेन यद्युक्तं कर्तव्यं तन्नः अस्मभ्यं भगवान् त्वं

श्रीशुक उ० द्वारि द्युनद्या ऋषभः कुरूणां मैत्रेयमासीनमगाधबोधं । क्षत्तोपसृत्याच्युतभावशुद्धः पप्रच्छ सौशील्यगुणा
भितृप्तः १ विदुर उ० सुखाय कर्माणि करोति लोको न तैः सुखं वान्यदुपारमं वा । विंदेत भूयस्तत एव दुःखं यदत्र युक्तं भ
गवान्वदेन्नः २ जनस्य कृष्णाद्विमुखस्य दैवादधर्मशीलस्य सुदुःखितस्य । अनुग्रहायेह चरंति नूनं भूतानि भव्यानि जना   र्दनस्य ३

टी १ साधिज्ञानसंपन्नः त्वं वदेः ब्रूहि इत्यर्थः न च पापेन कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्येन चितो लोकः क्षीयते इत्युक्तरीत्या कर्मणामा
त्यंतिकदुःखनिवृत्तिपूर्वकनिरतिशयसुखप्राप्तिसाधनत्वानुपपत्तिं परीक्ष्य भगवान् निरतिशयसुखसाधनं विविच्य मह्यमुपदि
शेत्यर्थः २ निवृत्तभवासुतान्तःकरणमपारस भगवत्स्वरूपैकचिंतनस्य मे किं भवत्कृतप्रश्नानां प्रतिवचनेन प्रयोजनमित्याशंक्याह
मयन्नसस्य प्रतिवचनो सत्वमाविष्करोति जनस्येति दैवात् पूर्वकर्मवशात् अधर्मशीलस्य अधर्मनिरतस्य पापं प्रज्ञां नाशयति क्रिय
माणं पुनः पुनः नष्टप्रज्ञः पापमेव नित्यमारभते नर इति वचनात् अत एव कृष्णाद्विमुखस्य परा दुःखस्य सुदुःखितस्य अतिदुःखितस्य
टी २   जनस्यानुग्रहाय भव्यानि भद्राणि जनस्य विष्णोः भूतानि विष्णुभक्ता भवंत इत्यर्थः इह मर्त्यलोके चरंति कृपालूनां भवन्नालोनुजि
घृक्षयैव मर्त्यलोके संचरणं नान्यपेक्षयेत्यर्थः ३

(margin) २५   सौशील्यं वाक्य   वेद २   राम   का १५

उपसंहरति एवमिति एवं इत्येवं त्रिलोकगुरुणा शब्दयोनिना शास्त्रप्रमाणगम्येन भगवता संदिष्टः आज्ञप्तः उद्धवः वदर्याश्रममासाद्य समाधिना ध्यानयोगेन हरिं भगवन्तमीजे पूजितवान् ३२ विदुर इति विदुरोऽपि क्रीडयोपात्तदेहस्य स्वेच्छयोपात्ताप्राकृतदिव्यविग्रहस्य परमात्मनः श्रीकृष्णस्य कर्माणि श्लाघितानि चरित्राणि च उद्धवाच्छ्रुत्वा ३३ तस्यैव भगवतः धीराणां योगिनां धैर्यवर्द्धनं योगवर्द्धकं विक्लवात्मनामधीरचित्तानां पशूनामज्ञानिनां दुष्करतरं देहन्यासं च देहत्यागप्रकारं च ३४ हे कुरुश्रेष्ठ राजन् कृष्णेन भगवता कटाक्षमनसा करणेनेक्षितं दृष्टमात्मानं च श्रुत्वेति पूर्वेणान्वयः भगवते उद्धवे गते सति तमेव श्रीकृष्णमेव ध्यायन् प्रेमविह्वलः निरतिशयभगवत्प्रेमपरवशः सन् रुरोद ३५ कालिंद्या इति भागवतर्षभः भागवतश्रेष्ठो विदुरः स्वयंसिद्ध एव परिनिष्पन्नभक्तियोगनिष्ठ एव कतिचिदहे

श्रीशुक उ० एवं त्रिलोकगुरुणा संदिष्टः शब्दयोनिना वदर्याश्रममासाद्य हरिमीजे समाधिना ३२ विदुरोऽप्युद्धवाच्छ्रुत्वा कृष्णस्य परमात्मनः क्रीडयोपात्तदेहस्य कर्माणि श्लाघितानि च ३३ देहन्यासं च तस्यैवं धीराणां धैर्यवर्द्धनं अन्येषां दुष्करतरं पशूनां विक्लवात्मनां ३४ आत्मानं च कुरुश्रेष्ठ कृष्णेन मनसेक्षितं ध्यायन् गते भागवते रुरोद प्रेमविह्वलः ३५ कालिंद्याः कतिभिः सिद्ध अहोभिर्भरतर्षभः प्रापद्यत स्वःसरितं यत्र मित्रासुतो मुनिः ३६ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे विदुरोद्धवसंवादो नाम चतुर्थोऽध्यायः ४॥

भिर्दिनैः कालिंद्याः यमुनायाः सकाशात् स्वःसरितं गंगां प्रापद्यत आप्तः यत्र गंगातीरे हरिद्वारे मित्रासुतो मैत्रेयः आस्ते तत्र आपद्यत इत्यर्थः ३६ इति श्रीवीरराघवकृतायां श्रीमद्भागवततृतीयस्कंधटीकायां चतुर्थः ४ एवं कुत्र प्रभुर्भगवता मैत्रेयेण संगमः कदा वा सह संवाद इत्यस्योत्तरमुक्तं [illegible] अथ एतत् प्रभृति तत्तो य चतुर्थस्कंधाभ्यां विदुरमैत्रेयसंवादं विवक्षन् तावद्विदुरस्य मैत्रेयोपसत्तिप्रकारं तत्र भगवल्लीलारूपमहदादिसृष्टिप्रकारं चाह पंचमेनाध्यायेन तावद्यथाविधि सत्रमैत्रेयोपसत्तिप्रकारमाह द्वारद्वारायत्सि: ॥ ॥ ॥ ॥ ॥ ॥ ॥

अन्यदपि पृच्छति यैरिति अधिलोकनाथः लोकाधिपतिः यैस्तत्त्वभेदैर्महदादिभिरित्यर्थः सहलोकपालान् स्वविद्यमानाः लोकपाला येषां तान् लोकानलोकान् [illegible] लोकबहिर्भागान् रकान्वा अचीकॢपत् कल्पयामास तत्तान्वर्णयेत्यर्थः यत्रये षु लोकादिषु सर्वाणि प्राणिसत्त्वानि प्राणिनः तेषां निकायाः समूहास्तेषां भेदः भिदा अधिकृतः कर्मानुगुणाधिकारवान् प्रतीतः प्र तीयते ९ येनेति उतापि चात्मयोनिः कारणं यस्य सः आत्मयोनिः कारणान्तरशून्य इत्यर्थः विश्वसृडनारायणः प्रजानां चाभिम तानां आत्मकर्मरूपाभिधानां आत्मा ज्ञानेन्द्रियगणः कर्म कर्मेन्द्रियगणः रूपाणि देवमनुष्यादिरूपा अभिधा देवो मनुष्य इत्या द्यभिधाः आसां भिदां येन येन प्रकारेण व्यधत्त अकरोत् किं साक्षात्स्वरूपं प्रत्येताभिप्रायः एतत्सर्वं च कारणं प्रमयापि नो स्मभ्यं हे

यैस्तत्त्वभेदैरधिलोकनाथो लोकानलोकान् सहलोकपालान् अचीकॢपद्यत्र हि सर्वसत्त्वनिकायभेदोऽधिकृतः प्रतीतः ९ येन प्रजानामुत आत्मकर्मरूपाभिधानां च भिदां व्यधत्त नारायणो विश्वसृगात्मयोनिरेतच्च नो वर्णय विप्रवर्य ९ परा वरेषां भगवन् व्रतानि श्रुतानि मे व्यासमुखादभीक्ष्णं अतृप्नुमः क्षुल्लसुखावहानां तेषामृते कृष्णकथामृतौघात् १० कस्तृप्नुयात्तीर्थपदोऽभिधानात् सत्रेषु वः सूरिभिरीड्यमानात् यः कर्णनाडीं पुरुषस्य यातो भवप्रदां गेहरतिं छिनत्ति ११

विप्रवर्य वर्णय ९ ननु बहुश्रुतं किमन्यत्पृच्छसि इत्यत आह परावरेषामिति हे भगवन् मैत्रेय परत्रैव वर्णिताः अपरे स्त्रीशूद्रा दयः तेषां व्रतानि व्यासमुखादभीक्ष्णं पुनः पुनः मे मया श्रुतानि भगवत्कथामृतस्याविन्नाक्षुल्लसुखावहानामल्पसुखसंपाद कानां तेषां व्रतानां श्रवणेनेति शेषः अतृप्नुमः तृप्ता अभूमः भगवत्कथाश्रवणेन तु न तृप्ता इत्यर्थः १० एतदेवाह क इति वः युष्माकं सत्रेषु सूरिभिर्विद्वद्भिरीड्यमानात् स्तूयमानात् तीर्थपदो भगवतः अभिधानाच्चरित्रात्कः पुरुषस्तृप्नुयात् कोपि तृप्नुया दित्यर्थः कथंभूतः तीर्थयात् यत्तीर्थयात् पुरुषस्य पुंसः कर्णनाडीं श्रोत्रविवरं यातः गतः कथाश्रवणेन श्रोत्रविवरद्वारेण हृदयं प्रविष्ट इत्यर्थः भवप्रदां संसृतिसंपादकां गेहरतिं देहापत्यकलत्रादिष्वासक्तिं छिनत्ति नह्येवं व्रतानां तापत्रयाभिहन्तीनि निःसक्ति [illegible] इति भावः ११

बुभुत्सितानि क्रमशः एच्छति तद्विति हे साधुवर्य शंस कथय सं पारकं तत् इत्यन्वयः आदिशाकथय कथंभूतं वर्त्म येन वर्त्मना संराधि
तो भगवान्पुंसां भक्तिः एवं भक्तियोगेन पवित्रिते हृदि हृदये स्थितः सन् तत्त्वाधिगमं तत्त्वमधिगम्यते येन तत्त्वावभासकं पुराणं मनाक्षि
वेद्यमाणकं ज्ञानं पृच्छति तत् इत्यादिशेषः ५ करोतीति अधीशः त्रिलोकेशः भगवान् स्वतंत्रः अकर्म एव एवं कृत्तावतारः ब्रह्मादि
रूपेण कृतानुप्रवेशावतारः यानि कर्माणि करोति अग्रे स्वेः एवं निरीहः निर्व्यापार एव स्वयमिदं विश्वं यथा येन प्रकारेण ससर्ज
२४
संस्थाप्य यथा संस्थाप्य स्थितिं रक्षां कृत्वा जगतः वृत्तिं जीविकां विधत्ते करोति एतद्वर्णये सुपरीततेनान्वयः एवमग्रेपि ५ यथेति स भगवान्स्व
शरीरभूते स्वस्मिन्स्वस्थे आकाशस्य कारणभूते अग्रे सरं तमसि लीयते इत्युक्तं तमः शब्दवाच्य प्रकृतिः इत्यत्र इमं रूपद्वयं निवेश्य सं

तत्साधुवर्यादिश वर्त्म शंनः संराधितो भगवान्येन पुंसां हृदि स्थितो यच्छति भक्तिपूते ज्ञानं सतत्त्वाधिगमं पुराणं ५ करो
ति कर्माणि कृतावतारो यान्यात्मतंत्रो भगवांस्त्र्यधीशः यथा ससर्जाग्र इदं निरीहः संस्थाप्य वृत्तिं जगतो विधत्ते ५
यथा पुनः स्वे ख इदं निवेश्य शेते गुहायां स निवृत्तवृत्तिः योगेश्वराधीश्वर एक एतदनुप्रविष्टो बहुधा यथासीत् ६ कौ
इत्विधत्ते द्विजगोसुराणां क्षेमाय कर्माण्यवतारभेदैः मनो न तृप्यत्यपि शृण्वतां नः सुश्लोकमौलेश्चरितामृतानि ७ ॥

र्थः

स्वे निवृत्ता वृत्तिः निवृत्तजगद्व्यापारं गुहायां परमाकाशे वैकुंठ इत्यर्थः शेते वसति हे योगीश्वराधीश्वर योगीश्वरश्रेष्ठ एकः स्वयं चिदचि
द्रूप जगदनुप्रविष्टः स्वप्रशासनाधीनं कुर्वन् धारकतया स्थितः बहुधा देवमनुष्यादिबहुनामभाक् यथा आसीद्बभूव ६ कौ
इत्विति यथा च द्विजगोसुराणां ब्राह्मणगोदेवानां क्षेमाय अवतारभेदैः मत्स्यकूर्मरामकृष्णादिरूपैः अवतारैः प्रदर्शनार्थः स्वच
यंकर्तृत्वेनैव कर्माणि दुष्कृद्विनाशन साधुपरित्राणादिरूपकर्माणि विधत्ते करोति अन्तर्यपि स्मृतः अंतरा स्वस्य प्रतिवचः
नश्रवणे कृत्स्नमाविष्करोति मनः इतिः सुश्लोकमौलेः सुष्ठुश्लोक्यते कीर्त्यते इति सुश्लोकाः पवित्रकीर्तिमंतः तेषां मौ
लिः प्रधानः तस्य भगवतश्चरितामृतानि अमृततुल्यानि चरित्राणि शृण्वतामपि नः तृप्यत्वलंभावं न गच्छतीत्यर्थः ७ ॥ ॥ ॥
२
२०

भा॰त॰टी॰ ५

अथास्मदुपसंहरन्ति हृष्णां तद्विति तत्तस्मात् हरिकथाया एव समस्तदुःखापायकरत्वाद्धेतोः हे कौषारव मैत्रेय शर्मदातुः स्वत
एवस्य पवित्रकीर्तेर्हरेः कथामेव कथासु सारां सारभूतां उद्धृत्य पुष्पेभ्यः मधुकरो मधुइव नः शिवाय हे आर्त्तबंधो त्त
प्र३ पत्रपापीडितानां सुखकरकीर्तयकथय १५ भगवत्कथास्वपि श्रीकृष्णकथैव कथनीयेत्याह स इति यो भगवान् विश्व
स्य जन्मस्थितिसंहारार्थं प्रगृहीतशक्तिः प्रगृहीतापारशक्तिर्येन सः शक्तित्वं शम्भुतिशरीरादयः शब्दाः पर्यायाः ले पा॰
नाधिकृतस्यावतारस्य विष्णुगतपालनानुकूलसामर्थ्यस्य स्वशक्तित्वबोधाय पएवेश्वरः कृतावतारः अतिपूरुषाणि मा ति
नुषाणि दिव्यानि कर्माणि चकार तानि मह्यं कीर्तयकथय १६ एवं क्षत्राप्रष्टो मैत्रेय आहेत्याह शुकः एवमित्येकेन भगवा
नुमत्तादिज्ञानसंपन्नः सकुषारवस्तुतो मैत्रेयः एवं क्षत्त्रा विदुरेण पुंसां निःश्रेयसार्थाय मोक्षोदयाय स्वस्य तुष्टिबहुत्वान्न

१७ तस्मात्स्वकौषारव शर्मदातुर्हरेः कथामेव कथासु सारं उद्धृत्य पुष्पेभ्य इवार्त्तबंधो शिवाय नः कीर्तय तीर्थकीर्तेः १५
स विश्वजन्मस्थितिसंयमार्थे कृतावतारः प्रगृहीतशक्तिः चकार कर्माण्यतिपूरुषाणि यानीश्वरः कीर्तय तानि
मह्य १६ श्रीशुकउ॰ एवं स भगवान्पृष्टः क्षत्त्रा कौषारविर्मुनिः पुंसां निःश्रेयसार्थेन तमाह बहुमानयन् १७ मैत्रेयउ॰
साधु पृष्टं त्वया साधो लोकान्साध्वनुगृह्णता कीर्तिं वितन्वता लोके आत्मनोधोक्षजात्मनः १८ नैतच्चित्रं त्वयि क्षत्त
र्बादरायणवीर्यजे गृहीतोनन्यभावेन यत्त्वया हरिरीश्वरः १९ मांडव्यशापाद्भगवान्प्रजासंयमनो यमः भ्रातुः क्षेत्रे
भुजिष्यायां जातः सत्यवतीसुतात् २० स्वनिःश्रेयसार्थेन पृष्टः एवमापृष्टः नं क्षत्तारं बहुमानयन् संमानयन्नाह १७ पुंसां नि
श्रेयसार्थायेत्यनेन सूचितमेव क्षत्तुर्लोकानुग्रहकारित्वमाविःकुर्वंस्तावत्प्रश्नमभिनंदति मैत्रेयः साध्विति हे साधो विदुर त्व
या साधु सम्यक् पृष्टं त्वया कथंभूतेन लोकान्साध्वनुगृह्णता अधोक्षजात्मनः स्वस्याधोक्षजचित्तस्य स्वस्य कीर्तिं वा कीर्तिं लोके वि
तन्वता विस्तारयता १८ हरिकथाप्रश्नस्त्वयि न चित्रमित्याह नैतदिति हे क्षत्तः बादरायणवीर्यजे व्यासवीर्यसंभूते त्वयि इ राम
ग दं हेतुगर्भं विशेषणं तत् हरिकथाप्रश्नरूपं न तन्न चित्रं न केवलं बादरायणवीर्यजत्वमात्रं एव किंतु यद्यस्मात् अनन्यभावेन कं तभावे
न ईश्वरो हरिस्त्वया गृहीतः १९ व्यासवीर्यजत्वं च स्पष्टयति मांडव्येति प्रजानामभगवतां प्रजानां संयमनः दंडयिता यमः वैव ५
स्वतः मांडव्यस्य मुनेः शापात् भ्रातुः सत्यवतीसुतस्य विचित्रवीर्यस्य क्षेत्रे क्षेत्रत्वेन परिगृहीतायां भुजिष्यायां दास्यां सत्यवतीसुताद्व्या
बादरायणाद्वीर्यजत्वा पा२ साक्षात् उत्पन्नः यम एव त्वं जातोसीत्यर्थः २० ॥ ।
नेर

ननु भगवत्कथायाः प्रवृत्तापत्यात्मकसंसृतिविच्छेदकत्वे सैव प्राधान्येन व्यासेन महाभारते किमिति नानुवर्णिता किमिति वा प्रा
यशो वृत्तान्येव वर्णितानीत्याशंक्याह रोहव्यास्यायेन महाभारतस्यापि भगवद्गुणानुवर्णनैतात्पर्यमित्याह मुनिरिति ते
सखा मुनिः कृष्णः व्यासः भगवद्गुणानां विवक्षुः भगवद्गुणान्वक्तुमिच्छुर्भारतमाह यस्मिन्भारते ग्राम्यसुखानुवादैर्द्वारभूतैर्नृ
णां मतिर्हरेः कथायां गृहीता ऽवतारितेत्यर्थः शौरवासेऽ न्यायेन भगवत्कथायां वृत्त्यवतारार्थं भारते ग्राम्यसुखानुवादः कृ
तः नहि तावता तत्रैव तात्पर्यमिति च कृत्युक्तं नद्रूमिति हासससमुच्चये कामिनो वर्णयन्कामान् लेभं तु ध्रुवसंवर्णयन् नरः किं
फलमाप्नोति कूपेऽधमिव यान्नयन् लोकचित्तावतारार्थं वर्णयित्वा तु तेन तौ इतिहासैः पवित्रार्थैः पुनरेव निर्दिष्टौ अन्यथा घो
रसंसारबन्धहेतुं जनस्य तौ वर्णयेत्स कथं विद्वान्महाकारुणिको मुनिरिति अतो भारताभिप्रायो दुरवगम इत्यर्थः १२ भगवत्कथा
७८ यां मतिप्रवेशस्य फलमाह सेति साहरिकथा अहरहः श्रवणेनैधिप्राप्तासती श्रद्दधानस्य कथायां श्रद्धां कुर्वतः पुंसः अन्यत्र

मुनिर्विवक्षुर्भगवद्गुणानां सखापि ते भारतमाह कृष्णः यस्मिन्नृणां ग्राम्यसुखानुवादैर्मतिर्गृहीता नु हरेः कथायां १२
सा श्रद्दधानस्य विवर्द्धमाना विरक्तिमन्यत्र करोति पुंसः हरेः पदानुस्मृतिनिर्वृतस्य समस्तदुःखाप्ययमाशु धत्ते १३ ता
ञ्छोच्यशोच्यानविदोऽनुशोचे हरेः कथायां विमुखानघेन क्षिणोति देवोऽनिमिषस्तु येषामायुर्वृथावादगतिस्मृतीनां १४

शब्दादौ विरक्तिं करोति ततः किमित्यत आह हरेर्भगवतः पादयोरनुस्मृत्याऽनुध्यानेन निर्वृतिस्य समस्तदुःखानामप्ययं नाशं
विधत्ते साहरिकथेति शेषः १३ हरिकथैव सत्सङ्गे श्रद्दधानस्य शुश्रूषोः शब्दादिविषये विरक्तिं भगवत्पादारविन्दभक्तिं च जन
यति तापत्रयाभिहतिं च विधत्ते अन एवंविधप्रभाववत्यां हरिकथायां ये विमुखास्तान् [illegible] शोच्यशोच्यान् शोच्या
नामपि शोच्यानत्यन्तशोच्यानित्यर्थः अतः अविदः अज्ञान् शोचे तर्कैर्हरेः कथायां उक्तगुणशालिन्यामघेन पापेन ये
ता नृ विमुखाः पराङ्मुखाः अत एव येषां हरिकथाविमुखानामायुरनिमिषो देवः रविः क्षिणोति क्षपयति किमिदं कथं तेय तः क
थायाः एव तो घायुःक्षिणोतीत्याशंक्याह विमुखानिति हि वृथा वादगतिस्मृतीनामिति वादो वाग्व्यापारः गतिर्देहव्या
पारः स्मृतिर्मनोव्यापारः वृथा व्यर्था वादगतिस्मृतयो येषां तेषां भगवत्कथाविमुखत्वात्तु वादगतिस्मृतयः सफलाइत्यर्थः॥
प आयुःक्षीणं तु तुल्यमेव १४

नृ४ नृ४

त्वमुच्यते नचचिदचिच्छरीरकत्वस्याप्रतीतेरेकएवेत्यनेनसजातीयविजातीयस्वगतभेदशून्यंब्रह्मैवजगत्कारणंप्रोच्यतइतिभ्रमित
व्यं आगदृत्तिकालस्यनिर्देशाद्विजातीयभेदस्यात्मनामात्मेतिव्यतिरेकनिर्देशेनसजातीयभेदस्याभावाभिसयनेनकारणत्वोपयिकस्या
र्वज्ञसर्वशक्तित्वसत्यसंकल्पत्वादिस्वगतभेदस्यचश्रुत्यैवप्रतिपन्नत्वात् नहीनेकइत्यनेनकिमुच्यत इतिचेद् भूतेमहदादिसृष्टिक्रमेणव्
यक्तानामानात्वप्रतिसंबंधिप्रैकत्वमेकइत्यनेनोच्यतइतिनामरूपविभागाभावाभिप्रायानिबंधनोह्येकइतिव्यपदेशः २३ तद्वेदंतर्ध्दि
आत्मनमासीनन्नामरूपाभ्यांव्याक्रियतइतिश्रुतेः प्रकृतिपुरुषकालशरीरकस्यसार्वज्ञ्यादिकल्याणगुणाकरस्यैवकारणत्वप्रपंचय
तिद्वाभ्यांसइति सवाएषः सोयंभगवान्तदाप्रलयदशायांद्रष्टासर्वज्ञः तत्रहेतुः अकर्मवश्यासंकुचितज्ञानः नतुतः एकराट्एक
रूपप्रकाशः नतुजीववत्कर्मायत्तः कदाचित्संकोचविकासभाग्ज्ञानसंपन्नः कर्मसंशक्तिः सूक्ष्मावस्थचिदचिद्रूपस्वशक्तिः ।
नतुतःतत्वादिपर्यायःशक्तिशब्दइत्युक्तं दृश्यंकार्यरूपंतत् किंतु असन्तंव्यवहारार्हनामरूपरहितमिवात्मानंमेनेऽमनुत ।

सवाएषतदाद्रष्टानापश्यद्दृश्यमेकराट् मेनेसंतमिवात्मानंसुप्तशक्तिरसुप्तदृक् २४ सवाएतस्यसंद्रष्टुःशक्तिः
सदसदात्मिका मायानाममहाभागययेदंनिर्ममेविभुः २५ ॥ ॥ ॥ ॥ ॥ ॥ ॥

78

इतशब्देनतस्यसूक्ष्मदर्शित्वात्स्वशरीरभूतसूक्ष्मावस्थचिदचिद्विषयज्ञानसंपत्तिः सूच्यते अनेनसार्वज्ञ्यादिगुणसंपत्तिनामरू
पविभागाभाव श्लोकः २४ अथचिदचिच्छरीरकत्वमाह सावाएतस्येति संद्रष्टुः [illegible] सकलपदार्थद्रष्टुः शक्तिरूपचक्रस्य
द्विविशेषणभूतमायानामप्रकृतिःसदसदात्मिकाचेतनाचेतनात्मिका भूमिरापोनलोवायुःखंमनोबुद्धिरेवच अपरेयमित
स्त्वन्यांप्रकृतिंविद्धिमे [illegible] चेतनाचेतनयोरुभयोरपिपरस्पर [illegible] वित्तसत्प्रतीत्याभिधानात् ययासदात्मिकयाप्र
कृत्याइदंकार्यावस्थचेतनाचेतनात्मकंजगत्स्वयंविभुःजगत्कर्ता दोषासंस्पृष्टः निर्ममेसृष्टवान्सैषामायापिविभोःशरीरत्वे
नसूक्ष्मावस्थयाआसीदित्यर्थः भगवानेकएवेदमग्रआत्मात्मनांविभुरासीदित्यनेनसूक्ष्मचिदचिद्विशिष्टस्योपादानत्वं
ययेदंनिर्ममेविभुरित्यनेनकेवलनिष्कर्षस्वरूपस्यनिमित्तत्वंचाभिहितं २५ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ।

किंच भवानिति सानुगस्य सभागवतस्य भगवतः श्रीकृष्णस्य भवान्नित्यं संमतः प्रीतिविषयः य[illegible]स्य तव ज्ञानोपदेशाय मां भगवाननुव्र
जन्ध्रुवं यस्य ज्ञानोपदेशाय दिष्टवान् समीपे उपसंतमपि मां चैतं स्मृत्वा ज्ञानोपदेशार्थं मामादिष्टवान् एतेन भगवन्निरतिशयप्रीतिविष
श्रो३ यत्वमवगम्यते प्रियो हि तेनानि समिति स्मरणात् २१ अतो निरतिशयभगवत्प्रीतिविषयाय तेप्यामयं वर्णयामीति प्रतिजानी
गा४ ते अथेति अथ ते भ[illegible]वल्लीलाः वर्णयामीति संबंधः कथंभूता योगमायोपबृंहिताः प्रयुक्ता [illegible]तियोगमाया सो माया आर्यशक्तिः त
योपबृंहिताः भगवल्लियाप्याश्चर्यशक्त्युपकल्पिताः अंतः संहारः अर्थो मोक्षः विश्वस्य स्थित्युद्भवौ यासां ताः एवंभूता लीलाः यद्व
अर्थशब्दः स्वरूपपरः तस्य अर्थशब्दप्रयोगात् अंतशब्देन संहारो मोक्षश्च विवक्षितः यत्प्रयंत्यभिसंविशंतीति श्रुतेः विश्वस्य स्थि
त्यादयः अर्थः स्वरूपं यासां ताः लीलाः क्रीडाः चेष्टाः आनुपूर्व्यशः अप्यानुसारेण वर्णयामीत्यर्थः यद्वास्विल्लीलादिक्रमेण सर्वाः
२२ अथ मनसश्चिलीलां वर्णयितुं सृष्टेः पूर्वं कारणत्वेनावस्थितवस्तुस्वरूपमाह भगवानिति द्वाभ्यां मिद[illegible]मानंनामरूपविभागा

भवान्भगवतो नित्यं संमतः सानुगस्य च यस्य ज्ञानोपदेशाय मादिशद्भगवान्व्रजन् २१ अथ ते भगवल्लीला योगमायोप-
बृंहिताः विश्वस्थित्युद्भवांतार्था वर्णयाम्यनुपूर्वशः २२ भगवानेक आसेदमग्र आत्मात्मनां विभुः आत्मेच्छानुगतावा
त्मा नानामत्युपलक्षणः २३

चि८१ इदं स्थूलं चिदात्मकं जगदग्रे सृष्टेः पूर्वकाले आत्मनां जीवानामात्मांतः प्रविश्य धारकः विभुः स्वामी
एकः अविभक्तनामरूपसूक्ष्मचिदचिच्छरीरः भगवानेवासीदित्यर्थः स एव भगवानात्मेच्छानुगतावात्मनः स्वस्य इच्छा सिसृक्षा यद्योगिस
कल्पः तस्याः अनुगतौ उन्मेषे सति नानामत्युपलक्षितः देवादिनानानामरूपविषयबुद्धिवेद्यः एवंविस्मिन्काले आसीत् तद्भेदेतः आत्मा
आत्मपर्यंतत्वान्नामरूपविषयमतीनामित्यभिप्रायः एक एव भगवान्कदाचिद्विभक्तनामरूपचिदचिच्छरीरकः कार्यावस्थः नाना चि८४
सएव कदाचिदविभक्तनामरूपविभागानर्हसूक्ष्मचिदचिच्छरीरकः परमात्मा कारणावस्थ इत्यर्थः यद्वा नानामत्युपलक्षित इति छेदः आत्मे
च्छानुगतौ संहारविषयात्मीयसंकल्पोन्मेष इति अनानामत्युपलक्षितः देवादिनामरूपविषयबुद्ध्यनुपलक्षितः कृतः आत्मा
देवादिनामरूपभाक्त्वं तत्र भाव आत्मन एवेत्यर्थः न चैवं विकारित्वप्रसंगः [illegible]नामरूपसंस्पर्शस्येत्यभिप्रायात् अत्रै
कशब्देन स्थूलचिदचिच्छरीरकः परमात्मैवोच्यते तस्यैव स्थूलावस्थाप्रहाणेन सूक्ष्मचिदचिच्छरीरकतयावस्थितत्वस्य कारणं ॥

त्रि२ तामसः

भा. तृ. टी. १८

अहंकारं विभजते वैकारिकः सात्विकाहंकारः तैजसो राजसो राजसाहंकारः तामसस्तामसाहंकारः तस्यैव भूतादिरिति नामान्तरं वैकारिकाहंकारकार्यमाह अहंतत्त्वाद्विकुर्वाणाद्विक्रियमाणाद्वैकारिकात्सात्विकादहंतत्त्वाद्धंकारान्मनोऽभूदुद्भूतं ये देवा दिगादिदेवा अधिष्ठातारो इन्द्रियाणाम् एव विवक्षितानि ये देवास्ते पि वैकारिकात्सात्विकाहंकारकार्यभूता इत्यर्थः कथंभूता देवाः यतो येभ्यः अर्थाभिव्यंजनं शब्दस्पर्शरूपरसादीनामर्थानामभिव्यंजनं उपलम्भो भवति एवंभूता देवा वैकारिकादभूवन्नित्यर्थः ३१ ज्ञानकर्ममयानि ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि च ... तैजसाहंकारस्य ... सहकृतसात्विकोर कार्याणि वेत्यर्थः तैजसस्य वैकारिकतामसयोरनुग्राहकत्वेन पृथक्कार्याभावात्तनुग्राहकत्वेनैव हि तैजसस्य कार्यता अथ तामसाहंकारकार्यमाह तामसः भूतसूक्ष्मादिः भूतानामाकाशादीनां तत्सूक्ष्माणां शब्दादीनां चादिः कारणं एतदेवोपपादयति यतः भूतादेः सकाशादात्मनो ब्रह्मणो लिंगं प्रमापकं शब्दः

हंकारः

वैकारिकस्तैजसश्च तामसश्चेत्यहं त्रिधा अहंतत्त्वाद्विकुर्वाणान्मनो वैकारिकादभूत् वैकारिकाश्च ये देवा अर्थाभिव्यंजनं यतः ३१ तैजसानीन्द्रियाण्येव ज्ञानकर्ममयानि च तामसो भूतसूक्ष्मादिर्यतः खं लिंगमात्मनः ३२ कालमायांशयोगेन भगवद्वीक्षितं नभः नभसोऽनुसृतं स्पर्शं विकुर्वन्निर्ममेऽनिलं ३३ अनिलोऽपि विकुर्वाणो नभसोरुबलान्वितः ससर्ज रूपतन्मात्रं ज्योतिर्लोकस्य लोचनं ३४ अनिलेनान्वितं ज्योतिर्विकुर्वत्परवीक्षितं आधत्ताम्भो रसमयं कालमायांशयोगतः ३५

१७

सततो लिंग ... तः खमाकाशं चाभूदित्यर्थः ब्रह्मणः शब्दैकप्रमाणत्वं शास्त्रयोनित्वाधिकरणे सिद्धं ३२ नभःकार्यमाह कालेत्यादि मायासत्त्वादिगुणसाम्यांशगुणकालात्मेति पूर्वमुक्तत्वात् अंशो जीवः कालादियोगेन हेतुनेत्यर्थः तृतीया कालादियोगेन हेतुना भगवद्वीक्षितं भगवत्संकल्पस्थानविषयं नभो भूत् एवंभूतान्नभसोऽनुसृतमुद्भूतं स्पर्शतन्मात्रं विकुर्वद्विक्रियमाणं सत् अनिलं निर्ममे ऽसृजत् ३३ स्पर्शादुत्पन्नोऽनिलो वायुरपि विकुर्वाणः नभसा नभोगुणेन शब्देन सहितः स्वयं चोरुबलान्वितः अधिकबलयुक्तः बलमपि प्राणमोजः सहः सामर्थ्यपलक्षणं रूपतन्मात्रं ससर्ज रूपतन्मात्रं च लोकस्य लोचनं प्रकाशकं ज्योतिः तेजः ससर्ज ३४ तेजो ज्योतिरनिलेनान्वितं स्पर्शगुणेनान्वितं अनिलेनेति नभसोऽप्युपलक्षणं एवमग्रेऽपि शब्दस्पर्शाभ्यां स्वकारणभूतगुणाभ्यां स्वगुणेन रूपेण चान्वितं ज्योतिर्भगवत्संकल्पविषयं सत् कालमायांशयोगतो हेतो रसमयं रसगुणकमम्भः जलम ... सृजत् भगवद्वीक्षणकालमायांशयोगाः सर्वत्रान्वेतव्याः रसमयमम्भः ससर्जेत्यनेन प्रथमं रसतन्मात्रं ततोऽम्भ इति क्रमो बोद्धव्यः ३५

१८

अथ महदादिक्रमेण सृष्टिं वक्तुं स्वशरीरभूतजीवानुप्रवेशेनाहितस्य सृष्टिसामर्थ्याया एव प्रकृतेर्महदादिरूपेण परिणामः मनुके
वलायाः इत्याह कालवृत्त्यांकल्पानुगुणवृत्तिमत्यामत एव गुणमय्यां साम्यानापन्नसत्त्वादिगुणोद्रेकयुक्तायां मायायामात्मभूतेन शरीरभू- भा २
तेन पुरुषेण जीवेन वीर्यं सिसृक्षासामर्थ्यं स्वयं वीर्यवान् [illegible] धत्त संपादितवान् मायाभिमानि स्वात्मकजीवानुप्रवेशेन मायां
सृष्ट्युन्मुखामकरोदित्यर्थः २६ महतः सृष्टिमाह तत इति तत आहितवीर्यात्कालचोदितात्कालक्षोभितादव्यक्तात्स्वात्मकादव्यक्तात्स्वय-
मेव विज्ञानात्मा विज्ञानं यस्तं तत् तेइत्युक्तजीवांतरात्मा आत्मदेहस्थं स्वशरीरभूतप्रकृतिगतं विश्वं कार्यजातं व्यंजयन्प्रका[…]
काशयितुमित्यर्थः प्रलयावसाने बोधांतमोनुदः तमः शब्दवाच्यसूक्ष्मावस्थप्रकृतिप्रेरकोभगवान्महत्तत्त्वमभवदित्यर्थः प्रकृतिपु-
रुषशरीरकोभगवानेव महत्तत्त्वशरीरकोभूदित्यर्थः २७ महतोहंकारसृष्टिमाह द्वाभ्यां सोपीति सोपि समहानपि अंशगुणकाला-

कालवृत्त्यां तु मायायां गुणमय्यामधोक्षजः पुरुषेणात्मभूतेन वीर्यमाधत्त वीर्यवान् २६ ततोभवन्महत्तत्त्वमव्य-
क्तात्कालचोदितात् विज्ञानात्मात्मदेहस्थं विश्वं व्यंजंस्तमोनुदः २७ सोप्यंशगुणकालात्मा भगवद्दृष्टिगोचरः आत्मा-
नं व्यकरोदात्मा विश्वस्यास्य सिसृक्षया २८ महत्तत्त्वाद्विकुर्वाणादहंतत्त्वं व्यजायत कार्यकारणकर्त्रात्मा भूतेंद्रियमनो-
मयः २९

त्मा अंशो जीवः अंशो नानाव्यपदेशात् ममैवांशो जीवलोके जीवभूतः सनातन इति प्रयोगात् गुणाः सत्वादयः कालश्च तेरूप-
लक्षितः आत्मस्वरूपं [illegible] यस्य सः कालवश्यो गुणमयो जीव गर्भ इत्यर्थः भगवद्दृष्टिगोचरः भगवतो दृष्टिः संकल्परूपज्ञा-
नं तस्य गोचरः विषयः आत्मा परमात्मकः सो ह्यात्मेति सामानाधिकरण्यं शरीरात्मभावनिबंधनं एवंभूतो महानस्य विश्वस्य
सिसृक्षया अहंकारादीनि स्रष्टुमिच्छया आत्मानं स्वात्मानं व्यकरोत् विकृतमकरोत् २८ महत्तत्त्वादिति विकुर्वाणाद्विक्रियमाणान्महतत्त्वादहंत-
त्वमहंकारः अजायत उत्पन्नोभूत् कथंभूतः कार्यकारणकर्त्रात्मा कार्यं शरीरं कारणमिंद्रियं तयोः कर्त्रात्मा कर्तृस्वरूपः कारणभू-
त इत्यर्थः नहि इयतोस्ति भूतेंद्रियमनोभवः भूतस्यमादिति भवः तेंद्रियमनोमय इति पाठे भूतेंद्रि[…]पंच परिणामस्वभाव इत्यर्थः २९

भा० त० टी०
२०

नन्वेतेन नानामहदादीनां तत्वानामुपपत्तिः न चाधिष्ठातृत्वमुपपन्नमिति शंक्यं अंडसृष्ट्यनंतरं चतुर्मुखसमस्तमात्मादिदेवं दी नामंडस्रष्टुः प्राक्तनैरुपपत्तेः न चलत्वशरीरकपरमात्मनः स्तोत्रत्वमुपपन्नमिति वाच्यं स्तुत्यस्तोतृत्वयोरेकस्मिन्नसंगतत्वा त् अलक्षणः स वेपितानत्वेन सर्वविकाराश्रयत्वेपि सद्वारकत्रिकाराश्रयत्वेन तस्य जीवद्वारेव स्तोतृत्वाद्युपपत्तेः परमात्मा काशवर्त्मि न्यस्तत्वाभिमानिदेवास्तत्वान्यधिष्ठाय तुष्टुवुः इतं च तुः षोडश पंचशक्तिभिः तत्र परमाकाशेतत्वाभिमानिदेवतास्थि त्वकमात् यद्वा पुरुषेणालम्भूतेन वीर्यमाधत्त वीर्यवानिति जीवद्वारेव परमात्मक [illegible] देवा तत्वेष्वनुप्रवेशाकथ्यतां त्परमात्मात्मकाः स्वांशेषु सचिवजीवद्वारेव शसंपादितस्तुतिसामर्थ्यानां तत्वानां स्वस्वकार्यकारित्वादुक्तत्वे [illegible] पपन्ने स्त [illegible] अथ मंगलाचरणत्वमासो पास्यत्वं मोक्षप्रदत्वगुणविशिष्टं प्रणमंति नमामइति हे देव भगवन् तव पदारविंदं नमाम नमस्कु र्मः [illegible] कथंभूतं पदारविंदं प्रपन्नतापोपशमातपत्रं प्रपन्नाः शरणागतास्तेषां ये तापा

देवा ऊचुः नमाम ते देव पदारविंदं प्रपन्नतापोपशमातपत्रं यन्मूलकेता यतयोंजसोरुसंसारदुःखं बहिरुत्क्षिपंति ३८
यत्तेयदस्मिन्भवईशजीवास्तापत्रयेणाभिहता न शर्म आत्मल्लभंते भगवंस्तवांघ्रिच्छायां सविद्यामत आश्रयेम ३९

आध्यात्मिकाधिदैविकाधिभौतिकस्तेषामुपशमे निहरणे आतपत्रं छत्रमिव वर्त्तमानं अनेन तापत्रया [illegible] तु ग्रोपास्यत्वमु क्तं यन्मूलकेताः पदारविंदमूलमेव केतनमाश्रयो येषां ते यतयः मनोनियमनेयत्नमानाः अंजसा सुखेन संसारदुःख [illegible] बहिरुत्क्षिपंति त्यजंति संसारिकदुःखस्य [illegible] श्रमुशो निवृत्तिप्राप्तिवि रोधित्वात्सुखस्यापि दुःखशबलत्वात् ३८ एतद्व्यतिरेकमुखेनापि कथयंतो नमस्कुर्वंति यत्त इति हे ईश अस्मिन्भ वे संसारे यत्ते यत् भगवत्पदांबुजं विना भगवत्पदारविंदोपासनं विना ता यत्त्रयेणाभिहताः जीवा आत्मन्नात्मनि संबोधनं वा शर्म सुखं न लभंते अतो न्वयव्यतिरेकाभ्यां भवत्पदांबुजोपासनस्यैव तापत्रयनिवृत्तिपूर्वकमुक्तिसाधनत्वाद्धेतोः हे भग वन् तवांघ्रिछायां विद्यां विद्यामुक्त्युपायभूतोपासनात् सहितामंघ्रिछायां मुक्तिमाश्रयेम उपासनानिवृत्त्या मुक्तिं प्राप्नुवाम
सं०
स्य थः ३९ ननु कथं मत्पदांबुजोपासनमात्रेणात्यंतिकसांसारिकसुखदुः

अनेन मोक्षप्रदत्वमुक्तं ४

प्रसाद्य जीवं [illegible] नं च हरेः [illegible] कृष्णाप्युपाधिभे देनेदमहं द्रादिव [illegible] पत्नकापाम [illegible] शादिवद्वित्वस्या वहितस्य सम [illegible] पुरुषस्य [illegible] तत्वो [illegible]

स्तो० नाद०

चोभूपस्य [illegible] रूपाद्वैतविव हितेः

राम०
२०

२०

नरो नरभूतं २

ततश्चांभो ज्योतिषा ज्योतिः स्पर्शांशैरनुसंसृष्टमनुसंहितं ब्रह्मसंकल्पविषयं कालादियोगतो हेतोः गंधगुणां महीमाधात्तस्य
मंगं धत्त तो महीं चाधात्ससर्ज ३६ भूतानामिति हे भव आविदुर नभआदीनां भूतानामयोपयधस्त ... [illegible] ततः परानु
संसर्गात् कारणद्वारा गुणानुवृत्या यथासंख्यं गुणानाविदुः ... एकगुणः द्वितीयस्य द्वौ तृतीयस्य त्रयः चतुर्थस्य चत्वारः च

पं

६७ मस्य पंच गुणानिति विदुः ३७ अथैतानि पृथिव्यादिमहत्तत्त्वांतानि तत्त्वानि परस्परं पंचीकरणरूपसंमेलनाभावात् ब्रह्मांडर
चनायामसमर्थानीश्वरं तुष्टुवुरित्याह एते इति ननु भगवद्दृष्टिगोचरः भगवद्वीक्षितं नभः एवं वीक्षितं ब्रह्मवीक्षितमित्ये
षां तत्त्वानां भगवत्संकल्परूपज्ञानविषयत्वोक्त्या सिद्धिसामर्थ्यावगमात्पुनः स्तुतिप्रीतपरमेश्वरानुप्रवेशसामर्थ्याच्चि
तत्त्वन्यसामर्थ्ये ति विरुध्यते न चान्य एव ब्रह्माण्डेनुप्रवेशौ वक्तुं शक्यं विभोरीश्वरस्य ज्ञानेनैवानुप्रवेशस्य वाच्यत्वात् तावतैवतेषां शरीरत्वो

ज्योतिषांभोनुसंसृष्टं विकुर्वद्ब्रह्मवीक्षितं महीं गंधगुणामाधात्कालमायांशयोगतः ३६ भूतानां नभआ
दीनां यद्भव्यावरावरं तेषां परानुसंसर्गाद्यथासंख्यं गुणान्विदुः ३७ एते देवाः कला विष्णोः कालमायां
शलिंगिनः नानात्वात्स्वक्रियानीशाः प्रोचुः प्रांजलयो विभुं ३८ ॥ ॥ ॥ ॥ ॥ ॥

पप्रभे आधेयत्वविधेयत्वशेषत्वानां शरीरत्वनिर्वाहकत्वं ... स्य पृष्ठ्यं आधेयं ... विधेयं शेषं च तत्तस्य श
रीरमिति हि शरीरलक्षणमेवं पूर्वं महदादीनां स्वस्वकार्योत्पादनसामर्थ्यं वि हि ईश्वरप्रवेशस्योक्तत्वे पो भि संचः संहत्यांडो
नु२ त्पादनसामर्थ्यापादकानुप्रवेशस्यानुक्तत्वेनैवंविधानुप्रवेशाय स्तुतेल ततः प्रीतपरमात्मनोनुप्रवेशस्य ततोऽडसृष्ट्यो
पपत्तेः एते महदादयो देवाः हे वत्स भगवतः शरीरत्वाद्देवाः इत्युक्तिः यथा हंताहमिमास्तिस्रो देवता इत्यादौ कालमा
यांशलिंगिनः कालमायांशरूपाणि लिंगानि येषां ते इति कालमायांशलिंगी तस्य कालमायाजीवविशिष्टस्येत्यर्थः विष्णोर्भ श३
गवतः कलाः शरीरभूता नानात्वात्पृथग्भूतत्वात् — — परस्परसंबंधाभावात् स्वक्रियायामनीशा असमर्थाः संतः विभुं भग
वंतं प्रांजलयो बद्धांजलयः प्रोचुः तुष्टुवुः ३८ ॥ ॥ ॥ ॥ ॥

त१

न४

अथ भगवतः भक्तानुग्राहकत्वं स्मारयंतः आहुः विश्वस्येति हे ईश यत्ते पदांबुजं स्वपुंसां स्वभक्तानामभयं प्रयच्छति निरंतरं स्म तं भावेन कृष्णानुस्मरणं यच्छ अभयं न विद्यते भयं संसारो यस्मात् तथाभूतं स्मृतं प्रयच्छति इदरानिर्गनिर्वर्तयतीत्यर्थः तेन तव पदांबुजं वयं सर्वे शरणं व्रजेम कथंभूतस्य ते विश्वस्य जगतः सर्गस्थितिसंयमार्थे सृष्टिस्थितिसंहारार्थं कृतावतारस्य कृतानेकरूपा नुप्रवेशस्यावतारस्य [illegible] इदमेव हि स्वभक्तानुग्राहकत्वं यत्प्रणमनाभ्र हतिनिवर्तकमनिशं निरंतरं शरणं द

न५ साधनं भूत्वा नुस्मृति निर्वर्तकत्वं ५२ स्वभक्तानां स्मृतं प्रयच्छतीत्यनेनाभक्तानमनुग्राहकत्वं सूचितं तत्प्राप्ते पास्यंतः शरणं व्रजंति यदिति सानुबंधे अनुबध्यंते इत्यनुबंधाः पुत्रदाराद्यः पात्रवस्त्रादयः देहानुबंधिनो गृहानुबंधिनश्च तैः सहिते असति अचेतनवति नामरूपे देहगेहे समाहारद्वंद्वेकत्वं ममेदं देहो ऽहं मनुष्यो ऽहं इत्यूढः निरूढः दुराग्रहः दुरभिमानो येषां तेषां पुंसां पुर्यां शरीरे हृदय गुहायामित्यर्थः वसतोपि वा सत्याति रेका पुरीमधितिष्ठतोपि नेतव हे भगवन् यत्पदांबुजं सुदूरमति विप्रकृष्टं [illegible] तं

विश्वस्य जन्मस्थितिसंयमार्थे कृतावतारस्य पदांबुजं ते व्रजेम सर्वे शरणं यदीश स्मृतं प्रयच्छत्यभयं स्वपुंसां ५२ यत्सानुबंधे सति देहगेहे ममाहमित्यूढदुराग्रहाणां पुंसां सुदूरं वसतोपि पुर्यां भजेम तत्ते भगवन्पदाब्जं ५३ तान्वा असद्वृत्तिभिरक्षिभिर्ये परा हृतांतर्मनसः परेश अथो न पश्यंत्युरुगाय नूनं ये ते पदन्यासविलासलक्ष्म्याः ५४

पदांबुजं शरणं व्रजेम सर्वे ५३ अहंममाभिमानग्रस्तचित्तानां सत्संगतिरेव दुर्लभा कुतः सत्संगति शुश्रूषा चापि प्रसन्नित्यगणाम भगवत्पदांबुजोपासनं निवृत्तिः स्यादित्याहुः तानिति हे परेश ब्रह्मादीनां ईशानियंतः असद्वृत्तिभिरचेतनपरिणामरूपशब्दादिप्रावण्येरक्षिभिरिंद्रियैः पराहृतं हृतमपहृतमंतर्मनो येषां ते ये लोकास्तांस्त्वं पश्यंति वेदप्रसिद्धं केनेप पश्यंति इत्यत आहुः हे उरुगाय बहुगेय ये तव पदन्यासविलासलक्ष्म्याः पदन्यासः स्वात्म समर्पणं तस्य विलासो विलसितं येशमाहयोगुणास्तेषां लक्ष्मीः संपद् येषां ते भगवत्पादारविंदात्मसमर्पणविलसितश्रमादिगुणसंपत्समृद्धा इत्यर्थः तत्संपतिततीयांतपाठे [illegible] तयोपलक्षिता इत्यर्थः अपोऽत्तवत्वेन पश्यंति नवीसंतेकिमुततत्संगतिं न कुर्वंतीति पथ इति पाठे अस्यानित्यं आहन्तंश्च पथः मार्गाद्भ्रष्टान्न पश्यंतीत्यर्थः तल्लक्ष्मीरिति द्वितीयांतपाठे पथ इति पाठे च अपदन्यासविलासलक्ष्मीनिति पदच्छेदः पदन्यासविलासलक्ष्मीरहितानतएव पथः मार्गाद्भ्रष्टान् ॥ ॥

21

राम.
२१

खनिवृत्तिरुच्यते पतत्सु सुखदुःखोत्पादकपुण्यपापरूपकर्मसु गामनिष्ठत्वादिसाधनं कार्यान्तरोपासनस्यैवात्यंतिककर्मनिरासक
त्वमपीति सूचयंतस्तद्भगवत्पदांबुजं सेव मुमुक्षूपासनादुपमापितमेव शरणं गता इत्याहुः मार्गन्तीति तीर्थपदस्तवत्पदांबुजं वयं प्र
पन्नाः शरणं गता इत्यन्वयः तीर्थपदः पवित्रपादस्य त्वाश्रितदुरितनिवर्तकपाद [illegible] स्येति यावत् कथंभूतं त्वत्पदांबुजं पदं घमर्षणिसरिद्
रायाः अघमर्षणि पापक्षपणकानि उदकानि यस्यास्तां समीक्षमाणेवरायाः श्रेष्ठायाः गंगायाः परं पदं मुख्यमुत्पत्तिस्थानं ।
एतेन समस्तजनदुरितनिवर्तकसरिद्वरायाः एवं दुरितनिवर्तकत्वात् तदुत्पत्तिस्थानभवत्पदांबुजस्योदकस्य दुरितनिवर्तकत्वं सुतरां
प्रसिद्धं यथा पुष्करपलाशे आपो न श्लिष्यन्ते एवमेवंविदि पापं कर्म न श्लिष्यत इत्यादिश्रुतिरत्रानुसंधेया उपासकानामपि
कपुण्यपापनिवृत्तिपूर्वकनिरतिशयसुखप्रापकत्वादेव त्वत्पदांबुजं ऋषयः उपासत इत्याहुः मार्गन्तीति तेनैव मुखपद्मनीडैर्मु

मार्गन्ति यत्ते मुखपद्मनीडैश्छन्दःसुपर्णैर्ऋषयो विविक्ते । यस्याघमर्षोदसरिद्वरायाः परं पदं तीर्थपदः प्रपन्नाः ॥ ५० ॥ यच्छ्रद्धया
श्रुतवत्या च भक्त्या संमृज्यमाने हृदयेवधार्य । ज्ञानेन वैराग्यबलेन धीरा व्रजेम तत्तेंघ्रिसरोजपीठं ॥ ५१ ॥ ॥ ॥ ॥

खकमलनिलयैर्मुखकमलोत्पन्नैरिति यावत् [illegible] तस्य त्वया एतस्य महतो भूतस्य निःश्वसितमेतद्यद्
ऋग्वेद इति श्रुतेः भगवन्मुखकमलोत्पत्तिस्थाने छन्दःसुपर्णैर्वेदपक्षिभिर्नीडं शब्दं नाद्यवजातपक्षा इति न्यायेन साम्पदोधं यथा नीडे
जातपक्षाः पक्षिणो नीडादुड्डीना इतस्ततः परिभ्रम्य पुनस्तत्रैव प्रविशन्ति तथा वेदा अपि त्वन्मुखादुद्गतास्त्वय्येव पर्यवसन्तीत्यभिप्रा
यः एवंविधैश्छन्दःसुपर्णैः विविक्ते निःसंगमनसि ऋषयः मार्गन्ति परिशीलयन्ति वेदोक्तकर्मज्ञानोपासनाद्यध्वयोगे यथा कथ्यं
न्ति तत्पदारविन्दं वयं प्रपन्ना इत्यर्थः ५० ननु कथं मार्गे संपद्यते इत्याहुः यच्छ्रद्धयेति श्रद्धया श्रवणमननादिसाधनेकीर्तितत्व
रविशेषः श्रुतवत्या श्रुतिविहितपंचमहायज्ञादिरूपासंगकर्मयोगयुक्तया भक्त्या उपासनया वैराग्यं शब्दादिष्वनासक्तिः तदेव
बलं यस्य तेन ज्ञानेन प्रकृतिविविक्तात्मज्ञानेन ज्ञानकर्मयोगानुगृहीतभक्तियोगेन संमृज्यमाने शोध्यमाने हृदये अवधार्य धारणा
विषयं कृत्वा धीरा जितेन्द्रिया यावत्वेषपं तिनतेंघ्रिसरोजपीठं शरणं व्रजेम अनेन मार्गणप्रकार उक्तः ५१ ॥ ॥ ॥ ॥ ॥ ॥

भा० तृ० टी०
२२

तदेवं स्तुत्वा ऽऽत्मस्वाभिप्रायमाविष्कुर्वन्ति तदिमादिभिश्चतुर्भिः नोऽस्माकं शरणागतत्वादेतोः हे आद्य परम कारण तत्तेन वयं त्वत्संबन्धिनो
वयं लोकमिसिसृक्षया लोकान् स्रष्टुमिच्छया त्रिभिः सत्त्वादिभिर्गुणैः स्वैः आत्मन्याधारभूतैः सृष्टाः आत्मभिः स्मेति पाठे आत्मभिः शरीर
भूतैस्त्रिभिरित्यर्थः अनुसृष्टाः महदाद्यनुक्रमेण सृष्टाः [illegible] सर्वे वियुक्ताः परस्परं मसंमिलिताः तेतु अंस्वविहार
तंत्रं स्वाधिकारनिर्वहणं प्रति [illegible] सर्वे प्रत्यवहर्तुं तव लीलोपकरणब्रह्माण्डरचनारूप [illegible] प्रत्युपकरणार्पणं न शक्नुमः ४७ प्रतिह
र्तवे इत्यस्य तुमर्थं प्रपंचयन्ति यावदिति हे अज काले काले स्वस्वकाले तव बलिमाराधनं यथाहराम समर्पयाम करवामेति पाठः वयं
च भगवत्क्रीडोपकरणभूता वयं यथान्नं शब्दादिभोग्यं यथाहराम अनुभुंजामः यथा चेमे लोकाः उभयमाणादेवादयो लोका उभयेषां
ज्ञानकर्मेन्द्रियाणां बलिं शब्दादीन् गंतव्यादींश्च विषयान् हरंतः उपस्थापयन्तः अन्नमेति फलमनुभवंति तत्प्रकारं न शक्नुम इत्यर्थः

तत्ते वयं लोकसिसृक्षयाद्य त्वयानुसृष्टास्त्रिभिरात्मभिः स्म सर्वे वियुक्ताः स्वविहारतंत्रं न शक्नुमस्तत्प्रतिहर्तवे ते ४७ यावद्ब
लिं तेऽज हराम काले यथा वयं चान्नमदाम यत्र यथोभयेषां त इमे हि लोका बलिं हरंतोऽन्नमदंत्यनूहाः ४८ त्वं नः सुराणामसि सान्व
यानां कूटस्थ आद्यः पुरुषः पुराणः त्वं देव शक्त्यां गुणकर्मयोनौ रेतस्त्वजायां कविमादधेऽजः ४९ ॥ ॥ ॥ ॥ ॥

यावत्कदेव धारणे न शक्नुम इति यावल्लशक्नुमः एतेत्यर्थः ४८ एवं प्रसंगं दृष्ट्वा वसामर्थ्यमावेद्याधुना तत्सामर्थ्यप्राप्त्युपायं तत्त्व
मेव तत्प्रदानसमर्थ इत्याहुः त्वं न इति सान्वयानां सकार्याणां कारणेन अस्माकं त्वमाद्यः कारणभूतोसि आद्यत्वेन विकाराश्रय
त्वमाशंक्याहुः कूटस्थः निर्विकारः तर्ह्याद्यत्वमयुक्तमित्याशंक्योक्तं पुरुष इति पुरि शेते पुरुषः तदिदं तदा तत्तया स्थितः नन्वुत
इस्तगतविकाराश्रय इत्यर्थः तस्यापि कारणांतरमाशंक्योक्तं पुराण इति सर्वापेक्षया त्वमेव पुराणः न तु त्वदन्यः कश्चित्पु
राणमस्तीत्यभिप्रायः एवंभूतोऽजस्त्वं हे देव गुणकर्मयोनौ शब्दादिगुणग्राहकज्ञानेन्द्रियाणां [illegible] कर्मेन्द्रियाणां च
योनौ कारणभूतायां शक्त्यां स्वोपाधिरूपायां [illegible] विग्रहणभूतायामजायां प्रकृतौ रेतः सर्वसामर्थ्यं किं विंसमष्टिपुरुषं ब्रह्मा
णं वा दधे निहितवान् पुरुषेणोत्तमभूतेन वीर्यमाधत्त वीर्यवानिति श्रुतेरुक्तत्वादिति ४९ ॥ ॥ ॥ ॥ ॥

राम
२२

मार्गेति यतेइ इति एवं प्रस्तुता भगवदुपासका न पश्यंतीत्यर्थः त्वावेत्यपि पाठः अस्मिन्पाठे ममाहमित्युरुदुराग्रहाणां पुंसां भगवत्पदां
बुजं सुदूरमित्युक्तं तेषामनुपासनाधिकृतानां सात्विकत्वं स्यादित्यात्रं कार्यमुपासनाधिकार एवनाव दुर्लभ इत्याह त्वामिति अस्मि
न्पाठे अवाहुतिप्रथमांता आहारः ये सद्वृत्तिभिः पराहूता तस्मै न सोत्त एव सन्मार्गभ्रष्टाये ते त्वां न पश्यंति नोपासते तर्हि के उपासत इ
त्यत आह येइति त्वत्पदन्यासविलासलक्ष्म्यास्तु पश्यंतीत्यर्थः लक्ष्म्या इति पंचम्यंत पाठे पथ्यादन्यस्य विक्षेपाः यदन्यासविलास
लक्ष्मी रूपा तयो भवान पश्यंति अस्मिन्पाठे अथो इति पाठश्चु पगमेलक्षणाः भक्ताः अथो उत एव न पश्यंतीत्यर्थः ४४ एवमनु
२६ ग्राहकत्वात्तु ग्राहकत्वेऽज्ञे अथात्तु तद्विषये अपि भगवत्कथाश्रोहरणां समाधिपरे भक्तो कथमीहर्दुर्भ्यां पानेनेति हे देव ते कथारू
धायाः अमृततुल्यकथायाः पानेन श्रवणेन सुष्टु भक्त्या प्रवृद्धमात्मकज्ञानेन निशदाशयाः निर्मलांतःकरणाः ज्ञानेनोपायो
त्वां ति प्राप्ति [illegible] वधुकपुण्यपापनिवृत्तिरूपा भवति [illegible] वैराग्यसा [illegible] वैराग्येण साधुभूतं वैराग्यं नाम निष्कामपर्यायं कामेषु

पा पेन ते देव कथासुधायाः प्रवृद्धभक्त्या विशदाशया ये वैराग्यसारं प्रतिलभ्य बोधं यथांजसान्वीयुरकुंठधिष्ण्यं ४५ तथा
२२ ऽपरे चात्मसमाधियोगबलेन जित्वा प्रकृतिं बलिष्ठां त्वामेव धीराः पुरुषं विशंति तेषां श्रमः स्यान्नतु सेवया ते ४६ ॥ ॥ ॥ ॥

न्नात्म सत्वरूपं कामानभिष्वंगत्वं इदं च विवेकादीनामप्युपलक्षणं विवेकादिसाधनसमकानुगृहीतं बोधं तैलधारावदविच्छिन्न
स्मृतिसंतानरूपं प्रपस्सतापन्नं प्रेमात्मकं ज्ञानं प्रतिलभ्य अंजसा सुखेनाकुंठधिष्ण्यं वैकुंठलोकं साहिगुणादिभिः प्रतिहतं वैकुंठाख्यं मन्दिराख्यं २२
स्थानं यथान्वीयुः प्राप्नुयुः ४५ अन्ये परे चात्मसमाधियोगबलेनात्मनोऽतः करणस्य यः समाधिः स्थैर्यं स एव योगः उपायस्तस्य
बलेन यद्वा आत्मनः परमात्मनः यः समाधिः परमात्मविषयकः समाधिः स एव योगस्तस्य बलेनानध्यादनेन परिपक्वभगव
त्समाधिना बलिष्ठां दुस्तरां प्रकृतिं भगवन्मायां जीत्वा तीर्त्वा धीराजितेंद्रियाः पुरुषं परमपुरुषं त्वामेव विशंति प्राप्नुवंति तथापि तेषां
श्रमः स्यात् अष्टांगयुक्तभक्तियोगनिष्ठानां श्रमः स्यात् एकैकस्याङ्गस्य दुःसंपाद्यत्वात् नतु सेवया ते कथाश्रवणादिरूपत्व से
वयोपलक्षितानां तु न श्रम इत्यर्थः ४६ स५

त्मभमा४

भा. टी.
२३

तिप्रतिपन्नार्थत्वात् नच महदादीनां केवलाचेतनपरिणामरूपत्वविशिष्टोपादानत्वासिद्धिः प्रकृतिपुरुषविशिष्टपरमात्मन
उपादानत्वभाषावस्थाविशेषाश्रयत्वं ह्युपादानत्वमितिवाच्यं विशिष्टोपादानत्वेपि त्रयाणां मंसांकर्येणकार्यत्वाभ्युपगमेन
विरोधाभावात् अचेतनमचेतनं प्रति चेतनश्चेतनं प्रति ईश्वर ईश्वरं प्रति कारणं इत्यंगीक्रियते तत्राचेतनस्य कार्यता महदादिरूप
पर्यवसाना तस्याश्रयतारूपास्वरूपान्यथाभावलक्षणा चेतनस्य कार्यता संकुचितज्ञानस्य तद्विकासरूपा स्वभावान्यथाभाव
लक्षणा सैवास्मिन्नध्याये प्रतिपादयिष्यते अत्रापि अधस्तनस्याभित प्रकीर्तितायतनानि चेष्टि उपक्रम्य जीवसंघातसंश्लिष्टस्य
समष्टिपुरुषस्य चतुर्मुखस्य वागादीन्द्रियेभ्यः सृष्टिभूतानां देवतानां नाभिंद्वितोत्पत्तिं चानुवर्ण्य तान्नित्यं चाभिधाय एते वर्णाः स्वध
र्मेण यजन्तिस्वगुरुं हरिं श्रद्धयात्मविशुद्ध्यर्थं यज्जाताः सह वृत्तिभिरित्यप्रलपदद्वयाभ्यां संकुचितज्ञानानामचेतनप्राणानां जीवा

इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे विदुरमैत्रेयसंवादे तत्त्वोत्पत्तिर्नाम पंचमोध्यायः ५ ॥ इति तासां स्वश
क्तीनां सतीनामसमेत्य सः प्रसुप्तलोकतंत्राणां निशाम्य गतिमीश्वरः १ ॥ ॥ ॥ ॥ ॥ ॥ ॥

स्य५

23

नां भगवदाराधनोपयुक्तक रणकलेवरोत्पत्तिद्वारा विज्ञानविकासरूप [illegible] कार्यता ह्यभिधास्यते कार्यावस्था चेतनाचेतन
[illegible] नियमनरूपाहारकावस्थाश्रयता चेतनगतकार्यतानिर्वाहकत्वरूपा सहारकावस्थाश्रयता चेत्युभयविधावस्था
श्रयते श्वरस्यानुप्रवेशश्चेतनाचेतनसामानाधिकरण्यादिभिरस्मिन् शास्त्रे बहुधा प्रतिपाद्यते अतोस्मिन्नध्याये चेतन
नपरिणाममपरं परामात्रमभिहितमिति ५० इतित्तृतीये पंच एवं निवेदितहार्दानां तत्त्वानामन्तः प्रवेशेनाहितसृष्टिसामर्थ्या
नां ब्रह्माण्डसृष्टिजनसमष्टिपुरुषचतुर्मुखोत्पत्तिं तत्समष्टीन्द्रियादिभ्यो व्यष्टीन्द्रियोत्पत्तिप्रकथ्यते षष्ठेनाध्यायेन तत्र तावदु
संहतानां परमात्मानुप्रवेशेन सृष्टिसामर्थ्यमाह इतीति त्रिभिः ईश्वरो भगवानित्युक्तरीत्या समेत्यामिलित्वा सतीनां वर्तमाना
नां स्वशक्तीनां यस्यपाल्यचीशरीरस्य सच स्कः शरीरस्यात्मा शरीरं इत्यादि प्रकारेण शरीरभूतानां प्रसुप्तमनुद्बुद्धं लोकतंत्रं
लोकरचनासामर्थ्यं यासां तासामसचे तनप्रमुखमहदादितत्त्वानां गतिं स्थितिं निशाम्य दृष्ट्वा गतमाविशदित्युत्तरेणान्वयः १

राम.
२३

ततइति ततस्तस्मान्नैव परमकारणत्वात् सम्प्रमुख्याः समष्टिपुरुषप्रभतयो वयं तच्छरीरभूता वयं यद् येपदं यं विभू विमतानि किं ते कार्यं सर
वामसृष्टिमिति चेन्न अहो तर्हि नोऽसमर्थत्वं क्रियार्थे सम्यग् यं स्विच चक्षुः स्वाधिकारानुरूपं ज्ञानं शक्त्या सामर्थ्येन सह यदनुग्रहाणां इति
यस्यानुग्रहे येषां शत्यधिकरणे बहुव्रीहिः यस्य तवानुग्रहभाजामस्माकं देहीत्यर्थः यद्वाऽनुग्रहत्तेयेन तानुग्रहाः संसारिणां फलानि
नेनानुग्रहा हकतयानुगृहीताः तेषां नः क्रियार्थे स्वस्वडाहं यच्चु स्वर्णानंतहेहीस्यर्थः अत्रेदं तत्त्वं पुरुषेणात्मभूतेन वीर्यं माधत्तवीर्यवान् रेतः
स्वजायां कविमार्ष्टधीजइति परमात्मकसमष्टिपुरुषसंसृष्टो मायामहदाद्यारंभकत्वमवगम्यते [illegible] महदादिरूपा अव्यक्ताः अचेतनस्ये
तावस्या विशेषाः तत्रावखंडिता या एव मायाः प्रदेशभेदेन महद्रूपत्वेन परिणामः एवं महतोऽप्यखंडितप्रदेशभेदेनाहंकाररूपपरिणामः
एवमहंकारादिष्वपि [illegible] नानुक्रमेण महदादीनामुत्तरोत्तरकार्यरूपपरिणामः तथा प्रत्युत्तरोत्तरकार्यरूपेणाप्यन्तस्यापि मह
हदादेः परिणतत्वान्महदादीनां पृथक्स्थित्यनुपपत्त्या पृथिव्यप्सु प्रलीयते इत्यारभ्य महान् चाक्षेत्ने लीयते इत्यंतेन लयश्रवणं विरुध्यते

ततो वयं समग्रमुख्याय दृष्टेर्विभूर्विमात्मन्नखामकिंते त्वं नः स्वचक्षुः परिदेहि शक्त्या देव क्रियार्थे यदनुग्रहाणां ५० ॥

अयमेव हि तत्पः यत्पूर्वपूर्वावस्थापन्नस्य उत्तरावस्थितेन इद्योगेन तदेकदेशस्योत्तरोत्तरावस्थाप्रहाणेन संश्लेषः एवं च पंचीकरणोप
पत्तिः अन्यथा पृथक्त्वाना मभावादनुपपन्नं स्यात् एवं च महतत्वा [illegible] दिपृथिवीत्वपर्यंतावस्थापन्नस्य प्रधा
नद्रव्यस्य परमात्मात्मकसमष्टिपुरुषद्रव्यानुप्रवेशेन परमात्मशरीरत्वव्यपदेशउपपन्नः कार्यावस्थ कारणानुस्यूतद्रव्य
स्यैकेन तत्रैवानुप्रवेशमात्रेण यस्य पृथिवी शरीरमित्यादीनामुपपत्तेः ननु पृथिवीत्वाद्यवस्थास्वनुप्रवेशउपपन्नः चेतनस्य
अक्षरशरीरमित्येतावतैव महदादिपृथिव्यंतानां शरीरत्वसिद्धेः पृथक्पृथक् यस्य पृथिवी शरीरं यस्यापः शरीरमिति पृथिव्यादीनां शरीर
त्वकथनं व्यर्थमिति वाच्यं परस्परमवस्थानामवस्थावतोऽभेदेऽपि व्यवस्थापनं [illegible] कत्वा सर्वावस्थाद्रव्यस्य परमात्म श
रीरत्वमेव ननु वैशेषिकमतरीत्या कार्यकारणयोर्भिन्नद्रव्यत्वेनाशरीरत्वमि ॥ ॥ ॥ ॥ ॥

संघातमनः आरोपेंद्रियात्मकशरीरवत्वं न चतुर्आदिशरीरभकशरीरवत्वाभिः आदीनांसमष्टिपुरुषत्वशंका[illegible] माद्‌ताबापः पुरुषवत्त्वसोभवति तदंतरप्रतिपन्नैरं हतिसंपरिष्वक्तः प्रभ्रानिरूपणाभ्यां शरीरंपदुपादभेयवापु[illegible] स्वर गहीत्वे तानसर्वानि गायुगंधानि गाशपादिसादिस्फतिसत्त्वसमस्तादिप्रामाण्येन मनआदींद्रियविष्णुतेषाभावेनापि आदिशरीरशर्णा तदारंभकत्वाभावात् नदिंद्रियाद्यधिष्ठानमात्रत्वात् ६ एवं समष्टिपुरुषोत्पत्तिमभिधाय यास्मा समष्टिपुरुषशरीराद्यास्थिशरीरेंद्रियाणां उत्पत्तिं च संस्थावदस्य समष्टिपुरुषत्वेनदन्त्करणभो[illegible] विषयरूपेणत्रिधा विभागंकरणं शरएकादशधा विभागस्वकर्तृकमाह सइति विश्वसृजां महदादीनां गर्भः आपस्तरूपः देवभगवत्संकल्पः कर्मात्मशक्तिः कर्मरूपाआत्मनांजीवानांशक्तिः अविद्याकर्मसंज्ञान्यान तृतीयाशक्तिरिष्यतइत्युक्तेः तद्वानित्यर्थः यद्वा देवं भगवत्संकल्पः कर्मजीवानां कर्मआत्मनोजीवाः

सवैविश्वसृजां गर्भो देवकर्मात्मशक्तिमान् विबभाजात्मनात्मानमेकधा दश
धात्रिधा ७ एषह्यशेषसत्त्वानामात्मांशः परमात्मनः आद्योवतारो यत्रासौ भूत
ग्रामोविभाव्यते ८ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

२९ [illegible] शक्तिः जीवसंघस्तरीरारंभकाचिच्छक्तिस्तास्त्वसंतीतितद्वान् अनेनसमष्टिपुरुषत्वाएवंभूतः सवैसमष्टिपुरुषः आत्मनाकर्त्रा आत्मानंप्रथमंत्रिधाकरणं भोग्यविषयरूपेण तत्रापिकरणांशे एकधादशधा मनः पर्यंतेंद्रियरूपेणैकादशधेत्यर्थः विवभाज विभक्तमकरोत्स्वसंश्लिष्टजीवसंघंभोक्तृत्वेन स्वंद्रियं[illegible] करेशान् तद्भोग्यकरणत्वेनाकारेणाकरोदित्यर्थः ७ अस्येवंविधविभागसामर्थ्यमाह एषइति एषब्रह्मा शेषतत्त्वानांसमस्तव्यष्टिपदार्थानामात्मा आधारः तच्छरीरपरमात्म[illegible] इत्युक्तं परमात्मनोंशः अप्यथकृसिद्धविशेषणभूतः नन्विदं सर्वजीवसाधारणमत आह आद्यइति आद्यः अवतारः पद्मात्मनकृतानुषंगः परमात्मन आवेशावतारोवाद्यः सर्गेतःकरिष्यामित्वामाविश्यप्रजापतेइत्युक्तेः यत्रपरमात्मके समष्टिपुरुषेपरमात्मांशावतारभूते सौभूतग्रामः व्याष्[illegible] पदार्थजातं विविधमुत्पाद्यते अतइंशविभागसमर्थइत्याहेति ८ कं४

नेर विभाव्यते त्मो

कालसंज्ञामिति ततो निशामनानंतरं कालसंज्ञां कालाख्यां देवीं देवस्य संबंधिनीं शक्तिमपृथक्सिद्धविशेषणभूतां स्वांतर
मिस्पर्शः विभ्रदनुप्रविशणप्रशासनेन धारयन् त्रयोविंशतितत्वानां महदहंकारपंचभूतपंचतन्मात्रैकादशेंद्रियाणां गणं सम
हं विक्रमो विस्तृतपादन्यासः त्रिविक्रमो भगवान् युगपदेकदा आविशदनुप्रविष्टोभूत् २ सद्गुणतत्वांश्चेष्टारूपेण प्रेरणात्मचेष्टा
पर्यवसितः स्पृष्टं कर्म तदाधारं प्रबोधयन् उद्बोधयन् ३ आहितसामर्थ्यस्य तत्वगणस्य ब्रह्मांडोत्पत्तिद्वारा चतुर्मुखशरीरं भवः
त्वसंग्रहेणाहकेन प्रबुद्धकर्मेति दैवेन भगवत्संकल्पेन प्रबुद्धमुद्बुद्धं कर्म यस्य व्यापारोद्यतस्य त्रयोविंशतितत्वात्मको गणः प्रेरितः दै
वेन समनुषंगः स्वाभिर्मात्राभिरंशैः अधिपूरुषं ब्रह्मांडमजनयत् असृजत् ४ कथमजनयदित्यपेक्षायां तदेव विवृणोति परेणेति मात्र
या अंशभूतसंकल्परूपज्ञानेन स्वस्मिन् विशता अनुप्रविशता परेण भगवतोपलक्षितः हेतौ तृतीया विश्वसृग्गणः [illegible] विश्वं
सृजतीति विश्वसृग्गणः त्रयोविंशतितत्वजातं यस्मिन् गणे चराचराः स्थावरजंगमात्मलोकाः कार्यत्वेनावस्थिताः एवंभूतो गणः अ

कालसंज्ञां तदा देवीं विभ्रच्छक्तिमुरुक्रमः त्रयोविंशति तत्वानां गणं युगपदाविशत् २ सोनुप्रविष्टो भगवांश्चेष्टारूपेण तं गणं
भिन्नं संयोजयामास सुप्तं कर्म प्रबोधयन् ३ प्रबुद्धकर्मा दैवेन त्रयोविंशतिको गणः प्रेरितोजनयत्स्वाभिर्मात्राभिरधिपूरुषं ४
परेण विशता स्वस्मिन्मात्रया विश्वसृग्गणः चुक्षोभान्योन्यमासाद्य यस्मिंल्लोकाश्चराचराः ५ हिरण्मयः स पुरुषः सहस्रपरि
वत्सरान् अंडकोश उवासाप्सु सर्वसत्वोपबृंहितः ६ न्योन्यं परस्परमासाद्य संहत्य चुक्षोभ परिणतोभूत् समष्टिपुरुषगर्भब्रह्मांडरूपे

६१ णपरिणतोभूदित्यर्थः ५ हिरण्मयेति हिरण्मय इत्यंडकोशविशेषणं पुरुषसंहितः यद्वा अप्सु वर्तमाने इडकोशे हिरण्मयः स्वर्ण
मयांडकोशगत्वाद्धिरण्मयः स पुरुषः प्रसिद्धः समष्टिपुरुष अनु सुरनरतिर्यगादिसर्वसत्वोपबृंहितः पुत्रः सहस्रं परिवत्सरान्वर्षाण्यंडस्य
परिपाकस्तावद्वास ऊषित अप्सु उवासेत्यनेनांडकोशोत्पत्तेः पूर्वमयांभ्युत्पत्तिर्वगमात् उदाहृतविश्वमिदं तदासीदितिवत्समा
णत्वाच्चावरणजलस्थिरंडो सतेः पूर्वमवगंतव्याः सर्वसत्वोपबृंहित इत्यनेन चतुर्मुखस्य समष्टिपुरुषत्वमावेदितं एतेनावरण ३
२ ब्रह्मणः जले शयानस्य भगवतो नाभ्याः प्रसूतत्वे [illegible] अंडोत्पत्तिरप्युक्ता वेदितव्या स पद्मकोशः सहसोदतिष्ठदिति
च स्मृत्याएकार्थ्यात् एवं तत्वानां समष्टिपुरुषशरीरारंभकत्वमुक्त्वा समष्टिपुरुषत्वे नामभूतसंघातारब्ध[illegible]जीव
कथनेनानंतरं वर्तनाः

तस्मादित्यर्थः तस्मात् २

भा॰ त॰ टी॰ २५

विभागमाह तस्येत्यादिभिश्चतुर्दशभिः अत्र प्रतिश्लोकं प्रकृत समष्टिपुरुषो भगवदात्मकश्चतुर्मुखस्तस्य स्पन्दमानस्य षष्ठ्यन्तैः पराम्‌श्यते तस्य भगवदात्मकस्य चतुर्मुखस्याभिनिर्भिन्नविभक्तं मुखं नामेति यावत् व्यष्टिभूतजन्तवस्य स्थं पदं स्थानमास्यरूपं स्थानं तत्राशेन स्वाधिदैवभूतेन वाचा वागिन्द्रियेण सह लोकपालोऽग्निराविशत् आविशत् कथंभूतया वाचा ऽसौ व्यष्टिजीवः वक्तृत्वमुच्चारयते वाग्व्यवहारं प्रतिपद्यते उच्चारयती स्यर्थः समष्टिपुरुषाद्विभक्तोऽग्निस्तस्मादेव विभक्तस्य व्यष्टिजीवस्य विभक्तमास्यं विभक्तेन वागिन्द्रियेण सह ह्याविशदित्यर्थः एवमग्रेऽपि बोध्यं सर्वत्र सौ विशिष्टः प्रथमान्तमध्यात्मपरं वाचेत्यादि तृतीयान्तमधिदैवतसमर्पकं वक्तव्यमित्यादि प्रतिपन्नवद्वाक्यादिकमधिभूतसमर्पकं वेदितव्यं १२ निर्भिन्नमिति निर्भिन्नं पृथग्विभक्तं तालु स्थानं लोकपालो वरुणश्चांशेन स्वाधिदैवेन जिह्वया सह आविशत् यया जिह्वया रसं मधुरादिमसौ व्यष्टिजीवः प्रतिपद्यते १३ विष्णोः यद्ध्यात्मकाद्ब्रह्मणो नासा निर्भि

तस्याग्निरास्यं निर्भिन्नं लोकपालो विशत्पदं वाचास्वांशेन वक्तव्यं यया सो प्रतिपद्यते १२ निर्भिन्नं तालु वरुणो लोकपालो विशद्धरेः जिह्वयांशेन च रसं यया सो प्रतिपद्यते १३ निर्भिन्ने अश्विनौ नासे विष्णोराविशतां पदं घ्राणेनांशेन गन्धस्य प्रतिपत्तिर्यतो भवेत् १४ निर्भिन्ने अक्षिणी त्वष्टा लोकपालो विशद्विभोः चक्षुषांशेन रूपाणां प्रतिपत्तिर्यतो भवेत् १५ निर्भिन्नान्यस्य चर्माणि लोकपालोऽनिलो विशत् प्राणेनांशेन संस्पर्शं येनासौ प्रतिपद्यते १६ कर्णावस्य विनिर्भिन्नौ धिष्ण्यं स्वं विविशुर्दिशः श्रोत्रेणांशेन शब्दस्य सिद्धिं येन प्रपद्यते ४ न्ने अश्विनावंशेन स्वाधिष्ठेयेन घ्राणेनेन्द्रियेण सह आविशत् यतः घ्राणेन्द्रियेण गन्धस्य सुगन्धदुर्गन्धादेः प्रतिपत्तिः ज्ञानं भवेत् १४ विभोर्ब्रह्मणः सकाशान्निर्भिन्ने अक्षिणी स्थानं लोकपालस्त्वष्टा

२२ आदित्यः स्वाधिष्ठेयेन चक्षुरिन्द्रियेण सह आविशत् रूपाणां नीलपीतादीनां प्रतिपत्तिर्यतः येन च रूपाणां भवेत् १५ निर्भिन्नानीति अस्य ब्रह्मणः निर्भिन्नानि चर्माणि लोकपालोऽनिलो वायुरंशेन प्राणेन त्वगिन्द्रियेण प्राणवत्ता स्वदेहव्यापिनेत्यर्थः आविशत् असौ व्यष्टिजीवः येन त्वगिन्द्रियेण संस्पर्शं मृदुलकठिनत्वशैत्योष्ण्यादिसंस्पर्शं प्रतिपद्यते १६ कर्णाविति अस्य ब्रह्मणः विनिर्भिन्नौ कर्णौ स्वं धिष्ण्यं स्वस्थानं दिशः देवताः श्रोत्रेणांशेन [illegible] श्रोत्रेन्द्रियेण सह विविशुः ॥ ॥ ॥ ॥

रत्न॰ २५

25

गं

प्रस्कन्त त्रिविधैकादशविभागावुपपादयन्समष्टिपुरुषत्वमेवोपपादयति साध्यात्म इति त्रिविधं राजतित्वाहि स्वरूपेणभातीति विरा
डपघोपि विराट्शब्दो निरूढ्यपरः तथा चोक्तसमष्टिपुरुषादिभक्तवायुः त्रिप्रकरणादितुर्दुत्वपरः स एव साध्यात्मः आध्यात्म
सहितः समष्टिरूपेणस्वशरीरेन्द्रियाभि[illegible]वर्गसहितः आत्मनि देहे वर्त्तमानो जीवो ह्यध्यात्मशब्दोक्तः स चाविभक्तरूपः समष्टिरू
पस्य ः साधिभूतः भूतेषु वर्त्तमानः शब्दादिविषयसहितः ब्रह्मशरीरारब्धभोग्यजातमविभक्तं साधिदैवः इन्द्रियसमष्टिसहितः आ
दित्यमंडलादिषु वर्त्तमाना आदित्यादयो देवशब्दवाच्याः तदधिष्ठेयइन्द्रियाणि [illegible] इत्यधिदैवशब्दोक्तः समष्टि देव
पस्य शरीरान्तर्गतं भोग्यभोगोपकरणसमवाननिःसीमः अथाधिदैवाशविवृणोति प्राण इति प्राणशब्दइन्द्रियपरः तमुत्क्रामंतम
वे प्राणा अनूत्क्रामंतीतिश्रुतिप्रयोगात् दशविधः श्रोत्रादिरूपेण एकधा हृदयेन मनसा च अधिकरणेन्द्रियादीनां ब्रह्मणा विभक्तत्वे

साध्यात्मः साधिभूतश्च साधिदैव इति त्रिधा विराट् प्राणो दशविध एकधा हृदयेन च ९ स्मरन्विश्वसृजामीशो विज्ञापित
मधोक्षजः विराजमतपत्स्वेन तेजसैषां विवृत्तये १० अथ तस्याभितप्तस्य कतिचायतनानि ह निरभिद्यंत देवानां तानि मे गद
तः शृणु ११

वक्ष्यते ९ ननु नत्वांतर्योगकृतं किंतु भगवदनुप्रवेशादित्याह स्मरन्निति ईशः नियंता अधोक्षजो भगवान् विश्वसृजां महदा
दितत्त्वानां विज्ञापितं यावद्बलिं तेऽजहराम काले इत्यादिना विज्ञापितं स्मरन् एषां इन्द्रियादीनां विवृत्तये व्यष्टिरूपेणाविस्ताराय
स्वेन स्वीयेन तेजसा ज्ञानेन विराजं ब्रह्माणमतपत् पर्यालोचयत् तप आलोचने अयं व्यष्टिशरीरेन्द्रियविभागसमर्थो वा न वा यथा भवे
[illegible] तथा तमसंकल्पयदित्यर्थः १० अथ शरीरेन्द्रियाणां ब्रह्मणः सकाशाद्विभाग इति पादनं प्रतिजानीते अथेति
अथालोचनानंतरं अभितप्तस्य उक्तसंकल्पविषयस्य तस्माद्ब्रह्मणः इत्यर्थः नरस्य प्राणोतीति वा पंचम्यर्थे संबंधसामान्यपरत
या षष्ठी विवक्षिता देवानां इन्द्रियाणां कति चायतनानि कति स्थानानि स्थानानि निरभिद्यंत उद्भवन् तानि स्थानानि गद नि
तः मे मत्तः शृणु एवं कर्माध्येतव्यर्थः ११

भा.टी.
२६

बुद्धिमित्यादि त्रिभिः अस्य बुद्धिं विनिर्भिन्नां बुद्धिं धिष्ण्यं स्थानं वागीशः ब्रह्मा बोधेन निश्चयात्मकज्ञानजननसामर्थ्येन सहाविशत् यतः बोधेन बोद्धव्यस्य निश्चेतव्यस्य प्रतिपत्तिर्ज्ञानं भवेत् २४ आत्मानमिति आत्मानमहंकारमस्य ब्रह्मणः निर्भिन्नं पदं स्थानमभिमानः अभिमन्यते अनेनेत्यभिमानः अनात्मन्यात्माभिमानहेतुर्देवता रुद्रः सर्वात्मनान्तःकरणं गिरित्रं इति प्रागुक्तत्वात् कर्मणा देहाभिमानेनांशेनाविशत् येन कर्मणासौ जीवः कर्तव्यमभिमानविषयं प्रतिपद्यतेऽभिमनुते २५ सत्त्वमिति अस्य ब्रह्मणो विनिर्भिन्नं सत्त्वं देहात्मविवेकज्ञानहेतुर्बुद्ध्याख्यमन्तःकरणं बुद्धिचित्तयोर्भेदेनायं निर्देशः धिष्ण्यं स्थानं महान् प्रजापतिः चित्तेन सम्यगर्पितरूपेण मनसा प्राविशत् येन चित्तेनांशेनासौ जीवः विज्ञानं सम्यक् ज्ञेयितव्यार्थविषयं ज्ञानं प्रतिपद्यते लभेत २६ एवं सर्वेन्द्रियविभागमुक्त्वा पदेगादीनां भोगस्थानविभागमाह शीर्ष्ण इति अस्य ब्रह्मणः शीर्ष्णः शिरसः द्यौः पद्भ्यां पादाभ्यां धरा भूमिः

बुद्धिं चास्य विनिर्भिन्नां वागीशो धिष्ण्यमाविशत् बोधेनांशेन बोद्धव्यप्रतिपत्तिर्यतो भवेत् २४ आत्मानं चास्य निर्भिन्नमभिमानोऽविशत्पदं कर्मणांशेन येनासौ कर्तव्यं प्रतिपद्यते २५ सत्त्वं चास्य विनिर्भिन्नं महान् धिष्ण्यमुपाविशत् चित्तेनांशेन येनासौ विज्ञानं प्रतिपद्यते २६ शीर्ष्णोऽस्य द्यौर्धरा पद्भ्यां खं नाभेरुदपद्यत गुणानां वृत्तयो येषु प्रतीयन्ते सुरादयः २७ आत्यन्तिकेन सत्त्वेन दिवं देवाः प्रपेदिरे धरां रजःस्वभावेन पणयो ये च ताननु २८ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

अस्य नाभेरन्तरिक्षलोकः उदपद्यत उदभूत् येषु द्युधराखेषु गुणानां सत्त्वरजस्तमसां वृत्तयः वृत्तिमन्तः [illegible] देवमनुष्यादयः वृत्तिशब्दोऽजहल्लक्षणया वृत्तिमत्परः प्रतीयन्ते देवादय उत्पन्नाः २७ गुणानां वृत्तय इत्येतदेव प्रपञ्चयति द्वाभ्यां आत्यन्तिकेन ऊर्जितेन आत्यन्तिकेनेत्यपि पाठः तदानैसर्गिके लोके तत्र सत्त्वेन सत्त्वगुणेनोपलक्षिता देवाः दिवं सात्त्विकं मनुष्यानन्निष्वादितफलभोगानुरूपं द्युलोकं प्रतिपेदिरे प्राप्ताः पणयः पणव्यवहारे पणन्ते आ व्यासादिना व्यवहारः [illegible]
पर [illegible] रान्तीति पणयो मनुष्याः ताननु सत्त्वे उपकरणभूता गवादयस्ते सर्वे रजःस्वभावेनोपलक्षिताः रजोजैः कर्मफलभोगानुकूलां धरां भूमिं प्रपेदिरे हेत्वर्थे तृतीया सात्त्विकादिस्वभावेन हेतुना द्युः पृथिव्यादीन् देवादयः प्रपेदिरे इत्यर्थः २८ ॥ ॥ सर राम
२६
वार

26
६
६१

ग्र

त्वचमिति अस्य ब्रह्मणः विभिन्नां त्वचमोषधीरोषध्यः तन्मानि देवताः विभक्त्या समय आर्षः रोमभिरंशेन स्वाधिष्ठेये [illegible] नेन्द्रि
येण विविशुः प्राविशन् असौ हि जीवः यै रोमभिः कंडुं प्रतिपद्यते जानाति त्वगिन्द्रियस्यैव स्थानभेदेन विषयद्वयं कंडुः स्प
र्शश्च तत्रायं नामभेदेन देवताभेदश्चेति द्वितीयमेव हास्यातं १८ मेढ्रमिति तस्य ब्रह्मणः विनिर्भिन्नं मेढ्रं उपस्थेन्द्रियस्थानं तस्य
धिष्ण्यं स्वस्थानं कः प्रजापतिर्देवता अंशेन रेतोरूपस्ताधिष्ठेयेनेन्द्रियेण सह विशत् येन रेतसा ऽसौ जीवः आनंदं रतिसु
खं जानाति १९ गुदमिति पुंसो ब्रह्मणः विनिर्भिन्नं गुदं पाय्विन्द्रियस्थानं लोकेशः मित्रः पायुनांशेन पाय्विन्द्रियेण सहाविश
त् येन पायुना विसर्गं पुरीषत्यागं प्रतिपद्यते करोति २० हस्ताविति अस्य ब्रह्मणः विनिर्भिन्नौ हस्तौ स्वर्पतिः स्वर्गस्य पतिरिन्द्रः
वार्त्तं यान्नादि व्यापाररूपसाधनेनांशेन पाणीन्द्रियेण विशत् सुरूवोयं हि जीवः ययावृत्तिसाधनपाणीन्द्रियेण [illegible] तिं जी

त्वचमस्य विनिर्भिन्नां विविशुर्धिष्ण्यमोषधीः अंशेन रोमभिः कंडुं यैरसौ प्रतिपद्यते मेढ्रं तस्य विनिर्भिन्नं स्वधिष्ण्यं कबु
याविशत् रेतसांशेन येनासावानंदं प्रतिपद्यते १९ गुदं पुंसो विनिर्भिन्नं मित्रो लोकेश आविशत् पायुनांशेन येनासौ
विसर्गं प्रतिपद्यते २० हस्तावस्य विनिर्भिन्नौ इंद्रः स्वर्पतिराविशत् वार्त्तयांशेन पुरुषो यया वृत्तिं प्रपद्यते २१ पादावस्य
विनिर्भिन्नौ लोकेशो विष्णुराविशत् गत्या स्वांशेन पुरुषो यया प्राप्यं प्रपद्यते २२ हृदयं चास्य निर्भिन्नं चंद्रमा धिष्ण्यमा
विशत् मनसांशेन येनासौ विक्रियां प्रतिपद्यते २३

वनप्रकरं प्रतिपद्यते प्राप्नोति अत्र हस्ताविध्यनेनाक्षिणी इति द्विवचनेने
षां कृताकानां च तुर्मुखशरीरादिभक्त्या विदेहविषयत्वं स्यादनतु तस्यैव हस्तादयुक्तेति परत्वे चतुर्मुखस्य भुजचतुष्टयने त्राष्टक
सम्भवात् २१ पादाविति निर्भिन्नौ पादौ चरणौ लोकेशो विष्णुर्गत्या गतिसाधनेनांशेन स्वाधिष्ठेयपादेन्द्रियेण सहाविशत् यया
गतिसाधनेन पादेन्द्रियेणासौ जीवः गंतव्यं गमनेन प्रतिपद्यते प्राप्नोति २२ हृदयमिति अस्य निर्भिन्नं हृदयं कमलाकारं धि
ष्ण्यं स्थानं चंद्रमा मनसांशेनेन्द्रियेण सहाविशत् येन मनसा ऽसौ जीवः विक्रियां विकल्पसंकल्पस्वरूपां प्रतिपद्यते २३ एकस्ये
वांतःकरणस्य विक्रियावोधाभिमानविवेकरूपवृत्तिभेदेन मनोबुद्ध्यहंकारचित्तभेदस्य चंद्रवागीशरुद्रप्रजापतयो धिष्ठा
तारो बोध्याः तत्र संकल्पविकल्पात्मकवृत्त्युपलक्षितस्यांतःकरणभेदस्य चंद्रमसाधिष्ठितस्य [illegible] समष्टिपुरुषाद्विभागः

ति

मो१

यो२

तावते२ वा१ भिन्न२ अथ बुद्ध्यादिविभागमाह

भा॰ तृ॰ टी॰
३२

तदेवोपपादयति एत इति एते वर्णा ब्राह्मणादयश्चत्वारो वर्णाः स्वधर्मेण स्ववर्णोचितधर्मेणाश्रद्धया आत्मविशुद्ध्यर्थमात्मनः अनादिपापवा[सना]सनादूषितस्यांतःकरणस्य विशुद्ध्यर्थं स्वगुरुं स्वजनकं हरिं स्वात्मनि संसारहरं हरिं यजंति यजंते पूजयंति कथंभूतं हरिं यज्जाताः यस्माद्वस्तु मुखादिशरीरावयवरूपात्परमात्मनो हरेः सकाशाद्वृत्तिभिः सह जाताः तं हरिं यजंतीत्यर्थः ३४ एवं संक्षेपेण लीलावर्णयित्वा पुनः प्रश्नावसरप्रदानाय पारमहिम्नो भगवतः साकल्येन महिमानमुपवर्णयितुं न कोपि शक्त इति वदन्नुपसंहरति एतदिति दैवकर्मात्मरूपिणः दैवं निर्यामत्वेन तत्संबंधित्वाच्च कर्म शब्देन जीवाः दृष्टस्य पृथगुपादानात् आत्मा नः कालकर्मैव रूपाणि जीवाः देवादिरूपाणि शरीराणि यस्य संतीति दैवकर्मात्मरूपी तस्य भगवतः एतत्स्वाङ्गरूपस्य योगमायाबलोदयं युज्यंते इति योगाधिष्ठेयास्ताश्च ता माया तस्याः बलं जननसामर्थ्यं तस्योदयः [आवि]र्भावो यस्मिंस्तदेतद्विश्वं हे क्षत्तः विदुर उपाकर्तुं साकल्येन व्याकर्तुं वर्णयितुमिति यावत् कः पुमान् श्रद्दध्यात् श्रद्धां कुर्यात् न कोपीत्यर्थः ३५ ननु कस्याप्यशक्तौ सत्यां केयं भवता वर्ण्यते इत्यत आह

एते वर्णाः स्वधर्मेण यजंति स्वगुरुं हरिं श्रद्धयात्मविशुद्ध्यर्थं यज्जाताः सहवृत्तिभिः ३४ एतत्क्षत्तर्भगवतो दैवकर्मात्मरूपिणः कः श्रद्दध्यादुपाकर्तुं योगमायाबलोदयं ३५ अथापि कीर्तयाम्यंग यथामति यथाश्रुतं कीर्तिं हरेः स्वां सत्कर्तुं गिरमन्याभिधासतीं ३६ एकांतलाभं वचसो नु पुंसां सुश्लोकमौलेर्गुणवादमाहुः श्रुतेश्च विद्वद्भिरुपाकृतायां कथासुधायामुपसंप्रयोगं ३७

अथापीति अथापि कार्त्स्न्येन वर्णयितुं कस्याप्यशक्तावपि यथाश्रुतं गुरुमुखाच्छ्रुतमनतिक्रम्य तत्रापि यथामति यावत्स्वबुद्धिविषयमनतिक्रम्य हरेः कीर्तिं अंग हे विदुर कीर्तयामि न ह्यहं साकल्येन वर्णयामीति प्रतिज्ञातवानस्मीत्यभिप्रायः तर्हि किमेकदेशवर्णनेन प्रयोजनमित्यत आह स्वां स्वकीयामन्याभिधा हरिव्यतिरिक्तार्थाभिधानं तयाऽसतीं दुष्टां गिरं वाचं सत्कर्तुं [illegible] पवित्रीकर्तुमित्यर्थः ३६ एतदेवोपपादयति एकांतलाभमिति सुश्लोकमौलेः श्लोकनीयप्रधानस्य भगवतो गुणवादं गुणकथनमेव पुंसां वचसः एकांतलाभं एकांतफलमाहुः श्रुतिस्मृतीतिहासपुराणानि तद्विदः विद्वद्भिरुपाकृतायां उपवर्णितायां कथासुधायां उपसंप्रयोगं सन्निधौ श्रवणसंबंधमित्यर्थः श्रुतेः श्रोत्रेंद्रियस्य एकांतलाभमाहुरित्यर्थः ३७

देव५

27

राम
२१

तृतीयेनेति तृतीयं तमः तदीयेन तृतीयेन तमः स्वभावेन भगवन्नाभिं भगवतस्तनुर्मध्यशरीरस्य नाभिं नाभ्या आसीदन्तरिक्षमिति श्रुतेः उपचारात्कार्यकारणशब्दः उभयोर्द्यावापृथिव्योरन्तरं मध्यस्थं व्योमान्तरिक्षं रुद्रपार्षदगणाः भूतप्रेतपिशाचादय आश्रिताः २८ चातुर्वर्ण्यवृत्तिमाह मुखत इति पुरुषस्य समष्टिपुरुषस्य मुखतः ब्रह्म [illegible] ब्राह्मणवृत्तिरध्यापनादि तन्मुखतोऽवर्तत प्रवृत्तं एतदेव हि ब्राह्मणानां ब्रह्म मुख्यं भूतत्वेनामय [illegible] मुखमापारभूताध्ययनादिवृत्त्याश्रितत्वं एवं क्षत्रियादिष्वपि द्रष्टव्यं हे कुरूद्वह विदुर यथ यस्माद्ब्राह्मणः तन्मुखत्वात् [illegible] तन्मुखत्वादुद्भूताध्ययनादिमुख्याचारत्वात्तस्माद्वर्णानां मुख्यः मुख्यमिव प्रधानः गुरुश्चाभूत् ३० बाह्विति क्षत्रं क्षत्रियधर्मपालनरूपा वृत्तिः तद्बाहुभ्योऽवर्तत तदनुव्रतः क्षत्रमनुव्रतः क्षत्रियः [illegible] यो बाहुभ्यो जातः पौरुषः समष्टिपुरुषांशः क्षत्रियः [illegible] कंटकेभ्यस्त्रात्

तृतीयेन स्वभावेन भगवन्नाभिमाश्रिताः उभयोरन्तरं व्योम ये रुद्रपार्षदां गणाः २८ मुखतोऽवर्तत ब्रह्म पुरुषस्य कुरूद्वह यस्तून्मुखत्वाद्वर्णानां मुख्योऽभूद्ब्राह्मणो गुरुः ३० बाहुभ्योऽवर्तत क्षत्रं क्षत्रियस्तदनुव्रतः यो जातस्त्रायते वर्णान्पौरुषः कंटकक्षतात् ३१ विशोऽवर्तन्त तस्योर्वोर्लोकवृत्तिकरीर्विभोः वैश्यस्तदुद्भवो वार्त्तां नृणां यः समवर्त्तयत् ३२ पद्भ्यां भगवतो जज्ञे शुश्रूषा धर्मसिद्धये तस्यां जातः पुरा शूद्रो यद्वृत्त्या तुष्यते हरिः ३३ ॥ ॥ ॥ ॥ ॥ ॥ ॥

काः कंटकवच्छोकोपद्रवकारिणः चोरादयः तेभ्यो जातं यत्क्षतं तदुपद्रवस्तस्माद्वर्णान्त्रायते रक्षति ३१ विश इति तस्य विभोरूर्वोः विशः [illegible] सा नस्येव शोभते विवस्याष्वी लोकवृत्तिकरी क्रयविक्रय कृष्यादिलोकजीविकाहेतवः विभक्ति लिङ्गव्यत्ययोवा विशः [illegible] अवर्तन्त तदुद्भवः ब्रह्मण उद्भूतः यो वैश्यः स नृणां वार्त्तामाजीविकां समवर्त्तयत्संपादितवान् ३२ पद्भ्यामिति भगवतः भगवदात्मकस्य ब्रह्मणः पद्भ्यां शुश्रूषा धर्मसिद्धये स्वपूर्ववर्णशुश्रूषारूप धर्मसिद्ध्यर्थं जज्ञे कर्मभूतात्मशुश्रूषाद्युत्तम आह तस्यामिति यद्यस्मात् स्वपरस्य वृत्त्या हरिस्तुष्यति तस्यां तादृशशुश्रूषावृत्तौ निमित्तभूतायां शूद्रो जातः भगवत्तुष्यापादकस्वपूर्ववर्णशुश्रूषावृत्तिनिमित्तकं शूद्रजन्मेत्यर्थः अनेन स्वस्ववृत्त्या भगवत्संतोषजननमेव धर्म इति सूचितं ३३ ॥ ॥ ॥ ॥

भा॰त॰टी॰ २८ — मौत्मकत्वचतुर्मुखकर्तृकेऽभिहिते पुनः श्रुत्वा कापिञ्जसंस्थमारोः प्रथमं भगवतो जगदुपादानत्वप्रयुक्तदोषसंस्पर्शशंकापरिहारं
बुभुत्सया पप्रच्छेत्याह शुकः एवमिति द्वैपायनसुतः श्रीव्याससुतः बुधस्तत्त्वदर्शी भारत्या वाचा गिरा प्रीणयन्निव प्रीतिजनयन्निवैमुक्त — ३२
प्रकारेण ब्रुवन्तं कथयन्तं मैत्रेयं प्रत्यभाषत १ प्रथमं भगवतः सद्रूपत्वमुपादानत्वं चाक्षिपति ब्रह्मन्निति हाभ्यां हे ब्रह्मन् मैत्रेय भग
बाङ्गुरायप४ — वतः पूर्णस्य सत्त्वादिगुणरहितस्य गुणाः गुणकार्यभूताः क्लेशादयः क्रियाः परिणामादयः लीलया वापि कथं युज्येरन् स्युः
अयमभिप्रायः भगवतः सद्रूपादिकं यज्जगदाकारेण परिणामप्रकल्लीलये वेति वक्तव्यं न तु कर्मणा अपहतपाप्मत्वादिश्रु
ते एतदेवहि निःप्रयोजनत्वाधिकरणे लोकवत्तु लीलाकैवल्यमिति सूत्रेण सूत्रेण सिद्धान्तितं एवं चैकस्यैव कर्तृत्वे ... लीलैक
मानं२ — प्रयोजनयोरभ्युपगमेन पो निर्विकारिणो निर्गुणस्य परिणामादयः क्रियाः गुणकार्यगर्भजन्ममरणक्लेशादयश्च दुर्वा
राः आपतिष्यन्त्यतः कथं जगत्कारणत्वमिति अनेन प्रयोजनवत्त्वाधिकरणसिद्धान्ते दूषणमुक्तं भवति तत्र हि सन्न द्वैपव

श्रीशुक उ॰ एवं ब्रुवाणं मैत्रेयं द्वैपायनसुतो बुधः प्रीणयन्निव भारत्या विदुरः प्रत्यभाषत १ विदुर उ॰ ब्रह्मन् कथं भग
28 — वतश्चिन्मात्रस्याविकारिणः लीलया वापि युज्येरन्निर्गुणस्य गुणाः क्रियाः २ क्रीडायामुद्यमोऽर्भस्य कामश्चिक्रीडिषा
न्यतः स्वतस्तृप्तस्य च कथं निवृत्तस्य सदान्यतः ३

तीमेवहि नीमधिति तृतो महाराजस्य कंदुकाद्यारंभवत्पूर्णबाङ्गुणप्र
तेरिवाप्तसमस्तकामस्यास्य परप्रयोजनरहितस्यापि भगवतः केवललीलैकप्रयोजनो जगद्व्यापार उपपन्न इतिस्थापितं
तत्र विषमोपदृष्टांत महाराजस्य बाङ्गुण्यपूर्त्तिर्नान वाससमस्तकामत्वात् सत्त्वादिगुणवद्रूपत्वाद्धिकारित्वाद् गुणस्तद्वि
म॰४ — परीतत्वाद् दुष्टदोषापातश्चेति २ एवं दृष्टांतं तं न रमयितोपपन्नमित्याह क्रीडायामिति अर्भस्य क्रीडायामुद्यमः प्रयत्नः तद्धे
राम — तुभूतः कामः अन्यतः क्रीडोपकरणैः कालांतरे प्रवर्त्तनेन वा चिक्रीडिषा क्रीडेच्छा च स्यात् ईश्वरस्य तु स्वतस्तृप्तस्य त्वानुभवेनैव
तृप्तस्य कथं कामः सदान्यतः स्वव्यतिरिक्तस्वतंत्रक्रीडोपकरणात् क्रीडाप्रवर्त्तकपुरुषांतरेभ्यश्च निवृत्तस्य च क्रीडा च कथं स्यादतो
नन्दु — र्भकदृष्टांतोऽनुपपन्न इति भावः शेषदोषापादनमयुक्तं यदुपादानत्वं परिणामित्वं क्लेशाद्याश्रयत्वमिति यतः प्रकृतिपुरुष
२८ व्याघ्र — सकारणत्वाभ्युपगमेन गुणक्रियाः स्वशरीरभूतप्रकृतिपुरुषगततया दत्तमाशंक्य भगवानेक एवेति पर्वाह्निनेः ... अ
... इशतः कालत इति श्लोकैर्वदोषान्तरापादनेन परिहरति अस्तासीदिदं ... ॥ ॥ ॥

नकेवलमस्माभिरेव भगवन्माहिमा कात्स्न्येन दुर्ज्ञेयः किंतु ब्रह्मादिभिरपि विज्ञानाधिकैरित्याह आत्मन इति हे वत्स विदुर आदिना कविना चतुर्मुखेनात्मनो भगवतो महिमा बहुसंवत्सरान्ते योगविपक्वया धिया अवसितः किमिति कांक्षा एतावानिति न ज्ञात इत्यर्थः अवसितः अपरिच्छिन्नत्वेनेत्याहारः ३८ न केवलं महिमा नैव वेत्ति स्वरूपमपि इत्याह अहो इति भगवती भगवत्संबंधिनी माया आश्चर्यशक्तिर्मायिनामपि मोहिनी यत् स्वयमात्मवर्त्मा आत्मा न वेद किमुतापरे ३९ ननु गोस्वामी तत्स्वरूपं प्रतिपादयति यतो वाचो निवर्तन्ते अप्राप्य मनसा सह अहं चान्ये इमे देवाः तस्मै भगवते नमः न हि कश्चित्तन्महिमानं साद्यो वेद

आत्मनोऽवसितो वत्स महिमा कविनादिना संवत्सरसहस्रान्ते धिया योगविपक्वया ३८ अहो भगवती माया मायिनामपि मोहिनी यत्स्वयं चात्मवर्त्मात्मा न वेद किमुतापरे ३९ यतोऽप्राप्य न्यवर्तन्त वाचश्च मनसा सह अहं चान्य इमे देवास्तस्मै भगवते नमः इति श्रीमद्भागवते म० तृतीयस्कन्धे सृष्टिवर्णनं नाम षष्ठोऽध्यायः ६ ॥ ॥ ॥ ॥ ॥

किंतु तन्महिमानमपरिच्छिन्नत्वेनोपासनोपपत्तेः अत एव न भगवतोऽपि कार्त्स्न्येन स्वस्वरूपाद्यज्ञानेन सर्वज्ञताहानिः अपरिच्छिन्नत्वाज्ज्ञानं परिच्छिन्नस्यैव परिच्छिन्नताज्ञानं सर्वज्ञत्वं नित्यं निर्मलं अत एव यस्यामतं तस्य मतं मतं यस्य न वेद सः अविज्ञातं विजानतां विज्ञातमविजानतां यतो वाचो निवर्तन्ते अप्राप्य मनसा सह आनंदं ब्रह्मणो विद्वान् इति वेदनाविधिप्रतिषेधयोरुपपत्तिः अपरिच्छिन्नत्वपरिच्छिन्नत्वाभ्यां तयोर्व्यवस्थितत्वविषयत्वात् ४० इति तृतीये षष्ठः ६ एवं प्रकृतिपुरुषकालनियंतृपरमेश्वराधिष्ठितात्प्रधानात् महदादिसृष्टिमुक्त्वा तत्त्वेषु सृष्टेषु तेषु स्वानुप्रवेशादिति सृष्टिसामर्थ्यं चतुर्मुखशरीरारंभ हारा समष्टिव्यष्ट्यवस्थितेषु कथितेषु पुनस्तेभ्य एव व्यष्टिशरीरेंद्रियादिविभागे पर ॥ ॥ ॥ ॥ ॥ ॥

तस्यमतं५

जो न

भा॰ त॰ टी॰ २८

अथ प्रश्नमुपसंहरति एतस्मिन्निति हे विद्वन्मैत्रेय एतस्मिन्नज्ञानसंकटे इति पदच्छेदः अज्ञानरूपसंकटे मनो खिद्यते तस्माद्धे विभो मैत्रेय नः अस्माकं मानसं मनःसंबंधि महत्कश्मलं खेदं पराणुदापाकुरु ७ एवमापृष्टो मैत्रेय आहेत्याह श्रीशुक सइत्थमिति तत्त्वजिज्ञासुना क्षत्रा विदुरेण इत्थमुक्तरीत्या चोदित आपृष्टो मुनिर्मैत्रेयः भगवच्चित्तः भगवत्येव चित्तं यस्य सगतस्मयः तत्त्वदर्शित्वेन विगतस्मयः स्मयन्निव प्रश्नस्य परिहा[र] देवाधिनेति भावः प्रत्याह प्रत्यभाषत ८ यद्युक्तं चेतनाचेतननियमनार्थं तदंतरात्मतया स्वेच्छया प्रविश्य स्थितस्य तत्संबंधप्रयुक्तदोषा मित्वदुःखित्वाद्यपुरुषार्थसंबंधो वर्जनीय इति तेनैतद्युक्तं नह्यचिद्वस्त्वपि स्वभावतो पुरुषार्थस्वरूपं कर्मवश्यानां तु कर्मस्वभावानुगुणे न परमपुरुषसंकल्पादेकं एव वस्तु कालभेदेन पुरुषभेदेन च सुखाय दुःखाय च भवति वस्तुस्वरूपप्रयुक्तत्वे तु तादृशं सर्वं सर्वदा सर्वस्य सुखाय दुःखाय वा स्यान्न चैवं दृश्यते तथा चोक्तं नरकस्वर्गसंज्ञे वै पापपुण्ये द्विजोत्तम वस्त्वेकमेव दुःखाय सुखायेर्ष्योद्भवाय च कोपाय च यतस्तस्माद्वस्तु वस्त्वात्मकं कुतः तदेव प्रीतये भूत्वा पुनर्दुःखाय जायते तदेव कोपाय यतः प्रसादाय च जायते तस्माद्दुःखात्मकं नास्ति न च किं

एतस्मिन्मे मनो विद्वन्खिद्यतेऽज्ञानसंकटे तन्नः पराणुद विभो कश्मलं मानसं महत् ७ श्रीशुक उ॰ स इत्थं चोदितः क्षत्रा तत्त्वजिज्ञासुना मुनिः प्रत्याह भगवच्चित्तः स्मयन्निव गतस्मयः मैत्रेय उ॰ सेयं भगवतो माया यन्नयेन विरुध्यते ईश्वरस्य विमुक्तस्य कार्पण्यमुत बंधनं ८॥

चित्सुखात्मकमिति अतो जीवस्य कर्मवश्यत्वात्तत्कर्मानुगुणेन तद्वस्तुसंबंध एवापुरुषार्थः स्यात् परस्य तु ब्रह्मणो निरस्तनिखिलदो षस्य समस्तकल्याणैकरसस्य स्वाधीनस्य विविधविचित्रस्वाभाविकशक्तिमतः अपुरुषार्थाश्रयचेतनाचेतनसंबंधस्तु हि चित्रं ह्यपम नरूपत्वे नारसै सर्वस्य जीवस्य त्वविद्यासंबंधोऽपुरुषार्थजननाय स्यादित्याह सेयमिति त्रिभिः ईश्वरस्य कृपणत्वं मुक्तस्य बंधनं चये न हेतुना न विरुध्यते सेयं भगवतो माया आश्चर्यशक्तिः जीवत्वापि भगवत्प्राप्तिरूप एव तज्जीवगतदोषास्पर्शहेतुभूताश्च र्यशक्तियोगाद्याप्यवस्तुगतदोषास्पर्शकारिहेतोर्न विरोध इत्यर्थः परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेति श्रुतेः विविधविचित्रानंतशक्तियोगात्तद्वस्तुवस्यानप्रयुक्ततद्गतदोषास्पर्श उक्तः अनेन ब्रह्मणः कथं भगवत इति कार णत्वाक्षेपोऽपि परिहृतः गुणक्रियाणां चेतनाचेतनधारकत्वेन ब्रह्मणस्तत्संस्पर्शाभावात् प्रकृतिपुरुषविशिष्टस्य कारण त्वाभ्युपगमेन प्रकृतिपुरुषगतावि ॥

जो १
२९
जो २
अ॰ २
भा॰
२८

गुणान्नथ्यासत्वादिगुणप्रचुरया आत्मसंबंधिन्या मायया भगवान्निम्नमस्मासु ईशीतया मायया योपलक्षितस्तद्धिसंस्थापयति सम्यक्
स्थापयन् प्रतिष्ठापयति पालयतीति यावत् पुनर्भूयः प्रसभिधास्यति प्रास्यति लोमयेनाविधास्यति तिरोहिते करिष्यति अपि पूर्वाधाधा
नुस्तिरोधाने वर्त्तते स्वाधिष्ठेयां गुणमयीं मायां महदादिरूपेण परिणमय्य स्वयं गुणत्रययुक्तत्रिमूर्त्तिरूपेण सृष्ट्यादीन्करोति पर्वः२
अतः पञ्चरात्रमादृत्य स्वाधिष्ठेयमायागततान् स्वगत्ता इति चेत्तत्राह देशत इति योसौ परमात्मा दीपप्रभायाइव देशतः विद्युत्तइव काल
तः स्मृतिरिवावस्थातः स्वप्रमत्ता द्विभिरविलुप्तावबोधात्मा विशेषेण सज्ञानरूपेण न भवति सर्वगतत्वान्नित्यत्वात् सर्वविक्रिया
त्वादनितरानुभाव्यत्वात् तत्कालमात्रावसायित्वाभावात् कर्मवश्यत्वाभावात् अतईदृशः स परमात्मा ऽजया मायया कथं युज्येत य
दि ... केनापि देशादिना तु नो वबोधो भवेन्न ह्यविद्या संबंधः सम्भवितुमर्हति तत्स्वभावात्कथमजया युज्येतेति शंकाभिप्रायः ५
एवं जीवशरीरकत्वेन ... परिहृत इति भगवानिति एव भगवानेकः सर्वक्षेत्रेषु समस्तशरीरेष्ववस्थितः
स्ता९ स्थितः जीवान्तरात्मतयाऽवस्थितः अतः प्रविष्टः प्रोजनानाय आत्मनि नितिष्ठन्ना ... त्मनो न्तरइ त्यादिश्रुतेः अताद्दु

अस्मास्वीशगृहीतगुणामजया मायया तस्यां संस्थापयतीन दूपः प्रसभिधास्यस्याति ५ देशतः कालतो योसाववस्थातः स्वतोन्यतः अविलुप्तावबोधात्मा सयुज्येताजयाकथं ५ भगवानेक एवैष सर्वक्षेत्रेष्ववस्थितः अमुष्य दुर्भगत्वं वा क्लेशो वा कर्मभिः कुतः ६

एतन्न संसर्गित्वादयो गुणरूपभूतानि परमात्मा नैस्पृशंतीति चेत्तत्राह अमुष्य भगवतः दुर्भग
तः१ त्वं कर्मभिः क्लेशो वा कुतः स्यादित्यर्थः अयमभिप्रायः परमात्मनः सर्वत्र व्याप्तिरुचिते तत्र हि जागरस्वप्नसुषुप्तिमूर्छादिक्रान्तिषु
जीवस्य तस्या न प्रयुक्ता ये दोषास्ते तदंतर्यामिणः परस्य ब्रह्मणोपि संभवति नच परमात्मनो कर्मवश्यत्वेन दोषाभाव इति वाचा
कर्मणां देहसंबंधापादनद्वारा क्लेशादिपुरुषार्थजनकत्वेन देहसंबंधस्यापि पुरुषार्थत्वादन्यथा कर्मणा मेवदः स्वादितिजनकते
न देहसंबंधस्य प्रयोजनप्रसन्नत्वात् तत्र परमात्मनः कर्मवश्यत्वाभावेपि सर्वक्षेत्रेष्ववस्थित इति देहसंबंधाभ्युपगमाशेनाविधानना
प्युक्तिदेहसंबंधस्यैवापुरुषार्थसंबंधत्वात् अत एव तन्नियमनार्थं स्वेच्छया तत्प्रवेशोपि पुरुषार्थसंबंधो पवर्जनीयः दूपशाति
तादिमं जनं स्वेच्छाकारितमपापुरुषार्थ एवातो यद्यपि जगदेककारणं सर्वज्ञ आदि कल्याणगुणाकरं च ब्रह्म तथापि यः पृथि
व्यां तिष्ठन्यथात्मनि तिष्ठन् योरेतसि तिष्ठन्नित्यादिवचनात्तत्तत्रावस्थितस्य तत्संबंधरूपाः पुरुषार्थाः संति सत्यं ६ ॥ ॥

मयीकृ चेतन

भा.स्.टी.

त्मनः अनात्मनः अपरमात्मनः गुणः अपरमात्मभूतदेहेन्द्रियगतो धर्मः असन्नपि भ्रांत्या प्रतीयते परमात्मनः चेतनाचेतनगतदोषसंस्प-
र्शकामूलभ्रांतिबुद्धिर्भ्रांतिरित्यर्थः १२ नकेवलं भगवतस्तत्तद्देहादिरूपेणावस्थितस्य दोषस्पर्शाभावरूपकल्याणगुणाए-
वप्रतिपादितः किं तु तत्स्वजीवगतहेयनिवर्तकत्वं चाह स वा इति स वै हेयगुणः कर्मयोगानुगृहीतभगवद्भक्तिजन्यभगवत्कृपया ति-
रोधत्ते इत्यर्थः यद्वा त्वाहेयनिवृत्तिस्तस्य हेयप्रत्यनीकत्वमर्थसिद्धं १२ कियत्पर्यंतं भक्त्या हेयनिवृत्तिरित्यत आह यदेति अर्थानुशब्दा-
दीनप्रति इंद्रियोपरतिरिंद्रियविनिवृत्तिः तदा परे प्रकृतिपुरुषविलक्षणे हरौ वा श्रितवेधहारिणि आत्मनि परमात्मनि पूर्वं निभ-
त्वाद्द्रष्टे साक्षात्कृते सति इषे आत्मनीति पदच्छेद अयादेशे यलोपे चार्षो दीर्घः कृत्स्नशः क्लेशाः विलीयंते इत्यर्थः तस्मिन्नुद्दिष्टेप-
रावर इति श्रुतेः तेषामस्थिरत्वे दृष्टांतमाह संसुप्तस्येवेति नहि संसुप्तस्य तात्कालिकं दुःखनिवृत्तिः तस्यैव जाग्रतः पुनः क्लेशाश्रयत्वात्

स वै निवृत्तिधर्मेण वासुदेवानुकंपया भगवद्भक्तियोगेन तिरोधत्ते शनैरिह १२ यद्वेंद्रियोपरामोथ द्रष्टात्मनि परे हरौ विली-
यंते तदा क्लेशाः संसुप्तस्येव कृत्स्नशः १३ अशेषसंक्लेशशमं विधत्ते गुणानुवादश्रवणं मुरारेः कुतः पुनस्तच्चरणारविंदप-
रागसेवा रतिरात्मलब्धा १४ विदुर उ॰ संछिन्नः संशयो मह्यं तव सूक्तासिना विभो उभयत्रापि भगवन्मनो मे संप्रधावति १५

द्रष्टात्मनीत्यपि पाठः तदार्थान्नु द्रष्टो इंद्रियोपरतिः इंद्रियाणामविकृतिर्यर्हि तर्हि द्रष्टरि आत्मनि जीवे स्थिते सति क्लेशा विलय-
इत्यर्थः द्रष्टात्मीयेत्यपि पाठः तदा सर्वज्ञे आत्मनि हरौ इंद्रियाणामुपरामो नैश्चल्यं यदा अणानंतरं प्रसन्नता पन्नात्मिकाध्रुवानु-
स्मृतिर्भवति तदा कार्त्स्न्येन क्लेशा विलय इत्यर्थः १३ साक्षात्कारपर्यंतं भगवद्भक्तेः किमुत स्वनये न क्लेशनिवर्तकत्वमाह अशेषेति
हरेर्गुणानुवादश्रवणं अनुवादः अनुवर्णनं श्रवणं चेत्येतदुभयमेवाशेषक्लेशशमं विधत्ते करोति किं वा पुनः केपुनः आत्म-
ल[illegible]ध्या तस्य भगवतः चरणारविंदयोर्यः परागः तस्य सेवा तैलधारावदविच्छिन्नस्मृतिसंततिरिति यावत् अशे-
षक्लेशशमं विधत्ते इति किं वक्तव्यमित्यर्थः १४ स्वाभिप्रेतमाविष्कुर्वन्नुत्तरमभिनंदति विदुर संछिन्न इति संशयः ईश्वरस्याकार-
णत्वविषयकः संशयः हे विभो मैत्रेय मह्यं तव तव दीपेन सूक्तासिना सूक्तसोपपत्तिकं वाक्यं तदेवासिः खड्गः तेन मदुद्देशेन त्व-
याभिहितवाक्यखड्गेन संछिन्नः समूलं छिन्नः अपि तु उभयत्र गुणानुवादश्रवणे चरणारविंदपरागसेवायां च मे मनः संप्रधाव-
ति प्रवृत्तं भवति अनेन स्वाभिप्रेतमाविष्कृतं १५ ॥ ॥

व

३०

नै
न४

३०

राम

३०

कारणानां पुरुषकृतस्मरकृतं तत्तारच्च प्रदेशेषु कार्मादीनां तत्तत्सुखदुःखादितं तु संयुक्तप्रदेशे कांतस्थितिवत् शरीरगतबाल्ययौवनादी
नामात्मन्यस्पर्शवच्च परमात्मनि प्रसक्त्यभावात् ततः सर्वक्षेत्रेष्ववस्थितस्यापि परमात्मनो न क्षेत्रगतदोषसंस्पर्शः ८ जीवस्य तु
स्वतोपहतपाप्मत्वादिविशिष्टेपि स्वरूपस्याविद्याकर्मवासनारुचिप्रकृतिसंबंधादिभिस्तिरोहितत्वेन तत्तद्देहादिदेहात्माभिमा
नेन पुरुषार्थसंबंधो वर्जनीय इति सदृष्टांतमाह यदर्थेनेति यद्यतस्त्वमुख्यकर्मरूपस्य पुंसो जीवस्यार्थेन पुरुषार्थभूतेनात्मस्वरू
पेण विना आत्मविपर्ययः देवमनुष्यात्वादिभ्रांतिः ततः युक्तः स्वशिरश्छेदनादिकः स्वशरीरभूतदेवमनुष्यादिशिरसि छिन्ने मम भेदं
एवं शिरश्छिन्नमिति शोकः स्वप्न उपद्रष्टुर्देहमात्मतादात्म्येनानुसंदधतः प्रतीयतेऽनुभूयते से यमपि भगवतो मायेत्यर्थः १० एतदेव दृष्टां
तेनोपपादयति यथेति यथा जले चंद्रमसः स्वतस्तस्यासन्नपि तत्कृतः जलाद्युपाधिकृतः कंपादिर्ज्वलनादि रूपो गुणः दृश्यते
एवमात्मनोऽसन्नप्यविद्यमानो देहस्य गुणः उपद्रष्टुर्देहस्यात्मनो तादात्म्यमभिमन्यमानस्य दृश्यते कर्मवश्यपर्यायोऽनाद्यविद्यासंबं
धेन स्वरूपाप्रतीतिर्देहात्मभ्रांतिस्तया च शोकमोहादयः परमार्थतस्तु न देहगतैर्दुःखैः स्पृश्यत इत्यभिप्रायः परमात्मनस्तु विरो

यदर्थेन विनामुष्य पुंस आत्मविपर्ययः प्रतीयत उपद्रष्टुः स्वशिरश्छेदनादिकः १० य

थाजले चंद्रमसः कंपादिस्तत्कृतो गुणः दृश्यतेसन्नपि द्रष्टुरात्मनोनात्मनो गुणः ११ ॥

धर्यौति [illegible] हितस्वरूप [illegible] स्वप्रकृतिपुरुषयोर्नियंतुः नाविद्यातत्कार्यप्रसंग इत्यर्थः एतदेव भुक्तभोगापरिसमाप्तदोषा
चनिस्पृशः नेश्वरस्याप्युभेधत्ते अनास्यातु स्वनियंतु लीलोपकरणाय भवति तथा च श्रुतिः अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मा
यया सन्निरुद्धः मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमिति माया प्रकृतिः मायीश्वरः अत्र यथा येन विनामुष्येति पाठः तत्रायमर्थः परमा
त्मनः व्याप्यचिदचिद्गतदोषास्पर्शे दृष्टांतमाह यथेति यथा अमुष्य जीवस्यार्थेन विना पुरुषार्थभूतस्य स्वस्वरूपेण विना आत्मनः स्वरूपा
प्रतीतिदशायामित्यर्थः आत्मविपर्ययः आत्मनः जीवस्य विपर्ययः देहाकारः प्रतीयते उपद्रष्टुस्तस्यैव देहतादात्म्यमभिमन्यमानस्य शिर
श्छेदादिकोऽपुरुषार्थश्च प्रतीयते पुरुषार्थभूतस्वात्मप्रतीतिदशायां तु न विपर्ययः शिरश्छेदादिको वा प्रतीयते तस्य देहविलक्षणत्वात् स
देहात्मबुद्धेः भ्रांतित्वात् देहाति [illegible] रिक्तत्वसिद्धिः एवं जीवस्यापि परमात्मशरीरत्वात्तस्य न तद्गतदोषस्पर्श इत्यर्थः दृष्टांतांतरमाह यथा चंद्र
मसो जलाद्युपाधिवशात्प्रतीयमानः कंपादिर्न परमार्थतोस्ति किंतु भ्रांतो द्रष्टुः सर्वं तस्यात्मनः परमा ॥ ॥ ॥ ॥ ॥ ॥

तथा १

सेसेवापि वहुत्तपसोल भ्येतेति व्यतिरेकमुखेनाह दुरापेति अल्पतपसः तपोहीनस्य वैकुंठवर्त्मसु वैकुंठप्रापकेषु भागवते-
षु सेवा दुरापा हि दुर्लभा हीत्यर्थः कथंभूतेषु यत्र वैकुंठवर्त्मसु देवदेवः ब्रह्मादीनामपि देवः जनार्दन उपगीयते अनेन सेवा-
याः श्रवणादिप्रणाली भक्त्युत्पादकत्वं इति सूचितं २० अथ प्रश्नांतरान्प्रष्टुकामस्तदनुक्रममनुवदति सृष्ट्वेति विकारैरिंद्रियादि-
भिः सहितानि सविकाराणि महदादीनि अग्रे आदौ सृष्ट्वा पूर्वं सृष्टेभ्यो महदादिभ्यः विराजं व्यष्टिरूपेण विविधं राजतीति विराट्
ब्रह्मांडं तमुद्धृत्य अंडरूपेणोद्धृत्य विभुः भगवान् तं विराजमनुप्राविशत् २१ कथंभूतो विभुः यं पुरुषमाद्यं वा आमाद्यं से-
वकारणकारणं सहस्रांघ्र्युरुबाहुकमाहुः सहस्रशीर्षा पुरुषः इत्याद्याः श्रुतयः सोनुप्राविशदित्यन्वयः यत्र तद्विभूतीर्वदस्वेत्य-
नेनान्वयः तमेव विशिनष्टि यत्रेति यत्र चतुर्मुखशरीरके विश्वे इमे सर्वे लोकाः सविकाशमसंकोचेन समासते तिष्ठंति २२ यस्मि

दुरापा ह्यल्पतपसः सेवा वैकुंठवर्त्मसु यत्रोपगीयते नित्यं देवदेवो जनार्दनः २० सृष्ट्वाग्रे महदादीनि सविकाराण्यनुक्र-
मात् तेभ्यो विराजमुद्धृत्य तमनु प्राविशद्विभुः २१ यमाहुराद्यं पुरुषं सहस्रांघ्र्युरुबाहुकं यत्र विश्व इमे लोकाः सविकाशं स-
मासते २२ यस्मिन् दशविधः प्राणः सेंद्रियार्थेंद्रियस्त्रिवृत् त्वयेरितो यतो वर्णास्तद्विभूतीर्वदस्व नः २३ यत्र पुत्रैश्च पौत्रैश्च नप्-
तृभिः सह गोत्रजैः प्रजा विचित्राकृतय आसन्याभिरिदं ततं २४

न्निति दशविधः प्राणः प्राणापानादयः पंच नागकूर्मकृकलदेवदत्त-
धनंजयाः पंच वा प्राणेंद्रियाणि ज्ञानकर्मभियात्मकानि तत्सहितो यस्त्रिवृत् त्रिगुणात्मकः प्राणः यस्मिन्विराजे समास्ते यत्त-
श्च वैराजात्त्वयेरितात्त्वदुक्तात् ब्राह्मणादयो वर्णा अभवन् तद्विभूतीस्तस्य वैराजस्य विभूतीः प्राधान्येन निपाम्य वर्णान्वोऽस्मभ्यं
वदेत्यर्थ २३ द्वितीयेऽस्मेध्याये यदधातुमतो ब्रह्मन्नित्यादिना राजकृतप्रश्नानां केषांचिदुत्तरा एवं अभिधायावशिष्टा-
नामुत्तराण्यभिधातुं विदुरमैत्रेयसंवादः प्रस्तावितः एवमेतत्पुरा पृष्टं इत्यादिना इयं नीते यामेव प्रश्नानामुत्तरात्वं वक्ष्या-
म्यतएव विदुरकृतप्रश्नाइत्याह यत्रेत्यादिना यावदध्यायसमाप्ति यत्र ब्रह्मांडे पुत्रादिभिः सह प्रजाः विचित्राकृतयः नानाविधदेहाः
याभिरिदं ब्रह्मांडं ततं व्याप्तं २४ ॥

उत्तरमेव प्रपंचेनाभिनंदति साध्विति आत्मा जीवः माया प्रकृतिः उभयमेवा [illegible] यनं हरेस्तत्स्ववासस्थानं साधु व्याहृतं इत्यर्थः
एवं शरीरगतच्छेदनादेरात्मन्यस्पर्शं दृष्टांतीकृत्य हि शरीरभूतस्वविरचितदोषाभावः परमात्मन उक्तः अतस्तस्य भगवतः विरचि
ध्या [illegible] ष्टिं पूर्वोक्तैर्दूषणैर्दूरीकृता कथं चेतनाचेतनं तस्याय [illegible] ननु हीदं जगदात्मकत्वेन प्रतीयते इत्यत्राह आभातीति विश्वमू
लं विश्वकारणं यद्ब्रह्म तद्बहिः परस्य जगतः बहिर्न आभाति प्रविष्टं तदिदं जगन्निर्मूलं मूलभूतपरब्रह्मरहितमतदात्मकमाभाती
ति यत्तदिदमपार्थमर्थशून्यं निर्विषयं भ्रांतिरूपमिति यावत् अनेनात्र ह्यात्मकत्वप्रतिभासो मिथ्यारूप इत्युक्तं १६ एवं देहा
रविद् त्मप्रतीतिर्भ्रांतिरूपेति वस्तुनः प्रत्यात्मकत्वे तत्रात्मभ्रमदेहात्मभ्रमवतां क्लेशत्वमाह यश्चेति यश्च लोके मूढतमः यश्च बुद्धेः
परं विलक्षणं प्रत्यात्मकस्वात्मानं गतः कृतार्थः अवगतवान् तावुभौ मूढतमात्मत्वरूपाभिज्ञौ सुखमेधेते स्फुरते मध्यमस्या

साध्वेतद्व्याहृतं विद्वन्नात्ममायायनं हरेः आभात्यपार्थं निर्मूलं विश्वमूलं न यद्बहिः १६ यश्च मूढतमो लोके यश्च बुद्धेः
परं गतः तावुभौ सुखमेधेते क्लिश्यत्यंतरितो जनः १७ अर्थाभावं विनिश्चित्य प्रतीतस्यापि नात्मनः तां चापि युष्मच्चरण
सेवयाहं पराणुदे १८ यत्सेवया भगवतः कूटस्थस्य मधुद्विषः रतिरासो भवेत्तीव्रः पादयोर्व्यसनार्दनः १९ ॥ ॥ ॥

विमोहमेव किंचित्सुखजनकमित्यभिप्रायः इदं चांतरितस्य सर्वथा क्लेशित्वाभिप्रायकः अंतरितः न मूढतमः नापि बुद्धेः परं गतः
किंतु संशयात्मा जनः क्लिश्यति १७ देहात्मप्रतीतेर्भ्रांतित्वं वदन् तन्निवर्तने मूलकारणमाह अर्थाभावमिति प्रतीतस्यापि आत्म
तादात्म्येन प्रतीयमानस्यापि नात्मनः अनात्मनः देहस्य निषेधार्थको नञ्शब्दः अर्थाभावमात्मभावं विनिश्चित्य तां चापि त्वा॰
देहात्मप्रतीतिमपि युष्मच्चरणसेवया त्वत्सेवया पराणुदे प्रणाशये इत्यर्थः अहं पराणुदे ऽपाकरोमीत्यर्थः १८ स सेवाया एव
प्रथमकारणत्वमाह यत्सेवयेति यत्सेवया येषां सतां सेवया कूटस्थस्य निर्विकारस्य मधुद्विषः भगवतः पादयोः तीव्रः विघ्ना
नुपहतः व्यसनार्दनः तापत्रयनिवर्तकः रतिरासः रतेरुल्लासः अनुरागोल्लासः भवेत् १९ ॥ ॥ ॥ ॥ ॥

धर्मादीनाम अविरोधतः परस्पराविरोधेन निमित्तानि उपायान् वार्तायाः कृष्यादिवार्तायाः दंडनीतेश्च दंडोपकारिलोकशिक्षायाः नीतेर्न्यायस्य श्रुतस्य श्रुतिविहितस्य सध्योपासनादेश्च पृथक् प्रविभज्य विधिं ३२ हे ब्रह्मन्मैत्रेय पितॄणां सर्गमादीनां सर्गं ग्रहाः सूर्यादयो नवग्रहाः नक्षत्राण्यश्विन्यादीनि ताराः तदितरतारकाः तेषां कालावयवसंस्थितिं कालावयवा यावच्छेदकत्तत्कास्थितिं ३३ दानस्य तपसः कृच्छ्रचान्द्रायणादेः इष्टापूर्तयोः श्रौतस्मार्तकर्मणोश्च यत्फलं तत्तदपि प्रवासस्थस्य स्वदेशान्तरगतस्य वा अनुष्ठेयो धर्मः तं उतापि च पुंसः आपदि यश्चानुष्ठेयो धर्मस्तं च ३४ धर्मप्रवर्तको जनार्दनः जनानामन्तरात्मा भगवान्येन मार्गेण तुष्येत् येषां वा हृदयानां वा संप्रसीदति तत्तत्सर्वं मे महामाख्याहि कथय हे अनघ मैत्रेय ३५ तस्यांतरा पृष्टप्रतिवचनौत्सुक्यमापाद्य यन्नन्यदपि पृच्छति अनुव्रतानामित्यादि

धर्मार्थकाममोक्षाणां निमित्तान्यविरोधतः वार्तायादंडनीतेश्च श्रुतस्य च विधिं पृथक् ३२ श्राद्धस्य च विधिं ब्रह्मन्पितॄणां सर्गमेव च ग्रहनक्षत्रताराणां कालावयवसंस्थितिं ३३ दानस्य तपसो वापि यच्चेष्टापूर्तयोः फलं प्रवासस्थस्य यो धर्मो यश्च पुंस उतापदि ३४ येन वा भगवांस्तुष्येद्धर्मयोनिर्जनार्दनः संप्रसीदति वा येषामेतदाख्याहि चानघ ३५ अनुव्रतानां शिष्याणां पुत्राणां चापि द्विजोत्तम अनापृष्टमपि ब्रूयुर्गुरवो दीनवत्सलाः ३६ तत्त्वानां भगवंस्तेषां कतिधा प्रतिसंक्रमः तत्रेमं क उपासीरन्क उ स्विदनुशेरते ३७ पुरुषस्य च संस्थानं स्वरूपं वा परस्य च ज्ञानं च नैगमं यत्तद्गुरुशिष्यप्रयोजनं ३८

ना। हे द्विजोत्तम मैत्रेय अनुव्रतानां सेवमानानां शिष्याणां पुत्राणां चानापृष्टमपि ब्रूयुः वहेतौ यतो गुरवो दीनवत्सलाः दीनजनेषु वात्सल्यवंतः पुत्राणामिति दृष्टांतार्थं यथा पुत्रेभ्योऽपृष्टमपि ब्रूयुस्तथा शिष्येभ्योऽपीत्यर्थः अपृष्टोऽपि रहस्यार्थः कश्चिदस्ति चेत्सोऽपि वक्तव्य इत्यर्थः ३६ हे भगवन्मैत्रेय तत्त्वानां पृथिव्यादीनां प्रतिसंक्रमः प्रलयः कतिधा कतिप्रकारः किं पृथिव्यादीनि सर्वाणि संहृत्य स्वपरमकारणे लीयंते उतो परेषां पूर्वस्मिन्लयः उतोभयविधोऽपीत्यादिसंशयानां प्रवृत्तेः कतिधेत्युक्तिः तत्र प्रलये एनं परमात्मानं के उपासीरन्ननुपसंहृताः सेवंते मुक्ता इत्यर्थः क उस्वित्केवा अनुशेरते उपसंहृियंते इत्यर्थः ३७ पुरुषस्य जीवस्य संस्थानं स्वासाधारणप्रकारं स्वरूपं च तथा परस्य परमात्मनः संस्थानं स्वरूपं च नैगमं शास्त्रजन्यं च कथं भूतं गुरुशिष्ययोः प्रयोजनं प्रयोजनभूतं ज्ञानं ३८

प्रजापतीनां मरीच्यादीनां पतिः स ब्रह्मा कान्प्रजापतीन्चक्लृपे सृष्टवान् तदेतत्सर्वं वर्णयेत्युपरितनेनान्वयः समष्टिपुरुषो नव
प्रजापतिसृष्टिद्वारा तत्सुतादिभिरिदं ब्रह्माण्डमापूरितवान् कथं करोत्तत्प्रकारं वर्णयेत्यर्थः तथा सर्गान्वस्मा मारणान्नवविधप्राकृत
सर्गाननुसर्गांश्च चतुर्मुखस सर्गांस्तांश्चात्मसर्गान्मनून्स्वायंभुवादींश्चतुर्दश मनून्मन्वन्तरेषु ये ये पास्तान् २५ एतेषां मन्वन्तरा
धिपानां ये वंशास्तान्वंश्यानां वंशजानामनुचरितानि हे मित्रात्मज मैत्रेय भूः मेरूपर्युपरिष्टादधोधस्ताच्च ये लोकास्त्र्या
सत्ते तांश्च तेषां लोकानां संस्थामवयवविन्यासं प्रमाणं परिमाणं च वर्णय कथयेत्यर्थः २६ तिर्यगिति तिरश्चां पश्वा
दीनां मानुषाणां देवानां सरीसृपाणां सर्पादीनां पतत्रिणां च गार्भाणां जरायुजानां स्वेदानां स्वेदजानां अण्डजानां मुद्भि
ज्जानां च सर्गसंव्यूहं सर्गविकल्पनेनोक्तं भवं वद कथय २७ गुणावतारै रजआदिगुणप्रधानैः ब्रह्मविष्णुरुद्रादिभिः स्र

प्रजापतीनां स पतिश्चक्लृपे कान्प्रजापतीन् सर्गांश्चैवानुसर्गांश्च मनून्मन्वन्तराधिपान् २५ एतेषामपि वंशांश्च वंशा
नुचरितानि च उपर्यधश्च ये लोका भूमेर्मित्रात्मजासते तेषां संस्थां प्रमाणं च भूर्लोकस्य च वर्णय २६ तिर्यङ्मा
नुषदेवानां सरीसृपपतत्रिणां वद नः सर्गसंव्यूहं गार्भस्वेदद्विजोद्भिदां २७ गुणावतारैर्विश्वस्य सर्गस्थित्यप्ययाश्रयं
सृजतः श्रीनिवासस्य व्याचक्ष्वोदारविक्रमं २८ वर्णाश्रमविभागांश्च रूपशीलस्वभावतः ऋषीणां जन्मकर्माणि वेद
स्य च विकर्षणं २९ यज्ञस्य च वितानानि योगस्य च पथः प्रभो नैष्कर्म्यस्य च सांख्यस्य तंत्रं च भगवत्स्मृतं ३० पाषंडपथवै
षम्यं प्रतिलोमनिवेशनं जीवस्य गतयो याश्च यावतीर्गुणकर्मजाः ३१ जतोजगदापारंकुर्वतः श्रीनिवासस्योदारविक्रमं उ

दारमपारं मां च स्व कथंभूतमुदारविक्रमं विश्वस्य सर्गस्थित्यप्ययाश्रयं सर्गस्थितिसंहारणानामाश्रयो विषयो यस्य तमिति वा २८
तथा रूपशील स्वभावतः रूपं लिंगं शीलमाचारः स्वभावः शमादिः तत्तीयार्थे तसिः रूपादिभिः सह वर्णाश्रमविभागांश्च वर्णा
दीनां परस्परविविक्तस्वरूपं चाख्याहि सूत्रेणान्वयः एवमग्रेऽपि द्वितीयान्तानां तेनैवान्वयः वेदस्य विकर्षणं व्यासं विभागं इतिया
वत् २९ यज्ञस्य वितानानि विस्तारांश्च योगस्य ज्ञानाभिसंहितकर्मयोगस्य पथः मार्गान्नैष्कर्म्यस्य प्रवृत्तिधर्मत्यागस्य सांख्यस्य ज्ञान
योगस्य च वितानानि वदेत्तिवा यद्वा ज्ञानयोगादीनां प्रतिपादकं यद्भगवतास्मृतं तत्तंत्रं सात्वतं ३० पाषंडानां वैदिकबहिःकृतानां पथाः प्रवृ
त्तिः तस्या वैषम्यं प्रतिलोमानिवेशनं वर्णप्रतिलोमजानां प्रतिकरणं जीवस्य सत्त्वादिगुणकर्मजाः पागतयः फलानि ताश्च ३१

भा॰त॰टी॰ ३३

एवं भवत्कथायां सत्रा प्रवर्तितो मैत्रेयः तत्कृतप्रश्नानां उत्तराण्यभिधास्यमानः प्रथमं भगवन्नाभेः ब्रह्मण उत्पत्तिं भगवंतमग्रा न [illegible] तत्तत्स्वरूपज्ञाने विभूतत्त्वपसा भगवतो बलं चाष्टमेनाध्यायेनाह तत्र भगवत्कथायां प्रवर्तयितारं श्रोतारं [illegible] वक्तारमभिनं शाःस॰ दति स सेवनीय इति वताहो पुरुवं सेवनीयः यस्माद्भगवत्प्रधानः भगवानेव प्राप्ततयोपायैत याच प्रधानः यस्य सः लोकपा लेषु मरिराजो शम्भुतत्त्वाहि तु यौ लोकपाल इत्युच्यते एवं भूतस्त्वं इह पूरुवंशे वभूविथ उत्तमो भूत अतः स सेवनीय इत्यर्थः भगवत्प्रा धानमेव विशदयति अजितः परमपुरुषः तस्य कीर्तीनां यशसां माला पंक्तिस्तां पदे पदे पुनः पुनरभीक्ष्णं भक्त्या नूतनयसि त्वं वानवां करोषि १ एवमभिनंद्य त्वत्कृतप्रश्नान्न केवलमस्मद्बुद्धिगोचरैरेवोत्तरयामयि तु सुसंप्रदायादागतं श्रीभागवताख्यानेनैवेत्याह सोहमिति सभ [illegible] वतास्य अहं सहाचार्यश्री पराशरकृपया परावरतत्त्वदर्शी भवत्कृतप्रश्नोत्तरव्विवक्षया भा

मैत्रेय उ॰ स सेवनीयो वत पूरुवंशो यल्लोकपालो भगवत्प्रधानः बभूविथेहाजितकीर्तिमालां पदे पदे नूतनयस्यभीक्ष्णं १ सोहं नृणां क्षुल्लसुखाय दुःखं महद्गतानां विरमाय तस्य प्रवर्तये भागवतं पुराणं यदाह साक्षाद्भगवानृषिभ्यः २ ॥

गवताख्यं पुराणं प्रवर्तये प्रवर्तनाफलमाह क्षुल्लकसुखाय अल्पसुखाय अल्पसुखसंपादनार्थं महद्दधिकं दुःखं गतानां प्राप्तानां लोकानां तस्य महतो दुःखस्य विरमायनाशाय अनेन लोको जिजीविषयैवायं संसारः प्रवृत्त इत्यवगम्यते उभयोरपि वक्तृत्वे नपक्षे अवक्तुस्वान्तराभावात् कथं भूतं पुराणं यद्भागवतं पुराणं भगवान्संकर्षणः ऋषिभ्यः सनकादिभ्यः साक्षादाह तत्प्रामाणिकत्व त्यर्थः द्वे हि भागवतसंप्रदायः एकं हि भागवत [illegible] चतुर्मुखेन नारदस्य ततो द्वैपायनपर्यंतं चतुःश्लोकीरूपेण प्रवृत्तं तदेव व्यासेन विवृतं दशलक्षणं श्रीशुकेनाधीतं राज्ञे उपदिष्टं अष्टादशसहस्रात्मकं अपरं तु भागवतं संकर्षणमारभ्य सनत्कुमारसांख्यायनपराशरमैत्रेयपर्यंतपरया चतुःश्लोकीरूपेणैव प्रवृत्तं मैत्रेयेण विवृतं विदुरायोपदिष्टं च तदेव द्वैपायनस्कंधद्वयात्मना विस्तरिष्यमाणेन भविष्यद्दशस्कंधात्मकपुराणं वक्ष्यतीति बोध्यं २ ॥ ॥ ॥ ॥ ॥ ॥ ॥

नैरेत रा॰म॰ ३२ ३३

मारम्भ ४

तस्य ज्ञानस्य निमित्तानि साधनानि यानि सूरिभिः प्रोक्तानि तानि च हे अनघ ब्रूहीत्यर्थः गुरूपदेशमंतरेण सर्वं मेतन्न संपद्यत इत्याह
स्वतः गुरूपदेशमंतरा पुंसां ज्ञानं ततो भक्तिः ततो वैराग्यं च कुतः स्यात् ततो ज्ञानभक्तिवैराग्यादेर्गुरूपदेशमंतरेणासंपन्ने ३९ हरेः
कर्मविवित्सया भगवच्चेष्टितं बुभुत्सया एतान्प्रश्नान्प्रश्नविषयान् पृच्छतः अजया प्रकृत्या नष्टचक्षुषः हृतज्ञानस्यात एवाज्ञ-
स्य मे मह्यं ब्रूहि मित्रत्वं च यमेतान्न वो नरु रूच ४० भयभीतस्यात्तत्वोपदेशेनाभयप्रदानं श्रेष्ठं मोक्षधर्मोऽस्तीत्याह सर्व इति वेदाध्यय-
नार्थज्ञानानि वेदशब्देन विवक्षितानि यज्ञादयो वेदार्थानुष्ठानरूपाः यज्ञाः पंचमहायज्ञादयः तपोऽनशनादि दानमुपासनं ए-
तानि सर्वाणि जीवाभयप्रदानस्य संसारनिवृत्त्युपायोपदेशरूपाभयप्रदानधर्मस्य कलांमात्रामपि न कुर्वीरन् ४१ विदुरकृत-
प्रश्नानुपसंहरंस्तेषामुत्तरप्रदानाय मैत्रेयः प्रारभत इत्याह श्रीशुकः इति इत्थं पूर्वोक्तप्रकारेण पृष्टः पुराणकल्पः कल्प्यत इति कल्पः

निमित्तानि च तस्येह प्रोक्तान्यनघ सूरिभिः स्वतो ज्ञानं कुतः पुंसां भक्तिर्वैराग्यमेव च ३९ एतान्मे पृच्छतः प्रश्नान् हरेः कर्म
विवित्सया ब्रूहि मेऽज्ञस्य मित्रत्वादजया नष्टचक्षुषः ४० सर्वे वेदाश्च यज्ञाश्च तपो दानानि चानघ जीवाभयप्रदानस्य न कु-
र्वीरन्कलामपि ४१ श्रीशुक उ० स इत्थमापृष्टपुराणकल्पः कुरुप्रधानेन मुनिप्रधानः प्रवृद्धहर्षो भगवत्कथायां संचोदित-
स्तं प्रहसन्निवाह ४२ इति श्रीभाग० तृतीयस्कंधे विदुरकृतप्रश्नसमुदायकथनं नाम सप्तमोऽध्यायः ७ ॥ ॥ ॥ ॥

[illegible] पुराणार्थः मंत्रकल्प इतिवत् यावद्रहस्य प्रकाशकतया कल्प इत्युक्तं आपृष्टः आसमंतात्पृष्टः पुराणकल्पः यस्य
सः मुनिप्रधानः मुनिश्रेष्ठो मैत्रेयः कुरुप्रधानेन विदुरेण भगवत्कथायां संचोदितः प्रवर्तितः अतएव प्रवृद्धहर्षः प्रहसन्निव प्रश्ना-
नां संहर्तव्या स्फरवनोत्तरयितुं शक्यत्वात् बहुहसन्निव तं प्रत्याहेत्यर्थः अत्रेदं ज्ञेयं तावद्धज्ञप्रश्नानां विदुरप्रश्नानां चैकरूपं प्रतीयते
उभयत्रोभयेषां प्रत्यभिज्ञानात् अप्रत्यभिज्ञाता तूपलक्षणतयोक्ता अत्रैषां केषांचित्प्रश्नानां मैत्रेयो ज्ञान्ये वोत्तराणि तृ-
तीयतुरीयाभ्यामाह शुकः अन्येषां तु स्वयमेतदास्वान प्रवृत्तेनोपरितनैः स्कंधैराचचक्षे मैत्रेयस्यकाल्पेन प्रश्नानामुत्तरान-
भिधानं तु विदुरस्य महात्मनो भगवद्धर्मप्रवर्तकस्योत्तरितप्रश्नैरेव बुभुत्सायाः शांतत्वादुपपद्यत इति अलमतिविस्तरेण ४२
इति तृतीये सप्तमः ७ ॥

निवृत्तिधर्माभिरताय मोक्षधर्मैषासक्तये सनत्कुमाराय भगवत्तमेन तेन संकर्षणेन तत् भागवतं प्रोक्तं किल सनत्कुमारायेत्यन्वयः तं संप्राभिप्रा-
यकं स च सनत्कुमारः एषः विधिवदुपसन्नाय एषः सांख्यायनेनेति शेषः धृतव्रताय धृतानि व्रतानि शिष्यधर्मा येन तस्मै ७ पारमहंस्यधर्मेषु-
ख्यः प्रधानः सांख्यायनः भगवद्विभूतीर्विविक्षमाणः वक्तुमिच्छुः ब्रुवादेशस्य वचेरुभयपदीत्वाद्विवक्षमाणइत्यात्मनेपदं अन्वितायानु-
गतायानुवर्तमानायेति यावत् अस्मद्गुरवे पराशराय बृहस्पतेश्च उवाच ८ दयालुः समुनिः पराशरः ... पुलस्त्येनोक्तः त्वं पर-
देवतापारमार्थ्यज्ञानवान् पुराणकर्ता च भवेति दत्तवरः एवं ह्याख्यायिका पितरं राक्षसैर्भक्षितं श्रुत्वा पराशरो राक्षससत्रे प्रवृत्तः वशिष्ठ-
वचनान्निवृत्तः ततः पुलस्त्येन संतुष्टेन वरो दत्तः पुराणसंहिताकर्ता भवान् सम्भविष्यति देवतापारमार्थ्यं च यथावद्वेत्स्यते भ-
वानिति एवंभूतः दयालुः पराशरः मह्यं पुराणं प्रोवाच सोहं पराशरेणोपदिष्टं श्रीभागवतपुराणं हे वत्स विदुर श्रद्धालवे नित्यमनुव्रता-
य च तव तुभ्यं नित्यमिति एवं परान्वये तवेति विभक्तिव्यत्यय आर्षः एतत् श्रीभागवतं कथयामि ९ एवं संकर्षणसंप्रदायप्रवृत्तिं प्रदर्श्य-

प्रोक्तं किलैतद्भगवत्तमेन निवृत्तिधर्माभिरताय तेन सनत्कुमाराय स चाह पृष्टः सांख्यायनायाङ्ग धृतव्रताय ७ सांख्यायनः पार-
महंस्यमुख्यो विवक्षमाणो भगवद्विभूतीः जगाद सोस्मद्गुरवेन्विताय पराशरायाथ बृहस्पतेश्च ८ प्रोवाच मह्यं स दयालुरुक्तो मुनिः
पुलस्त्येन पुराणमाद्यं सोहं तवैतत्कथयामि वत्स श्रद्धालवे नित्यमनुव्रताय ९ उदाप्लुतं विश्वमिदं तदासीद्यन्निद्रयामीलितदृङ्
न्यमीलयत् अहीन्द्रतल्पेधिशयान एकः कृतक्षणः स्वात्मरतौ निरीहः १० ३।८।२

प्रसक्तं तत्प्रश्नानामुत्तराणि विवक्षुः पूर्वोक्तमेव महदादिपृथिव्यंतं तत्त्वसृष्टिमुपजीव्य ब्रह्माण्डरूपपद्मोत्पत्तिं वक्ष्यन् तंतराजगद्धारणाधि-
ष्ठातारं निरूढरूपं भगवद्वैस्थितिप्रकारमाह उदिति द्वाभ्यां यदा । अहीन्द्रतल्पे शेषशय्यायां न एकः असहायः कृत... क्षणः तत्कालिक ज-
गद्धारणादुपरतत्वेनलब्धयोगनिद्रावसरः स्वात्मरतौ स्वात्मानुभवसुखे अहीनः पूर्णः अनीह इत्यपि पाठः तदा स्वात्मरतौ कृत ... क्षणः
अनीहः निष्क्रियः निद्रया स्वात्मानुभवरूपयोगनिद्रया न्यमीलयत् लोचन इति शेषः तदेदं विश्वं चेतनाचेतनात्मकं जगत् दामरणोद-
केनाप्लुतं व्याप्तमभिसंधिः अन्यथा ब्रह्माण्डरूपपद्मोत्पत्तेर्वक्ष्यमाणत्वायोगात् उदाप्लुतमित्यनेन तत्कालिकावस्थायां विश्वं तस्योद-
प्लुतत्वमुच्यते तत्कारणभूतजातस्यावरणजलस्यापि ब्रह्माण्डस्य कार्योदकव्याप्तिरुच्यते आवरणजलपर्यंतं सृष्टतस्मिन्नावरणजले
प्लावितत्वान्नित्युक्तं भवति १० ॥

अस्य सांकर्षणं भागवतस्य संकर्षणप्रभृति सत्यपर्यन्तं संप्रदाय [illegible] प्रवृत्तिमभिधास्यमानः सनकादीनां विधिवत्संकर्षणोपसत्तिमाह
चतुर्भिः आसीनमिति उर्व्यां पातालतले आसीनं उपविष्टं भगवन्तमाद्यम् अकुण्ठसत्त्वं रजस्तमोभ्यामप्रतिहतं सत्त्वं यस्य तं शुद्धसत्त्वमयं दिव्य
मंगलविग्रहमित्यर्थः एवंभूतं संकर्षणं देवं कुमारमुख्याः सनत्कुमारप्रभृतयश्चत्वारो मुनयः अपृच्छन् विधिवदुपसद्यानुपृष्टवन्तः कथं
भूता मुनयः अतः चेतनाचेतनात्मकजगतः परस्य विलक्षणस्य परमात्मनस्तत्त्वं याथात्म्यं विविदिषवः वेत्तुमिच्छवः ३ तमेव संकर्षणं विशि
नष्टि स्वमिति यं वासुदेवाभिधं वासुदेवशब्दवाच्यम् आमनन्ति तं स्वधिष्ण्यं स्वावासभूतं स्वकारणं भगवन्तमित्यर्थः बहुमानयन्तं सर्वोत्कर्षेण
पूजयन्तं प्रत्यग्धृताक्षाम्बुजकोशं प्रत्यगात्माभिमुखेन निमित्तेन धृतं मुकुलितं यदक्षाम्बुजकोशं [illegible] तद्विबुधोदयाय विबु
धामभ्युदयायेषदुन्मीलयन्तम् [illegible] अपृच्छन्निति पूर्वेणान्वयः ४ मुनीन्विशिनष्टि स्वर्धुनीति स्वर्धुन्या गङ्गाया उदकेनार्द्रैः स्व

आसीनमुर्व्यां भगवन्तमाद्यं संकर्षणं देवमकुण्ठसत्त्वं विवित्सवस्तत्त्वमतः परस्य कुमारमुख्या मुनयोन्वपृच्छन् ३ स्वमेव धिष्ण्यं बहु
मानयन्तं यं वासुदेवाभिधमामनन्ति प्रत्यग्धृताक्षाम्बुजकोशमीषदुन्मीलयन्तं विबुधोदयाय ४ स्वर्धुन्युदार्द्रैः स्वजटाकलापैरुप
स्पृशन्तश्चरणोपधानं पद्मं यदर्चन्त्यहिराजकन्याः सप्रेमनानाबलिभिर्वरार्थाः मुहुर्गृणन्तो वचसानुरागस्खलत्पदेनास्य कृतानि
तज्ज्ञाः किरीटसाहस्रमणिप्रवेकप्रद्योतितोद्दामफणासहस्रं ५ जटाकलापैः श्रीभागवतं गायन्ति सत्यलोकात्पातालमवतरन्तो नितरं अव

गं१ गंगामध्यात एवावतीर्णा इति तत्स्नानेनार्द्रजटाकलापैरितिभावः एवंभूतैर्जटाकलापैश्चरणोपधानं चरणपद्मपृथ्वीं तैः स्पृश
न्तः चरणोपधानं पादपीठं उपस्पृशन्तः नमस्कुर्वन्तः सन्तः कथंभूतं चरणोपधानं यत्पद्मं महिराजकन्याः अहेः शेषस्य संकर्षणस्य
कन्याः वरार्थाः पतिकामाः सप्रेम प्रेमसहितं भक्तिर्यथा तथा बलिभिर्नानोपहारैरर्चन्तीति तथाभूतमित्यर्थः ५ अस्य भगवतः कृतानि कर्मा
णि तज्ज्ञाः तानि जानन्तीति तद्विचेष्टिताभिज्ञाः अनुरागेण प्रेमातिशयेन स्खलन्ति पदानि यस्मिंस्तेन वचसा मुहुर्गृणन्तः गायन्तः मुन
यः किरीटानां सहस्रं तस्मिन्मणिप्रवेकाः मणिउत्तमाः तैः प्रद्योतितं उद्दामफणानां सहस्रं यस्य तं संकर्षणमन्वपृच्छन्निति पूर्वेणान्वयः
एवं विधिवदाचार्योपसत्तिमभिधायोपसन्नेभ्यः तेभ्यः श्रीभागवतमुपदिदेशेति वदंस्तदर्वाचीनामप्याचार्यपरंपरामाह प्रोक्त
मिति ॥

नि:८

भा॰ त॰ टी॰ ३५

कथंभूतोऽनिरभिद्यत इत्यत आह आत्मयोनिः कारणं यस्य सः आत्मयोनिः परमात्मस्वरूपः कोशः लोकात्मकः पद्मरूपः कर्म जीवादृष्टं तस्मिन्निवेधि तेनैव तथा कालेन संक्रमानक्रमेणेत्यर्थः उदतिष्ठत् कथंभूतः पद्मकोशः स्वरोचिषा विशालं तत्सलिलमावरणं जलं सर्वं द्योतयन् १४ अथ भगवन्नाभिदेशादुत्पन्नब्रह्माण्डरूपपद्मकोशे चतुर्मुखोत्पत्तिमुत्पन्नस्य व्यापारं चव ब्रह्मस्य तदधिष्ठितत्वमस्य च भगवदात्मकत्वमाह सार्द्धेन तल्लोकेति तदिति संबोधने विस्मयेन सर्वगुणावभासं [illegible] सर्वगुणान् जीवोपभोग्यान् अवभासयतीति तथा तच्छ्लोकपद्मं स एव यस्माज्जातः स एव विष्णुः प्राविविशत् तत्र यामित्यपरविशेषभूतं तत्र निवृत्तये रणादिशौरीश्चुधिष्ठानमिति पाठं तदेतदा सर्वे गुणाः त्वं सत्त्वौ यपि कागुणाः [illegible] तेरवभास्यते इति तथाभूतं स्वात्मकं जीवविशेषं लोकपद्मरूपं धिष्ठानं प्राविविशत् प्रविष्टमकरोत् नाभिसरसि जेत्स्थापयामासेत्यर्थः कोऽसौ स्वात्मको जीवविशेष इत्यपेक्षायां तद्विशदयंस्तस्य तत्रोत्पत्तिमाह तस्मिन्निति यं स्वयंभुवं प्रवदन्ति स वेदमयो वेदप्रचुरः विधाता स्रष्टा तस्मिन् स्वयं अभूदुत्पन्नः उदात्तु

टी॰ ८

35

स पद्मकोशः सहसोदतिष्ठत्कालेन कर्मप्रतिबोधितेन स्वरोचिषा तत्सलिलं विशालं विद्योतयन्नर्क इवात्मयोनिः १४ तल्लोकपद्मं स उ एव विष्णुः प्राविविशत्सर्वगुणावभासं तस्मिन्स्वयं वेदमयो विधाता स्वयंभुवं यं स्म वदन्ति सोऽभूत् १५

तमित्यादयः श्लोकाः अवान्तरप्रलयपरा वा वर्णनीयाः तदानीमर्थः क्रमः तथा हि एवं सर्गश्चैवानुसर्गश्चेति चतुर्मुखात्पूर्वं निरस्यश्चोः एव त्वात्तत्र भगवानेक आसेदमग्र आत्मात्मनां विभुरित्यादि महाप्रलयकथनं एवं क्रमवान्तरसर्गचतुर्मुखपद्माद्याः दैनंदिनः कथ्यते तत्र दैनंदिनसर्गाणां तत्प्रलयानां च उक्त्वा तत्कथनस्य तच्छ्रवणस्य चाशक्यत्वात्सर्वपरार्द्धमिपाद्मरयकल्प संगतिप्रलयपर्वा २ तः दैनंदिनः कथ्यते तत्र दैनंदिनसर्गाणां तत्प्रलयानां च उक्त्वा तत्कथनस्य तच्छ्रवणस्य चाशक्यत्वात्सर्वं पराद्धं मिपाद्मरयकल्प

ते४ मे तत्कल्पापसयासन्निहितत्वात्कथयितुं प्रलयपूर्वकत्वात्सृष्टेः स च प्रकरणेषु देवसौम्येदमग्र आसीदित्यादिप्रलयकथनपूर्वकमेवसृष्टिकथनाच्च प्रथमे पाद्मकल्पात्प्राक्तनं प्रलयमाह उदाप्लुतमिति निशायामनुवृत्तायां निर्मुक्तशशिभास्करं इत्यारभ्य तावयं स्तुत्कटाटोपचंड वातेरितोर्मय इत्यं तवक्ष्यमाणरीत्या विश्वं त्रिलोकात्मकं जगदुदाप्लुतं मासीदित्यर्थः अन्यत्पूर्ववत् एवं प्रलयमभिधाय सर्गं वक्तुमारभते तस्येत्यादिना प्राक्कल्पांते धाता भगवतो योगनिद्रालोक्यास हभगवतितिरोहितः तस्मिन्प्रबुद्धे तत एवमभिधाय सर्गं वक्तुमारभते तस्येत्यादिना प्राक्कल्पान्ते धाता भगवतो योगनिद्रालोक्यास ह भगवति तिरोहितः तस्मिन्प्रबुद्धे तत एव ताम्रेकल्पेपद्म हरेणाभिव्यक्तिप्राप्तस्तु प्रादुर्भवमाह तस्येत्यादिना धिष्ठ्य प्राविविशत्स्वस्थानं प्रविष्टमकरोन्नाभिसरसि स्थापयामासेत्यर्थः अन्यत्पूर्ववत् १५॥

पान ३५

सन्निहितं प्रलयं ५

पंक्ति ५

त२

पुनस्तमेव विशिनष्टि स इति अंतःशरीरे शरीरांतः अर्पितभूतसूक्ष्मः अर्पितानि निहितानि भूतसूक्ष्माणि येन सः दिदृक्षया लयस्य भोक्तृकरणविषयरूपशक्तित्रयोपपत्त्या कारणात्मनां तदंतर्गतत्वं युक्तं कालात्मिकां शक्तिं स्वात् पृथक् सिद्धविशेषणभूतेकाले उदीरयाणः प्रेरयन् कालशक्तिप्रेरणं पुनः सृष्ट्यवसरे प्रबोधनार्थं स्वे स्वकीये पदे स्थाने सलिले चिरमेव यावत्तनं स्वापो हि स्मार्यते उवास उषितवान् नु बहिर्व्यापाराभावे दृष्टांतः यथानल इति दारुणि काष्ठे नलो अग्निः रुद्धवीर्यः निरुद्धप्रकाशत्वादि गालत्वदाहकत्वादि स्वभावो वर्तिष्यते एवं सोपि स्वेच्छया पूर्वानाविष्कृतसृष्ट्यादिसामर्थ्य आस्तेत्यर्थः ११ एवं मंतरा वस्थितिमभिधाय तस्य ब्रह्मांडसृष्ट्युन्मुखत्वमाह चतुर्युगेति सहस्रशब्दोऽनंतवाची अनेककालमित्यर्थः चतुर्युगानां कृतादीनां सहस्रमप्सु स्वपन् तत एव सादितलोकतंत्रः असंपादितलोकस्थ नः स्वशक्त्या स्वात् पृथक् सिद्ध विशेषणभूतया कालरूपशक्त्या हेतुभूतयोपलक्षित इति वा निपीतान् अर्पितान् लोकान् स्वदेहे ददृशे लोककारणभूतानि भूतसूक्ष्मरूपाणि यानि द्रव्याणि तान्यर्थः स्वदेहे दृष्टवानित्यर्थः

सोऽन्तःशरीरेऽर्पितभूतसूक्ष्मः कालात्मिकां शक्तिमुदीरयाणः उवास तस्मिन्सलिले पदे स्वे यथानलो दारुणि रुद्धवीर्यः ११

चतुर्युगानां च सहस्रमप्सु स्वपन्स्वयोदीरितया स्वशक्त्या कालाख्ययासादितकर्मतन्त्रो लोकानपीतान्ददृशे स्वदेहे १२

तस्यार्थसूक्ष्माभिनिविष्टदृष्टेरन्तर्गतोऽर्थो रजसा तनीयान् गुणेन कालानुगतेन विद्धः सूष्यंस्तदाभिद्यत नाभिदेशात् १३

अथ निग्रहान्छायेतत्त्वाधिष्ठिते प्रधाने इत्यर्थः क्लीबसे संस्थानधर्ममनंतेन च सृष्टितं प्रधानमिति हि पराशरवचनं देहः स्वादि व मंगलमिग्रह तेऽर्पितवंसप्लवकं देहः शब्दः प्रधानपरो वा यस्याव्यक्तं शरीरमिति हि श्रुतिः अत एव चतुर्युगानां सहस्रे स्वपन्नेव प्रत्यक्ता नाभिदेशात् सपद्मकोशः सहसोदतिष्ठत् सन्निधानेन क्रमेण विवृद्धं तत् कमलं बुद्बुदवत् समात तच्च नाभ्यः स्मारितो भवति अंतः सृष्टो पारभ्यायां गहगोपुरादिनिर्माणे शिववित्तेवोनेति दित स्यात् १२ अथ तत्र लोकोत्पत्तिमाह द्वाभ्यां तस्येति अर्थसूक्ष्माभिनिविष्टदृष्टेः भूतसूक्ष्मेषु प्रवर्तितसंकल्परूपज्ञानस्य भगवतोऽन्तर्गतः तनीयान् सूक्ष्मतरः अर्थः भूतसूक्ष्मवर्गः कालानुगतेन कालवशादुन्मिषितेन रजसा गुणेन विद्धः सूष्यन्प्रसूष्यन् उद्भिद्यन् नाभिदेशान्निरभिद्यतेत्यर्थः रजसा भूतसूक्ष्मजातं जगत्पद्मरूपेण तन्निसर्पः रजः शब्देन पद्मरागसमाधिश्च सूच्यते एव १३ ॥ ॥ ॥ ॥

दित्यन्वयः नच स्वयमपश्यदित्यनुषंगः २२ ४

भा॰ तृ॰ टी॰
३६
२४
3.6

॥ एवं लोकपद्माधिष्ठानभूतः परमात्मा नान्वेषणाद्वगंतुं किंतूपासनयैवेत्याह ततइति द्वाभ्यां स देवः ब्रह्माऽप्रतिलब्धकामः न प्रतिलब्धः कामः अधिष्ठानदर्शनरूपमनोरथः येन सः ततोऽन्वेषणात् प्रतिनिवृत्तः पुनः स्वधिष्ण्यं कमलकर्णिकामासाद्य शनैर्जिताः श्वासाः प्राणाः निवृत्तं विषयविमुखं कृतं चित्तं येन सः २१ अतएव कालेनाभिप्रवृत्तो यो योगः समाधियोगस्तेन विरूढ उत्पन्नो बोधो यस्य सः यत्पूर्वं विचिन्वता जलेनापश्यत्तत्स्वयमेवांतर्हृदयेऽवभातमपश्यत् २२ तद्दर्शयति मृणालेत्यादिनवभिः [illegible] नुषंगः मृणालवद् त्यं तं तु वज्रौरश्चायतः शेषस्य भोगः स एव पर्यंकः तस्मिन् शयानमेकं पुरुषमपश्यत् कुत्र स्थिते पर्यंके फणा एवातपत्राणि तैरायुताः सर्वतो युक्ताः ये मूर्धानः तेषां रत्नानि किरीटस्थानि तेषां द्युतिभिः प्रभाभिः हतं निरस्तं ध्वांतमंधकारं यस्मिंस्तस्मिन् युगांततोये स्थिते इत्यर्थः २३ क

ततो निवृत्तोऽप्रतिलब्धकामः स्वधिष्ण्यमासाद्य पुनः स देवः शनैर्जितश्वासनिवृत्तचित्तो न्यषीददारूढसमाधियोगः २१ कालेन सोऽजः पुरुषायुषाभिप्रवृत्तयोगेन विरूढबोधः स्वयं तदंतर्हृदयेऽवभातमपश्यतापश्यत यन्न पूर्वं २२ मृणालगौरायतशेषभोगपर्यंक एकं पुरुषं शयानं फणातपत्रायुतमूर्धरत्नद्युभिर्हतध्वांतयुगांततोये २३ प्रेक्षां क्षिपंतं हरितोपलाद्रेः संध्याभ्रनीवेरुरुरुक्ममूर्ध्नः रत्नोदधारौषधिसौमनस्यवनस्रजो वेणुभुजांघ्रिपांघ्रेः २४

थंभूतं पुरुषं हरितोपलाद्रेः मरकतशिलामयपर्वतस्य प्रेक्षां शोभां क्षिपंतं स्वलावण्यातिशयेन तिरस्कुर्वंतं कथंभूतस्य हरितोपलाद्रेः संध्याभ्रमेव नीविः परिधानं यस्य तस्य संध्याभ्रस्य शोभां पीतांबरेण क्षिपंतमित्यर्थः उरुरुक्ममूर्ध्नः भूयिष्ठकनकशृंगस्य किरीटैः कनकशृंगशोभां क्षिपंतमित्यर्थः रत्नानि च उदधाराः उदकधाराश्च ओषधयश्च नगा ज्योतींषि च सौमनस्यानि पुष्पाणि सुमनसां समूहा एव वा तेषां वनस्रजो वनमाला यस्य तस्य वेणव एव भुजा अंघ्रिपा वृक्षा एवांघ्रयः पादा यस्य तस्य स्वीयरत्नतुलसीमुक्तापुष्पदामभिः भुजैरंघ्रिभिश्च हरितोपलाद्रेः रत्नान्यंघ्रिपान् तानि क्षिपंतं इत्यर्थः यद्वा मरकताद्रेः रत्नादयो वनमाला इव वेणवो भुजा इव वृक्षा अंघ्रय इव वर्तंते हरितस्य शोभां स्वीयरत्नादिभिः क्षिपंतमित्येवंभूतोपमेयं २४ ॥ ॥ ॥ ॥

रामः
३६

टी॰२ वेणूनं२

अस्य चतुर्मुखाख्यस्य जीवविशेषस्य कर्मणा संकुचितज्ञानस्य भगवदुपासनयैवाविर्भूतज्ञानक्रियाशक्तेर्लौकिकत्वं [illegible] त्वं न स्वतन्त्रमी
वक्तुं तस्य प्रथमं मोहनमाह तस्यामित्यादि द्वाभ्यां स च स्वयंभूः तस्यां जगत्कर्णिकायामवस्थितस्तिष्ठन् लोकप्रपंचमपश्यमानः तद्दर्श
नार्थं व्योम्नि विवृत्ते विस्फारिते नेत्रे यस्य सः परिक्रमन्क्रमणमध्ये चतुर्दिक्षु परिभ्रमन् चत्वारि मुखानि लेभे प्राप्तवान् १६ तस्मादितः यु
गान्ते प्रलयान्ते यः श्वसनः पवनस्तेनावघूर्णं भ्रमत् यज्जलं तस्योर्मीणां चक्रं तद्युक्तस्य तस्मात्सलिलाद्विरूढं कंजं जगत्पद्मं उपाश्रितः अधिष्ठि
तः आदिदेवश्चतुर्मुखः लोकतत्त्वं लोकात्मकं पद्मतत्त्वमात्मानं चाद्धा तत्त्वेन न वेद १७ अवेदनमेव प्रपंचयति क इति अब्जपृष्ठे क ८५
मलकर्णिकायां स्थितो योऽसावहमित्येषः कः अनन्यद् द्वितीयः एतदब्जमप्सु कुतो वा जातं एवमज्ञस्य तस्य तर्कमाह अस्तीति प
आधिष्ठाने एतस्य पद्ममधिष्ठितं तत्तदधिष्ठानभूतं किंचन वस्तु अधस्तादस्ति हि यस्मात्सत्तेन वस्तुना भाव्यं विद्यमानाधिष्ठाने नैवाधिष्ठेयस्य

तस्यां स चाम्भोरुहकर्णिकायामवस्थितो लोकमपश्यमानः परिक्रमन् व्योम्नि विवृत्तनेत्रश्चत्वारि लेभेऽनुदिशं मुखानि १६ त
स्माद्युगान्तश्वसनावघूर्णजलोर्मिचक्रात्सलिलाद्विरूढं उपाश्रितः कंजमु लोकतत्त्वं नात्मानमद्धाविददादिदेवः १७ क एष योऽसाव ८२
हमब्जपृष्ठ एतत्कुतो वाब्जमनन्यदप्सु अस्ति ह्यधस्तादिह किंचनैतदधिष्ठितं यत्र सता नु भाव्यं १८ स इत्थमुद्वीक्ष्य तदब्जनाल
नाडीभिरन्तर्जलमाविवेश नार्वाग्गतस्तत्खरनालपद्मनाभिं विचिन्वंस्तदविंदताजः १९ तमस्यपारे विदुरात्मसर्गं विचिन्वतोऽभू
त्सुमहांस्त्रिणेमिः यो देहभाजां भयमीरयाणः परिक्षिणोत्यायुरजस्य हेतिः २० येन भवितव्यं अधिष्ठानाभावेऽधिष्ठेयस्य पद्मस्या

संभवादित्यर्थः १८ स इति स ब्रह्मा इत्थं उक्तप्रकारेणोद्वीक्ष्य तदब्जनाल [illegible] नाडीभिस्तल्लोकपद्मनालच्छिद्रैरन्तर्जलं जलस्यान्तः प्रवि
वेश प्रविष्टः पद्म अजः ब्रह्मा खरं कठिनं नालं यस्य तस्य पद्मस्य नाभिमधिष्ठानं विचिन्वन्नन्विष्यन्नर्वाग्गतोऽपि तदा तदधिष्ठानं नाविन्दत्
लेभे १९ तमसीति हे विदुर अपारे तमसि तमोवत् दर्शनप्रतिबन्धके जले आत्मसर्गः सृज्यतेऽनेनेति कुत्तु स्वकारणं तद्विवक्षायां वा अ
धिकरणे वा घञ् आत्मकारणमित्यर्थः विचिन्वतः सतः त्रिणेमिः न्यूनाधिकसमदिवसरूपनेमित्रययुक्तः महादीर्घः कालः अभूत् संव
त्सरशतं तिक्रान्तमित्यर्थः कथं भूतोऽसौ त्रिणेमिः यः अजस्य भगवतः हेतिः कालचक्रं सुदर्शनरूपं शस्त्रं देहभाजां देहधारिणां भयमीरयाणः
प्रेरयन्नायुः परिक्षिणोति २० ॥ ॥

म१

दी

३३

प्रेक्षो क्षिपंतमिवत्रैव पर्वतरूपेण रूपितमपि विशेषणांतरैः पुनर्निरूपयति चराचरेत्यादिना भगवानेव [illegible] महीध्रः पर्वतस्तं
कथंभूतं चराचराणामोकः स्थानं पर्वतोपि तथा हीन्द्रस्य बंधुः पर्वतोपि हीन्द्राणां बंधुः सलिलोपगूढं जलेनावृतं पर्वतोपि मैनाको
दिस्तथा किरीटानां साहस्रमेव हिरण्मयशृंगाणि यस्य तं मेर्वादिस्तथा आविर्भवन्ती दृश्यमानो कौस्तुभरत्नं गर्भे मूर्तिमध्ये यस्य तं पर्व
तस्यापि हि गर्भे रत्नानि आविर्भवन्ति ३० किंच वनमालया निवीतं कंठलंबिन्या व्याप्तं कथंभूतया वनमालया आम्नायमधुव्र
तश्रिया आम्नाया वेदाः तद्रूपा ये मधुव्रता भ्रमरास्तैः श्रीर्यस्यास्तया कीर्तिमय्या विष्वैदस्वरूपैर्भ्रमरै राहितशोभया स्वकीयः सूर्येन्दुवाय्व[illegible] न्यग
मं सूर्यादिभिरगमं स्वस्य आपारे कलयितुमशक्यमित्यर्थः सूर्येन्दुताराग्न्यगममिति पाठः तत्र सूर्यादिभिरप्रकाश्यमित्यर्थः तथा वक्ष्य
ति न तत्र सूर्यो भाति न चंद्रतारकमित्यादिकाः त्रिधामभिः [illegible] त्रिषु लोकेषु धामस्फुरन्ति येषां तैः रसनार्थं परिभ्रमद्भिः प्राधनिकैः

चराचरौको भगवान्महीध्रमहीन्द्रबंधुं सलिलोपगूढं किरीटसाहस्रहिरण्यशृंगमाविर्भवत्कौस्तुभरत्नगर्भं ३० निवीतमाम्ना
यमधुव्रतश्रिया स्वकीर्तिमय्या वनमालया हरिं सूर्येन्दुवाय्वग्न्यगमं त्रिधामभिः परिक्रमत्प्राधानिकैर्दुरासदं ३१ तर्ह्येव तन्ना
भिसरःसरोजमात्मानमंभः श्वसनं वियच्च ददर्श देवो जगतो विधाता नातः परं लोकविसर्गदृष्टिः ३२ स कर्मबीजं रजसोपरक्तः
प्रजाः सिसृक्षन्नियदेव दृष्ट्वा अस्तौद्विसर्गाभिमुखस्तमीड्यमव्यक्तवर्त्मन्यभिवेशितात्मा ३३ इति श्रीभा॰ तृतीयस्कंधेष्टमोध्यायः ८

वो

संग्रामयुद्धजनकैः [illegible] दर्शनादिहेतुभिर्दुरासदं दुःप्रापं ३१ तर्हीति यदैवं हरिमपश्यत्तर्ह्येव तदैव लोकविसर्गदृष्टिः लोकसृष्ट्यापेक्षानं
यस्य सः जगतो विधाता कर्ता स्रष्टा देवः ब्रह्मा तस्य भगवतः नाभिसरसि सरोजं श्वसनं प्रलयवातं लिकमंभः आत्मानं स्वात्मानं च ददर्श
तः सरोजादिभ्यः परमन्यत्सृष्टिप्रकारादिकं न ददर्शेत्यर्थः ३२ अथालब्धजगत्सृष्टिज्ञानस्तल्लब्धये भवंतं तुष्टाव इत्याह स इति स ब्र
ह्मा रजसा रजोगुणेन उपरक्तः युक्तः अव्यक्तवर्त्मन्यभिव्यक्तिरहितावधाने निवेशितः आत्मा चित्तं यस्य सः ईड्यं स्तुत्यं कर्मबीजं कृपतः इति
कर्म जगत् या स्यचैतत्कर्मनिष्कृतेः तस्य बीजं कारणं भगवंतमस्तौत्स्तुतवान् ३३ इति तृतीयेष्टमः ८ अथ यक्तत्तिप्रकारं तत्
याप्रसन्नस्य भगवतोनुग्रहविशेषं चाह नवमेन तत्र कृतस्य स्तुतिरा ॥

चि

३२
राम
३१

37

किं वा यामतः दैर्घ्येण विस्तरतः विस्तारेण च स्वमानदेहेन स्वानुरूपप्रमाणदेहेनातन एव लोकत्रयसंग्रहेण लोकत्रयं संगृह्णाति ऽनेनालि
न्मि(?)तिवा लोकत्रयं संगृह्णातीति तेन चित्राणि पद्भुतानि दिव्यान्यमानुषाणि आभरणान्यंशुकानि च तेषां त्वीणा पेश(?)श्रीः तैः कृता संपादिता
श्रीः शोभा यस्य तेनेति देहविशेषणं पद्म आभरणांशुकैः कृता या श्रीः तया लोकत्रयसंग्राहकस्वमानदेहेनोपाश्रितवेषदेहं उपा
श्रितः प्रवृद्धः स्फीतः वेषो यस्य स एवंभूतो देहो यस्य तमिति बहुव्रीहिगर्भो बहुव्रीहिः २५ पुंसामिति स्वकामाय स्वाभिलषितफला
य विविक्तमार्गैः सकौलैर्वर्णाश्रमादिधर्मैरभ्यर्चतामाराधयतां पुंसां कामान्समीहितफलानि दोग्धीति कामदुघं यदङ्घ्रिपद्मं दर्शयं
तं पुरुषमपश्यत् कथंभूतमङ्घ्रिपद्मं नखा एवेन्दवः तेषां मयूखैः किरणैः भिन्नाः संभिन्ना या अङ्गुल्यः पर्णाः ते च ता अङ्गुलय एव चारूणि
सुन्दराणि पत्राणि यस्य तत् २६ मुखेनेति लोकानामुपासकानामार्तिहरं दुःखहरं स्मितं यस्मिंस्तेन स्फुरन्त्यां कुण्डलाभ्यां मण्डिते

~~आया~~मतो विस्तरतः स्वमानदेहेन लोकत्रयसंग्रहेण । विचित्रदिव्याभरणांशुकानां कृतश्रियापाश्रितवेषदेहं २५ पुंसां स्वका
माय विविक्तमार्गैरभ्यर्चतां कामदुघाङ्घ्रिपद्मं प्रदर्शयंतं कृपया नखेन्दुमयूखभिन्नाङ्गुलिचारुपत्रं २६ मुखेन लोकार्तिहरस्मि
तेन परिस्फुरत्कुंडलमंडितेन शोणायितेनाधरबिम्बभासा प्रत्यर्हयंतं सुनसेन सुभ्र्वा २७ कदंबकिंजल्कपिशंगवाससा स्वलं
कृतं मेखलया नितंबे हारेण चानंतधनेन वत्स श्रीवत्सवक्षःस्थलवल्लभेन २८ परार्ध्यकेयूरमणिप्रवेकपर्यस्तदोर्दंडसहस्र
शाखं अव्यक्तमूलं भुवनाङ्घ्रिपेंद्रमहींद्रभोगैरधिवीतवल्शं २९

नाधरबिंबदीप्त्या शोणायितेन शोणवदाचरितेन शोणवदाचरि
तेन स्फुरनसा शोभमाननासिकायुक्तेन सुभ्रुणा सुभ्रुवा चाननेन प्रत्यर्हयंतमुपासकान्संमानयंतं २७ किंच कदंबकिंजल्कवत्पिशंगवर्णे
न वाससा मेखलया च नितंबे स्वलंकृतं हे वत्स हे विदुर अनंतधनेन बहुमूल्येन श्रीवत्सयुक्ते पद्मस्थलः स्थानं तस्य वल्लभेन सुंदरतरभू
षणभूषितेन हारेण च स्वलंकृतं २८ पुनश्च तं वृक्षरूपेणाभिरूपयितुं तं विशिनष्टि परार्ध्यानि केयूराण्यंगदानि मणिप्रवेकाः मणिपु
ङ्गमाश्च तैः पर्यस्ता व्याप्ता ये दोर्दंडा भुजदंडा एव सहस्रमनंताः शाखा यस्य तं वृक्षोपि केयूरादितुल्यफलपुष्पादिभिर्व्याप्तशाखो भवति अ
व्यक्तं ब्रह्म मूलं यस्य तं ब्रह्माभिव्यक्तिरूपत्वाद्वृक्षस्यापि मूलमव्यक्तं भुवनाङ्घ्रिपेंद्रं भुवनकारणमङ्घ्रिपेंद्रं वृक्षश्रेष्ठं महींद्रस्यानंतस्य भो
गैर्देहावयवैः अधिवीताः संवेष्टिताः वल्शाः स्कंधा यस्य तं वृक्षोपि सर्पवेष्टितो भवति २९ ॥

५२ २।१।२

ब्रह्मतु निरस्तनिखिलदोषगंधमपरिछिन्नज्ञानानंदमेकस्वरूपमेवभवरिति विवेकः एवंभूतस्तस्य विदचिदं तरात्मनो भगवत एव ज्ञानस्य मुक्ति
साधनत्वं तस्य तावदेव चिरं यावन्नविमोक्ष्ये संपत्स्य इति श्रुतेस्तस्य सर्वब्रह्मात्मकत्वेनोपासीनस्येत्यर्थः तथाच श्रुत्यंतरं सर्वंखल्विदं ब्र
ह्मतज्जलानिति शांत उपासीतेति १ अथ जन्मकर्मचमेदिव्यमेवं योवेत्तितत्त्वतः त्यक्त्वा देहं पुनर्जन्मनैतिमामेतिसोऽर्जुन इति भगवद्वचनात् तद्
स्य ज्ञानस्यापि मोक्षसाधनत्व स्मरणात् अवतारयाथात्म्यमपि शोधयति रूपमिति अवबोधरसोदयस्यावबोधरूपस्य रसस्योदयः
स्वाभाविकाविर्भावोयस्येतिव्युत्पत्तिः निरु- पाधिकनित्याविर्भूतापरिछिन्नानंदरूपज्ञानवत इत्यर्थः अत एव शाश्वन्निवृत्तं तमो ज्ञानं यस्मा
त्तस्य मुक्तानामपि संसारदशायांतमःसंबंधाछाश्वन्निवृत्ततमस्त्वाभावात् नित्यानां तथात्वस्य परसंकल्पायत्तत्वेनसोपाधिकत्वात्
एवंभूतस्य स्वरूपस्य तव यद्रूपं विग्रहः कथंभूतं अवतारशतैकबीजमवतारशतानामेकंबीजं मूलं तदेव प्रदर्शयति यस्य पादेग्रहीते चैति
धरूपस्य तव नाभिपद्ममेवभवनं गृहं तस्मादहं तवावेशावसरे रूपोहं सृष्टिं ततः करिष्यामि त्वामाविश्य प्रजापते इति चतुर्मुखस्य भगवदावे

रूपं यस्ते तदवबोधरसोदयस्य शश्वन्निवृत्ततमसः सदनुग्रहाय आदौ गृहीतमवतारशतैकबीजं यन्नाभिपद्मभवनादहमाविरासं २
नातः परं परम यद्भवतः स्वरूपमानंदमात्रमविकल्पमविद्धवर्चः पश्यामि विश्वसृजमेकमविश्वमात्मन्भूतेंद्रियात्मकमदस्त उपाश्रि
तोस्मि ३
शावतार रूपत्वसिद्धेः एतद्रूपमादौ सर्गादौ सदनुग्रहाय साधूनांपरित्राणाय येत्यर्थः गृहीतमाविष्कृतं न तु जीववत्कर्मायत्त स्वदुःखोपभो
गाय गृहीतमित्यर्थः तथाचश्रुतिः अजायमानो बहुधा विजायते अजोपिसन्नव्ययात्माभूतानामीश्वरोपि सन्नित्यादिकं २ एवं चि
दचिद्विलक्षणत्वेन शोधितस्वरूपस्य शरीरविलक्षणत्वेन शोधितरूपस्य चोभयोरेवोपास्यत्वेन तद्[illegible]न्नैरपि धर्मैः स्वरूपरूपे विशिनष्टि
नात इति हे परम परो मा विद्यते यस्मात्स परमः तस्य संबुद्धिः भवतस्तव यत्स्वरूपं कथंभूतं आनंदरूपं मात्रया चादुःखसंभेदनिरासः अ
विकल्पं जातिगुणादिरहितं आभांचिदचिद्यावृत्तिः अविद्धवर्चः आविद्धमप्रतिहतं वर्चः संकल्परूपं ज्ञानं यस्य तदेवंभूतं रूपं पश्चाद्विश्व
विश्वविलक्षणं विश्वसृजं विश्वस्य कारणं भूतेंद्रियात्मकं पंचोपनिषन्मंत्रव्यंति पाद्याद्याकृतं भूतेंद्रियात्मकं रूपं चेतियतः [illegible] अतः
अस्मात्परं विलक्षणं स्वरूपं रूपं च न पश्यामि अत अदः एतदुभयमेव आत्मनः परमात्मन उपाश्रितोऽस्मि सम्यगनुष्ठ्या शरणंगतोस्मि
३

कृ२ सर्वं२

कप्रपंचस्य भगवच्छरीरत्वेन ज्ञातवतः स्वस्य कृतार्थतामाविष्कुर्वन्नीदृशज्ञानविधुरान्नेंद्रनुब्रह्मात्मकस्त्वं भावमुपपादयति ज्ञातोसी-
ति ननु हे भगवन् सुचिराद्बहुकालोपार्जितात्तपस इति शेषः मे मयाऽद्याधुना ज्ञातोसि यथा दृष्टिगतत्वेन दृष्टोसि कथं तव स्वरूपस्य
कृत्स्नं चिदचिद्विशेषत्वेनाभितत्वं को वा ज्ञाता प्राकृतपंचोपनिषन्मयदिव्यमंगलविग्रहविशिष्टत्वं सर्वज्ञत्वं शक्तित्वं सत्यसंकल्पत्वं ज्ञातवान् लोके
घा४ जलधिन्वासमविशिष्टत्वेन सत्यज्ञानादिस्वरूपत्वं मत्तविवक्षितं नमो भगवते भुवनदुर्मापविर्यज्ञानुष्ठा विदुषामपि दुर्ज्ञानः परं पर्जि-
स्याद्विनाहीतद्देव प्रपंचयिष्यति इदृशज्ञानविधुरा भिंदाने भगवतः षाड्गुण्यपूर्णस्य तेजस्विनः स्वरूपं न ज्ञायते इति यद्देहभाजो के-
मायया प्रकृतिपृथिव्यामरूपशरीरभाजो हे चेतनानामेव दोषः अज्ञानसौवायुभवसइत्यादिवद्भगवतां एवेसंधारणं आत्मनि स्वत्वरेदृष्टे
श्रुते मते विज्ञाते इदं सर्वं विज्ञातं भवति येनाश्रुतं श्रुतं भवति अमतिविद्या सर्वविद्याप्रतिष्ठा मतिर्भगवज्ज्ञानेनेवहन्सस्य [illegible] तत्व
श्रवणात् अब्रह्मात्मकस्य स्वतंत्रवस्तुनोभावान्तमेवविदित्वातिमृत्युमेतीति ब्रह्मज्ञानस्यैव मुमुक्षुतरणोपाय[illegible]त्वश्रवणाच्च भगवान्
वेज्ञातवाद्न्तितज्ज्ञानविधुराद्दुर्घटमभिप्रायः एतदेवोपपादयति हे भगवन् भूरिषाड्गुण्यपूर्णत्वतः अन्यद्ब्रह्मात्मकं नो[illegible]स्तिसर्व

ब्रह्मोवाच ज्ञातोसि मेद्य सुचिरान्ननु देहभाजां न ज्ञायते भगवतो गतिरित्यवद्यं नान्यत्त्वदस्ति भगवन्नपि तन्न शुद्धं
मायागुणव्यतिकराद्यदुरुर्विभासि १ सत्वरात्मकत्वात्त[illegible]ज्ञानेनैव सर्वस्य ज्ञातत्वात्तज्ज्ञानवांतराभावात्त्वमे[illegible]वज्ञातव्य

इत्यभिप्रायः ननु स्वतंत्रत्वेनैव देवमनुष्यत्वादिवस्तु प्रतीतेस्त्वदन्यन्नास्तीति कथमुच्यते तत्राह अपि स्वतंत्रत्वेन प्रतीतमपि
देवादिवस्तु न शुद्धं ना[illegible] अत्र ब्रह्मात्मकत्वेन तत्र बुद्धिर्भ्रांतिरित्यर्थः कुत एतदित्यत आह मायेति यत् यतः मायायाः प्रकृतेर्गुणानां
व्यतिकरात्क्षोभात्सृष्टिमारभ्येत्यर्थः त्वमेव उरु बहुधा विभासि प्रकाशसे एकस्सन्बहुधा विचचार [illegible] बहु स्यां प्रजायेति
तत्सृष्ट्वा तदेवानुप्राविशत् तदनुप्रविश्य सच्च त्यच्चाभवदिति प्रकृत्यस संचानंतं च सत्यमभवदिति श्रुतेः शरीरतया त्वमपारच्छिन्नज्ञानानंदस्व-
भावोपितेऽसूक्ष्मतयासकल्पस्सलीलोपकरणचिदचिद्वस्तुशरीरतया तन्मयः परमात्मा विचित्रानंतक्रीडनकोपादित्सया तु शरीरभूतप्रकृतिपु-
रुषसमष्टिरूपपरमहाभूतपर्यमात्मानं तत्तच्छरीरकं परिणमय्य तन्मयः पुनस्स्वसंकल्पव्याख्यविचित्र[illegible]चिदचिन्मिश्रदेवादिस्थाव-
रांतजगद्रूपो भवसीत्यर्थः ब्रह्मणः जगद्रूपतया विक्रियमाणेपि तत्प्रकारभूताचिदंशगता सर्वविकाराः तत्प्रकारभूतस्यैव जगतः
पुरुषार्थाः ॥

ब्रह्मात्मकं स्वतंत्रं त२

भा. त. टी. भक्ति
३८

विधुराणां संसारनिवृत्तमिधानेन भक्तिं [illegible] नेवसाद्दृश्य निष्कामेषु पासकेषु भगवान् सोऽजः प्रसादं करोति [illegible] हेऽजाय तुल्यं त्वं भ
[illegible] भाववोगान् भक्तियोगस्तेन परिभावितं शोधितं हृत्सरोजं हृदयकमलं येषां तेषां स्थितं पयः एवंभूतं त्वदीयसेनिहुसि हेतुरूपते
वं पुंसः धिया तेन त्वयं यद्यद्वपुः ध्यायति तत्तद्वपुः [illegible] प्रणयसे प्रकटयसि [illegible] विशेषं तं भावयतीत्य
हृदिसंहृतविशेषाभवतीत्यर्थः अनेन सोऽनभ्यपुत्रः ११ निष्कामानामेव भगवान्सुलभ इत्याह नेति [illegible] नैरनुकूलजनैः विमु
भक्तिपरादेवो विपरीतं [illegible] इतिवदनात् कथंभूतैः दिव इह कामैः प्रसक्तकामैः सकामानपि न गच्छ एवं भगवतोऽभक्तः कलभ्य
सङ्गैरित्यादिना [illegible] त्वमभिधायपयोनाहतो नरकभाक्स्रसत्व [illegible] विषयलालसान्निदं स्तानेव शोचति दैवेनेति द्वाभ्यां सर्वाशुभोपशमनात्स्वर्ग

दैवेन ते हतधियो भवतः प्रसंगात्सर्वाशुभोपशमनाद्विमुखेंद्रियाये कुर्वंति कामसुखलेशलवाय दीना लो
भाभिभूतमनसोकुशलानि शश्वत् ७ क्षुत्तृट्त्रिधातुभिरिमा मुहुरर्द्यमानाः शीतोष्णवातवर्षैरितरेतराच्च
कामाग्निनाच्युतरुषा च सुदुर्भरेण संपश्यतो मन उरुक्रमसीदते मे ८ ॥ ॥ ॥ ॥ ॥ ॥ ॥

एवमशुभानि भयशोकादीनि उपशाम्यंते अनेनेति तथाभूतात् भगवतस्तव प्रसंगाद्दर्शनश्रवणादिरूपाद्विमुखानीन्द्रियाणि च
क्षुः श्रोत्रादीनि येषां ते अकुशलान्यशेमकराणि कर्माणि शश्वन्निरंतरं कामसुखानि स्त्र्यादिविषयसुखानि तेषां लवाय ते
भेन तृष्णातिशयेनाभिभूतं मनो येषां ते अत एव दीनाः सतः कुर्वंति ते दैवेन हताः प्रतिहता धियो येषां ते तथोक्ताः मंदभा
ग्या इत्यर्थः ७ क्षुदित्यादि [illegible] क्षुत्तृड् शनापिपासे इमे शोकमोहजरामृत्यु इत्यादीनाम प्युपलक्षणं क्षुधादिषड्ऊर्मिभिः त्रिधा
तवः वातपित्तश्लेष्माणः ते शीतवर्षाशीतादिभिः इतरेतरैः परस्परैश्च कामाग्निना काम एवाग्निस्तेन कथंभूतेन सुदुर्भरेणाच्यु
तक्रोधेन च [illegible] अच्युतेति संबोधनं वा एता मुहुर्मुहुरर्द्यमानाः प्रजाः संपश्यतो [illegible] मे मनः हे उरुक्रम सीद
तेक्लिश्यति ८

कदाचिदपि न च्यवतीति तथाभूतेन पातनलो कामिः [illegible] कामिः [illegible]
अनेन सर्वेषां सर्वकालीनत्वेसमाने [illegible] पराविश्वमतं [illegible]

राम
३८

३९

पुनरुक्ताकारविशिष्टस्य भगवतो भक्तैकलभ्यत्वं वदंस्तमेव नमस्करोति तद्वा इति हे भुवनमंगल विश्वस्य मंगलरूप यत्त्वयाद्य उपास
कानां नोस्माकं ध्याने मंगलाय अस्मदभ्युदयाय तद्दैवेदं तेषु प्रसिद्ध इदं रूपं दर्शितं तस्मै — इदं रूपं स्वरूपं रूपगुणादिभूतिमते भगवते [illegible]
रूपमूर्त्ये तुभ्यं नमोनुविधेम नमस्कुर्महे यस्त्वमसत्प्रसंगैरसत्शास्त्रादिषु प्रकृष्टः संगो येषां तैरत एव नरकभाग्भिर्दृशिभिर्नादृतः ४

अं४ आदरेण त्वामभजंतो नरकभाजस्त्वामादरेण भजंतस्तु कृतार्था इत्याह ये त्विति श्रुतिः श्रवणं तदेव वातः तेन नीतं प्रापि
तं त्वदीयचरणांबुजकोशगंधं कर्णविवरैर्ये जिघ्रंति येषां च परया अव्यभिचारिण्या भक्त्या गृहीतौ चरणौ यस्य स तथाभूतो भवति
तेषां स्वपुंसां स्वभक्तानां हृदयांबुरुहाद्धृदयकमलात् हे नाथ नापैषि नापसरसि ये त्वत्कथाश्रवणमप्यादरेण कुर्वंति तेषु एकांतभक्त्या
त्वां प्रपन्नास्तेषां हृदि भवान्नित्यं सन्निहितो भवसीत्यर्थः ५ भवतु मत्सान्निध्यमेतावता कथं तेषां कृतार्थत्वमित्यत आह तावदिति तेत

तद्वा इदं भुवनमंगल मंगलाय ध्याने स्म नो दर्शितं त उपासकानां तस्मै नमो भगवतेनुविधेम तुभ्यं योनादृतो नरकभाग्भिरसत्प्र
संगैः ४ ये तु त्वदीयचरणांबुजकोशगंधं जिघ्रंति कर्णविवरैः श्रुतिवातनीतं भक्त्या गृहीतचरणः परया च तेषां नापैषि नाथ हृ
दयांबुरुहात्स्वपुंसां ५ तावद्भयं द्रविणगेहसुहृन्निमित्तं शोकः स्पृहा परिभवो विपुलश्च लोभः तावन्ममेत्यसदवग्रह आर्ति
मूलं यावन्न तेंघ्रिमभयं प्रवृणीत लोकः ६

तावद्भयं न विद्यते भयं यस्मात्तदभयं संसृतिनिवर्तकमंघ्रिं लोको यावन्न प्रवृणीत निर
तिशयप्रियत्वेन नोपासीत तावदेव भयादय इत्यन्वयः आगामिदुःखदर्शनजं ज्ञानं भयं तच्च द्रविणदेहसुहृन्निमित्तं द्रविणं धनं सु
हृन्मित्रं भार्यादि द्रविणादिविषयनिमित्तदुःखविषयं ज्ञानं भयमित्यर्थः शोकस्तादात्विकप्रतिकूलविषयः विषयं वा ज्ञानं स्पृहानु
कूलविषये इच्छा परिभवस्तिरस्कारः विपुलः विस्तृतो लोभः तस्मात् असदवग्रहः अनात्मभूते शरीरे अवग्रह आत्मत्वाभिमानः अपर
योक्तानां भयादिरूपाणां आर्तीनां मूलं कारणं एते सर्वे तावत्कालमेव न तावत्त्वच्चरणारविंदप्रवणावधि अनुवर्तंत इत्यर्थः त्वच्च
रणावरणेन तु सांसारिकभयादिनिवृत्त्या स्वभर्तापहतपाप्मत्वादिगुणाष्टकविशिष्टः कृतार्थो भवतीत्यभिप्रायः ६ ॥ ॥ ॥

भा. त. टी.
४०

स्मरणादेरनुकूलजनैः विष्णुभक्तिपरो देवो विपरीतस्तथाऽस्मर इति वचनात् कथंभूतैः क्रूदिवधकामैः प्रसक्तकामैः सकामापि भग
वद्भक्तिरासक्तप्रमती नानं संभवतीत्यभिप्रायः एवंभूतैः स्मरणादेः कर्मभिरुपचितोपचारैः पुष्कलोपचारैराराधितो भगवन्नाति
प्रसीदतीति नात्यंतं प्रसन्नो भवति निरतिशयमोक्षरूपप्रदो न भवतीत्यर्थः कुत इत्यत आह यद्यस्मादसद्दलभयाऽऽरसद्भिर्देहमा
त्मतयानुसंदधद्भिर्नेधुमशक्यासर्वभूतदयया सर्वेषु भूतेष्वात्मतया व्यवस्थिते सति त्वयि कस्मिन्नपि भूते कृतोऽपकारस्त्वयि कृ
तो भवतीति बुद्ध्या सर्वेषु भूतेषु क्रियमाणया स्वार्थनिरपेक्षदुःखनिराचिकीर्षापरपर्यायया दयया भवान् प्रसीदतीति सर्वभूतानां
मीश्वरशरीरत्वानुसंधानपराणामेव सकलफलं भवतीति भावः शरीरात्मभावमेवोपपादयति नानाजनेषु समस्तजनेष्ववहितः स्थि
तः कथमवस्थितः अंतरात्मा जीवात्मप्रवेशेन तत्तद्रसप्रेरकत्वेन प्रशासितृत्वेन धारकत्वेन च स्थितः अत एव स्वकृत्कामना
पूर्वकानुष्ठासिकर्मणोऽपि सर्वभूतदयायास्तत्प्रसादहेतुरित्यर्थः २२ यतोऽभिसंहितफलैरुपचारैर्नातिप्रसन्नः अत एव सत्कर्मणा

तिं०त०टी० ८
40

नातिप्रसीदतीति तथोपचितोपचारैराराधितः स्मरणादेर्द्रिवधकामैः यः सर्वभूतदययाऽसद्दलभयं ये केनानाजनेष्ववहितः स्मरूदं
तरात्मा २२ पुंसामतोऽखिलविधकर्मभिरध्वराद्यैर्दानेन चोग्रतपसा व्रतचर्यया च आराधनं भगवतस्तव सत्क्रियार्थो धर्मोऽर्पितः क
र्हिचित्तद्धृर्षतेन यत्र २३ मीश्वराराधनवेषेणानुष्ठानं कार्यमित्याह पुंसामिति अतोऽभिसंहितफलानां कर्मणामीश्वराप्रस
त्तिहेतुत्वात् सर्वात्मकब्रह्मोपासीनस्यैव तत्प्रसादहेतुत्वाच्च हेतोः पुंसां भगवतो माराधयितॄणां सर्वैरखिलैरध्वराद्यैर्दानादिभिः नानाविध
श्रौतस्मार्तकर्मभिर्दानादिभिः प्रदर्शनार्थमेतत् कृच्छ्रचांद्रायणादिव्रतचर्यया व्रतानुष्ठानेन [illegible] भगवंस्तव प्राराधनं तत्सत्क्रियार्थः
सत्क्रियाणां सत्कर्मणामर्थः प्रयोजनं त्वदाराधनैकप्रयोजनवेषेण सर्वाणि कर्माण्यनुष्ठेयानीत्यर्थः एवंविधकर्मानुष्ठानस्यापि स्व
फलसाधनत्वमाह धर्मः प्रज्ञादिरूपः यत्र यस्मिंस्त्वय्यर्पितः त्वत्सत्कारैकप्रयोजनः न तु स्वर्गादिफलप्रदः इति बुद्ध्या त्वय्यर्पितः कर्हिचित्कदा
चित्कथंचिदपि न क्षीयते न विनश्यति भगवदुपासनद्वारा निःश्रेयसपुरुषार्थहेतुर्भवतीत्यर्थः तथा च गीतं भगवता नेहाभिक्रमनाशोऽस्ति प्र
त्यवायो न विद्यते स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयादिति २३ एवमनभिसंहितफलकर्मयोगस्य भगवदाराधनरूपस्यास्य फलसाध
नत्वमभिधाय तस्यैव प्रकृतिविविक्तात्मयाथात्म्यानपूर्वकानुष्ठेयत्वमुभयोरपि भगवदुपासनस्य च कारणत्वं विषयत्वं चा ॥ ॥ ॥ ॥

श्री

श्र

सदवग्रह आर्त्तिमूलमिति देहात्मभ्रमस्यार्त्तिमूलत्वमुक्तमुपपादयति यावदिति द्वाभ्यां भगवतस्तव मायायाः बलं बलकारि
तं इन्द्रियार्थं वाह्येन्द्रियविषयभूतं पृथक्त्वं देवमनुष्यादिदेहगतं पृथक्त्वं आत्मनः आत्मसंबंधितया जनः यावत्पश्येद्धे ईश ता
वदसौ संसृतिर्न प्रतिसंक्रमेत न निवर्त्तेत न केवलं न निवर्त्तेत एव किंतु क्रियार्था क्रियाः अर्थः प्रयोजनं यस्याः सा संसृतिः व्यर्था परम
पुरुषार्थशून्यापि दुःखसमूहं वहति प्रापयति अहंकारमूला संसृतिरुत्तरोत्तरकर्मार्जनहेतुस्तस्मान्मोक्षविरोधिनी दुःखाव
हा चेत्यर्थः ९ अन्हीति अह्नि आपृतानि आर्त्तकरणानि अहनि व्यापृतानि अर्थकरणानि शब्दादिविषयेंद्रियाणि येषां ते आर्त्तीति पाठे व्या
पृतान्यार्त्तानि दुःखितानि करणानि येषां ते इत्यर्थः निशि रात्रौ निःशयानाः नितरां शयाना निवृत्तवाह्येंद्रियव्यापाराः विष
यस्फुरणलवोपि नास्तीत्यभिप्रायः नानाभूतेषु मनोरथेषु धियः तास्वप्नदर्शनेनेत्यर्थः क्षणे क्षणे भग्ना निद्रा येषां ते दैवाहता

यावत्पृथक्त्वमिदमात्मन इन्द्रियार्थमायाबलं भगवतो जन ईश पश्येत् तावन्न संसृतिरसौ प्रतिसंक्रमेत व्यर्थापि दुः
खनिवहं वहति क्रियार्था ९ अन्ह्यापृतार्त्तकरणा निशि निःशयाना नानामनोरथधिया क्षणभग्ननिद्राः दैवाहतार्थरच
ना ऋषयोपि देव युष्मत्प्रसंगविमुखा इह संसरंति १० त्वं भावयोगपरिभावितहृत्सरोज आस्से श्रुतेक्षितपथो ननु ना
थ पुंसां यद्यद्धिया त उरुगाय विभावयंति तत्तद्वपुः प्रणयसे सदनुग्रहाय ११ र्थरचनाः दैवेनाहता वितथीकृताः अर्थरचना

योज्झितविषयव्यापारा येषां ते ऋषयोपि त्वद्भक्तिरहितास्ते एवंविधा भूत्वा संसरंतीत्यर्थः १० एवं देहात्ममानिनो भगवद्भक्तिविमु
राणां संसृत्यभिधानेन भक्त्येकलभ्यत्वमेव स्फुटयन्निष्कामेषु उपासकेषु भगवत्प्रसादमाह त्वमिति द्वाभ्यां हे नाथ पुंसां
स्वभक्तानां भावयोगो भक्तियोगः तेन परिभाविते शोधिते हृत्सरोजे हृदयकमले आस्से श्रुतेक्षितपथः शास्त्रदर्शितमार्गः एवंभूतस्त्वं
आस्से इति वससि हे उरुगाय ते तव पुंसः धिया ते तव यद्वपुः ध्यायंति तत्तद्वपुः सन् स्वनुग्रहाय प्रणयसे प्रकटयसि यादृशविग्रहविशिष्टं
त्वां विशेषतो भावयंति तादृशविग्रहविशिष्टो भवसीत्यर्थः ११ निष्कामानामेव भगवान् सुलभ इत्याह नेति ॥ ॥ ॥ ॥ ॥

ना

स एवास्य मूलत्वविदचिद्विशिष्टः उरुर्देवमनुष्यादिः प्ररोहः शाखाविटपशाखादिर्यस्य तादृशाय भुवनद्रुमाय तस्मै नम इत्यर्थः ५

भा॰ टी॰
४१

मत आह। य इति। प्रथममेकः अविभक्तनामरूपः स्थितिसृष्टिप्रलयानां हेतवः कर्तारः स्वयं विभुर्भगवानहं ब्रह्मा गिरीशो रुद्रश्च यो वै भगा-
न्नेवेत्यर्थः। हिरण्यगर्भरुद्रतन्मध्यावर्त्यवतारस्वरूपवानित्यर्थः। स्वयमित्यनेन स्थित्यवतारे स्वे पेण सृष्टिसंहारयोर्ब्रह्मरुद्रावंशजीवान्तःप्र
वेशेन करोतीति द्योतितं सृष्टिं ततः करिष्यामीति स्मरणात्। स्थितिसृष्टिप्रलयहेतव इति चतुर्थी भावप्रधानो निर्देशः। स्थित्यादिकर्तृत्वा
२४ द्धि हिरण्यगर्भरुद्रस्यावतारत्वाभूत्वेत्यर्थः। आत्ममूलमात्मैव मूलं यस्य तदात्ममूलमकार्यमित्यर्थः। एवंभूते हि त्रिपान्निःसाविभूतिः
हित्वातीतं भित्वेत्यपि पाठः पूर्वमेवार्थः। पद्म स्थित्यादिहेतुभूतस्यावतारादिरूपेणान्निपात्रिस्कन्धः आत्ममूलं प्रधानं भित्वा महदादिसमष्टि
प्रभृतिव्यष्टिपर्यन्ते परिणामप्ररूढः प्ररोहः देवतिर्यङ्मनुष्यस्थावरादिरूपाः प्रशाखोपशाखाः पत्रपुष्पफलानि यस्य स एवंभूतो यः प्र
वृद्धस्तस्मै भुवनद्रुमाय भुवनाकारद्रुमाय भगवते नमः। हिरण्यगर्भादिरूपेण सृष्ट्यादिव्यापारस्त्वयैव क्रियत इत्यभिप्रायः २६ एवमूर्ध्व
मूलमधःशाखमित्यादिना निरूपितं वृक्षं भगवन्तमाकारान्तरेण द्रुमरूपं नमस्कृत्य प्रकृतं तस्य भक्तानुग्राहकत्वमेवाह लोक इति यो

अर्थात्त्रिपादं च व
जगत्परिच्छिन्न
इत्यर्थः ५
रूपं च

यो वा अहं च गिरिशश्च विभुः स्वयं च स्थित्युद्भवप्रलयहेतव आत्ममूलं। भित्वा त्रिपाद्ववृध एक उरुप्ररोहस्तस्मै नमो भगवते भुवनद्रु-
माय २६ लोको विकर्मनिरतः कुशले प्रमत्तः कर्मण्ययं त्वदुदिते भवदर्चने स्वे। यस्तावदस्य बलवानिह जीविताशां सद्यश्छिनत्त्यनिमि-
षाय नमोऽस्तु तस्मै २७ ॥

41

भगवांस्त्वदुदिते वेदोक्ते कर्मणि वा त्वयागदिते भवदर्चने भगवदाराधनरूपे स्वे स्वधर्मे आश्रमोचिते कुशले सम्यक्कर्मणि यो यं लोकः आ
प्रमत्तः प्रमादरहितः अथ विकर्मनिरतः विकर्मासु कर्म अत्यन्तं निरतश्च भवति तस्य लोकस्य जीविताशां संसारस्पृहां सद्य आ चिरेण छिन
त्ति कुतः बलवान् सर्वशक्तित्वादित्यर्थः तस्मै सर्वशक्तये निमिषाय वैराग्योत्पादनावसे पेक्षाय भगवते तुभ्यं नमोऽस्तु स्तात् अनभिसं
हितफलस्ववर्णाश्रमोचितधर्मैराराधयन्तां सांसारिकधर्मश्च द्वाविधुन्वन्वैराग्योत्पादनेनानुगृह्णातीत्यर्थः। प्रधानिकर्मनिरतः प्रम
त्तः इत्येव छेदः अत्र व्यतिरेकमुखेन भक्तानुग्राहकत्वमाह विकर्मसु स्वरूपाननुबंधिषु अहं ममाभिमानगर्भेषु वैषयिकेषु स्वसाध
नेषु निरतः त्वदाराधनरूपे तु कर्मणि यो लोकः प्रमत्तः तस्याभक्तलोकस्य जीविताशां जीवनेच्छां कालः शरीरको यो भगवानाच्छिनत्ति त
स्मै अनिमिषाय कालरूपिणे नमः। अनेन भक्तानुग्राहकत्वमर्थसिद्धं स्वानुरूपभगवदाराधनरूपकर्मभिराराधितो भगवानुपासका
नां निवृत्तयनिरतिशयमोक्षाख्यफलं प्रयच्छतीति सूक्तं २८ ॥ ॥

राम
४१

सं४ आत्मा

भिप्रायन्नमस्करोति शश्वदिति । शश्वत्सदा स्वरूपमहसैव प्रकृतिविविक्तात्मस्वरूपयाथात्म्यज्ञानेनैव भेदः देवमनुष्यादिभेदः मोहः देहा
त्मभ्रमस्वतंत्रात्मभ्रमादिनिमित्तं ज्ञानं आदिशब्देन तत्प्रयुक्तः शोकादयो विवक्षिताः निरस्ता भेदादयो येषां योगिनां तेषां प्रबोधः स्वस्वरूपपरस्वरूप
विषयकं ज्ञानं धिषणा भगवदुपासनात्मिका बुद्धिः एते स्वप्राप्त्युपायभूते यस्य तस्मै प्रकृतिविविक्तस्वरूपयाथात्म्यज्ञानान्निरस्तभेदमोहभ्र
तसांसारिकधर्माय ज्ञानयोगकर्मयोगाङ्गकोपासनाविषयभूतायेत्यर्थः यद्वा चतुर्थ्यन्तपाठे स्वस्वरूपाविर्भावेन स्वस्मिन्नसत्य
षद्देवमनुष्यादिभेदरूपमोहाय अंतरात्मतयावस्थितस्याप्यनात्मगतदोषास्पृष्टायेत्यर्थः अत एव परस्मै प्रकृतिपुरुषविलक्षणा
यत नहेतुः विश्वस्य जगतः स्थितिलयेषु निमित्तभूताया लीलायास्तस्या रागो रसो यस्य तस्मै ईश्वराय नियन्त्रे प्रकृतिपुरुषयोरसमावितत्वलौ
लैव प्रयोजनं जगद्व्यापारादेरित्यर्थः अनेन प्रकृतिपुरुषविलक्षणत्रियं तज्जगत्कारणविषयकोपासनमेव मुक्तिसाधनमित्यभिप्रेतं तत्प्र
तायते तुभ्यं नमस्कारमकरवाम १४ ननु परिपूर्णस्यावाप्तसमस्तकामस्य लीलार्थमपि जगद्व्यापारो नोपपद्यत इत्याशंक्य भवभयाभि

शश्वत्स्वरूपमहसैव निरस्तभेदमोहाय बोधधिषणाय नमः परस्मै । विश्वोद्भवस्थितिलयेषु निमित्तलीलारासाय ते नम इदं चकृमेश्वरा
य १४ यस्यावतारगुणकर्मविडंबनानि नामानि येऽसुविगमे विवशा गृणन्ति ते नैकजन्मशमलं सहसैव हित्वा संयान्त्यपावृतमृतं तमजं
प्रपद्ये १५

तत्त्वसांसारिकजीवानुजिघृक्षया संघटते इत्यभिप्रायेणावतारगुणकर्मणामनुवचनस्यापि त्वत्प्राप्त्युपायतामाविष्कुर्वन् शरणं व्रजति यस्येति यस्य ते
वावतारगुणकर्मणां विडंबनान्यनुकरणानि नामानि देवकीनन्दनदाशरथेत्यादीनि सर्वज्ञभक्तवत्सलगोवर्धनधरकंसारिरावणान्तकइत्यादीन्यसुविगमे
प्राणोत्क्रमणकाले विवशाः परवशाः अपि गृणन्ति उच्चारयन्ति ते नैकजन्मार्जितं शमलं पुण्यपापरूपं सहसाऽचिरेण हित्वा विधूयापावृतं निरस्ता
वरणं ऋतं ब्रह्म संयान्ति प्राप्नुवन्ति तमजं कर्माधीनोत्पत्तिरहितं त्वां शरणं उपायं प्रपद्ये अध्यवस्यामि अनेन भक्त्या सकृद्विगमानुस्मरणादीनां
तेः सन्निमात्रहेतुत्वं उपायत्वं तु भगवत एवेत्यभिप्रेतं तथा च श्रूयते अमृतस्यैष सेतुरिति सेतुः प्रापकः स्वस्य यावतारगुणकर्मप्रति
पादकनामाद्यनुस्मरणादीनां तैरेवानुजिघृक्षयैव भगवतो जगद्व्यापारः इति भावः १५ भवतु भगवद्गुणकीर्तनादेरेव तत्प्राप्त्युपाय
त्वमस्यापि सृष्ट्यादिव्यापारेण चतुर्मुखादिकर्तृकत्वश्रवणात्कथं विश्वोद्भवस्थितिलयेषु निमित्तलीलारसायेत्युक्तं ॥ ॥ ॥ ॥

नता भ्या ३

श्रीदु

६

५५

एवं स्वरूपगुणविभूतिविशिष्टं भगवंतं नमस्कृत्याथ स्वमनीषितं विज्ञापयिषुस्तत्कालिकं परिदृश्यमानमनिरुद्धरूपं प्र
स्तुवन्नमस्करोति द्वाभ्यां दशार्द्धं पंचवृत्तयो यस्यास्तया तामिस्रांधतामिस्रतमोमहामोहतमोरूपाः पंचाविद्याभेदा यः स्वसगुल्म
त्वताविरुद्धानुपगताः पंचपर्वाज्ञानवृत्तयः तमो मोह इत्यादि केचित् अन्ये स्वप्नसुषुप्तिमूर्छामरणोर्ध्वज्ञानवृत्तयः इति केचि
त् एवंभूतयाविद्यया निद्राहेतुभूतयाऽनुपहतोप्यनभिभूतोपि योगनिद्रामुवाह प्राप्तवान् तस्मै नमः इत्युत्तरेणान्वयः कथंभू
तः उवाह जठरीकृतलोकयात्रः उदरे निवेशितजगद्वृत्तांतः अहिरनंत एव कशिपुः शय्या तया स्पर्शेऽनुकूलो यस्यास्तां निद्रां भी
मानामूर्मीणां मालाः विद्यंते यस्मिन् तज्जले निद्राणस्यापि वै किं नो जनस्य निद्रासुखमीदृगिति विवृण्वन् प्रदर्शयन्निवेत्यर्थः
२० किंच यस्य नाभिपद्ममेव भवनं तस्मादहं लोकत्रयोपकरणः लोकत्रयमुपकरणं यस्य स तथा स्रष्टा लोकानां परिवारिरित्यर्थः एवंभूतो

योऽविद्ययाऽनुपहतोपि दशार्द्धवृत्त्या निद्रामुवाह जठरीकृतलोकयात्रः अंतर्जले हिकशिपुस्पर्शानुकूलां भीमोर्मिमालि
नि जनस्य सुखं विवृण्वन् २० यन्नाभिपद्मभवनादहमासमीड्य लोकत्रयोपकरणो यदनुग्रहेण तस्मै नमस्त उदरस्थ
भवाय योगनिद्रावसानविकसन्नलिनेक्षणाय २१ सोयं समस्तजगतां सुहृदेक आत्मा सत्वेन यन्मृडयते भगवान्भगेन ते
नैव मे दृशमनुस्फुरताद्यथाहं स्रक्ष्यामि पूर्ववदिदं प्रणतप्रियोऽसौ २२

हं यदनुग्रहेण यस्य भगवतोनुग्रहेणासमा विरभवं तस्मै उदरस्थभवाय उदरस्थः भवः कार्यवर्गो यस्य तस्मै योगनिद्रावसाने वि
कसन्नलिनवदीक्षणं यस्य तस्मै नमः इत्यर्थः २१ एवं स्तुत्वा मनीषितानि प्रार्थयते स इति चतुर्भिः समस्तजगतां चेतनाचेतना
नामात्मा अत एव सुहृत् सोयं भगवान्येन सत्वेन ज्ञानेन सुहृत्सत्वमयविग्रहेण भगेनैश्वर्येण चाविश्वं मृडयते सुखयति तेनैवै
श्वर्येण मे दृशं प्रज्ञामनुस्फुरतात् प्रेरयतात् ददतादिति यावत् यथाहं इदं विश्वं पूर्वकल्पवत्स्रक्ष्यामि सर्गोपि स्वभोपयिकां प्रज्ञा
मनुस्फुरतादित्यर्थः प्रार्थनायाने ऽकल्पशंकां वारयति असौ समस्तस्य सुहृत्सर्वं तिर्यामी भगवान्प्रणतेषु प्रियः निरति
शयप्रीतियुक्तः प्रियो हि ज्ञानेनोत्सर्यमहं स च मम प्रियः इति गीतत्वात् प्रणतप्रियत्वात्प्रणतार्पितार्थः प्रदानशीलितः
इत्यभिप्रायः २२

48

इममेवार्थं स्वदृष्टान्तेन द्रढयति यस्मादिति यद्द्विपरार्द्धधिष्ण्यं द्विपरार्द्धकालस्थानं सत्याख्यं लोकं कथंभूतं सकललोकनमस्कृतं स-
कलैरर्वाचीनलोकैर्नमस्कृतं समानितमध्यासितं आरूढोऽप्यहं यस्मात्कालशरीरकात्त्वत्तः बिभेमि भीषास्माद्वातः पवत इत्युक्तेरस्मा-
त्त्वदधीनः स्वाधिकारेऽप्रमत्तोऽहमपीदमपि धिष्ण्यं द्विपरार्द्धावसाने विनंक्ष्यतीति बिभेमि भीतः सन्नहं त्वामेवावरुरुत्समानः अस्मादु-
मिच्छन्नेव करिष्यत्यर्थः बहुस्रवः बहवः सवास्त्वदाराधनरूपा यागा यस्य सः एवंभूतस्तपस्तेपेऽकृशोमि पाकं पचतीतिवन्निर्देशः तस्मै
भगवतेऽधिमखाय मखाराध्याय मखफलप्रदात्रे च नमः अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव चेति गीतत्वात् विस्तरायेति प्राक्तत्

पा०६ रत्नदात्रे सहायेत्यर्थः १८ एवं नमः परस्मा इत्यादिना परत्वभक्तानुग्राहकत्वादिविशिष्टं भगवन्तं नमस्कृत्य परत्वप्रयुक्तैश्वर्यत्वनिवा-
हकसौशील्यसौलभ्यगुणविशिष्टं नमस्करोति तिर्यगित्यादिना सौशील्यं हि महतो मन्दैः सह नीरन्ध्रेण संश्लेषस्वभावत्वं सौलभ्यं ना-
मस्वलोकाश्चानसागोचरस्य सकलमनुजनयनविषयतागतत्वं एतद्द्वयमुपास्यत्वापादकमवतारकथनेनोपपादयति तिर्यगा-

यस्माद्बिभेम्यहमपि द्विपरार्द्धधिष्ण्यमध्यासितः सकललोकनमस्कृतं यत् तेपे तपो बहुसवोऽवरुरुत्समानस्तस्मै नमो भगव-
तेऽधिमखाय तुभ्यं १८ तिर्यङ्मनुष्यविबुधादिषु जीवयोनिष्वात्मेच्छयात्मकृतसेतुपरीप्सया यः रेमे निरस्तरतिरप्यवरुद्धदेहस्त-
स्मै नमो भगवते पुरुषोत्तमाय १८

पा० नि

दिषु जीवयोनिष्वात्मेच्छया आत्मनो यसंकल्पेनैव न तु कर्मतोऽत्यर्थः अवरुद्धदेहः स्वीकृतमूर्त्तिः रेमे किमर्थमात्मकृतसेतुपरीप्सया
यः स्वकृतमर्यादानां जन्मकर्मनाशरक्षणायेत्यर्थः परीप्सयेति पाठे अध्ययनेन वसतीतिवद्धेत्वर्थे तृतीया परीप्सेः रस्थाने द्रष्टव्यमित्यर्थः
स्वयं कथंभूतो निरस्तरतिरपि निरतिशयानन्दस्वरूपानुभवेनैव कदाचिदप्यस्पृष्टबोधपिकस्वरवापि रेमे तिर्यगादिसजातीयचेष्टितानि कु-
र्वन् रेमे तिर्यक्षु अवतारा मत्स्यकूर्मवराहहंसादयः मनुष्येषु रामकृष्णादयः विबुधेषु वामनादयः एवमसंकल्पेनैव स्वस्वभावमजह-
देव तत्तद्योनिष्ववतीर्य तत्सजातीयदिव्यचेष्टितानि कुर्वन्नक्रूरध्रुवमालाकारगुहशबरीप्रमुखाननवधिकदयासौहार्दगर्भानुरागभा-
वलोकनालापामृतदानेनाप्याययन् सकलमनुष्यनयनविषयतां प्राप्नोतीत्यभिप्रायः एवंभूताय भगवते पुरुषोत्तमायात्मादिविध चेत-
नविलक्षणायते नमः १८ ॥

ने२ ने२

त्वा॰ त्वाद्

स्तुतिमुपसंहरति स्वसंभवमिति स्वसंभवो यस्मात्तं भगवंतं तयो विद्यासमाधिभिः कर्मज्ञानभक्तिभिर्निशाम्य दृष्ट्वा एवं प्र-
प्रकारेण यावन्मनोवचः स्वमनोवागनुसारेण स्वयथाशक्ति स्तुत्वा न तु साकल्येनेत्यर्थः इषुरपान्निवर्त्तते नांतरिक्षक्षितिस्पृ-
त मतिक्षयान्निवर्त्तते न गोविंदगुणक्षयादिति वचनात् खिन्नवच्छ्रान्तवद्विरराम २६ आत्मनः स्वस्य लोकसंस्थानविज्ञाने विषये
परिखिद्यतः कल्पव्यतिकरांभसा विषण्णचेतसः ब्रह्मणो हिरण्यगर्भस्याभिप्रेतमन्वीक्ष्य मधुसूदनस्तं ब्रह्माणमगाधया गं-
भीरया वाचा कश्मलं मोहं शमयन्निवाह उवाचेति द्वयोरन्वयः २७ वचनमेवाहमेति हे वेदगर्भ ब्रह्मन् तंद्रीं विषादकृतपारवश्यं
मा गाः मा प्राप्नुहि किंतु सर्गे सृष्टौ उद्यमं प्रयत्नमावह कुरु भवान् यन्नेनैवमेदशमनुस्पशतादिना प्रार्थयते तदग्रे पूर्वमेव मम
याप्यापादितं संपादितं २८ तर्हि कथमहं सृष्टिप्रकारं न जानामीत्यत आह भूयः पुनः तपः कर्मयोगं मदाश्रयां मद्विष-

मैत्रेय उ॰ स्वसंभवं निशाम्यैवं तपो विद्यासमाधिभिः यावन्मनो वचः स्तुत्वा विरराम स खिन्नवत् २६ अथाभिप्रेतम-
न्वीक्ष्य ब्रह्मणो मधुसूदनः विषण्णचेतसं तेन कल्पव्यतिकरांभसा २७ लोकसंस्थानविज्ञान आत्मनः परिखिद्यतः
तमाहागाधया वाचा कश्मलं शमयन्निव २८ श्रीभगवानु॰ मा वेदगर्भ गास्तंद्रां सर्ग उद्यममावह तन्मयापादितं ह्यग्रे
यन्मां प्रार्थयते भवान् २८ भूयस्त्वं तप आतिष्ठ विद्यां चैव मदाश्रयां ताभ्यामंतर्हृदि ब्रह्मन् लोकान्द्रक्ष्यस्यपावृतान् ३० त
त आत्मनि लोके च भक्तियुक्तः समाहितः द्रष्टासि मां ततं ब्रह्मन्मयि लोकांस्त्वमात्मनः ३१ यां च विद्यां उपासनं तंत्रेण ज्ञान
योगोपि विद्याशब्देन विवक्षितः आतिष्ठ कुरु ताभ्यां तपोविद्याभ्यामंतर्हृदि हृदयकमलमध्ये हे ब्रह्मन्नावृत्तान् लोकान्यथावद्द्र-
क्ष्यसि ३० ततः यथावल्लोकदर्शनानंतरं भक्तियुक्तः समाहितश्चेन्नत्त्वमात्मानं स्वस्मिन् लोके च सर्वचेतनाचेतनाचेत-
नात्मके जगति च ततं व्याप्तं मय्यात्मनीति सामानाधिकरण्यं आत्मन इति पाठे आत्मनो जीवादित्यर्थः यद्वात्मनो मम लो-
कान् शरीरभूतान् लोकान् यद्वात्मनः मत्तः प्रसृतान् लोकान् मयि यथावद्द्रष्टासि द्रक्ष्यसीत्यर्थः सर्वचेतनाचेतनात्मकत्वपारि-
णं चारकं मां मद्व्याप्यान् [illegible] लोकांस्त्वपरं पश्यसीत्यर्थः सर्वात्मकब्रह्मसाक्षात्कारेण मोहो निवर्त्तते इत्यभिप्रायः ३१ इदमे

बघुक्तप्रज्ञा

ननु विश्वसृष्ट्युपमिव सृष्टत्वं स्व बंधकरी विश्वसृष्ट्युपयुक्तां प्रज्ञां प्रार्थयितुं नार्हसीत्याशंकां निराकुर्वन्नन्यदपि प्रार्थयते ए
ष इति एष भगवान्प्रपन्नवरदः आत्मप्रशस्त्या आत्मनः स्वस्यापत्यं किंचिद्विशेषणभूतपालस्यापासाकं गहीता अपरित्यक्ता गु
णाः स्वाभाविकसर्वज्ञत्वापहतपाप्मत्वादयः ज्ञानशक्त्यादयश्च गुणा येषु तेषां भूता अवतारा यस्य यथा ल्लक्षिष्यन्ति यद्यहं वन
२४ नुष्यातिर्यगादिसजातीयचेष्टितं करोमि तस्मिन्कर्मणि मे चेतः चित्तं युंजीत तत्तद्देवतारगुणकर्मानुभवयुक्तं स्यात् कथंभूतस्या
पि मे स्वविक्रमं स्वस्यानवविक्रमं प्रबोधोपनिषद्दिदं विश्वं सृजतोपि मे चेतः त्वद्गुणकर्मानुभवयुक्तं स्यात् घण्णा भवेन्नयानुग्रहात्
तात्पर्यः किं गुणकर्मानुभवात् प्रज्ञा प्रार्थनेनेति शंकानिरासाय यथा वद इति निवर्त्तक गुणकर्मानुभवात् सज्ञा कर्मशाम
त्वं संसृतिहेतुभूतमनादिपुण्यपापमालिन्यं विजह्यात् जेयं भगवदनुग्रहेणोत्वदेवतरगुणकर्मानुभवं त्वद्धि भूतिभूतं जगत्त्व
त्कैकर्यवैषेण सृजतो मे त्वत्कैकर्ये प्रार्थनायुक्तेति भावः २३ एवं सृष्ट्योपयिकीं प्रज्ञां मनन्तदवतारगुणकर्मासाक्षिं च सप्रार्थ्याथ
एष प्रपन्नवरदो रमयात्मशक्त्या यद्यत्करिष्यति गृहीतगुणावतारः तस्मिन्स्वविक्रममिदं सृजतोपि चेतो युंजीत कर्मशमलं
च यथा विजह्यां २३ नाभिह्रदादिह सतोऽम्भसि यस्य पुंसो विज्ञानशक्तिरहमास महानुभावः रूपं विचित्रमिदमस्य विवृण्वतो मे
वि मा रीरिषीष्ट निगमस्य गिरां विसर्गः २४ सोसावदभ्रकरुणो भगवान्विवृद्धप्रेमस्मितेन नयनाम्बुरुहं विजृम्भन् उत्थाय विश्व
विजयाय च नो विषादं माध्व्या गिरापनयतात्पुरुषः पुराणः २५ तत्स्वरूपगुणविभूतिप्रतिपादकवेदराशिविस्मरणं प्रार्थयते
नाभिह्रदादिति इह अम्भसि शयानस्य यस्य नाभिह्रदात्पद्मे ज्ञानबलक्रियाशक्तेः पुंसस्तव नाभिह्रदाद्विज्ञानश
क्तिरपणे किंचिद्विशेषणं यस्य सः ज्ञानगुणः कोहं आस जातः अस्य भगवतस्तव विचित्रमद्भुतं रूपं शरीरं इदं चिदचिदात्मकं जगद्वि
स्तारयतो मे निगमस्य वेदस्य गिरां वेदावयवभूतानां वाचां विसर्गः प्रसरः उच्चारणमिति यावत् मा रीरिषीष्ट माक्षीणः स्यान्नद
नुग्रहादित्यर्थः २४ अथाभिमुख्येन तत्संभाषणं प्रार्थितस्य सर्वस्यानिशानभूतं प्रार्थयते स इति अदभ्रकरुणः अनल्पक
पः पुराणः पुरुषः सोसौ भगवान् विवृद्धप्रेमास्मितेन विवृद्धः प्रेमा यस्मिन् तथाभूतेन स्मितेन नयनाम्बुरुहं विजृम्भन्नुत्थाय सन्नयित्व
कासयन्निति यावत् विश्वस्य विजयाय उद्भवाय च कारादस्मदनुग्रहाय चोत्थाय माध्व्या मधुरया गिरा नः विषादं खेदमपनयतात्ति
राकुर्यात् २५

भा॰ तृ॰ टी॰

४४ ॰

अनुग्रहस्य वर्षीयस्त्वमेव दर्शयति ऋषिमिति आद्यं भवमाद्यं ऋषिं मत्स्वरूपगुणविभूतिप्रतिपादककृत्स्नवेदराशिद्रष्टारं
त्वां पापीयान् बंधकः रजोगुणः न बध्नाति न संसारपतितं करोति यस्मात् मदनुग्रहात् प्रजाः संसृजतोपि ते मनः मयि निर्बद्धं नितरामासक्तं
३५ एवमनुग्रहस्य वर्षीयस्त्वं प्रदर्श्य मत्स्वरूपादिविषयकं ज्ञानं मद्विषयकस्तवनं चैतेत्सर्वं मदनुग्रहादेव संपन्नमित्याह
ज्ञात इति त्रिभिः देहिनां देहासक्तानामभक्तानामिति स्यार्थः दुर्विज्ञेयोपि दुःखेनापि ज्ञातुमशक्योप्यहं मद्योधुना भवता ज्ञातः यथाव
त्स्वरूपगुणविभूतिविशिष्टत्वेन ज्ञातः मया ज्ञात इति कथं ज्ञायत इत्यत आह यद्यस्मात्त्वं भूतानि पृथिव्यादीनि गुणाः सत्वादयः

रू॰प५

आत्मा मनः प्राकृतैर्भूतादिभिरयुक्तं मां मन्यसे सर्वकर्मा सर्वकामः सर्वगंधः सर्वरस इत्यादिश्रुत्युक्ताऽप्राकृतशुद्धरूपं चोप
निषन्मय भूतेन्द्रियादियुक्तं मन्यसे इत्यर्थः रूपं यदेतदवबोधरसोदयेनेत्यादि [illegible] नात्तथैव प्रतिपादनात् यद्वा युक्तमिति वच्छे

44

ऋषिमाद्यं न बध्नाति पापीयांस्त्वां रजोगुणः यन्मनो मयि निर्बद्धं प्रजाः संसृजतोपि ते ३५ ज्ञातोहं भवता त्वद्य दुर्विज्ञेयो
पि देहिनां यन्मां त्वं मन्यसेयुक्तं भूतेन्द्रियगुणात्मभिः ३६ तुभ्यं मद्विचिकित्सायामात्मा मे दर्शितो बहिः नालेन सलिले मूलं
पुष्करस्य विचिन्वते ३७ यच्चकर्थांग मत्स्तोत्रं मत्कथाभ्युदयांकितं यद्वा तपसि ते निष्ठा स एष मदनुग्रहः ३८ प्रीतोहमस्तु
भद्रं ते लोकानां विजयेच्छया यदस्तौषीर्गुणमयं निर्गुणं मानुवर्णयन् ३९

टी॰ आत्मनो जीवाः भूतादिभिस्त्वेतनैरात्मनि प्रति
ष्ठितेन विषयं मां मन्यसे मच्छेषतया मच्छरीरतया मत्सृज्यपाल्यसंहार्यतया च चेतनविशिष्टं मां सर्वज्ञत्वसत्यसंकल्पत्वसत्य
कामत्वप्रकृतिपुरुषविलक्षणत्वाद्यनन्ताकारविशिष्टं मन्यसे इत्यर्थः ३६ किंच मद्विचिकित्सायां अस्ति ह्यधस्तादिह किंचनैतदधि
ष्ठितं यत्र सता नु भाव्यमित्येवंरूपायां मद्विषयायां विचारणायां निमित्तभूतायां सलिले पुष्करस्य मूलं नालेन मार्गेण वि
चिन्वते अन्वेषते तुभ्यं मे मया आत्मा विग्रहः बहिर्दर्शितः ३७ किंच अंग हे ब्रह्मन् मत्कथाभ्युदयांकितं मत्कथैवाभ्युदयः स्तोत्रं म

चै॰२

द्विषयकं यत् कृतवानसीति यत् [illegible] यच्च यज्ञते न वत्त तपसि निष्ठा चेति यदेतत्सर्वं स एव मदनुग्रहः ३८ सर्वस्य मदनुग्रहकारि
तत्वानुभाम हंप्रसन्न इत्याह प्रीतोहमिति यद्गुणमयं [illegible] कल्याणगुणप्रचुरं निर्गुणं हेयगुणरहितं मां मां अनुवर्णयन् त्वं
लोकानां विजयेच्छया सर्गेच्छया स्तोषीः स्तुतवान् अतोहं प्रीतोस्मि निरतिशयप्रीतियुक्तोस्मि ते तुभ्यं भद्रमस्त्वित्यर्थः ते

च सीद्दिव किंचवक्तव्यमस्ति चेद् ३८

सेनादितं॰

४४

यदा त्विति दारुष्वग्निमिव सर्वभूतेषु स्थितं मां लोकः यदा तु प्रतिचक्षीत पश्येत् दारुष्वग्निमिवेति दृष्टान्तसामर्थ्यात् विलक्षणयो
गोभिप्रेतः कौटिल्यदैर्घ्यादिधर्मा हि दारुगता न त्वग्निगताः एवं देहस्थचिदचिदंतरात्मतया वस्थिते परमात्मनि चेतनाचेतनगतक
योगाभिप्रेतः ... इयोनसंगच्छन्तीत्यभिप्रायः तर्ह्येव प्रकृतिपुरुषविलक्षणतया तदन्तरात्म
मेव रूपत्वसर्वज्ञत्वपालत्वनियामकत्वैः ... दर्शनानन्तरमेव कश्मलं दुःखमोहं च जह्यात् ३२ एवं सर्वात्मब्रह्मोपासनस्य मुक्तिसाधनत्वमभिधाय ब्रह्मशरीरस्व
तया च दर्शनानन्तरमेव कश्मलं दुःखमोहं जह्यात् ३२ एवं सर्वात्मब्रह्मोपासनस्य मुक्तिसाधनत्वमभिधाय ब्रह्मशरीरस्व
याप्रकृतिविलक्षणतया स्वात्मोपासनमपि तत्साधनमित्याह यदेति भूतानि पृथिव्यादीनि इन्द्रियाणि श्रोत्रादीनि कर्माभिप्रे
त्रियाणि आशयो वासनान्तःकरणं एतैर्विरहितं तत्सम्भवे सति तत्प्रभावासंभवादेभ्यः विलक्षणमित्यर्थः स्वस्वरूपेण सत्यज्ञानमनं
तदूत्यिक्तसुक्त ... स्वरूपेण ... मया आत्मना धारकेण उपेतम् आत्मधार्यम् आत्मानं जीवात्मानं पश्यन्नुदासीनः स्वाराज्य

यदा तु सर्वभूतेषु दारुष्वग्निमिव स्थितं प्रतिचक्षीत मां लोको जह्यात्तर्ह्येव कश्मलं ३२ यदा रहितमात्मानं भूतेन्द्रिय
गुणाशयैः स्वरूपेण मयोपेतं पश्यन्स्वाराज्यमृच्छति ३३ नानाकर्मवितानेन प्रजा बह्वीः सिसृक्षतः नात्मावसी
दत्यस्मिंस्ते वर्षीयान्मदनुग्रहः ३४ मकर्मवश्यत्वं ऋच्छति प्राप्नोतीत्यर्थः ३३

ननु स्वस्य सर्वात्मकब्रह्मोपासनं ब्रह्मशरीरभूतस्वात्मोपासनयोर्मुक्तिसाधनत्वमेव मम पि कथं मे स्वाधिरूपव्यापारशत
रूपस्य सर्वात्मकब्रह्मानुसंधानं स्यादित्याशङ्क्य तन्मनुग्रहणाति नानेत्यादिना नानाकर्मणां जीवसम्बन्धानादिपुण्यपाप
रूपकर्मणां वितानेन विस्तारेणानादितत्कर्मवासनानुसारेण बह्वीर्बहुविधाः विचित्रा इत्यर्थः प्रजा देवतिर्यङ्मनुष्यस्थाव
रादिरूपाः सिसृक्षतः ते तवात्मा चित्तं नावसीदति न मोहं प्राप्नोति किं तु मत्स्वरूपरूपगुणविभूत्यनुसंधानासक्तमेव भवति
कुत एतदत आह मदनुग्रहः वर्षीयान्बलवत्तर इत्यर्थः व्यासंगान्तरसक्तस्यापि त्वच्चेतो मत्स्वरूपरूपगुणविभूत्यनुसंधाना
सक्तमेव स्यादित्यनुगृह्णामीत्यर्थः अनेन तस्मिंस्त्वद्विक्रमाभिदं सर्जनोपचेतो ... युंजीतेति तेनैव विज्ञापितमनुष्ठितं भवति
३४

नेत्र

भा॰ त॰ टी॰

४५

पत्रविश्व इमे लोकाः सविकाशं समात इत्यादिना कृतप्रश्नो गुरुशुश्रूषया विदुरः पृच्छति अंतर्हित इति अत्र प्रश्नोत्तरयोः क्रमस्त्व
विवक्षितः भगवति षाड्गुण्यपूर्णे ब्रह्मणामनुग्रह्यांतर्द्धानं गते स तिलोकानां पितामहः ब्रह्मा प्रभुर्वशी इतेंद्रियः अबीनां प्र
भुः स्वामीति वा दैहिकीर्देहजाः मानसीः संकल्पजाश्च प्रजाः कतिधाः स सर्ज सृष्टवान् १ ये चेति हे भगवन्नो त्रेयमे मया ये चान्येऽर्थाः
पृष्टाः तान्संशयविषयान्पृष्टान्प्रश्नानानुपूर्व्येण क्रमेण कथय ननु प्रश्नक्रमानुसारेण उत्तरेषु न स्यादर्शनात् अश्रुतत्वेनवद
तपूत्तरेय कथयेति वा हे बहुवित्तम ब्रह्मविद्श्रेष्ठ सरनो ऽस्माकं सर्वसंशयान् छिंधि छिंधि ते सर्वसंशया इति पाठ अतत्वात् स्वपर
संशयछेदनं ब्रह्मविदस्तव युक्तमित्यभिप्रायेण ब्रह्मवित्तमेत्युक्तं २ एवमुक्तप्रकारेण तेन क्षत्त्रा विदुरेण संचोदितः ज्मरणे
प्रवर्त्तितः कौषारवः मैत्रेयः मुनिः प्रीतः निरतिशयरूपभगवद्भक्तिजनकप्रश्नविशेषेण स्वयं निरतिशयप्रीतियुक्तः हे भारत त

विदुर उ॰ अंतर्हिते भगवति ब्रह्मा लोकपितामहः प्रजा ससर्ज कतिधा दैहिकीर्मानसीर्विभुः १ ये च मे भगवन्पृष्टास्त्वय्य
र्था बहुवित्तम तान्वदस्वानुपूर्व्येण छिंधि नः सर्वसंशयान् २ श्रीशुक उ॰ एवं संचोदितस्तेन क्षत्त्रा कौषारविर्मुनिः प्रीतः प्र
त्याह तान्प्रश्नान्हृदिस्थानथ भारत ३ मैत्रेय उ॰ विरिंचोपि तथा चक्रे दिव्यं वर्षशतं तपः आत्मन्यात्मानमावेश्य यथाह
भगवानजः ४ तद्विलोक्याब्जसंभूतो वायुना यदधिष्ठितः पद्ममंभश्च तत्कालकृतवीर्येण कंपितं ५ तपसा ह्येधमानेन वि
द्यया चात्मसंस्थया विवृद्धविज्ञानबलो न्यपाद्वायुं सहांभसा ६

45

राजन् हृदिस्थान्तान्प्रश्नान्प्रत्याह प्रत्यभाषत उत्तरयामास स

११

र्वः हृदिस्थानित्यनेन भूतप्रश्नास्तेनास्मृता इत्यभिप्रायः एवमाक्षेपे मैत्रेयः स्वातिप्रीतभगवदनुगृहीतचतुर्मुखस्य नाभिकंजस्यास्य
तदात्विकं कर्म संग्रहेणाह विरंचोपीत्यादि बुद्धिः भगवान्षाड्गुण्यपूर्णः अजः जन्मरहित यादृक् विकाररहितः यदाह भूयस्त्वं तप आतिष्ठ
विद्यां चैव मदाश्रयामिति यदाह तथा विरंचोपि ब्रह्मा अप्यात्मनि परमात्मन्यात्मानं मनः आवेश्य स्थिरीकृत्य दिव्यं देवमानामितवर्ष
शतं वत्सरशतं तपश्चक्रे चकार ४ तदिति साद्धश्लोकद्वयमेकान्वयः अब्जसंभूतो ब्रह्मा यद्यदधिष्ठितः यद्यत्पद्ममधिष्ठाय स्थितः

राम॰

कंतद्विक्तः तत्पद्ममंभश्च विलोक्य ५ एधमानेन उत्तरोत्तरं प्रवृद्धेन तपसा कर्मयोगेन आत्मसंस्थया परमात्मविषयया विद्यया उपास
नया च प्रवृद्धं विज्ञानं विविधसृष्टिविषयज्ञानमेव बलं यस्य स तथाभूतः अंभसा सह वायुं न्यपात् पीतवानित्यर्थः ६ ॥ ॥ ॥

४५

तेन स्वच्छतुगुणेन कालेन कृतमुत्पादितं वीर्यं यस्मिंस्तेन वायुना कंपितं २

यइति एतेनभ[illegible]वत्कृतेनस्तोत्रेणपुमान्नरः निसंस्कृत्वामांभजेत्तस्यपुंसोप्याश्वहंसर्वेषांकामानांवराणांईश्वरः दातासंप्रसीदेयंप्र
सन्नोभवामितत्रकिमुवक्तव्यमित्याशयः ५० मत्प्रीतेरधिकमन्यच्छ्रेयोनास्तीत्याह पूर्तेनेति पूर्तंस्मार्तं [illegible] एतैर्हिभिःराद्धंसिद्धंनिःश्रे
यसकरं राजसूयादिपाद्येराज्ञांनिःश्रेयसंचमत्प्रीतिःयज्ञादिजन्यमत्प्रीतिनिबंधनोभोगमोक्षादिसर्वं इतितत्वविदांमतंभवति ५१ एतदे
वसहेतुकमुपपादयति अहमिति हेधातःब्रह्मन्नात्मनांजीवानामहमात्मा अंतःप्रविश्यप्रशासकःधारकः अतएवप्रेयसामपि
प्रीतिविषयाणामपिमध्येप्रेष्ठः निरतिशयप्रीतिविषयःसन्नियंतः एवंधाःसर्वेप्रियवदाभातितस्यप्रियतमत्वेकैमुत्यन्यायेन मत्कृतिरेवज
ङ्कआत आत्मत्वात्प्रेष्ठत्वाच्चमय्येवरतिंभक्तिंकुर्यात् प्रियःप्रियत्वेनपरिगृहीतोदेहादिरपियत्कृतेपदर्थः प्रियःभवति मत्प्रीतिरेवज
गत्सर्वंकुर्वित्याह सर्वविदमयेनेति आत्मात्मयोनिनाऽऽत्मनो
त्मनोत्ताभद्रसार्थः ५२ मदनुग्रहविषयतयाकृतार्थस्त्वंमदाज्ञारूपंजगत्सर्वंकुर्वित्याह सर्वविदमयेनेति आत्मात्मयोनिनाऽऽत्मनो
यएतेनपुमान्नित्यंस्तुत्वास्तोत्रेणमांभजेत् तस्याशुसंप्रसीदेयंसर्वकामवरेश्वरः ५० पूर्तेनतपसायज्ञैर्दानैर्योगसमाधिना
राद्धंनिःश्रेयसंपुंसांमत्प्रीतिस्तत्त्वविन्मतं ५१ अहमात्मात्मनांधातःप्रेष्ठःसन्प्रेयसामपि अतोमयिरतिंकुर्याद्देहादिर्य
त्कृतेप्रियः ५२ सर्वविदमयेनेदमात्मनात्मात्मयोनिना प्रजाःसृजयथापूर्वंयाश्चमय्यनुशेरते ५३ मैत्रेयउ० तस्मा ए
वंजगत्स्रष्टुप्रधानपुरुषेश्वरः व्यज्येदंस्वेनरूपेणकंजनाभस्तिरोदधे ५५ श्रीभागवतेतृतीयस्कंधेनवमोध्यायः ९ श्रीम
जीवानामात्मापरमात्मायस्ययोनिःकारणंतेनमहत्तेनेत्यर्थः सर्वविदमयेनमदुपदिष्टसर्ववेदप्रचुरेणात्मनज्ञानेन आत्मना
हिमतिवाचीमहत्त्वज्ञानेनेत्यर्थः इदंजगदंतर्गताःप्रजाःदेवादीन्यथापूर्वंपूर्वकल्पवत्सृज कथमवस्थितास्ताःप्रजाःयाश्चयाहि
प्रजाःमय्यनुशेरतेजपसंहृताःस्थिताःतास्सृजेत्यर्थः ५३ संवादमुपसंहरति तस्मैइति प्रधानपुरुषेश्वरःप्रकृतिपुरुषयोर्नियं
ताकंजनाभःजगत्स्रष्टुकंप्रति पद्मनाभोयस्यसएवंभूतोभगवान्तस्मैजगत्स्रष्टुब्रह्मणेइदंजगन्निर्माणप्रकारादिकंव्यज्यप्रदर्श्य
त्वास्वेनरूपेणतिरोदधेस्वकीयदिव्यमंगलविग्रहंतिरोहितमकरोदित्यर्थः ५५ एवंभगवन्नाभिकमलसमुद्भूतचतुर्मु
खकृतस्तुतिप्रकारेस्तुतस्प्रीतभगवदनुग्रहेचतुर्मुखविषयेभिहिते ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

इतिश्रीभागवतेतृतीयेटीकायांनवमः

भा·त·दी·
४६

एवमाक्षिप्तो मुनिः कालस्वरूपं वक्तुं तावत्कालस्य सृष्टिमनुवदति गुणेत्यादिना यावदध्यायसमाप्ति तत्र प्रथमं परमात्मन एव कर्तृत्वं कार
णत्वं कार्यत्वं चाह गुणेति व्यतिकरः परिणामो यस्य तद्गुणव्यतिकरं प्रधानं तदाकारो रूपं शरीरं यस्य सः तथोक्तः निर्विशेषः पृथिव्यादिरहि
तः अप्रतिष्ठितः कारणान्तररहितः इत्यर्थः कार्याणां हि कारणे प्रतिष्ठा प्रलयसत्त्वे भावात्कारणं तस्य हि संफलितं एवंविधः परमपु
रुषः तदुपादानं उपादानभूतं यस्येति बहुव्रीहिः उपादानभूतेन ...... तेन प्रधानेन विशिष्टमात्मानं जगद्रूपेण सृजदित्यर्थः अत्र
करा ५ गुणव्यतिकारः सृजतीत्यनेन चेतनाचेतनयोर्नियन्तुः परमपुरुषस्य निकृष्टस्य निमित्तत्वं तदुपादानमात्मानमित्यनेन प्रकृतिपुरुषका
लविशिष्टत्वा कारणोपादानत्वं चोक्तं भवति तथा च श्रूयते तदात्मानं स्वयमकुरुतेति सच्चित्तं च सासा क्षोभयामास नादिति ११ एकस्यै
व ब्रह्मणश्चिदचिद्विशिष्टस्यावस्थाभेदेन कार्यकारणभावं प्रतिपादयन् सृष्टेः प्रागवस्थानमाह विश्वमिति विश्वं ब्रह्म तत्सन्नेन सर्वं ख-
शरीरशरीरीभाव २५८ ल्विदं ब्रह्मेति स्मारिता अत्र च सामानाधिकरण्यभावनिबन्धन इति भाष्ये प्रपञ्चितः एवं च विश्वं विश्वाकारं ब्रह्म तन्मात्रं प्रकृत्यव

मैत्रेय उ० गुणव्यतिकराकारो निर्विशेषोऽप्रतिष्ठितः पुरुषस्तदुपादानमात्मानं लीलयाऽसृजत् ११ विश्वं
वै ब्रह्मतन्मात्रं संस्थितं विष्णुमायया ईश्वरेण परिच्छिन्नं कालेनाव्यक्तमूर्तिना १२ ॥ ॥ ॥ ॥

46

स्थामात्रविशिष्टं संस्थितं संहृतं तत्तु महदाद्यवस्थाविशिष्टं विष्णुमायया भगवत्संकल्पेन यत्कार्यावस्थायां स्थूलचिदचिद्विशिष्टं ब्र
ह्म विश्वाकारं तत् संहारविषयस्वकीयसंकल्पेन प्रकृतिमात्रावस्थामात्रविशेषितत्वेनोपसंहृतमित्यर्थः एकस्यैव ब्रह्मणः स्वकालभेदेन
पिण्डत्वघटत्वाद्यवस्थाद्वययोगेन कार्यकारणभाववदेकस्यैव ब्रह्मणश्चिदचिद्विशिष्टस्य स्थौल्यसौक्ष्म्यावस्थाभ्यां कार्यकारणभाव ५
उपपन्नः तन्निबन्धन एव मृदयं घट इत्यादिवत्सामानाधिकरण्यनिर्देश इत्यभिप्रायः प्रलयेऽपि कालसाचिव्यमाह ईश्वरेणेति का
लेनाविनाभाव्याद्ययोगात्स्वेश्वरत्वं ईश्वरशरीरत्वाद्धा तस्येश्वरत्वव्यपदेशः कालस्येश्वरशरीरत्वमेतस्यान्तरस्य प्रशासने गा
र्गि मुहूर्ता अर्धमासा मासा ऋतवः संवत्सरा विधृतास्तिष्ठन्तीत्यादिश्रवणात् यावत्सत्त्वं स्वशक्यानियत्तव्यस्वस्वभावत्वमेव हि शरीरत्वं अ ४६
त एव शरीरभावेन सामानाधिकरण्यनिर्देशा उपपन्ना अव्यक्तमूर्तिना प्रत्यक्षेणानवगतत्व इत्यर्थः मूर्तिरूपं यस्य तेनानुमेयेन
परिच्छिन्नं प्रलयदशायां सूक्ष्मचिदचिद्विशिष्टं कालपरिच्छिन्नं सदेव स्थितमित्यर्थः १२

शरीरी २

स्वायंभुवः पादानंतरं कर्माह तद्विति पद्मधिष्ठितः यस्मिन्नधिष्ठाय स्थितः तत् विषद्व्याप्यं तत् स्थितं व्याप्य सुप्तं तमित्यभिप्रायः पद्मं पुष्करं विलो
क्यानेन पुष्करेण प्राक्प्रलीनान् सर्वं कल्पांते तल्लीनाँल्लोकान् कल्पितास्मि सृष्टास्मीत्यचिंतयत् स्थितिं तत्त्ववान् ७ पद्मेति भगवत्कर्मचोदितः भगव
ताकरणीये कर्मणि चोदितो नियुक्तः सन् तत् पद्मकोशं माविश्याधिष्ठाय तमेवैकं पद्मकोशं व्यभांक्षीत् द्विधा भाग उरुधा बहुधा विभागं वि
हरण्वन्ने केन कमलमुकुलेन कथं त्रिलोकी सृष्टिरित्यसंभावनां निवारयितुं तस्य विशालतामाह भाव्यं चतुर्दश धात्मकं ... रूपेण लोका४
लोकात्मना भवितुं योग्यमतोनेन त्रिलोकीकरणं न चित्रमित्यर्थः त्रिधा देवादिभोक्तृरूपेण शब्दादिभोग्यरूपेण ज्ञानकर्मेंद्रियात्म
ककरणरूपेणैवं त्रिधा व्यभांक्षीदित्यर्थः ८ कृत्स्नं जगदेतत्कमलांतर्भूतमित्याह एतावानिति जीवलोकस्य कार्यवर्गस्य संस्थाभे
दः संनिवेशविशेषः एतावान् विभक्तभोक्तृभोग्यभोगोपकरणभोगस्थानांतर्गतप्रपंचात्मकः पद्मकोशः उक्त इत्यर्थः ननु परमे
ष्ठिनः तत्स्थानस्य च कार्यवर्गांतर्गतत्वात्तत्र सहस्यैव त्रिलोकीवत् किं न स्यादित्याशंकां निरस्यति अनिमित्तस्येति कामस्य धर्मे
तद्विलोक्य वियद्व्यापि पुष्करं यदधिष्ठितः अनेन लोकान् प्राक्प्रलीनान् कल्पितास्मीत्यचिंतयत् ७ पद्मकोशं तदाविश्य भगवत्क
र्मचोदितः एकं व्यभांक्षीदुरुधा त्रिधा भाव्यं द्विसप्तधा ८ एतावान् जीवलोकस्य संस्थाभेदः उदाहृतः धर्मस्य ह्यनिमित्तस्य विपाकः
परमेष्ठ्यसौ ९ विदुर उ० यदात्थ बहुरूपस्य हरेरद्भुतकर्मणः कालाख्यं लक्षणं ब्रह्मन् यथा वर्णय नः प्रभो १० ॥ ॥ ॥ ॥
स्यासौ परमेष्ठी विपाकः फलभूतः परमेष्ठीति परमेष्ठिलोकोप्युच्यते तेन तस्याधिष्ठितत्वात् यद्वा भावप्रधानो निर्देशः परमेष्ठित्व
मित्यर्थः ननु अनिमित्तधर्मस्य मुक्तिरेव फलं न तु परमेष्ठित्वं तल्लोकप्राप्तिर्वा मैवं ते ब्रह्मलोके तु परांतकाले परामृतात्परिमुच्यंति
२७ सर्वे ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे इति ब्रह्मलोकस्थानां ... परार्धावसाने प्रायशो मुक्त्यभिधानात् एवं जगान्ने मा
ण प्रकारे संग्रहेणाभिहिते विदुरस्तत्कालकृतं वीर्यं शोकपितमिति प्रलयोपि कालस्यावाभिधाने नित्यत्वापातप्रतीते भ्रान्ति पा२
स्तत्त्वजिज्ञासया तत्स्वरूपं पृच्छति यदिति चिरंचिदात्मकप्रपंचरूपस्याद्भुतकर्मणः अचिंत्यवीर्यस्य हरेः संबंधि यत्कालाख्यं लक्षणं
रू२ रूपमात्थ उक्तवान् तत्कालकृतं वीर्यं शोकपितं इत्यनादित्वेन काथितं वा तत्कालाख्यं भगवच्छरीरे हे ब्रह्मन्नोः सम्यग्यथा तद्वर्णय हे प्रभो व
र्णयितुं त्वं समर्थ इत्यभिप्रायः किं कालः कल्पग्रता कल्प्य किं वा तस्य स्थूलसूक्ष्मचरूपमित्यादि यथावर्णयेत्यभिप्रायः १० ॥ ॥ ॥
६१

भा० त० टी० ४७

भूतसर्गस्तृतीयस्तु देवो पपादयति तन्मात्रो द्रव्यशक्तिमानिति तन्मात्राणि शब्दादीनि पंच द्रव्याणि आकाशादीनि पंच एतान्ये
व शक्त्योस्तयोः संततीति लक्ष्यन् तन्मात्रद्रव्याणां भगवच्छक्तिशब्देनोक्तिः यथा परस्य ब्रह्मणः शक्तिस्तथेदमखिलं जगत् यस्य
पृथिवी शरीरमित्यादि तदुक्तं तन्त्वष्टाशरव्यादिशब्दः पर्याया इति पुरस्तादेवोक्तं अत्र मतुप्प्रत्ययेनावगतसंबंधसामान्यं विष
यविषयिभावरूपसंबंधविशेषपर्यवसन्नं यथा गामानयेत्युक्ते गोशब्दस्य विवक्षित प्रकृतगोव्यक्तिविशेषे पर्यवसा
नं तथा चायमर्थः भगवच्छरीरभूततन्मात्रद्रव्यविषयकः सर्गस्तृतीय इति तन्मात्रो द्रव्यशक्तिमानिति पाठे तु तृतीयो भू
तसर्गो द्विविधः तन्मात्रः शब्दादितन्मात्रसर्गः द्रव्यशक्तिमान् द्रव्यशक्तिविषयक इति समास [illegible] व्यासरूपं व्याख्येयं
ज्ञान[illegible]क्रियात्मकः ज्ञानकर्मेंद्रियविषयः परित्विंद्रियसर्गश्चतुर्थ इत्यर्थः वैकारिकः सत्त्वोद्रिक्तः देवसर्गः इंद्रियाभिमानि

47

भूतसर्गस्तृतीयस्तु तन्मात्रो द्रव्यशक्तिमान् चतुर्थ ऐंद्रियः सर्गो यस्तु
ज्ञानक्रियात्मकः वैकारिको देवसर्गः पंचमो यन्मयं मनः १५ ॥ ॥

दिग्वाताद्दिदेवसर्गो पिः पंचमः यन्मयं मनः यद्वैकारिकाहंकारकार्यं मनः तद्वैकारिकाहंकारोद्रिक्तो देवसर्गः इंद्रियाभिमानि पं
चम इत्यर्थः यद्यपींद्रियाभिमानिदेवतानां सर्गस्यांडसृष्ट्यनंतरं चतुर्मुखकर्तृत्वेन न वैकारिकाहंकारसर्गांतर्भावः अत एव वैकृता
स्त्रय एवैते देवसर्गश्चसत्तमेति देवसर्गस्य वैकृतत्वं वक्ष्यते तथापींद्रियसर्गाद्गृह्यस्य तथा कथनं न वैकारिकत्वविवक्षया सर्वेषा
मिंद्रियाणां वैकारिकाहंकारादेव जन्म ते देवताधिष्ठेयप्राप्त्यात्रादीन्द्रियोत्पत्त्यभिप्रायेण वा देवसर्ग इत्युक्तं ननु सर्वेंद्रियाणां वैका
रिकत्वे कथं चतुर्थस्त्विन्द्रियसर्गः यस्तु ज्ञानक्रियात्मकः इति पंचमसर्गानंतर्भावेन चतुर्थसर्गत्वकथनमिति चेन्न अत
इंद्रियत्वबाह्येंद्रियत्वरूपवैधर्म्येण मनः सर्वेंद्रियवर्गयोः पृथग्गणनात् न चैतावतेंद्रियाणामवैकारिकत्वशंका कार्या तैजस
स्य वैकारिकभूतादेरनुग्राहकत्वेन स्वतंत्रेंद्रियोत्पादकत्वस्य हृतीयेनिरस्तत्वात् १६

रिका १ कर १२ राम० ४७

सम्प्रिसंहारदशास्तु सर्वत्र कालस्यानुगतिमाहार्द्धेन यथेति इदानीं सृष्टिदशायां यथा सर्वं कालपरिच्छिन्नं तथाग्रे सृष्टेः प्राक्प्रलये प
श्चादपि भाविप्रलयसृष्टौ रपि जगदीदृशं कालपरिच्छिन्नमेवेत्यर्थः न च कालपरिच्छिन्नत्वे नानित्यत्वं शंक्यं अवस्थानां कालपरिच्छि
स्प३ न्नत्वे ऽप्यवस्थावतो ऽर्थस्य नित्यत्वात् तथा च वैश्रवणवचः तदेतत्स्वयं नित्यं जगन्मुनिवराखिलं आविर्भावतिरोभावजन्मनाशविकल्प
वदिति एवं सर्वस्यापि परिच्छेदकः कालः सामान्यतः कालस्वरूपमप्युक्तं भवति १३ एवं कालकल्पावस्थासृष्टिमनूद्यायतः सर्गभेदान्प्र
लयभेदांश्च कालादीननुवदति सर्ग इत्यादिना दशभिर्विदुरे तत्र तेन तस्य कालकल्पस्यावस्थानः प्राकृतो वैकृतश्चेति उभयात्मकः सर्गः
स नवविधः आद्यो महत्सर्गः द्वितीयस्त्वहंकारसर्गः भूतसर्गस्तृतीयः इन्द्रियसर्गस्तु तुर्यः मनःसर्गः पंचमः अंडसर्गः षष्ठः एते षट् सर्गाः
प्राकृताः तस्थुषां सर्गः सप्तमः तिरश्चामष्टमः सर्गः नराणां सर्गो नवमः एते त्रयो वैकृताः मिलित्वा नवविध इत्यर्थः अथ प्रलयान्वि

यथेदानीं तथा चाग्रे पश्चादप्येतदीदृशं १३ सर्गो नवविधस्तस्य प्राकृतो वैकृतश्च यः कालद्रव्यगुणैरस्य त्रिविधः प्रतिसंक्र
मः १४ आद्यस्तु महतः सर्गो गुणवैषम्यमात्मनः द्वितीयस्त्वहमो यत्र द्रव्यज्ञानक्रियोदयः १५ ॥ ॥ ॥ ॥ ॥

भजति कालेत्यर्द्धेन [illegible] अस्य कालकालस्य प्रतिसंक्रमः प्रलयः कालद्रव्यगुणैस्त्रिविधः कालेनास्मिन्काले सम
तिरिक्तनियतेन कालेन प्रलयो नित्यप्रलयाख्यः कालिक एव द्रव्येण संकर्षणमुखाग्न्यादिना प्रलयो नैमित्तकप्रलयाख्यः
तिरिक्तनियतेन कालेन प्रलयो नित्यप्रलयाख्यः कालिक एवं द्रव्येण संकर्षणमुखाग्न्यादिना प्रलयो नैमित्तकप्रलयाख्यः
ल२ द्रव्यप्रलयो द्वितीयः गुणैः सत्त्वादिभिः साम्यावस्थां गतैः प्राकृतप्रलयाख्यस्तृतीयः १४ नवविधानेव सर्गान्प्रपंचयति आद्य
इत्यादिना अर्वाक्स्रोतसस्तु नवम इत्यन्तेन आत्मनः कार्येषु स्वप्रकृतिपुरुषशरीरकात्परमात्मनः सकाशाद्गुणवैषम्यकृतो मह
त्तत्त्वस्य सर्गः आद्यः वैषम्याय त्रिगुणत्रयात्मकप्रकृतिविकारविशेषो महत्सर्गः प्रथम [illegible] इत्यर्थः अहमः अहंकार
स्य द्रव्यज्ञानक्रियोदयः द्रव्यं भूतपंचकं ज्ञानक्रिया शब्दाभ्यां ज्ञानकर्मेंद्रियोक्तिः मनस्तन्मात्राश्चोक्तानि एतेषां त्रयाणां
स्मादहमः उत्पन्नाद्द्वितीयस्याहमः सर्गो द्वितीय इत्यर्थः १५ ॥ ॥

स्थावराणां षड्विधत्वमेवाह वनस्पतीत्यादि अपुष्पाः फलिनो वनस्पतयः ओषधयः फलपाकान्ताः लता आरोहणापेक्षाः त्वक्साराः कदलीवेण्वादयः वीरुधः गुल्मरूपाः द्रुमाः पुष्पफलाः तेषां साधारणं लक्षणमाह उत्स्रोतस इति गतेराहारो ह्यागतिर्भूत्वा आहारसञ्चारो वा तमःप्रायाः अव्यक्तचैतन्याः अन्तःस्पर्शा विशेषिण इत्येकं पदं अन्तःस्पर्शाः शीतोष्णादिस्फुरद्वेदाः स्पर्शविशेषा नैव विशेषिणः अवान्तरविशेषानभिज्ञाश्च अन्तर्गतानेव स्पर्शाञ्जानन्ति न तु बाह्यानि सूर्यः १९ तिर्यक्सर्गस्याष्टमत्वं कथयन्नु तस्याष्टाविंशद्विधत्वमाह तिरश्चामिति तिरश्चां तिर्यग्गच्छतां यः सोऽष्टमः स च पुनरष्टाविंशद्विधो मतः तेषां साधारणं लक्षणमाह अविद इति श्वस्तनाद्यननुसन्धानादिज्ञानशून्याः भूरितमसः केवलाहारनिद्रामैथुनभयमात्रनिष्ठाः घ्राणज्ञाः घ्राणेनैवेष्टमर्थं जानन्तीति घ्राणज्ञाः गन्धेन गावः पश्यन्तीतिवत् हृद्यवेदिनः कृतस्वबाधनेभिज्ञाः दीर्घानुसन्धानरहिताः इति भावः

वनस्पत्योषधिलतात्वक्सारा वीरुधो द्रुमाः उत्स्रोतसस्तमःप्राया अन्तःस्पर्शा विशेषिणः १९ तिरश्चामष्टमः सर्गः सोऽष्टाविंशद्विधो मतः अविदो भूरितमसो घ्राणज्ञा हृद्यवेदिनः २० गौरजो महिषः कृष्णः सूकरो गवयो रुरुः द्विशफाः पशवश्चेमे अविरुष्ट्रश्च सत्तम २१ खरोऽश्वोऽश्वतरो गौरः शरभश्चमरी तथा एते चैकशफाः क्षत्तः शृणु पञ्चनखान्पशून् २२ श्वा सृगालो वृको व्याघ्रो मार्जारः शशशल्लकौ सिंहः कपिर्गजः कूर्मो गोधा च मकरादयः २३ कङ्कगृध्रवटश्येनभासभल्लूकबर्हिणः हंससारसचक्राह्वकाकोलूकादयः खगाः २४

तथा च श्रुतिः अथेतरेषां पशूनामशनापिपासे एव ज्ञानं वदन्ति न विज्ञातं पश्यन्ति न विदुः श्वस्तनं न लोकालोकाविति २० अष्टाविंशतिभेदानाह गौरित्यादि गवादय उष्ट्रान्ताः द्विशफाः द्विनखाः नवैव सन्तीत्यर्थः हे सत्तम विदुर २१ खरादयश्चमर्यन्ता एकशफाः षट् २२ श्वादयो गोधान्ताः पञ्चनखाः द्वादश मिलिताः भूचराः सप्तविंशतिः मकरादयो जलचराः २३ कङ्कादयः खगाः भूचरभेदेनैकीकृत्य गृहीताः एवमष्टाविंशतिभेदाः मकरादिषु स्वजातिविशेषभिन्नेष्वपि भूचरत्वे नैकत्वं बोध्यं गवादिषु पठितो रुरुर्गौरो मृगविशेषो छिन्नन्यायेन पशुत्वेनेति निर्दिष्टः एवमन्यत्रापि द्रष्टव्यं २४ ॥

षष्ठस्त्विति तामसः तमः शब्देन प्रकृतिमंडलात्मकमंडमुच्यते आदित्यवर्णं तमसः परस्तादित्यादौ तमः शब्देन प्रकृतिमंडलाभि
धानात्तद्विषयः सर्गस्तामसः षष्ठः तमेव विशिनष्टि अबुद्धिकृतः प्रभोरिति प्रभोश्चतुर्मुखस्याबुद्धिकृतः तदन्तर्यामिपर
मात्मसंकल्पकृत इत्यर्थः तामसस्याबुद्धिकृतत्वकथनं पूर्वेषामप्युपलक्षणं षण्णामपि चतुर्मुखबुद्धिपूर्वकत्वाभावात्
षष्ठस्त्क तमसः सर्ग इति पठित्वा अबुद्धिर्जीवानामावरणं विक्षेपश्च तत्करोतीत्यबुद्धिकृतस्य तमसः पंचपर्वणो यः सर्गः षष्ठ इत्त
पूर्ववर्णनं त्वयुक्तं । विष्णुपुराणे स्थावरादिसर्गे चतुर्मुखाबुद्धिकृतत्वप्रदर्शनेन दृष्टापि नट्टैकाप्यस्य न्यायत्वाच्चतुर्मुखाबुद्धि
२षे कृतत्वमेवेष्यम् ननु स्थावरादिष्वपि स्वबुद्धिपूर्वकत्वमुक्तं श्रीविष्णुपुराणे इह प्राकृतानां षण्णामेवाबुद्धिकृतत्वं कण्ठमुक्तमि
ति चेदुच्यते साधकमनुष्या इति तद्व्यतिरिक्तानां सृष्टिरबुद्धिपूर्विकेति भगवतः पराशरस्याभिप्रायः स्थावरतिरश्चां पशूनां प्रकृ
रणत्वाद्देवानां कर्माराधत्वाच्च मनुष्यवधशोपपिकत्वमस्तीति स्थावरादिसृष्टिरपि बुद्धिपूर्विकेति भगवतो द्वैपायनस्याभि

षष्ठस्तु तमसः सर्गो यस्त्वबुद्धिकृतः प्रभोः षडिमे प्राकृताः सर्गा वैकृतानपि मे शृणु १७ रजोभाजो भगवतो लीलेयं हरिमे
धसः सप्तमो मुख्यसर्गस्तु षड्विधस्तस्थुषां च यः १८ प्रायः अन्योन्यविरोधः ननु चतुर्मुखस्य स्थावरेषु बुद्धिकृतत्वं
च परस्परविरुद्धमुभयं कथमुपपद्यत इति चेद्यज्ञानुपयुक्तस्थावराभिप्रायकत्वात्पाराशर्योक्तेः यज्ञानुपयुक्तं चतुर्मुखस्य
क्लिष्टसाधा अभावेऽपि तदन्तर्यामिपरमात्मसंकल्पादेव तत्सृष्ट्युपपत्तेः प्राकृतसर्गान्निगमयन्नेव कृतसर्गविभागमवतारय
तिइमे षट् प्राकृताः सर्गाः अनुक्रमिता इति शेषः मेमत्तः वैकृतानपि सर्गाननुक्रमिष्यमाणान् शृणु ४ नन्वचिंत्यविवि
ध विचित्ररचना ब्रह्मणः अस्मदादित्याशंक्याह मुनिराह रजोभाज इति चतुर्मुखशरीरकत्वाद्रजोभाजः रजउद्रेकस्य भ
गवतो हरिमेधसः मधुयाचुष्टा हरतिसांसारिकक्लेशमिति हरिमेधाः यद्विषयकबुद्धिः संसारक्लेशान् हरति स हरिमेधा इत्युच्य
ते तस्य हरेरियं सर्गलीला न तु तस्य क्लेश इत्यर्थः वैकृतसर्गाननुक्रमिष्यन्नतेषां स्थावरसर्गस्य पूर्वानुक्रान्तप्राकृतसर्गपे
क्षयासन्नत्वमाह सप्तम इति तस्थुषां स्थावराणां यो मुख्यः सर्गः सप्तमः स च पुनः षड्विध इत्यर्थः तस्य मुख्यत्वमुखमिवाद्यम

२२ कौत्वादवंगतवं १८

ता२

स

भा॰ त॰ टी॰ ४९

पुरुषस्तद्रूपोऽनमात्मानं लीलया सृजदित्युपक्रांतमेकस्यैव ब्रह्मणः उपादानत्वं निमित्तत्वं चोपसंहरति एवमिति कल्पादिषु स्रष्टा आ
त्मभूर्हरिरनुसुखशरीरको हरिः रजोभृत अनुमुखब्रह्मरजउद्रेकः अमोघसंकल्पः सत्यसंकल्प इदं सार्वज्ञ [illegible] सर्वशक्तित्वादेरुपलक्ष
णम् आत्मा नैव सृजति अमोघसंकल्प इत्यनेन लोकपरिदृष्टनिमित्तोपादानमृत्कुलालभेदन्यायस्यात्रानवकाश उक्तः कुलालस्यासर्व
शक्तित्वान्नोपादानत्वं मृदस्त्वसत्त्वान्न निमित्तत्वं इह त्वस्मिन्नेवोभयोः प्राप्तत्वान्न कर्त्रंतरकर्मांतरकरणांतराद्यपेक्षेति भावः २९
उक्तं नवविधसर्गाणां मध्ये अंडसृष्टिर्युगपन्न त्वाकाशादीनामिव क्रमेणेत्याह गुणव्यतिकर इति गुणव्यतिकरात्मकेऽत्रास्मिन्नंडे
पौर्वापर्यं निवृत्तिः सर्वे महदादितत्त्वे ब्रह्मांडसृष्टिर्युगपदित्यर्थः तत्कृतः अधीशितुरधीशस्य तत्र परमात्मनो मायावित्वात् आ
श्चर्यशक्तत्वादंडसृष्टिर्युगपदेवेत्यर्थः न त्वाकाशादिष्वपि यौगपद्यं शंक्यं आकाशाद्वायुर्वायोरग्निरित्यादिविरोधात् युगदृष्ट
तौ दृष्टांतमाह न घ्राणमिति भ्रमेः शरत् आवर्तवुद्बुदादेर्यथा युगपदेवोत्पत्तिस्तथेत्यर्थः ३० ननु प्रति
एवं रजःप्लुतः स्रष्टा कल्पादिष्वात्मभूर्हरिः सृजत्यमोघसंकल्पः आत्मैवात्मानमात्मना २९ गुणव्यतिकर एतस्मिन्मायावित्वादधीशि
तुः पौर्वापर्यं न चेष्टते सृष्टेन घ्राणं यथा भ्रमे ३० देवासुरादयो नामरूपाभ्यां ये प्रकीर्तिताः अस्मिन्कल्पे त एवासन्सर्गमन्वंतरांत
रे ३१ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे दशविधसर्गवर्णनं नाम दशमोऽध्यायः १० ॥ ॥

कल्पस्यानामेव जीवानामिंद्रत्वाद्यैश्वर्यभाजां पुनः पुनः कल्पांतरेऽनुवृत्तिरिति संशयं निराकुर्वन्नाह देवासुरादय इति हे सत्तः नामरूपा
भ्यामिंद्रादिनामसहस्राक्षत्वादिरूपेणास्मिन्कल्पे ये सुरादयः प्रकीर्तिताः त एव मन्वंत[illegible]रांतरे आसन्नित्यर्थः यद्वा यदिदानीं देवा
सुरादयः त एव मन्वंतरांतरे नामांतररूपांतराभ्यामुपलक्षिता आसन्नित्यर्थः अन्यथा प्रतिमन्वंतरं पृथक्करणपराशरवचनविरोधात्

स्कंधे ३ अ॰ १० अ॰ ११

अनंतश्लोकेनैंद्राद्यैश्वर्यवतामास्तित्वं पुनरावृत्तिश्च ज्ञाप्यते ३१ इति तत्त्वदीपे दशमः १० एवं कालकालस्य सृष्टिमुक्त्वा कालस्वरूपं सोऽन्यत्वेन
रूपप्रकर्षापकर्षकाष्ठे निरूपयति चरम इति श्लोकद्वयेन ननु कालपरिच्छेद्यवस्तुनः प्रकर्षापकर्षनिरूपणं किमर्थमिति प्रकृतत्वा
दिति चेन्न कालो ह्यत्र परमाण्वादिसंवत्सरांतः स्थूलसूक्ष्मरूपः सूर्यगत्या लक्ष्यते यन्नसूर्योऽयावत्परमाणुमतिक्रामति तावान्कालः ॥

भा॰ ४९

निरूपयन्

४९

अथनवमंसर्गमाह [illegible] अर्वागिति स्रोतः गतिराहारो वा यस्य सः अर्वाक्स्रोतः ह्रस्वत्वमार्षं हेमन्तः नृणामर्वाक्स्रोतो यः
सर्गः स एकविधः न तु स्थावरादीनामिव नानाविधः स नवमः सर्गः अर्वाक्स्रोत इत्येतत्कि पा विशेषणं वाऽर्वाक्स्रोतो यथा भवति तथा
यो नृणां सर्ग इति नृणां साधारणं लक्षणमाह रजोधिका इति रजः प्रचुरा अत एव कर्मपरा २५ त्रय एते वैकृताः एवं न तु कौमारव
दुभयात्मकाः इत्यर्थः देवसर्गस्यादिप्रोक्त इत्यतमेकान्वयं प्राकृतेषु यो देवसर्गः प्रसंगाद्वैकारिकाख्यो ऽभिहितः स च वैकृतान्तर्भूत एव
त्यर्थः हे सत्तम विदुर वैकृत देवसर्गान्तर्भूतकौमारसर्गस्योभयात्मकत्वमाह कौमारस्त्विति वैकृतसर्गान्तर्भूतकौमारसर्गस्य प्राकृतत्वं
कथमिति चेत् कुमाराणां माला वे व ब्रह्मणा सृष्टत्वात् प्राकृतान्तर्भावः कुमारेष्वन्तर्भूतो नीललोहितस्तु सनकादिभिः सहसृष्टोपि प्राकृत
वै त्वं संज्ञया तेन तस्य वैकृतत्वमित्युभयात्मक इत्यभिप्रायात् २६ देवसर्गस्याष्टविधत्वं प्रतिजानन्त एवं तदेवाह देवसर्ग इति सार्द्धेन विबुधाः

अर्वाक्स्रोतस्तु नवमः क्षत्तरेकविधो नृणां रजोधिकाः कर्मपरा दुःखे च सुखमानिनः २५ वैकृतास्त्रय एवैते देवसर्गश्च सत्तम
वैकारिकस्तु यः प्रोक्तः कौमारस्तूभयात्मकः २६ देवसर्गश्चाष्टविधो विबुधाः पितरोऽसुराः गंधर्वाप्सरसः सिद्धा यक्षरक्षांसि चारणाः
भूतप्रेतपिशाचाश्च विद्याध्राः किन्नरादयः २७ दशैते विदुराख्याताः सर्गास्ते विश्वसृक्कृताः अतः परं प्रवक्ष्यामि वंशान्मन्वन्तरा णि च २८

असुरस१ पितरश्चैककोटिः असुरविधत्वात् असुरा एककोटि गंधर्वाश्चैककोटिः सिद्धा एकः यक्षरक्षांस्येकः चारणा एकः भूतप्रेतपिशाचा ए वे६
कः किन्नरादय इत्यादिशब्देनाप्सरस्त्वं किंपुरुषादय [illegible] किन्नरा [illegible] इयो [illegible] विद्याधरो [illegible]
दिः एवमष्टविधत्वमित्यर्थः २७ अनुक्रान्तान्सर्गान्निगमयन्नेव दशेति सर्गान्निर्वा विध इत्युपक्रमे कथितमवतारविधाभिप्रायेण दृष्टि
तु उपसंहार इत्यविरोधः हे विदुर विश्वसृजा चतुर्मुखरूपेण केवलेन स्वात्मना च कृता एते दश सर्गास्ते तुभ्यमाख्याताः कथिताः सर्गा
[illegible] चतुर्मुख
श्चैवानुसर्गश्च मनून्मन्वन्तराणि चेति [illegible]
सष्ठ एवं विरेष्वेषु सर्गेष्वकथितेष्वनन्तरं सप्तेषु मनुमन्वन्तरेषु न्तरश्च वेण त्वरानकापी संगति विशेषे रतान्यपि कथयिष्या
मीत्याह अतः परमिति अतः सर्वतत्त्वपदिकेद एककालरूपकथनानन्तरं मनून्मन्वन्तराणि च प्रवक्ष्यामि २८ ॥ ॥ ॥ ॥

दे२ ने१

भा. स. टी.
५०

अतिदिशामेवापकर्षकाष्ठामुपपादयति स इत्यर्द्धेन परमाणुतामत्यल्पतां यः कालः भुंक्ते भजति स कालः परमाणुर्ज्ञेयः प्रकर्षकाष्ठ
माह सत इत्यर्द्धेन सतः निरतिशयस्य स्मात्स्य यावत्स्थितस्य स्वस्य यो विशेषः निरतिशयस्थूलसंवत्सरात्मकत्वं विशेषणं तं भज
तीति विशेषभुग्यः स परमो महान्निरतिशयप्रकर्ष इत्यर्थः संवत्सरात्मकमेव वहि कालस्योत्कर्षं द्विपरार्द्धत्वं तस्यैव संवत्सरस्य युगमन्वं
तरानुक्रमेण भवतीति न तत्स्योत्कं ४ एवमपकर्षप्रकर्षाव्युपपाद्येऽवांतरकालविशेषाववच्छेदकावस्थाः प्रतिपादयति अणुर्द्वावित्यादिना
द्वौ तावणू तु षडयनं द्रसिणं चोत्तरं द्वीसंतेन अणुरित्यादिनो वैशेषप्रक्रियोक्तिः किंतु तैस्तैरभ्युपगतवक्त[illegible] परिभाषिता नांश
दानां कालावयवेषु प्रयोगस्त्वे परमाण्वादिनां वत्सरावसानेने विष्यते द्वाभ्यां परमाणुभ्यामणुरित्येकः कालः स्यादित्यर्थः त्रिभिरणुभि

स कालः परमाणुर्वै यो भुंक्ते परमाणुतां सतो विशेषभुग्यस्तु स कालः परमो महान् ४ अणुर्द्वौ परमाणू स्यात्त्रसरेणुस्त्रिभिः स्मृ
तः जालार्करश्म्यवगतः खमेवानुपतन्नगात् ५ त्रसरेणुत्रिकं भुंक्ते यः कालः स त्रुटिः स्मृतः शतभागस्तु वेधः स्यात्तैस्त्रिभिस्तु
लवः स्मृतः ६

स्त्रसरेणुरित्येकः कालः स्यात् त्रसरेणुसंज्ञकात्कालात्पूर्वोक्तानां कालानामसंततस्त्वतया तदवच्छेदककथनस्याशक्यत्वात्त्रसरेणुसंज्ञ
ककालस्यावच्छेदकमाह जालार्केति जालकरंध्रनिष्क्रांतादित्यरश्मिषु दृष्टः स खमाकाशमेवानुपतन्नगाऽत्तः न भूमिमनुपतन् प्राप्नुयः
सत्रसरेणुः कालइत्यन्वयः अवच्छेदस्य कालस्यावच्छेदकपांसुरूपपदार्थस्य चोपचारात्सामानाधिकरण्यं जालार्करश्म्यवगत पांसोरीष
त्स्पंदनावच्छिन्नः कालः त्रसरेणुसंज्ञ इत्यर्थः ५ त्रसरेणुसंज्ञककालानां त्रिकं भुंक्ते प्राप्नोति यः कालः स त्रुटिरित्यर्थः त्रसरेणुकालत्र
यं त्रुटिरित्युक्तं भवति सा त्रुटिः वेधाख्यस्य कालस्य शतभागः शतगुणः कालः एकः पत्रवेधावच्छिन्नः त्रिभिस्तैः वेधैर्लवएकः कालः स्मृतः
इत्यर्थः ६ लवत्रयं निमेष इत्याह ॥ ॥ ॥ ॥

५१

परमाणुः यावत्तावच्च द्व्यणुकत्र्यणुकादिषु न कोऽपि सूक्ष्मतमः अतः परमाणुः तावत्सूक्ष्मत्वमिति क्रमात्तिसपरममहान्संवत्सरात्मकः एवं च सर्वगतित्रिविषय देशप्रकर्षापकर्षनि-
रूपणमंतरेण सर्वगत सनुरूप कालप्रकर्षापकर्षनिरूपणायोगात् युक्तं तावत्काल कालस्य वस्तुनः निरतिशयस्थौल्यसौक्ष्म्यनि-
रूपणं तत्र प्रथमं कालपरिच्छेदस्य निरतिशयसौक्ष्म्यरूपापकर्षकाष्ठामाह चरम इत्येकेन केचिदिमं श्लोकं वैशेषिकोक्तपरमाणुसद्भाव
परमाणुः तद्युक्तं च शेषपदं हेतुं परेऽप्र वध्येयपरमाणुस्वभावास्तु पगमासंभवात्परमाणवादिसंवत्सरावसानेनेत्येव परमाणुत्वाच्च सद्विशे-
षाणां सततः कार्यस्य विशेषाणामंशानां यश्चरमोंऽशोऽशः असल्पः यस्य पुनरंशो नास्ति स इत्यर्थः तमेव विशिनष्टि अनेककार्यावस्था-
म प्राप्तः असंयुतः समुदायावस्थां चाप्राप्तः अत एव सदा कार्यसमुदायावस्थयोरपगमेऽप्यास्ति स परमाणुर्विज्ञेयः नृणां यतः का-

मैत्रेय उ० चरमः सद्विशेषाणामनेकोऽसंयुतः सदा परमाणुः स विज्ञेयो नृणामैक्यभ्रमो यतः १ स तत एव पदार्थस्य ख-
रूपावस्थितस्य यत् केवल्यं परममहानविशेषो निरंतरः २ एवं कालोऽप्युपमितः सौक्ष्मे स्थौल्ये च सत्तम संस्थानभुक्त्या
भगवानव्यक्तो व्यक्तभुग्विभुः ३ ॥

लापकर्षादैक्यभ्रम इहयंसूक्ष्मं विभागमज्ञात्वानेकेषु कालांशेष्वेकः काल इति भ्रमं तीत्यर्थः १ एवमपकर्षकाष्ठाभिहिता अ-
थ प्रकर्षकाष्ठामाह सतइति यस्य कार्यस्य चरमोंऽशः परमाणुस्तस्यैव सतः कार्यावस्थया यावस्थितस्य स्वरूपावस्थितस्य विकारा-
तररहितस्य पदार्थस्य यत्केवल्यं केवलत्वं स्वरूपं स एव परममहान्निरतिशयप्रकर्षः तमेव विशिनष्टि अविशेषः पुनः प्रकर्षा-
तररहितः निरंतरः स्वसमवेतागृहीतभेदावयवः २ कालपरिच्छेदस्यापि दार्ष्टांतिके प्रकर्षकाष्ठे निर्दिशति एवमिति द्वाभ्यां
एवं परिच्छेदप्रकर्षापकर्षकाष्ठावत्कालोऽपि सौक्ष्मे परमाण्वादिरूपे प्रकर्षे च संस्थानभुक्त्याऽवच्छेदार्थगतावस्थाविशेषसंयो-
गलक्षणया यथास्वावच्छेदकाणुत्वाद्यवस्थारूपसंस्थानविशेषसंयोगलक्षणयाभुक्त्याऽनुमितः कथंभूतः भगवान्जग-
दात्मकः स्वयमव्यक्तो व्यक्तभुग्विभुर्व्यक्तवस्तुपरिणामहेतुः ३ ॥ ॥ ॥

स्थौल्येसंवत्सरात्मके प्रकर्षे

पि २

३

प्रकर्षकाष्ठे

ले ४

हे मानद विदुर तयोः शुक्लकृष्णयोः पक्षयोः समुच्चयः समुदायः एको मासः नृणामित्यनुषंगः पितॄणां विशेषमाह पितॄणामिति तत्स्थ्य
वेकैको मासः पितॄणामहर्निशमहोरात्रः यत्तदोरनियमेनोद्देश्यविधेयान्यतरलिंगत्वान्नपुंसकनिर्देशः तैरेव द्वौ मासौ नृणां
ऋतुः षण्मासास्त्वयनं इत्युच्यते तच्चायनं दक्षिणोत्तरभेदेन द्विविधं षण्मासा दक्षिणायनं पुनः षण्मासा उत्तरायणं ११ देवानां विशे
षमाह अयने दक्षिणोत्तरायणे दिवि स्वर्गे अहनी प्राहुः देवानामहर्निशमित्यर्थः द्वादश [illegible] मासा वत्सरः स्मृतः प्रसंगान्नृणामायुःप
रिमाणमप्याह संवत्सरशतमिति स्पष्टोऽर्थः नृणामित्युपलक्षणमन्येषामपि स्वस्वमानेन शतसंवत्सरमायुर्भवतीत्यर्थः १२ अने
कक्रमेण सर्वेषां नित्यमायुः क्षिपतीत्याह ग्रहर्क्षेति अनिमिषः नित्यजागरूकः विभुः सूर्यः ग्रहर्क्षताराचक्रस्थः ग्रहाश्चंद्रादयः ऋक्षा

52

तयोः समुच्चयो मासः पितॄणां तदहर्निशं द्वौ तावृतुः षडयनं दक्षिणं चोत्तरं दिवि ११ अयने चा
हनी प्राहुर्वत्सरो द्वादश स्मृतः संवत्सरशतं नृणां परमायुर्निरूपितं १२ ग्रहर्क्षताराचक्रस्थः
परमाण्वादिना जगत् संवत्सरावसानेन पर्येत्यनिमिषो विभुः १३ संवत्सरः परिवत्सर इ
डावत्सर एव च अनुवत्सरो वत्सरश्च विदुरैवं प्रभाष्यते १४

एषु अश्विन्यादीनि ताराः अन्यानि नक्षत्राणि तदुपलक्षितं यत्कालचक्रं तत्स्थितः जगद्द्वादशराश्यात्मकं भुवनकोशं परमाण्वादिना
संवत्सरान्तेन कालेन पर्येति पर्यटति १३ उक्तस्यैतस्य वार्षिककालचक्रस्य सूर्यादिगतिभेदेन नाममेदमाह संवत्सर इत्येकेन आदि
त्यगत्या संवत्सरः बृहस्पतिगत्या परिवत्सरः त्रिंश द्दिवसैर्मासैरादित्यगतिविशेषादिडावत्सरः चांद्रनक्षत्रगतिभ्यामनुवत्सरव
त्सरावित्येवं प्रभाष्यते कथ्यते १४ एवं सूक्ष्मत्वेन स्थूलत्वेन च सर्वस्यावच्छेदकत्वेन च स्वरूपं निरूप्यास्य द्विविधकालशरीरस्याका
त्मस्य सूर्यात्मनः परमात्मनः उपासनं कालत्वमिच्छद्भिः कर्तव्यमित्याह यद्गति ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

म१

निमेषइति शतभागस्तु वेध इति प्रकृत शतशब्दोऽनेकवाची तथा सति निमेष शतभाग स सहस्रांशः क्षणो न प तस्याप्ययुतभागांशैर्भवे
सुपच योन एतद्युक्ति योनकवचने कार्य्यं स्यात् ईदृशः कालविभागः कथमवगम्यत इति चेत् एक क्षणो विद्युदादि [illegible] दयोनेकयो
जनं व्याप्नुवंति एकक्षणोऽपि दिस्परयस्यानेकयोजनगति ध्वस्मर्थ्यते तत्रैकयोजने पि प्रदेशे समुद्दितः केशः सर्वथा न शक्याः सं
ख्यातुं तत्र केषां द्विकसारिमितदेशव्याप्यवच्छिन्नः कालावयवा एक क्षणं सन्निपन्नात्यप सख्येयाः संती सुपपन्नमेवतेत्रयो
निमिषाः एकः क्षणः स्यात् पंचक्षणान् काष्ठां विदुः काष्ठाः पंचदश एकालघुता [illegible] लघुतास्याएकालः ७ पंचदशलघूनि एका
नाडिका समाम्नाता द्वे ते नाडिके एको मुहूर्त्तः षट्नाडिका सप्तवा प्रहरः सएव यामोऽदिनस्परात्रेश्च चतुर्थोभागः क्षासेषट्टं द्वौसप्त
संध्यामुहूर्त्तद्वयं विनेति शांतव्यं तत्रापि नियमो थो वा शब्दः न्यूणामितमनेन मनुष्यमानयुक्तं ८ अस्पहं तत्र इदानीं गणयितुम शक्य

निमेषस्त्रिलवो ज्ञेय आम्नातस्ते त्रयः क्षणः क्षणान् पंचविदुः काष्ठां लघुता दश पंच च ७ लघूनि वैसमाम्नाता दश पंच च ना
डिका ते द्वे मुहूर्त्तः प्रहरः षट् यामः सप्त वा नृणां ८ द्वादशार्द्ध पलोन्मानं चतुर्भिश्चतुरंगुलैः स्वर्ण माषैः कृत छिद्रं यावत्प्रस्थ
जलप्लुतं ९ यामाश्चत्वारश्चत्वारो मर्त्यानामहनी उभे पक्षः पंचदशाहानि शुक्लः कृष्णश्च मानद १० ॥ ॥ ॥

त्वा नाडिका मानं ज्ञापयितुं प्रस्थलक्षणमाह द्वादशार्द्धेति द्वादशार्द्धपलोन्मानं उन्मीयते ऽनेन उन्मानं मात्रं तच्च द्वादशार्द्धपलम
र्द्धाधिक द्वादश पलपरिमितताम्ररचितं षट्पलताम्ररचितमित्येके पंचगुंजो माषः तैश्चतुरंगुलायाम शलाकारूपेण रचितैः कृ
तमूलछिद्रं तेन छिद्रेण प्रस्थपरिच्छिन्नजलभरणयोग्यत्वात्प्रस्थशब्दवाच्यं पात्रं जले प्लुतं स्थापितं यावता कालेन निमज्जति
सानाडिकेत्यर्थः माषचतुष्टयमितस्वर्णकृतचतुरंगुलसूच्या कृतछिद्रमर्द्धाधिकद्वादशपलपरिमितं प्रस्थपरिमितजलभरणेन निम
ज्जत्पात्रं प्रस्थं तन्निमज्जनावच्छिन्नः कालः नाडिकेति समुदायार्थः अत्र पलच्छिद्रयोराधिक्ये शीघ्रं निमज्जेदल्पत्वे च विलंबेनेति प
लशलाकयोर्नियमः ९ चत्वारश्चत्वारः अल्पविस्तर्थः अशो यामाः मर्त्यानां उभे अहनी अहोरात्रः पंचदशाहान्यहोरात्रा त्मकान्य
हानि शुक्लः कृष्णश्च पक्षः पंचदशाहानि शुक्लः पक्षः पुनः पंचदशाहानि कृष्णः पक्ष इत्यर्थः १० ॥ ॥ ॥ ॥ ॥ ॥

ल४

अपिच कृतादियुगयथाक्रमं चत्वारि त्रीणि द्वे चैति सहस्राणि संख्यातानि शतानि तु द्विगुणसंख्यानीत्यर्थः अयमर्थः तत्र कृतयुगस्य देवमानेन चत्वारि सहस्राणि संध्यांशयोश्च चत्वारि चत्वारि शतानि इत्यष्टौ शतान्यष्टशतोत्तरचतुः सहस्रवत्सराः [illegible] ससंध्यांशस्य कृतयुगस्य परिमाणं त्रेतायाः षट्शतोत्तरत्रिसहस्रवर्षा [illegible] द्वापरस्य तु ससंध्यांशस्य चतुःशतोत्तरद्विसहस्रवर्षाणि कलेस्तु ससंध्यांशस्य द्विशतोत्तरैकसहस्रवर्षपरिमितिः युगस्यादौ संध्या युगान्ते संध्यांशः सहस्राणामुपरि उक्तानि शतानि क्रमेण तत्संध्यांशयोः परिमाणमित्यवगन्तव्यं १८ ननु ससंध्यांशस्यैव युगत्वं उत ताभ्यामन्तरेण मध्यस्यैवेति संशयं निराकुर्वन् चतुर्युगेषु तत्तद्वर्णाश्रमधर्माणामवश्यकर्तव्यत्वमाह संध्यांशयोरिति शतसंख्ययोः शतानि संख्या ययोः संध्यांशयोरन्तरेण मध्ये यः कालः तमेव कालं युगमिति युगज्ञाः प्राहुरित्यर्थः यत्र युगधर्मो नित्यनैमित्तिककाम्य

चत्वारि त्रीणि द्वे चैकं कृतादिषु यथाक्रमं संख्यातानि सहस्राणि द्विगुणानि शतानि च १८ संध्यांशयोरन्तरेण यः कालः शतसंख्ययोः तमेवाहुर्युगं तज्ज्ञा यत्र धर्मो विधीयते २० धर्मश्चतुष्पान्मनुजान् कृते समनुवर्तते स एवान्येष्वधर्मेण व्येति पादेन वर्द्धिता २१ त्रैलोक्ये युगसाहस्रं बहिराब्रह्मणो दिनं तावत्येव निशा तात यन्निमीलति विश्वसृक् २२ निशावसान आरब्धो लोककल्पोऽनुवर्तते यावद्दिनं भगवतो मनून् भुञ्जंश्चतुर्दश २३ कर्मभेदेन त्रिविधोऽपि [illegible] कर्तव्यत्वेन बोध्यत इत्यर्थः २०

कृते चतुष्पादो धर्मस्यानुवृत्तिं त्रेतादिषु तत्संकोचं चाह धर्मइति कृते युगे मनुजान् चतुष्पाद्धर्मोऽनुवर्तते अन्येषु त्रेतादिषु एकैकेन पादेन वर्द्धितोऽधर्मेण हेतुना धर्मः व्येति अपगच्छतीत्यर्थः २१ अथ त्रैलोक्याद्बहिःस्थानां दिनपरिमाणमाह त्रैलोक्याद्बहिः स्थितानामाब्रह्मणः ब्रह्मपर्यन्तानां सर्वेषां युगसाहस्रं दिनमहरित्यर्थः हे तात तद्विदुरतावती रात्रिः दिनपरिमिता युगसहस्रमिता रात्रिः यथस्यां रात्रौ विश्वसृग्ब्रह्मा निमीलति स्वपिति २२ बहिःस्थानामहोरात्रगतानां स्थितिमाह निशावसान इत्यादिना अतः सत् अस्मिन्निस्यन्तेन निशायामत्रे अवसाने तस्येनिशायामपगतायामित्यर्थः आरब्धो यो लोककल्पः लोकाः कल्पन्ते अनेनेति कल्पः सर्ग इत्यर्थः लोकसर्गः चतुर्दशमनून् भुंजन्परिक्षिंश्रन् भगवतो ब्रह्मणो यावद्दिनमनुवर्तत इत्यर्थः २३ ॥ ॥ ॥

दाग
क०१
युजानू२
विधीयते
राम
52

भूतानि भिनत्तीति भूतभेदः भूतविकारकः संवत्सरात्मा कालाख्यया स्वशक्त्या स्वतन्त्र्या सत्वानां कर्मशक्तीः परिणमयन् पुंसो जीवस्याभ्रमाय भ्र-
मो मोहस्तन्निवृत्तये तत्तत्कालानुष्ठेयधर्मविषयं मोहं निवर्त्तयितुमित्यर्थः क्रतुभिः साधनैः वर्द्धमानं सत्वादिगुणभेदेन त्रिगुणात्मकं
फलं वितन्वन् विस्तारयन् दिव्यन्तरिक्षे धावति सूर्यात्मवह्निर्भूत्वा पर्यटति तस्मै सूर्यशरीराय वत्सरपञ्चकाय पूर्वोक्तसंवत्सरादिपञ्च-
कात्मने बलिं हरत पूजां कुरुत १५ एवं कालस्वरूपे आयुःपरिमाणे कालस्य नियन्तुः सूर्यात्मनः तस्योपासने च उक्तेऽभिहितेऽपि ब्रह्मणस्त-
दहर्निशं द्विपरार्धं अयने अहनी प्राहुः संवत्सरः शरणं तेन तेषां परमायुर्निरूपितमिति त्रैलोक्यान्तर्वर्त्तिनां एव पितृदेवमनुष्याणामायुः
परिमाणं कथितं त्रैलोक्याद्बहिर्भूतानां तु किंपर्य्यन्तं आयुःपरिमाणमिति बुभुत्सया पृच्छति विदुरः पितृदेवमनुष्याणां परमायुरिदं स्वस्व-
मानेन वर्षशतं स्मृतं परेषां गतिमायुर्मानमाचक्ष्व ते के इत्यत आह कल्पात्कल्पावस्थायी त्रैलोक्याद्बहिर्ये स्युः सन्ति ते विदः ते ज्ञानि-
न इत्यर्थः विद इति पाठान्तरे तत्र कल्पाद्बहिर्भूता ये ज्ञानिनस्तेषामित्यर्थः १६ अहं न जानामीति नावोच इत्याह भगवानिति भगवेदात्मकः कालस्य भगव-

यः सृज्य शक्तिमुरुधोच्छ्वसयन्स्वशक्त्या पुंसोऽभ्रमाय दिवि धावति भूतभेदः कालाख्यया गुणमयं क्रतुभिर्वितन्वंस्तस्मै बलिं हरत व-
त्सरपञ्चकाय १५ विदुर उ० पितृदेवमनुष्याणामायुः परमिदं स्मृतं परेषां गतिमाचक्ष्व ये स्युः कल्पाद्बहिर्विदः १६ भगवान्वेद
कालस्य गतिं भगवतो ननु विश्वं विचक्षते धीरा योगराद्धेन चक्षुषा १७ मैत्रेय उ० कृतं त्रेता द्वापरं च कलिश्चेति चतुर्युगं दिव्यै-
र्द्वादशभिर्वर्षैः सावधानं निरूपितं १८

स्य गतिं [illegible] मपि [illegible] वेद जानाति ननु हे मैत्रेय निश्चयेन वा कथमहं जानीयां इत्यत आह
धीरा भवादृशा ज्ञानिनः योगराद्धेन योगसिद्धेन चक्षुषा विश्वं जगद्विचक्षते पश्यन्ति योगिप्रत्यक्षाविषयं न किंचिदस्तीत्यर्थः १७ एवमा-
पृष्टो मुनिस्त्रैलोक्याद्बहिरवस्थितानां मा चतुर्मुखादीनां सर्वेषां युगसाहस्रदिनपरिमाणं एवंविधषष्ट्युत्तरत्रिशतदिनात्मकवर्षशतमा-
युःपरिमाणमिति निरूपयितुं तावद्युगपरिमाणं युगांशसंध्यापरिमाणं युगस्वरूपं युगेषु धर्मानुवृत्तितारतम्यं चाह चतुर्भिः तत्र द्वा-
भ्यां युगपरिमाणमाह कृतमिति कृतादि चतुर्युगं सावधानमवधीयत इत्यवधानं संध्यांशाभ्यां सहितं चतुर्युगं दिव्यैर्देवमानमितै-
र्द्वादशसहस्रैर्वर्षैर्निरूपितं १८

भा॰ त॰ टी॰
५३

S3

पुनस्तमेवापिधानप्रकारमाह त्रिलोक्यामिति द्वाभ्यां शक्त्या भगवच्छक्तिरूपेणं संकर्षणाग्निना संकर्षणमुखोद्भूतरुद्रगणाग्निना
त्रिलोक्यां दह्यमानायां सत्यां तस्योष्मणा उर्दिताः महर्लोकवासिनो भृग्वादयः तस्माज्जनलोकं यांति ३० तावत्तदा संक
र्षणाग्निनादग्धं त्रिभुवनं कल्पांते एधिताः प्रवृद्धाः सिंधवः उत्कट आटोपः क्षोभः येषां ते च ते चंडवातेरितोर्मयश्च सद्यः प्लावयंति सं॰
प्लावयंति ३१ एवं त्रिलोक्यपिधानमभिधाय तस्मिन्प्रलयांभसि भगवतोऽवस्थानमाह तस्मिन्सलिले अंतः मध्ये अनंतः शेष एवा॰
सनं यस्य सो हरिः योगः स्वानुभवरूपः स एव निद्रा तया मीलिते अक्षिणी यस्य स जनालयैर्जनलोक आलयो येषां तैः स्तूयमानः आस्ते
३२ एवं त्रैलोक्यवहिष्ठानामायुः परिमाणमभिधाय एतैर्वै निरयास्तात स्थानस्य परमात्मन इत्युक्तरीत्या ब्रह्मभुवनाहि यत्त्वमस्थानं
ब्रह्मायुषोप्यपक्षयमाह कालस्य गत्या परमाणवादिसंवत्सरांतरूपया गत्या उपलक्षितैः एवंविधैः पूर्वोक्तपरिमाणविशिष्टैरहोरात्रैर्ब्र॰

त्रिलोक्यां दह्यमानायां शक्त्या संकर्षणाग्निना यांत्यूष्मणा महर्लोकाज्जनं भृग्वादयोर्दिताः ३० तावत्त्रिभुवनं सद्यः कल्पांतैधि
तसिंधवः प्लावयंत्युत्कटाटोपचंडवातेरितोर्मयः ३१ अंतः स तस्मिन्सलिले आस्तेऽनंतास नो हरिः योगनिद्रामीलिताक्षः स्तू
यमानो जनालयैः ३२ एवंविधैरहोरात्रैः कालगत्योपलक्षितैः अपक्षितमिवास्यापि परमायुर्वयःशतं ३३ यदर्धमायुषस्तस्य
परार्धमभिधीयते पूर्वः परार्धोऽपक्रांतो ह्यपरोऽद्य प्रवर्तते ३४

ह्मणः परं ब्रह्मणो नामायुषः परमधिकं वयः शतं स्वमानेन संवत्सरशतात्मकं यदायुस्तदपि अपक्षितमिवाक्षीणमिवेत्यर्थः इवशब्देन॰
किंचिदायुरपक्षीणं किंचिदवशिष्टमिति सूच्यते ३३ [illegible] तत्र कियदक्षीणं कियदवशिष्टमित्यत्राह यदिति तस्य॰
ब्रह्मणो यदायुस्तन्मानेन संवत्सर [illegible] शतात्मकं तस्यायुषः अर्धं परार्धमिति कथ्यते तस्माद्द्विपरार्धात्मकस्यायुषः पूर्वः परार्धोपक्रां
तः अपगतः अपर उत्तरपरार्धः अद्याधुना प्रवर्तते इत्यर्थः ३४ पूर्वोत्तरयोः परार्धयोः प्रतिदिनं दिनकल्पं नाम भेदोऽस्ति नेतीति सं॰
शयं निराकुर्वन्कल्पानां बहुत्वात्सर्वपरार्धस्यादिमयोः कल्पयोरुत्तरपरार्धपूर्वकल्पस्य चान्त्यपानि नामान्याह पूर्वस्येत्यादिभि
स्त्रिभिः श्लोकैः

२६

नं
राम
५३

मन्वायुःपरिमाह स्वंस्वमिति साधिकां किंचिदधिकां युगानामेकसप्ततिं स्वंस्वं कालं मनुर्भुंक्तेऽनुभवतीत्यर्थः २४ मन्वंतरगतानां स्थितिं
माह मन्वंतरेष्विति मनूनामंतराणि मन्वंतराणि पूर्वपूर्वमनुमारभ्योत्तरोत्तरमनुपर्यंतो मध्यकालास्तेषु मनवः मनुवंश्याः पृथ्वी
पालकाः राजानः ऋषयः सुराश्च सुरेशाः इंद्रादयः तान् अनुवर्त्तंते ये ते सर्वे युगपत्संभवंति त्रिलोकीं परिपालयंतीत्यर्थः २५ अथैवं त्रै
लोक्यबहिरेव मानमितत्तद्दिनकालावधिस्वसर्गस्य दैनंदिनसर्गत्वं वदन्मन्वादिभिर्हरिमूर्तैर्भगवानेव विश्वमवति न तु मन्वादयः स्वा
यमवितार इत्याह एष इति ब्रह्मणश्चतुर्मुखकर्तृकः एष दैनंदिनः दिने दिने क्रियमाणो यः सर्गः स एष दैनंदिनसर्गः कथंभूतः त्रैलोक्य
स्य वर्त्तनं वृत्तिर्यस्मिन्नस्तीति त्रैलोक्यवर्त्तनः वर्द्धन इति पाठांतरे तत्र त्रैलोक्यं वर्द्धयतीति तथा यत्र यस्मिन्दैनंदिने सर्गे तिरश्चां

स्वं स्वं कालं मनुर्भुंक्ते साधिकां ह्येकसप्ततिं २४ मन्वंतरेषु मनवस्तद्वंश्या ऋषयः सुराः भवंति चैव युगपत्सुरेशाश्चानु ये च तान्
२५ एष दैनंदिनः सर्गो ब्राह्मस्त्रैलोक्यवर्त्तनः तिर्यङ्नृपितृदेवानां संभवो यत्र कर्मभिः २६ मन्वंतरेषु भगवान्बिभ्रत्सत्वं स्वमू
र्त्तिभिः मन्वादिभिरिदं विश्वमवत्युदितपौरुषः २७ तमोमात्रामुपादाय प्रतिसंरुद्धविक्रमः कालेनानुगताशेष आस्ते तूष्णीं
दिनात्यये २८ तमेवान्वपिधीयंते लोका भूरादयस्त्रयः निशायामनुवृत्तायां निर्मुक्तशशिभास्करं २९ ॥ ॥ ॥ ॥

नृणां पितॄणां देवानां कर्मभिः पुण्यपापरूपैः संभवः उत्पत्तिर्भवतीति २६ मन्वंतरेषु भगवान्स्वमूर्त्तिभिः सत्वं प्रबुद्धसत्वं बिभ्रत्कुर्वन् मदिहरैरेव
सत्वमयमूर्त्तिर्बिभ्राण इत्यर्थः उदितपौरुषः आविष्कृतपुरुषाकारः सन्मन्वादिभिर्हरिमूर्तैरिदं विश्वमवति अत्रोरक्षकत्वे
साभिप्रायः २७ एवं दिनगतां स्थितिमभिधायाथ रात्रिगतां स्थितिमाख्यातुमुपक्रमते तमेवंत्रामिति तमोमात्रां लेशमुपादाय
न्येष स्वीकृत्येत्यर्थः प्रतिसंरुद्धः निवृत्तः विक्रमो व्यापारो यस्य सः कालेनानुगतमनुप्रविष्टमशेषं यस्य सः कालोपाध्येन मनुसरतीत्यर्थः ब्रह्म
दिनात्यये दिनांते तूष्णीमास्ते उपविशति २८ अनुगताशेषत्वमेव विशदयति तमेवेति तमेवानुगतं कालमेवानुपश्चाद्भूराद
यः त्रयो लोकाः अपिधीयंते तिरोहिता भवंतीत्यर्थः कथमपिधीयंते इत्यत आह निशायामनुवृत्तायां प्रवर्त्तमानायां सत्यां निर्मुक्तौ
शशी चंद्रः भास्करश्च यथा भवति तथा तौ विनेत्यर्थः अपिधीयंते नश्यंतीत्यर्थः २९ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

भूमत्वमेवाहंविकारैरिनित्रिभिः शब्दादिविषयाः पंचवागादिव्यापाराः पंचप्राणादिवायुवृत्तयः पंचरात्कोमनोविकारः संकल्पादिः एतैः षोडशभिर्विकारैर्युक्तः विशेषादिभिः पृथ्व्यादिभिः पृथिव्यप्तेजोवाय्वाकाशाहंकारमहत्प्रकृतिभिः कथंभूतैः विशेषादिभिर्दशान्तराधिकैर्दशगुणमुत्तरोत्तरमधिकैर्बहिरावृतः पंचशत्कोटिविस्तृतोयमंडकोशः ४० यत्र मूलप्रकृतौ प्रविष्टा [illegible] एवंविधाण्यन्येऽण्डराशयः कोटिशः प्रविष्टाः परमाणुवद्दृश्यन्ते ४१ तत्सर्वेषां कारणानां महदादीनामपि कारणं मूलप्रधानं महात्मनः पुरुषस्य विष्णोर्धाम शरीरमाहुरित्यन्वयः यस्मात्पुरुषं शरीरमिति श्रुतेः एवमचिंत्यविविधविभवमूलप्रकृतिशरीरकस्य परमात्मनः कथं कालः प्रभुः स्यादित्यभिप्रायः ४२ इति तृतीये एकादशः ११ एवं कालस्वरूपं सप्रपंचमभिधाय प्रकृतमनुसर्गमेव विशेषेण प्रतिपादयिष्युस्तमेवानुसर्गकथनं सूत्ररूपेण एवं कं प्रतिजानीते इतीति हे सत्तः परमात्मनः कालाख्यो महिमा ते तुभ्यं इत्युक्तप्रकारेण वर्णितः अथ यान्

विकारैः सहितो युक्तैर्विशेषादिभिरावृतः आंडकोशो बहिरयं पंचाशत्कोटिविस्तृतः ४० दशोत्तराधिकैर्यत्र प्रविष्टः परमाणुवत् लक्ष्यतेऽन्तर्गताश्चान्ये कोटिशो ह्यंडराशयः ४१ तदाहुरक्षरं ब्रह्म सर्वकारणकारणं विष्णोर्धाम परं साक्षात्पुरुषस्य महात्मनः ४२
इति श्रीभा० तृतीयस्कंधे कालस्वरूपवर्णनं नामैकादशोऽध्यायः ११ इति ते वर्णितः सत्तः कालाख्यः परमात्मनः महिमा वेद गर्भोऽथ यथास्राक्षीन्निबोध मे १ ससर्जाग्रेऽन्धतामिस्रमथ तामिस्रमादिकृत् महामोहं च मोहं च तमश्चाज्ञानवृत्तयः २ ॥

तं वेदगर्भः ब्रह्मा यथास्राक्षीत्तत्प्रकारं वर्ण्यमानं मे मत्तः निबोध शृणु १ प्रथममज्ञानपंचपर्वसृष्टिमाह ससर्जेति अग्रे बुद्धिसृष्ट्यादिकृद्ब्रह्मांधतामिस्रादीनि ससर्ज एता अज्ञानवृत्तयः वृक्षगुल्मलतादीनां गता पंच पर्वाज्ञानवृत्तयः तमो मोहादयः इति केचित् ज्ञायस्व प्रसूप्तिमूर्छामरणोत्थज्ञानवृत्तय इत्यपरे पातंजलोक्ता [illegible] अविद्यास्मितारागद्वेषाभिनिवेशा इत्यन्ये तथैवोक्तं वै तमो विवेको मोहः स्यादंतःकरणविभ्रमः महामोहस्तु विज्ञेयो ग्राम्यभोगसुखैषणा मरणं ह्यंधतामिस्रं तामिस्रः क्रोध उच्यते अविद्या पंचपर्वैषा प्रादुर्भूता महात्मन इति तमः स्वरूपाप्रकाशकः १ मोहो देहादिष्वहं बुद्धिः महामोहो विषयभोगेच्छा ३ तामिस्रस्तत्प्रतिरोधे क्रोधः ४ अंधतामिस्रस्तन्नाशे हमेव विनष्टोऽस्मीति बुद्धिः [illegible] अवेदिनः स्वस्वरूपानभिज्ञाः अहंकृता देहे हं बुद्धिमंत अहंमानाः स्वतंत्राभिमानवंतः अनपस्फुरट २ ॥ ॥ ॥ ॥ ॥ ॥ ॥

पूर्वस्य परार्द्धस्यादौ ब्राह्मो नाम ब्राह्मसंबन्धी महाकल्पः अभूत् नाम्नो पर्यन्तां वदन् महत्वं चाह यत्र पूर्वपरार्द्धादिकल्पे ब्रह्मा अभवदिदमेवान्वर्थतानिमित्तं योसौ ब्रह्मणः संबंधात्कल्पस्य ब्राह्मत्वमत आह यं शब्दब्रह्मेति वेदमयं इति विदुः इदमेवाहि महत्वे निमित्तं यस्य परब्रह्मतद्धासू न तदाराधनप्रकाशकवेदमयब्रह्मणोपयोगोसन्निरति ३५ तस्यैव च पूर्वपरार्द्धस्यान्ते यं कल्पं पाद्मम् अभिचक्षते मनीषिणः इतिस कल्पोभूत् तस्य पाद्माख्यात्वाभिमित्तमाह यत् यत्र कल्पे हरेर्भगवतो निरुद्धस्य नाभिरेव सरस्तस्मात् लोकसरोरुहं भुवनकोशात्मकं कमलम् आसीदुपधत ३६ द्वितीयस्यापि द्वितीयपरार्द्धस्याद्ययं कल्पः कथितः कोसौ इत्यत आह वाराह इति विख्यातः आसिद्धमन्वर्थतायानिमित्तमाह यत्र यस्मिन्कल्पे हरिः सूकररूपेणासीत् ३७ ननु चतुर्मुखपर्यन्तानां कालकल्पत्वमुक्तं तद्वारमात्म

पूर्वस्यादौ परार्द्धस्य ब्राह्मो नाम महानभूत् कल्पो यत्राभवद्ब्रह्मा शब्दब्रह्मेति यं विदुः ३५ तस्यैव चान्ते कल्पोभूद्यं पाद्ममभिचक्षते यद्धरेर्नाभिसरस आसील्लोकसरोरुहं ३६ अयं तु कथितः कल्पो द्वितीयस्यापि भारत वाराह इति विख्यातो यत्रासीच्छूकरो हरिः ३७ कालोयं द्विपरार्द्धाख्यो निमेष उपचर्यते अव्याकृतस्यानन्तस्य ह्यनादेर्जगदात्मनः ३८ कालोयं परमाण्वादिर्द्विपरार्द्धान्त ईश्वरः नैवेशितुं प्रभुर्भूम्न ईश्वरो धाममानिनां ३९

नोपि किं कालकाल्यत्वमस्तीत्याशंक्याह कालइत्यादिना द्विपरार्द्धाख्योयं कालः अनादेर्भगवतो निमेष इवावतिष्ठतीत्यर्थः निमेष इत्युक्ते कालपरिच्छिन्नत्वं स्यादित्याशंक्य उपचर्यत इत्युक्तं अनादित्वाद्यनन्तस्य कालकाल्यत्वमित्यभिप्रायेणानादेरित्युक्तं अनादेरपि हिरण्यगर्भादिक्षेत्रज्ञस्य कालपरिच्छिन्नत्वयोभिहितातनत्परस्यापि सा स्यादित्यत आह अव्याकृतस्याकृतनामरूपरहितस्य हिरण्यगर्भादीनां प्राकृतनामरूपभाक्त्वेनादिमत्वमित्यभिप्रायः कथं तस्य नामरूपराहित्यं जैशानकारणत्वेन नामरूपभाक्स्यादिति नीयत्वादित्यत उक्तं जगदात्मन आत्मतया नामरूपनिर्वोढृत्वेनोपादानत्वेपि स्वतो नामरूपभाक्त्वाभावात् ३८ कालइति परमाण्वादिद्विपरार्द्धान्तोयं कालो नाम ईश्वरः ईश्वरशरीरत्वेन नन्वियामत्वात् कालः अन्येषां धाममानिनां उक्तलक्षणानां ब्रह्मरुद्रादीनामीश्वरः प्रभुरपि ईशितुं सेशितुं भूम्नः त्रिविधपरिच्छेदरहितस्य भगवतो न प्रभुः न समर्थ इत्यर्थः ३९ ॥

ईशितुमितिवापास्तदा परिच्छेतुमित्यर्थः २

५५

प्र

ते २

पा

स्थानकरणमाह हृदीत्यादिना अहंकाराधिदेवतात्वेन रुद्रस्य हृत्स्थत्वं नत्वंतरात्मतया असुः प्राणः रुद्रादीनि स्थानान्यग्रे पूर्वमेव
तेतवार्थमिया कृतानि ११ एकादशस्थानस्थस्य पुनः स्थानभेदानाह मन्युरिति १२ धीप्रभृतयः रुद्राण्यः पत्न्य एकादश हे रुद्र ते
स्त्रियः पत्न्यः १३ सयोषणः सस्त्रीकः एतानि नामानि स्थानानि च गृहाण एभिः स्थानैर्नामभिश्च युक्तः त्वमाभिः स्त्रीभिः सहब
ह्वीः प्रजाः सृज यत्प्रजासर्गत्वमपि प्रजानां पतिरसि भवसि १४ गुरुणा पित्रा भगवानुत्पत्तिप्रलयादिज्ञानवान् नीललोहितः कु
मार इत्युक्तप्रकारेणादिष्ट आज्ञापितः सत्वाकृतिस्वभावेन सत्वमाकृतिर्यस्य तेन सात्विकेन स्वभावेनात्मना समाः प्रजाः ससर्ज

हृदिंद्रियाण्यसुर्व्योम वायुरग्निर्जलं मही सूर्यश्चंद्रस्तपश्चैव स्थानान्यग्रे कृतानि ते ११ मन्युर्मनुर्महिनसो महांश्छि
वऋतुध्वजः उग्ररेता भवः कालो वामदेवो धृतव्रतः १२ धीर्वृत्तिरुशनोमा च नियुत्सर्पिरिलांबिका इरावती सुधा दीक्षा
रुद्राण्यो रुद्र ते स्त्रियः १३ गृहाणैतानि नामानि स्थानानि च सयोषणः एभिः सृज प्रजा बह्वीः प्रजानामसि यत्पतिः १४
इत्यादिष्टः स गुरुणा भगवान्नीललोहितः सत्वाकृतिस्वभावेन ससर्जात्मसमाः प्रजाः १५ रुद्राणां रुद्रसृष्टानां समं
ताद्ग्रसतां जगत् निशाम्यासंख्यशो यूथान्प्रजापतिरशंकत १६ अलं प्रजाभिः सृष्टाभिरीदृशीभिः सुरोत्तम मया सह
दहंतीभिर्दिशश्चक्षुर्भिरुल्वणैः १७ तप आतिष्ठ भद्रं ते सर्वभूतसुखावहं तपसैव यथा पूर्वं स्रष्टा विश्वमिदं भवान् १८

१५ रुद्रेण नीललोहितकुमारेण सृष्टानां रुद्राणां कथंभूतानां जगद्विश्वं समंताद्ग्रसतां यूथान् संघानसंख्यशः निशाम्य दृष्ट्वा
प्रजापतिरशंकताशंक्याहेत्यभिप्रायः १६ तदेवाह अलमिति त्रिभिः हे सुरोत्तम रुद्र ईदृशीभिः स्वतुल्याभिः सृष्टाभिः उल्वणैः
चक्षुर्भिर्मया सह दिशो दहंतीभिः प्रजाभिरलं मा सृज न सृजेत्यर्थः १७ अतस्तप आतिष्ठ चर ते भद्रमस्तु तपः कथंभूतं स
र्वेषां भूतानां सुखमावहतीति तथोक्तं तपः प्रशंसति तपसैवेति सार्द्धेन भगवान् त्वं विश्वं यथापूर्वं तपसैव स्रष्टासि स्रक्ष्यसीत्यर्थः
१८

पापीयसीमत्वा नत्त्रीनां निरयसाधनत्वेन पापीयस्त्वात्तत्सृष्टेः पापीयस्त्वं सृष्टिं दृष्ट्वा आत्मानं पापीयःस्रष्टारं स्वात्मानं न बहु अमन्यत तन
समीचीनममन्यतेत्यर्थः ततः आत्मनोऽबहुमानानन्तरं भगवतो ध्यानेन पूतं यन्मनस्तेनान्यान् असृजत् ३ तानाह सनकं चेति आत्मभूः
ब्रह्मा सनकादीन्मुनीन् प्रभुभाष्ये संशीलनपरान्सत्क्रियान् निवृत्तिधर्मपरायणान् ऊर्ध्वरेतसः जितेन्द्रियान् असृजत् ४ स्वभूर्ब्रह्मा ता
न्सनकादीन् पुत्रान् बभाषे भाषणमेवाह हे पुत्रकाः प्रजाः सृजत इति ते सनकादयः मोक्षधर्मिणः निवृत्तिधर्मनिष्ठाः वासुदेवः परमयन
प्राप्यं प्रापकं साधारस्त्वं येषां तेतथोक्ताः संतो नैछन्निति आनुज्ञातां सृष्टिं कर्त्तुं नैछन्नित्यर्थः ५ सब्रह्मा प्रत्याख्यातमनंगीकृतमनुशा
सनमाज्ञा यस्तैः कृतैः एवमवध्यातः अवज्ञातः दुर्विषहं दुःसहं जातमुत्पन्नं क्रोधं नियंतुं उपचक्रमे उपक्रांतवान् ६ धिया बुद्ध्या नि

दृष्ट्वा पापीयसीं सृष्टिं नात्मानं बह्वमन्यत भगवद्ध्यानपूतेन मनसान्यां ततोऽसृजत् ३ सनकं च सनंदं च सनातनमथात्मभूः स
नत्कुमारं च मुनीन्निःक्रियानूर्ध्वरेतसः ४ तान्बभाषे स्वभूः पुत्रान्प्रजाः सृजत पुत्रकाः तन्नैच्छन्मोक्षधर्माणो वासुदेवपरायणाः
५ सोऽवध्यातः सुतैरेवं प्रत्याख्यातानुशासनैः क्रोधं दुर्विषहं जातं नियंतुमुपचक्रमे ६ धिया निगृह्यमाणोपि भ्रुवोर्मध्यात्प्र
जापतेः सद्योऽजायत तन्मन्युः कुमारो नीललोहितः ७ स वै रुरोद देवानां पूर्वजो भगवान्भवः नामानि कुरु मे धातः स्थानानि
च जगद्गुरो ८ इति तस्य वचः पाद्मो भगवान्परिपालयन् अभ्यधाद्भद्रया वाचा मा रोदीस्तत्करोमि ते ९ यदरोदीः सुरश्रेष्ठ सोद्वे
गइव बालकः ततस्त्वामभिधास्यंति नाम्ना रुद्र इति प्रजाः १०

निगृह्यमाणोपि विशेषेण भ्रममाणोपि तन्मन्युः स चासौ मन्युः क्रोधः प्रजापते
र्ब्रह्मणः भ्रुवोर्मध्यान्नीललोहितः कुमारः अजायत निगृह्यमाणोऽप्यनिगृहीतं भ्रूमध्यमागत्य तस्मान्नीललोहितकुमाररूपेणाजाय
तेत्यर्थः ७ कोसौ नीललोहितः कुमारो यो जातः भ्रुवोर्मध्यात्कृतश्च किमरोदीत् तत आह स वा इत्यादिना एवमात्मभुवा आदिष्टः परिक्र
मणिरां पतिमिति तेन देवानां पूर्वजो भगवान् भवः सदाशिवः स च जातो रुरोद रोदनप्रकारमेवाह नामानीति मा रोदीः रोदनं मा कु
रु तेतवतद्रुकं करोमीति ८ नामकरणमेवाह यदिति हे सुरश्रेष्ठ सोद्वेगः भयसहितो बालक इव यद्यस्मात्त्वमरोदीः रोदनमकार्षीः
ततः रोदनान्निमित्ताद्रुद्र इति नाम्ना प्रजाः त्वामभिधास्यंत्यभिवदिष्यंतीत्यर्थः १० ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

भा. ८८.८१. ५६

हृदि हृदयात्कामः भ्रुवो भ्रूमध्यात्क्रोधः अधरदच्छदात् अधरोष्ठाल्लोभः आस्यान्मुखतः वाक् वागधिष्ठात्री देवता मेढ्रात्सिंधवः पायोः गुदात् अघाश्रयः पापाश्रयः पापाधिष्ठाता निर्ऋतिः २६ छायायाः देहच्छायायाः कर्दमः कथंभूतः देवहूत्याः स्वायंभुवमनुकन्यायाः पतिः प्रभुः जितेंद्रियः अवांतरकथां प्रस्तोतुं उपसंहरति मनस इति मनसो देहतश्च एवं मुख्यरीत्या विश्वकृतः ब्रह्मणः इदं सर्वं जगज्जज्ञे २७ वाक्प्रसंगादवांतरकथां प्रस्तौति वाचमित्यादिना तां [illegible] दिशो जगद्गुरिंसितेन गंधेन स्वयंभुर्ब्रह्मा स्वदुहितरं तन्वीं स्त्रीरूपां मनश्चित्तं हरंतीं स्वयमकामयमानां वाचं वागधिष्ठा[illegible]त्रीं देवतां स्वयं सकामः चकमे रोद्धुमिति नो अस्माभिः श्रुतं २८ अधर्मे दुहितृकामनारूपे कृतवायात्म

56

हृदि कामो भ्रुवः क्रोधो लोभश्चाधरदच्छदात् आस्याद्वाक्सिंधवो मेढ्रान्निर्ऋतिः पायोरघाश्रयः २६ छायायाः कर्दमो जज्ञे देवहूत्याः पतिः प्रभुः मनसो देहतश्चेदं जज्ञे विश्वकृतो जगत् २७ वाचं दुहितरं तन्वीं स्वयंभूर्हरतीं मनः अकामां चकमे क्षत्तः सकाम इति नः श्रुतं २८ तमधर्मे कृतमतिं विलोक्य पितरं सुताः मरीचिमुख्या ऋषयो विस्रंभात् प्रत्यबोधयन् २९ मरीच्यादय ऊचुः नैतत्पूर्वैः कृतं त्वद्य न करिष्यंति चापरे यत्त्वं दुहितरं गच्छेरनिगृह्यांगजं प्रभुः ३० तेजीयसामपि ह्येतन्न सुश्लोक्यं जगद्गुरो यद्वृत्तमनुतिष्ठन्वै लोकः क्षेमाय क" ल्पते ३१

के कर्मणि कृता संनद्धा मतिर्यस्य तं पितरं ब्रह्माणं विलोक्य मरीचिप्रभृतयः पुत्राः मुनयः विस्रंभात् विश्वासात् साधिक्यात् पितरं प्रत्यबोधयन् ज्ञापितवंतः २९ अवबोधनप्रकारमेवाह नैतदिति पूर्वैः इतरैः कृतं अद्य अनु न कुर्वंति अपरे भाविनो लोकाः न करिष्यंति किंतु इदं त्वं तत्राह स्वयं प्रभुः धर्ममर्यादापालनसमर्थस्त्वम् अंगजं काममनिगृह्य स्वां दुहितरं गच्छेरिति यत् ३० तेजीयसामस्माकमेतन्न प्रशस्यं (सनः) वायकरमतआह तेजीयसामिति हे जगद्गुरो जगन्मर्यादापालक तेजीयसां तेजिष्ठानामप्येतन्न सुश्लोक्यं न श्लाघ्यं [illegible] हि यस्माच्छ्रेष्ठानामाचारं ह्यत्र मनुतिष्ठन् लोकः जनः क्षेमाय कुशलाय कल्पते तथाच गीयते यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ३१

५६

तपसैव पुमानंजसा सुखेन भगवंतं विंदते प्राप्नोति कथंभूतमधोक्षजमधःकृतेंद्रियव्यापारं निरस्तप्राकृतेंद्रियव्यापारमित्यर्थः सर्व
भूतगुणावासं सर्वेषां भूतानां गुणानां कल्याणगुणानां चावासमाश्रयं अत्राधोक्षजशब्देन प्राकृतेंद्रियादितव्यापारतद्विषयसंब
न्धिः सूच्यते तथा हि श्रूयते सर्वकर्मा सर्वकामः सर्वगंधः सर्वरस इत्यनेन भोग्यतादिप्रायः सूच्यते गुणशब्देन आप्यत्वौपाधिकाः ज्ञानश
क्त्यादयः कल्याणगुणा विवक्षिताः भगवत्त्वेन प्राप्यविशेषनिर्देशः आवासशब्देन तदुपासनस्य स्वस्वरूपानुगुणत्वं सूच्यते १८ एव
मादिष्टो रुद्रः किमकरोदित्यत्राह एवमिति आत्मभुवा ब्रह्मणा एवमुक्तप्रकारेणादिष्टः गिरांपतिं ब्रह्माणं परिक्रम्य प्रदक्षिणीकृत्य
मुं गिरांपतिं बाढमित्यामंत्र्य भगवदाज्ञामंगीकरोमीत्युक्त्वा इत्यर्थः तपसे तपश्चर्तुं वनमरण्यं विवेश प्रविष्टवान् २० अथ रुद्राज्ञा

तपसैव परं ज्योतिर्भगवंतमधोक्षजं सर्वभूतगुणावासमंजसा विंदते पुमान् १९ मैत्रेय उ० एवमात्मभुवादिष्टः परिक्रम्य
गिरांपतिं बाढमित्यमुमामंत्र्य विवेश तपसे वनं २० अथाभिध्यायतः सर्गं दश पुत्राः प्रजज्ञिरे भगवच्छक्तियुक्तस्य लोकसं
तानहेतवः २१ मरीचिरत्र्यंगिरसौ पुलस्त्यः पुलहः क्रतुः भृगुर्वसिष्ठो दक्षश्च दशमस्तत्र नारदः २२ उत्संगान्नारदो जज्ञे दक्षोंगुष्ठा
त्स्वयंभुवः प्राणाद्वसिष्ठः संजातो भृगुस्त्वचि करात्क्रतुः २३ पुलहो नाभितो जज्ञे पुलस्त्यः कर्णयोरृषिः अंगिरा मुखतोक्ष्णो
त्रिर्मरीचिर्मनसोभवत् २४ धर्मः स्तनाद्दक्षिणतो यत्र नारायणः स्वयं अधर्मः पृष्ठतो यस्मान्मृत्युर्लोकभयंकरः २५ ॥ ॥

पनानंतरं पुनः सर्गं ध्यायतश्चिंतयतः दश पुत्राः प्रजज्ञिरे जाताः [illegible] कथंभूतस्य भगवच्छक्तियुक्तस्य भगवतो या शक्तिर्लोकरचना
सामर्थ्यं तेन युक्तस्य पुत्रान् विशिनष्टि लोकसंतानहेतवः लोकसंततिवृद्धिकराः २१ के ते दश पुत्राः कः कस्माज्जात इत्यत आह मरीचि
रित्यादिस्त्रिभिः २२ भृगुस्त्वचि त्वचश्चर्मणो भृगुर्जात इत्यर्थः करात् हस्तात् २३ नाभितः नाभेः कर्णयोः कर्णाभ्यां पुलस्त्य ऋषिर्जातः मु
तै२ खतः मुखात् अक्ष्णः नेत्रात् अत्रिर्जातः २४ धर्म इति पुनः सर्गं ध्यायत इत्यनुषंगः दक्षिणतः स्तनात् धर्मो जातः कथंभूतः यत्र धर्मे ना
रायणः स्वयं स्थितः तदधिष्ठितः स्थितः इत्यर्थः धर्मस्य प्रभुरच्युत इति वचनात् पृष्ठतः अधर्मः जज्ञे कथंभूतः यस्माद्यत्राधर्मे
लोकभयंकरो मृत्युस्तिष्ठति मृत्युरधर्मदेवत इत्यर्थः २५ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

भा॰ त॰ टी॰ ५७

एवमाप्रष्टो मुनिः क्रमेण पूर्वादिभ्यो मुखेभ्यः ऋगादीनसृजदित्याह ऋगिति पूर्वादिभिर्मुखैर्मुखेभ्यः चातुर्होत्रक्रममाह शस्त्रमिति शस्त्रमप्रगीतमंत्रं स्तोत्रं तत्तद्धोतृकर्तव्यत्वेन हौत्रमित्युच्यते इज्याम् आध्वर्यवं स्तुतिस्तोमं स्तुतिः संगीतरूपं स्तोमं तद्गेयमंत्रसमुदायः त्रिवृत्स्तोमो भवतीत्यादिविहितं तदुद्गातृप्रयोज्यत्वेनौद्गात्रमित्युच्यते स्तुतयः स्तोमा यस्मिन्निति चतुर्थीसमासः प्रायश्चित्तं ब्रह्मणा प्रयोज्यं एतानि चत्वारि क्रमादिति पूर्वादिमुखेभ्यो व्यधादसृजत् ३७ उपवेदक्रममाह आयुर्वेदमिति स्थापत्यं शिल्पकर्म ३८ इतिहासाश्च पुराणानि च तेषां समाहारः पंचमं वेदाख्यमितिहासपुराणं सर्वदर्शनः सर्वज्ञः ईश्वरो ब्रह्मा सर्वेभ्यो मुखेभ्यः ससर्ज ३९ कर्मतंत्रक्रममाह षोडश्युक्थ्याविति षोडश्युक्थ्यशब्दौ षोडश्युक्थ्यनामसंस्थाविशिष्टकर्मपरौ पुरीषी चयनः अग्निष्टुदग्निष्टोमः आप्तोर्यामस्त्वाति

57

मैत्रेय उ॰ ऋग्यजुःसामाथर्वाख्यान्वेदान्पूर्वादिभिर्मुखैः शस्त्रमिज्यां स्तुतिस्तोमं प्रायश्चित्तं व्यधात्क्रमात् ३७ आयुर्वेदं धनुर्वेदं गांधर्वं वेदमात्मनः स्थापत्यं चासृजद्वेदं क्रमात्पूर्वादिभिर्मुखैः ३८ इतिहासपुराणानि पंचमं वेदमीश्वरः सर्वेभ्य एव वक्त्रेभ्यः ससृजे सर्वदर्शनः ३९ षोडश्युक्थौ पूर्ववक्त्रात्पुरीष्यग्निष्टुतावथ आप्तोर्यामातिरात्रौ च वाजपेयं सगोसवं ४० विद्या दानं तपः सत्यं धर्मस्येति पदानि च आश्रमांश्च यथासंख्यमसृजत्सह वृत्तिभिः ४१

रात्रश्चेतौ कर्मविशेषौ गोसवेन सहितं सगोसवं वाजपेयं षोडश्युक्थ्यौ पूर्ववक्त्रात् पुरीष्यग्निष्टुतौ दक्षिणमुखात् आप्तोर्यामातिरात्रौ पश्चिममुखात् सगोसववाजपेयौ उत्तरतः असृजदित्यर्थः ४० धर्मस्य पादानामाश्रमा... णां च क्रममाह विद्येति विद्यादानादीनि धर्मस्य चत्वारि पादानि ब्रह्मचर्यादयः चत्वारः आश्रमाश्च यथासंख्यं वृत्तिभिः सह पूर्वादिभ्यो मुखेभ्यः असृजत् ननु तपः सत्यं दया शौचमिति प्रथमस्कंधे दयाशौचयोः पादत्वं कीर्तितं अत्र तु विद्यादानयोरिति विरोधः मैवं दयाशौचयोर्विद्यादानकार्यत्वात्कारणशब्दः कार्यउपचर्यतेन च क्रमिकविरोधात् शौचं हि ईश्वरज्ञानकार्यं सेत्रज्ञस्येश्वर ज्ञानाद्धि शुद्धिः परमा मतेति स्मृतेः एवंभूताभयप्रदानस्य कलां नार्हन्ति षोडशीमिति पूर्वोक्तरीत्या दयैवंभूताभयप्रदानमतो न विरोधः ४१ ॥ ॥ ॥

राम

५७

एवं पितरं प्रबोध्य तमेतस्मादधर्मान्निवर्तयितुं भगवानेव समर्थः नान्य उपायोऽस्तीति तस्मै नमस्कुर्वंतस्तस्मै विज्ञापयामासुरित्याह
तस्मा इति तस्मै भगवते नमः यो भगवानात्मस्थमात्मन्यात्मरूपविभागानर्हं सूक्ष्मरूपतयावस्थितं चेतनाचेतनात्मकं इदं जग
त्स्वेन रोचिषा संकल्परूपज्ञानेन व्यंजयामास विभक्तनामरूपापन्नत्वेन व्यक्तमकरोत् सकलजगत्कारणभूतः परमात्माऽधर्म
धर्मान्निवृत्तिरूपं धर्मं पातुं रक्षितुमर्हति ३२ एवमुक्तवत्सु पुत्रेषु पिता किमकरोदित्यत आह स इति इत्थमुक्तरीत्या पुरः अग्रे गृण
तः भाषमाणान्प्रजापतीन्पुत्रान्दृष्ट्वा प्रजापतीनां मरीच्यादीनां पतिर्ब्रह्मा व्रीडितः लज्जितः तदा तन्वं तनुं तत्याज त्यक्तवान् ३३ तां
त्यक्तां घोरां तनुं दिशः जगृहुः गृहीतवत्यः कुत एतज्ज्ञायते इत्यत्राह यत्त्यक्तां तनुमेव तमो नीहारं विदुः जानीयुः अत्र तनुत्यागो नाम का

तस्मै नमो भगवते य इदं स्वेन रोचिषा आत्मस्थं व्यंजयामास स धर्मं पातुमर्हति ३२ मैत्रेय उ० स इत्थं गृणतः पुत्रान्पुरो दृ
ष्ट्वा प्रजापतीन् प्रजापतिपतिस्तन्वं तत्याज व्रीडितस्ततः ३३ तां दिशो जगृहुर्घोरां नीहारं यद्विदुस्तमः ३३ कदाचिद्ध्यायतः
स्रष्टुर्वेदा आसंश्चतुर्मुखात् कथं स्रक्ष्याम्यहं लोकान्समवेतान्यथा पुरा ३४ चातुर्होत्रं कर्मतंत्रमुपवेदनयैः सह धर्मस्य
पादाश्चत्वारस्तथैवाश्रमवृत्तयः ३५ विदुर उ० स वै विश्वसृजामीशो वेदादीन्मुखतोऽसृजत् यद्यद्येनासृजद्देवस्तन्मे ब्रूहि
तपोधन ३६

मुकत्वभावत्याग एव तद्ग्रहणं नाम तद्भावग्रहणमेव तनुशब्देन निर्देशस्तत्तनुवद्दृष्टेषणत्यावेदितव्यं ३३
तनुत्यागानंतरं ब्रह्मा किमकरोदित्यत आह कदाचिदिति समवेता संगतान्लोकान्यथा पुरा पूर्वकल्पवत् कथमहं स्रक्ष्यामीति क
चि२ दाध्यायतः स्रष्टुः चतुर्मुखाच्चतुर्मुखेभ्यः वेदा ऋगादय आसन्नाविर्भूता ३४ चातुर्होत्रं चतुर्णां होतॄणां कर्मतंत्रं यज्ञविस्तारः उपवेदा
आयुर्वेदादयः ते च न्यायाश्च तैः सह धर्मस्य चत्वारः पादाः तपः सत्यं दया शौचं इति प्रथमस्कंधोक्ताः पादाः आश्रमास्तद्वृत्तयश्चा
भि२ सन्निति पूर्वेणान्वयः ३५ एवं सामान्येन वेदादीनां सर्गे हि तेन तेषां मध्ये कस्य कस्मान्मुखादुत्पत्तिरिति विविदिषया पृच्छति विदुरः स वा इ
ति विश्वसृजां प्रजापतीनां ईशः पतिः स ब्रह्मा वेदादीनसृजदिति श्रुतमस्माभिः इदं तु न ज्ञायते देवः ब्रह्मा येन येन यद्यदसृजदिति
हे तपोधन मैत्रेय तन्मह्यं ब्रूहि वद ३६ ॥ ॥ ॥

मुखतो२ तु२

भा. त. टी.

५८

मज्जायाः पंक्तिरुत्पन्ना प्राणात् बृहतीछंदोऽभवत् ब्रह्मणः जीवः स्पर्शः कारणे कार्योपचारः एवमग्रेपि देहः स्वरः देहात्स्वरा उत्पन्नाः ४६ इंद्रियाणींद्रियेभ्य ऊष्माणः आत्मनो ब्रह्मणः बलमंतःस्थाः तस्मात्ते उत्पन्ना इत्यर्थः कादयो मावसानाः स्पर्शाः अचः स्वराः सषशहा ऊष्माणः यरलवा अंतस्था इति वैयाकरणोक्तरीत्या स्पर्शादयः शब्दाः प्रयुक्ताः प्रजापतेर्विहारेण क्रीडया सप्त स्वराः षड्जर्षभगांधारमध्यमपंचमधैवतनिषादाः भवंति स्माभवन्नित्यर्थः ४७ एवं वर्णानामुत्पत्तिमभिधाय यत्तस्मादेतद्ब्रह्म नामरूपमन्नं च जायत इति श्रुत्युक्तरीत्या शब्दार्थरूपप्रपंचात्मके ब्रह्मणि अर्थरूपस्य ब्रह्मणो देवादिरूपेण यथा विततत्वमेवं ब्रह्मण उत्पन्नाकारादिवर्णसंघातात्मकशब्दब्रह्मणोपि विततत्वमस्तीत्याह शब्देत्यादिना शब्दात्मकं ब्रह्म आत्मा शरीरं यस्य तस्माच्छब्दब्रह्मणोऽभिव्यक्तिस्थानत्वात् छरीरत्वाच्छब्दब्रह्मापि तच्छरीरमेवेत्यभिप्रायेण शब्दब्रह्मात्मनः इति शब्दात्मकं ब्रह्म शरीरं यस्य तस्माच्छब्दब्रह्माभिव्यक्तिरित्युक्तं ३७

नर्द

व्यक्ताव्यक्तात्मनः २

मज्जायाः पंक्तिरुत्पन्ना बृहती प्राणतोऽभवत् स्पर्शस्तस्याभवज्जीवः स्वरो देह उदाहृतः ४६ ऊष्माणमिंद्रियाण्याहुरंतःस्था बलमात्मनः स्वराः सप्त विहारेण भवंति स्म प्रजापतेः ४७ शब्दब्रह्मात्मनः परः ब्रह्मावभाति विततो नानाशक्त्युपबृंहितः ४८ ततोपरामुपादाय स सर्गाय मनो दधे ऋषीणां भूरिवीर्याणामपि सर्गमविस्तृतं ज्ञात्वा तद्धृदये भूयश्चिंतयामास कौरव ४९

व्यक्ताव्यक्तात्मनः चतुर्मुखशरीरेपि चतुर्विंशति तत्त्वसंभूयाव्यक्ताव्यक्तत्वं एवंभूताच्चतुर्मुखात् हेतोः तत्परः अर्णात्मकादन्यः ब्रह्मा शब्दात्मकः ब्रह्मापि विततः स्फूर्तिमान् नीतिहासादिरूपेण प्रकृतिप्रत्ययपदवाक्यादिरूपेण तत्र भाषारूपेण च विस्तृतः। नानाशक्त्युपबृंहितः अत्र शक्तिशब्देनार्थोपि मानसामर्थ्यरूपाभिधालक्षणागौण्यादिरूपा वृत्तय उच्यंते नानाशक्तिभिरभिधादिभिरुपबृंहितः ४८ ततः वर्णस्वरसर्गानंतरं किमकरोदित्यत्राह ततस्त्वर्धेन ततः शब्दब्रह्म [illegible] अपरां तनुं उपादाय स्वीकृत्य स सर्गाय मनो दधे मनसा चिंतयदित्यर्थः केयमपरा तनुः कीदृशी वा चिंतेत्यपेक्षायामृषीणामित्यादिना स्वीया सीदित्यंतेन प्रपंचयति। तावच्चिंताप्रकारमाह ऋषीणामिति भूरिवीर्यं प्रजननसामर्थ्यं येषां तेषां ऋषीणामपि सर्गमविस्तृतं ज्ञात्वा तद्धृदये सर्गवृद्ध्युपायं भूयश्चिंतयामास ४९

राम:

५८

कारणत्वाद्वृत्तयो या आश्रमैः सह जाता इत्यपेक्ष्य याः वृत्तीर्वदंस्तासामवांतरभेदांश्चाह द्वाभ्यां सावित्रं ब्रह्मचर्यं स्त्रीसंगविरहादिरूपं
न४२ उपनयनादारभ्य गायत्रीमधीयानस्य त्रिरात्रं प्राजापत्यं व्रतान्याचरतः संवत्सरांतं ब्राह्मं वेदग्रहणांतं बृहन्नैष्ठिकं एतान्ब्रह्मचर्याश्रम
वृत्तयः वार्त्ता अनिषिद्धकृष्यादिवृत्तिः संचयो यावत्कजीवनं कृषीवनवृत्तिः शालीनमयाचितवृत्तिः शिलं कणिकाद्यर्जनं उंछः
कणश आदानं उभयमेकवृत्तिः एकवचनमार्षं समाहारद्वंद्वत्वात्पुंस्त्वमार्षं वेदितव्यं एताः गृहाश्रमे वृत्तय इत्यर्थः ४२
चतुर्विधा वनस्थाश्चेत्याह वैखानसाः अकृष्टपच्याशिनः वालखिल्याः पूर्वार्जितान्नत्यागिनः उदुंबराः प्रातरुत्थाय यां दिशं
प्रथमं पश्यंति तत आहृतैः फलादिभिर्जीवंतः फेनपाः स्वयंजीर्णाशिनः वने वनवासिन इत्यर्थः तुर्याश्रमानामपि चातुर्वि
ध्यमाह न्यासे इति कुटीचकः स्वाश्रमधर्मप्रधानः बह्वोदः कर्मोपसर्जनीकृत्य ज्ञानप्रधानः हंसो ज्ञानाभ्यासनिष्ठः निष्क्रियः परम
हंसः प्राप्ततत्वः प्रवृत्तिधर्महीनत्वान्निष्क्रिय इत्युक्तं न तु निवृत्तिधर्मनिवृत्तिरप्यनेनोच्यते विद्यागतेन तस्यावश्यमनुवर्तनी

सावित्रं प्राजापत्यं च ब्राह्मं चाथ बृहत्तथा वार्त्तासंचयशालीनशिलोंछ इति वै गृहे ४२ वैखानसा वालखिल्यौदुंबराः
फेनपा वने न्यासे कुटीचकः पूर्वं बह्वोदो हंसनिष्क्रियौ ४३ आन्वीक्षिकी त्रयी वार्त्ता दंडनीतिस्तथैव च एवं व्याहृतयश्चा
आसन्प्रणवो ह्यस्य दह्रतः ४४ तस्योष्णिगासील्लोमभ्यो गायत्री च त्वचो विभोः त्रिष्टुम्मांसात्स्नुतोनुष्टुब्जगत्यस्थ्नः प्रजापतेः ४५

पत्वात् न्यासे एते संन्यासाश्रमे स्थिताः ४३ नयादीनां पूर्ववत्सृष्टिक्रमेणोत्पत्तिमाह आन्वीक्षिकी आत्मानात्मविवेकविद्या मोक्ष
फला त्रयी कर्मविद्या स्वर्गादिफला वार्त्ता कृष्यादिरूपा जीवनफला दंडनीतिरर्थपरा अथ व्याहृतीनां क्रममाह एवमिति एवं दृ
५३ वादिमुखक्रमेणैव व्याहृतयश्चासन्नित्यर्थः भूर्भुवः स्वरिति यस्तास्तिस्रो व्याहृतयः समस्ता चतुर्थी व्याहृतिः तथा हाश्वलायनः
एवं व्याहृतयः प्रोक्ता व्यस्ताः समस्ता इति पक्षा भूर्भुवः स्वरित्येतास्तिस्रो व्याहृतयस्तासां महः समस्ता चतुर्थी महा चमसः प्रवेदयते
मह इति श्रुतेश्च चतुर्थी मह इति व्याहृतिः एवं मुखोत्पन्नानां मुखक्रममभिधायान्येभ्यो ऽगेभ्यो ऽन्येषामुत्पत्तिमाह प्रणव इत्या
दिना हृत्तः हृदयाकाशात् प्रणव आस ४४ ब्रह्मणः लोमभ्यः उष्णिगाख्यं छंदः आसीत् अस्य सर्वगणाभियनाच्छंदः विभोर्ब्रह्मणः
त्वचः गायत्री छंदः मांसात्त्रिष्टुप्छंदः स्नुतः स्नायोरनुष्टुप्छंदः प्रजापतेर्ब्रह्मणः अस्थ्नः जगती छंद आसीत् ४५ ॥ ॥

भा॰ तृ॰ टी॰
५९

मन इति विशेषणसूचितं तच्चरित्रविस्तारं विवित्सया विदुरः पृच्छतीत्याह शुक निशम्येति वदतः आदत्तो मुने मैत्रेयस्य पुण्यतमां वाचं
निशम्य श्रुत्वा हे नृप राजन् कौरव्यो विदुरः वासुदेवकथायामादृतः कृतादरः आदरेण युक्तः भूयः पुनः पप्रच्छ पृष्टवान् १ विदुरप्रश्न
प्रकारमेवाह स वा इति त्रिभिः स्वयंभुवः ब्रह्मणः प्रियः पुत्राणां मध्ये प्रियः निरतिशयप्रीतिविषय इति भावः सम्राट् सार्वभौमः स्वाय-
ंभुवो मनुः प्रियां पत्नीं शतरूपां प्रतिलभ्य लब्ध्वा ततः किमकरोत् हे मुने मैत्रेय २ प्रकृतमनुसर्गं विहाय कस्मादिति मनुचरित्रं पृच्छ-
सीत्याशंकां निराकुर्वन्पृच्छति चरितमिति हे सत्तम आदिराजस्य तस्य राजर्षेर्मनोश्चरितं श्रद्दधानाय मे मह्यं ब्रूहि कथय यद्यस्मा-
दसौ मनुः विष्वक्सेनाश्रयः विष्वक्सेनो हरिरेवाश्रयो यस्य स तथोक्तः भगवद्भक्तत्वात्तच्चरित्रमवश्यं श्रोतव्यमतः पृष्टव्यमेवेति

59

श्रीशुक उ॰ निशम्य वाचं वदतो मुनेः पुण्यतमां नृप भूयः पप्रच्छ कौरव्यो वासुदेवकथादृतः १ विदुर उ॰ स वै स्वायंभुवः स-
म्राट् प्रियः पुत्रः स्वयंभुवः प्रतिलभ्य प्रियां पत्नीं किं चकार ततो मुने २ चरितं तस्य राजर्षेरादिराजस्य सत्तम ब्रूहि मे श्रद्द-
धानाय विष्वक्सेनाश्रयो ह्यसौ ३ श्रुतस्य पुंसां सुचिरश्रमस्य नन्वंजसा सूरिभिरीडितोऽर्थः तत्तद्गुणानुश्रवणं मुकुंदपा-
दारविंदं हृदयेषु येषां ४ श्रीशुक उ॰ इति ब्रुवाणं विदुरं विनीतं सहस्रशीर्ष्णश्चरणोपधानं प्रहृष्टरोमा भगवत्कथायां प्रणी॰

गवत्

भावः नन्वेवं तर्हि सा साक्षाद्भगवच्चरित्रमेव पृष्टव्यं किं भौ चरितानुप्रश्नेनेत्याशंक्याह श्रुतस्येति सुचिरश्रमस्य सुचिरं श्रमो यस्मिंस्तस्य
चिरकालश्रमार्जितस्य पुंसां श्रुतस्याध्ययनस्यार्थः प्रयोजनं सूरिभिर्विद्वद्भिरयमेवेतीडितः स्तुतः किं तत्तत्र सूरिभिरीडितमित्य-
ाह येषां हृदयेषु मुकुंदपदारविंदमुपास्यते तेषां भागवतानां गुणानां श्रवणमिति यदित्यर्थः भगवद्गुणवद्भागवतगुणा अ-
पि श्रोतव्यास्त्वेत्यभिप्रायः ४ एवं वैदुरिकप्रश्नमाश्रुत्य मुनिरभ्यभाषतेत्याह शुक इतीति उक्तप्रकारेण ब्रुवाणं पृच्छंतं विनीतं
विनयादिसंपन्नं सहस्रशीर्ष्णः सहस्रशीर्षपुरुषस्य सहस्रशीर्षा पुरुष इति श्रुतेः चरणोपधीयेते न्यस्येते अस्मिन्निति चरणोपधानं भगवत्पा-
दपीठं भगवत्प्रियोऽसौ विदुरः अनंतस्य शिरस उपरि भगवान्स्वपादौ प्रसारयतीत्यर्थः एवंभूतं विदुरं प्रति मुनिर्मैत्रेयोऽभ्यचष्टाभ्य-
भाषत कथंभूतः भगवत्कथायां प्रणीयमानः प्रवर्त्यमानः अत एव प्रहृष्टानि उद्दंचितानि रोमाणि यस्य स तथोक्तः ५ ॥ ॥

दणा

राम
५९

किमित्यत्राह नहीति निसारा सर्वदाव्यापृतस्यापि प्रजसर्गेव्यापारंकुर्वतोपिमेममसकाशात्प्रजानह्येधंतेनवर्द्धते एतदद्भुतमहो
आश्चर्यंखलु अत्र प्रजावृद्धौ दैवंविघातकं प्रतिबंधकंनूननिश्चयः ५० एवंयुक्तकृतः अचिंतच्चिंतनरूपपुरुषंकुर्वतः दैवंदैवानुकूल्यं
चापेक्षतः अपेक्षमाणस्य कस्य ब्रह्मणो रूपंद्वेधाभूत् प्राक्तनेनरूपेणसत्येवद्वितीयंरूपमभूत् प्राक्तनेनसहद्वेरूपेअभवतामित्यभिप्रेत्यद्वि
धाभूदित्युक्तं इदंरूपस्यद्विधाभवनंदेवासुरादिसर्गेप्रभावत्वलोलुपत्वादिभावग्रहणात्तत्रभावग्रहणंकिंतुतस्यशरीरमेवद्वि
धाभूत् तामिस्रावेदयितुंरूपंविशिनष्टि यत्कायमिति यद्रूपकायंशरीरमभिचक्षतेव्याहरंति ५१ ताभ्यांरूपस्यविभागाभ्यांविभ
क्ताभ्यांरूपाभ्यामित्यर्थः मिथुनंस्त्रीपुमात्मकंद्वंद्वमभूदित्यर्थः तत्रमिथुनेयः पुमान्समनुःस्वायंभुवःस्वायंभुवमन्वाख्यःस्वराट्

अहो अद्भुतमेतन्मेव्यापृतस्यापिनित्यदा नह्येधंतेप्रजानूनंदैवमत्रविघातकं ५० एवंयुक्तकृतस्तस्यदैवंचावेक्षतस्त
दा कस्यरूपमभूद्द्वेधायत्कायमभिचक्षते ५१ ताभ्यांरूपविभागाभ्यांमिथुनंसमपद्यत यस्तुतत्रपुमान्सोभून्मनुःस्वा
यंभुवःस्वराट् ५२ स्त्रीयासीच्छतरूपाख्यामहिष्यस्यमहात्मनः तदामिथुनधर्मेणप्रजाह्येधांबभूविरे ५३ सचापिशतरूपा
यांपंचापत्यान्यजीजनत् प्रियव्रतोत्तानपादौतिस्रः कन्याश्चभारत आकूतिर्देवहूतिश्चप्रसूतिरितिसत्तम ५४ आकू
तिंरुचयेप्रादात्कर्दमायतुमध्यमां दक्षायादात्प्रसूतिंचयतआपूरितंजगत् ५५ इतिश्रीमद्भागवतेमहापुराणेतृतीयस्कं
धेद्वादशोध्यायः १२

सार्वभौमोभूत् ५२ यास्त्रीसास्यमहात्मनःमहाबुद्धेःस्वायंभुवमनोःमहिषीभार्याशतरूपाख्याभूत् ततःप्रभृतिकिमासीज्जातंतत्रम
नुःकिमकरोदित्यत्राह तदेत्यादियावदध्यायपरिसमाप्तिः तदामनुशतरूपाप्रादुर्भावप्रभृतिकालेमैथुनधर्मेणप्रजाराधांबभू
विरेवर्द्धंतेइत्यर्थः ५३ सचापिस्वायंभुवोमनुरपिशतरूपायांस्वभार्यायामपत्यानिपंचजीजनत्जनयामास अपत्यशब्दस्यसाधार
णत्वात् तत्रस्त्रीपुंविभागमाह प्रियव्रतेति प्रियव्रतोत्तानपादौपुत्रौ आकूतिदेवहूतिप्रसूत्याख्यास्तिस्रः कन्याश्चाजीजनदिति
पूर्वेणान्वयः ५४ रुचयेरुच्याख्यायमुनयेप्रथमामाकूतिंकर्दमायमध्यमांदेवहूतिंदक्षायप्रसूतिमदात्दत्तवान् यतः याभ्यः आकूत्या
दिभ्यः उत्पन्नाभिः प्रजाभिःकृत्स्नंजगदापूरितंबहुसंतानकराःकन्याइत्यर्थः ५५ इतितृतीयेद्वादशः १२ एवमतीताध्यायांते [illegible] मनो
र्जन्मनितच्चरित्रेचसंग्रहेणाभिहितेस्वायंभुवस्स्वराट्महा

किंभगवत्संतोषेणेत्यत्राह येषामिति यज्ञलिंगोयज्ञलिंगो यज्ञमूर्त्तिः सनातनोभगवान्येषांनतुष्टः तेषांश्रमः अपार्थ्यापनिः प्रयो
जनायभवतीत्यर्थः यद्यतः आत्माभगवान्स्वयंनादृतः उपेक्षित इतियावत् १३ एवमुक्तो मनुः किमुवाचेत्यत्राह आदेशइति अ
मीवसूदन पापनाशन भगवतस्तवादेशेआज्ञायांवर्त्तेयस्थितुहेप्रभो प्रजानांममचइहास्मिन्लोकेस्थानंनिवासस्थानम
नुजानीह्यनुज्ञापयप्रदर्शयेत्यर्थः १४ ननुमहीएवसर्वभूतानांस्थानंकथमुच्यतेस्थानमनुजानीहीतितत्राह यदिति सर्व
सत्वानांसर्वभूतानांयदोकः स्थानंस्थानभूतामहीभूमिः महांभसिमहतिजलेमग्नाअंतर्गताआसीदतोस्यादेव्याभसेरुद्धर

येषांनतुष्टोभगवान्यज्ञलिंगोजनार्दनः तेषांश्रमोह्यपार्थाययदात्मानादृतःस्वयं १३ मनुरुः आदेशेहंभगवतोवर्त्ते
याम्यमीवसूदन स्थानंत्विहानुजानीहिप्रजानांममचप्रभो १४ यदोकःसर्वभूतानांमहीमग्नामहांभसि अस्याउद्धर
णेयत्नोदेवदेव्याविधीयतां १५ मैत्रेयउः परमेष्ठीत्वपांमध्येतथासन्नामवेक्ष्यगां कथमेनांसमुन्नेष्यइतिदध्यौ
धियाचिरं १६ पीतंमयाजलंसर्वंपृथिवीचनिवेशिता सृजतोमेक्षितिर्वार्भिः प्लाव्यमानारसांगता ७ अथात्र
किमनुष्ठेयमस्माभिःसर्गयोजितैः यस्याहंहृदयादासंसईशोविदधातुमे कर्त्तव्यंकरुणासिंधुःसर्वलोकाभयंकरः १८

णेयत्नः हेदेवविधीयतांक्रियतां १५ एवमुक्तोब्रह्माकिमकरोदित्यत्राह परमेष्ठीब्रह्मातदापांमध्येआसन्नांनिमग्नांगामवेक्ष्य
ज्ञात्वाएनांभूमिमहंकथंसमुन्नेष्येउद्धरिष्यामीतिधियाचिरंदध्यौचिंतयामास १६ चिंतामेवप्रपंचयति पीतमिति सर्वंकृ
त्स्नंजलंप्रलयिकंजलंमयापीतंततःपृथिवीचनिवेशितास्थापिता ततोहेतोरसौरान्प्रजाः मेममसृजतः सतःवार्भिःजलैःप्लाव्यमा
नानिम[illegible]क्रममानारसांरसातलंगताप्राप्ता ७ अथानंतरंसर्गयोजितैःप्रयुक्तैरस्माभिःकिमनुष्ठेयंकिंविधेयंयस्याभ
गवतोहृदयात्संकल्पादहमासंजातःभुवःसईशोमेभगवान्विदधातुअनुष्ठेयंसंपादयतु १८ ॥ ॥ ॥ ॥

त

अभिभाषणप्रकारमेवाह यदेत्यादिना यदा स्वभार्यया शतरूपया सह तायं स्वायंभुवो मनुरुत्पन्नः तदायं मनुः प्रणतः नम्रो भूत्वा प्रांजलि
रेनं वेदगर्भं ब्रह्माणं अभ्यभाषत ६ त्वमिति सर्वेषां भूतानां त्वमेक एव पिता जन्मकृद् वृत्तिदः पोषकश्च अतएव यद्यप्येवं पेसा नास्ति तथा
प्यस्माकं ते शुश्रूषा परिचर्या केन कर्मणा भवेत् तद्विधेहीत्युत्तरेणान्वयः ७ तदिति हे ईड्य स्तुत्य आत्मशक्तिषु मच्छक्तिविषयेषु क
र्मसु मध्ये [illegible] केन कर्मणा ते परिचर्या भवेदित्यनुषंगः इदं कर्तव्यमिति कथयेति भावः यत्कर्म कृत्वा इहास्मिन्लोके विष्व
क् सर्वतः यशो भवेत् अमुत्र परलोके गतिश्च भवेत् इति ८ एवं मनुना पृष्टो ब्रह्माह प्रीत इति हे तात तुभ्यमहं प्रीतः हे क्षितीश्वर वां युवा
भ्यां स्वस्ति स्ताद् भूयात् कुत एतत्तत्राह यद्यस्मान्निर्व्यलीकेन निर्दुष्टेन हृदा मनसा मां शाधि अनुशिक्षयेत्यात्मना स्वयमेवार्पितं आ

वि४

मैत्रेय उ० यदा स्वभार्यया साकं जातः स्वायंभुवो मनुः प्रांजलिः प्रणतश्चेदं वेदगर्भमभाषत ६ मनुरु० त्वमेकः सर्वभूता
नां जन्मकृद्वृत्तिदः पिता अथापि नः प्रजानां ते शुश्रूषा केन वा भवेत् ७ तद्विधेहि नमस्तुभ्यं कर्मस्वीड्यात्मशक्तिषु यत्कृ
त्वेह यशो विष्वगमुत्र च भवेद्गतिः ८ ब्रह्मोवाच प्रीतस्तुभ्यमहं तात स्वस्ति स्ताद्वां क्षितीश्वर यन्निर्व्यलीकेन हृदा शाधि मे
त्यात्मनार्पितं ९ एतावत्यात्मजैर्वीर कार्या ह्यपचितिर्गुरौ शक्त्याप्रमत्तैर्गृह्येत सादरं गतमत्सरैः १० स त्वमस्यामपत्या
नि सदृशान्यात्मनो गुणैः उत्पाद्य शास धर्मेण गां यज्ञैः पुरुषं यज ११ परं शुश्रूषणं मह्यं स्यात्प्रजारक्षया नृप भगवांस्ते
प्रजाभर्तुर्हृषीकेशोऽनुतुष्यति १२

स

वेदितं ९ हे वीर गुरौ पितर्यात्मजैः पुत्रैरेतावत्यपचितिः पूजा कर्तव्या का पूजेत्यत्राह शक्त्ये
ति अप्रमत्तैर्निर्मत्सरैः शक्त्या शक्त्यनुरूपेण सादरं गृह्येत आज्ञेति शेषः यथाशक्ति पितुराज्ञा ग्राह्येत्येतावत्पितरि शुश्रूषेत्यर्थः
१० तर्हि का वा पितुस्तवाज्ञा या मया कर्तव्या बोध्यते तत्राह स त्वमिति मत्पुत्री शतरूपा तस्यां त्वमस्यां स्वमहिष्यां आत्मनस्तव गुणैः
सदृशान्यपत्यानि उत्पाद्य गां भूमिं धर्मेण शास अनुशिष्टः यज्ञैः पुरुषं परमपुरुषं यज आराधय ११ इदमेव मह्यं परं शुश्रूष
णं स्यादनेनावयोर्भगवानपि तुष्यतीत्याह परमिति हे नृप प्रजारक्षया भगवान् हृषीकेशो विष्णुः प्रजाभर्तुः प्रजाभर्त्रे तुभ्य
मित्यर्थः प्रजारक्षयेति वान्वयः अनुतुष्यति संतुष्टो भवति १२॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

नी२

नी४

धु२

भा. त. टी.
६२

ब्रह्माणमिति विभुर्हरिर्वराहः ककुभः दिशः प्रतिस्वनयता प्रतिध्वनियुक्ताः कुर्वता स्वगर्जितेन ब्रह्माणं तांश्च द्विजोत्तमान् मरीच्यादीन् हर्षयामास २५ निशम्येति मायामयसूकरस्याश्रयप्रचुरसूकरतनोर्घुर्घुरितं तज्जातीयानुकाररूपघुर्घुरितध्वनिं निशम्य ते जनस्तपःसत्यलोकनिवासिनः जनस्तपःसत्यत्रयस्थानागमस्थाः मुनयः कथंभूतं घुर्घुरितं स्वखेदक्षयिष्णु तेषां संबंधिनो यः खेदः तं क्षपयितुं शीलं आत्मीयदुःखनिरसनस्वभावं ते मुनयः पवित्रैस्त्रिभिः ऋग्यजुःसामसंज्ञकैर्गृणन्स्म स्तुवन्ति स्म खलु ते इति पुनरुक्तिः प्रसिद्धख्यापनाय २६ तेषामिति वेदवितानमूर्त्तिः वेदैर्वितन्यत इति वेदवितानः यज्ञः स एव मूर्त्तिर्यस्य स भगवान् तेषां सतां मरीच्यादीनामात्मनो ये गुणाः कल्याणगुणाः ताननुवदतीति तं ब्रह्म वेदमवधार्य श्रुत्वा भूयः पुनः विनद्य घुर्घुरितं कृत्वा विबुधानां

62

ब्रह्माणं हर्षयामास हरिस्तांश्च द्विजोत्तमान् स्वगर्जितेन ककुभः प्रतिस्वनयता विभुः २५ निशम्य ते घुर्घुरितं स्वखेदक्षयिष्णु मायामयसूकरस्य जनस्तपःसत्यनिवासिनस्ते त्रिभिः पवित्रैर्मुनयोऽगृणन्स्म २६ तेषां सतां वेदवितानमूर्त्तिर्ब्रह्मावधार्यात्मगुणानुवादं विनद्य भूयो विबुधोदयाय गजेंद्रलीलो जलमाविवेश २७ उत्क्षिप्तवालः खचरः कठोरः सटा विधुन्वन् खररोमशत्वक् खुराहताभ्रः सितदंष्ट्र ईक्षाज्योतिर्बभासे भगवान्महीध्रः २८ घ्राणेन पृथ्व्याः पदवीं विजिघ्रन् क्रोडापदेशः स्वयमध्वरांगः करालदंष्ट्रोऽप्यकरालदृग्भ्यामुद्वीक्ष्य विप्रान् गृणतोऽविशत्कं २९ ॥ ॥ ॥ ॥ ॥

ब्रह्मादीनामुदयाय श्रेयसे जलमाविवेश कथंभूतः गजेंद्रस्येव लीला यस्य सः २७ पुनः कथंभूतो विशेषस्यापेक्षायामाह उत्क्षिप्त इति द्वाभ्यां वाराहविशेषणानि उत्क्षिप्तः वालः पुच्छं येन सः खचरः आकाशचारी कठोरः कठिनः सटाः कंधरास्थाः केशास्तान् विधुन्वन् खराणि रोमाणि यस्यां सा त्वग्यस्य सः खुरैराहतान्यभ्राणि येन सः सिते दंष्ट्रे यस्य सः ईक्षा निरीक्षणमेव ज्योतिरालोको यस्य सः प्रकाशमाननेत्र इत्यर्थः महीध्रः महान् उच्चश्च भगवान् बभासे २८ किंच घ्राणेनेति क्रोडापदेशः वराहच्छद्मा ततः स्वयमध्वरांगोऽपि पशुरिव घ्राणेन पृथ्व्याः पदवीं विजिघ्रन्नेषयन्निवेत्यर्थः करालं भयंकरे दंष्ट्रे यस्य तथाभूतोऽप्यकरालदृग्भ्यां सौम्यदृष्टिभ्यां गृणतः स्तुवतो विप्रानुद्वीक्ष्य सः कं उदकं समुद्रजलमविशत् २९ तदानीं तत्र समुद्रध्वनिं उत्प्रेक्षते स इति ॥ ॥ ॥ ॥ ॥

रा. म.
६२

वीर न्वेर

चिंतो निगमयन्वराहावतारं प्रस्तौति इतीति इत्युक्तरीत्याभिध्यायतः चिंतयतो ब्रह्मणो नासाविवरात् नासिकाविवराद्वराहतोकः वराहपोतः अंगुष्ठपरिमाणतः प्रातिपदिकार्थे तसिः निरगात् निर्गतोभूत् हे अनघ विदुर न चानेन चतुर्मुखस्यैव वराहरूपो भवादिति शंकां तर्कयामास चित्रधा किमेतत्सौकरव्याजं सत्त्वं दिव्यमिति चतुर्मुखेनाप्यज्ञायमानतया विचारितत्वोक्तेः १८ तस्य ब्रह्मणोभि पश्यतः सतः स पोतो वराहः खस्थ आकाशे स्थितः सन् क्षणेन गजमात्रः गजपरिमाणः प्रववृधे तदुत्पत्तिः शंकाशरो हणं वृद्धिश्चेति एतत्सर्वं पश्यतामाश्चर्यमिवाभूत् इवशब्देन पश्यतामेवाश्चर्यं न तु भगवतो वराहस्येति सूचितं २० ततो मरीचि प्रभृतिभिः पुत्रैः कुमारैः सनकादिभिः मनुना सह तत्सौकरं वाराहं रूपं दृष्ट्वा चित्रधा बहुधा तर्कयामास २१ तर्कमेव प्रपंचय

इत्यभिध्यायतो नासाविवरात्सहसानघ वराहतोको निरगादंगुष्ठपरिमाणतः १९ तस्याभिपश्यतः खस्थः क्षणेन किल भारत गजमात्रं प्रववृधे तदद्भुतमिवाभवत् २० मरीचिप्रमुखैर्विप्रैः कुमारैर्मनुना सह दृष्ट्वा तत्सौकरं रूपं तर्कयामास चित्रधा २१ किमेतत्सौकरव्याजं सत्त्वं दिव्यमवस्थितं अहो बताश्चर्यमिदं नासाया मे विनिःसृतं २२ दृष्टोंगुष्ठशिरोमात्रः क्षणाद्गंडशिलासमः अपि स्विद्भगवानेष यज्ञो मे खेदयन्मनः २३ इति मीमांसतस्तस्य ब्रह्मणः सह सूनुभिः भगवान्यज्ञपुरुषो जगर्जागेंद्रसंनिभः २४

ति किमिति द्वाभ्यां दिविभवं दिव्यं परमव्योमनिलयं शुद्धसत्त्वमयं परब्रह्म सूकरः व्याजः छद्मवेषो यस्य तत्तदेवमवस्थितं किं इदं विचारद्योतकः मे मम नासाया इदं वराहरूपं [illegible] विनिःसृतं विनिर्गतं महो बताश्चर्यं २२ अंगुष्ठस्य शिरः ऊर्ध्वप र्वतदेवमात्रा परिमाणं यस्य सः प्रथमं दृष्टः पश्चात्क्षणेन गंडशिलासमः स्थूलपाषाणमात्रो दृष्टः यज्ञो विष्णुः यज्ञो वै विष्णुरिति श्रु तेः मे मनः खेदयन् निजरूपतिरोधानेन मोहयन्नेष भगवान् [illegible] नापि स्विदेष वराहमूर्त्तिर्भगवानपि स्वित् अपि स्विदिति संभावना यां भगवान्स्यादित्यर्थः २३ तर्कमुपसंहरन्वाराहतनोर्भगवतश्चारित्रं संहेलमाह इतीत्यादिना यावदध्यायसमाप्ति इत्युक्तरी त्या सूनुभिर्मन्वादिभिः सह तस्य ब्रह्मणो मीमांसतः तर्कयतः सतः अगेंद्रसन्निभः गिरींद्रसदृशो भगवान् यज्ञपुरुषः जगर्ज गर्जत् २४

ज२

२।४ ति॰१

भा॰ त॰ टी॰ उपस्थानप्रकारमेवाह जितमित्यादिना हे अजित ते त्वया जितं सर्वोत्कर्षेण वर्त्तितं जितं जितमिति संभ्रमाद्वीप्सा हे यज्ञभावन यज्ञैर्भाव्यते इति तत्संबुद्धिः यज्ञाराध्येत्यर्थः यद्वा यज्ञान्भावयति निर्वर्त्तयतीति तत्संबुद्धिः यज्ञाधिपत इत्यर्थः यद्वा यज्ञैर्विभाव्यते वयवत्वेनोपास्यत इति तत्संबुद्धिः यावत् अत एव घृतरवत्रयज्ञावयवान्छंदःआदीन वयवत्वेन कल्पयित्वा स्तुतिर्यज्ञतेत्रयीवेदत्रयीविहितयज्ञमयत्वेनोपासनो... ध्यात्वाह त्रयीमयत्वं तत्र तां स्वां स्वकीयां तनुं परिधुन्वते परितः सर्वतः कंपयते तुभ्यं नमः रङ्गेषु कस्याणगुलोष्वस्मां विशेषणं तनुपरिधूननमेव ... प्रथमं स्तूयत इत्यत्राह यज्ञोमेति यद्यस्यां तन्वां रोमाण्येव गर्तेषु रंध्रेष्वध्वयः समुद्रानि लिल्युर्लीनाः तदेवमत्याश्चर्यमिति तदेव प्रथमं स्तूयत इति भावः अत एव कारणस्य सूकराय जगत्कारणीभूताया प्राकृतसूकरस्वरूपिणे यद्वा कारणात्स्विपुत्रारणानि मिन्नाः सूकररूपधारिण इत्यर्थः न हि प्राकृतसूकरस्यैतत्सामर्थ्यं इदमिस्वभिप्रायः एवंभूताय तस्मै नमः ३५ रूपस्याप्राकृतत्वं वदन् रूपज्ञभावनत्वमेव प्रपंचयति रूपमिति चतुर्भिः हे देव यदध्वरात्मकं तव रूपं तत् दुष्कृतात्मनां दुष्कृतमघमलिनं आमनो येषामयोगिनां दुर्दर्शनं ... दर्शनाविषयं प्राकृतं हि रूपं प्राकृतमनोग्राह्यं इदं नु रूपं दर्शनतेत्वग

ऋषय ऊचुः जितं जितं तेजित यज्ञभावन त्रयीं तनुं स्वां परिधुन्वते नमः यद्रोमगर्तेषु निलिल्युरध्वरास्तस्मै नमः कारणसूकरायते ३५ रूपं तवैतन्ननु दुष्कृतात्मनां दुर्दर्शनं देव यदध्वरात्मकं छंदांसि यस्य त्वचि बर्हिरोमस्वाज्यं दृशि त्वङ्घ्रिषु चातुर्होत्रं ३६

यावुधास्य स्मया सूक्ष्मदर्शिभिरित्यादिश्लोकमुक्तविधया योगशुद्धमनोग्राह्यत्वादप्राकृतमित्यर्थः नन्वयोगिभिरपि तादात्विकैर्भवतो विभवरूपं दृश्यत एव कथमेतदुच्यते दुष्कृतात्मनां दुर्दर्शमिति उच्यते न ह्ययोगिनो भगवतो विभवरूपमप्राकृतं पंचोपनिषन्मयं स्वेच्छया वोपात्तमिति यथावज्जानंति किंतु तिर्यगादिजातीयं प्राकृतमित्येव जानंतीत्यनोन विरोधः अत्र यज्ञांगानां छंदःआदीनां भगवदवयवत्वेनानुसंधानरूपदृष्ट्युपासनविनार्थं एवं विशिष्टयज्ञभावनत्वं यदध्वरात्मत्वं इत्यनुघते इदं छंदःआदीनां भगवत्त्वगादित्वरूपेण दृष्ट्युपासनार्थमेव नाम ब्रह्म मनो ब्रह्मेत्यादिवत् न हि काल त्रयवर्त्तिनां संघातस्य तात्कालिकभगवद्विग्रहे तनुसंभवः सर्वशारीरकत्वान्न यज्ञावयवानामपि तदंगत्वकथनं संभवति तथापि प्राकृतानां यज्ञावयवानामप्राकृतत्वावयवत्वासंभव एवं तस्य सर्वशारीरकत्वेन यज्ञावयवानां तच्छरीर... त्वेपि प्रत्येकमेव यज्ञावयवानां तच्छरीरत्वात् तेषां तच्छरीरावयवत्वकीर्त्तनमनुपपन्नमेव तस्मादृष्ट्युपासनाविधानमेवेति मंतव्यं अतश्छंदांसि त्वचि बर्हिः रोमस्वित्यादिकं विघातिरेकनिर्देशः क्वचिदग्निहोत्रं च ... वर्णाउपसदाः शिरोधर इत्स भेदेन निर्देशः प्रापयन्ते

संभवे॰२ संभवो॰२ त्वे॰४ वद्यपि॰४ यस्य तव त्वचि ॥ ॥

ते॰३

सवज्रकूटांगनिपातवेगविशीर्णकुक्षिः वज्रकूटो वज्रपर्वतस्तद्वदंगं यस्य भगवतस्तस्य निपातवेगेन विशीर्णा विलुंठिता कुक्षिर्यस्य सः अत एवार्त इव स्त
नयन् शब्दं कुर्वन् भो यज्ञेश्वर मां पाहि माभिधीयेवं चुक्रोश आर्त्तसादृश्यमाह उत्सृष्टाः प्रसारिता दीर्घा ऊर्मय एव भुजास्तैर्विशिष्टः
३० ततः प्रविष्टो भगवान्किमकरोदित्यत आह खुरैरिति त्रिपरूंषि त्रीणि पर्वाणि सवनात्मकानि पर्वाणि यस्य सः यद्वा त्रीणि पर्वाणि खुरेस्वा
ककुत्स्थले यस्य सः उत्पारपारं उत्पारश्चासौ पारश्च अस्पारः उद्वेलइव पारमतिक्रांतः पारः समर्ग्यस्सारयितास्वेत्यर्थः उत्पारपारं इति द्वि
तीयान्तोपि पाठः तदा उत्पारपारं दरयन्निति क्रियाविशेषणत्वेन योज्यं उत्पाराणां पारम्भन्यानामपारमवसाने वयौ अपः जलानि
खुरैस्तदा दरयन्विदलयन्विलोडयन् कथंभूतैः खुरैः क्षुरप्रैः क्षुरप्रायैः रसायां रसातले गां भूमिं ददर्श कथंभूतां नाम गे अलयसम

सवज्रकूटांगनिपातवेगविशीर्णकुक्षिः स्तनयन्नुदन्वान् उत्सृष्टदीर्घोर्मिभुजैरिवार्त्तश्चुक्रोश यज्ञेश्वर पाहि मेति ३०
खुरैः क्षुरप्रैर्दरयंस्तदाप उत्पारपारं त्रिपरू रसायां ददर्श गां तत्र सुषुप्सुरग्रे यां जीवधानीं स्वयमभ्यधत्त ३१ स्वदंष्ट्र
योद्धृत्य महीं निमग्नां स उत्थितः संरुरुचे रसायाः तत्रापि दैत्यं गदयापतंतं सुनाभसंदीपिततीव्रमन्युः ३२ जघान रुंधा
नमसह्यविक्रमं सलीलयेभं मृगराडिवांभसि तद्रक्तपंकांकितगंडतुंडो यथा गजेंद्रो जगतीं विभिंदन् ३३ तमालनीलं सित
दंतकोट्या क्ष्मामुत्क्षिपंतं गजलीलयांग प्रज्ञाय बद्धांजलयोनुवाकैर्विरिंचिमुख्या उपतस्थुरीशं ३४ ॥ ॥ ॥

ये तत्र तास्वप्सु सुषुप्सुः शिशयिषुः सन् जीवधानीं जीवाधीयंते यस्यां तां प्राणिनामाश्रयभूतां यां गां स्वयमभ्यधत्ताभिमुखेन द
धार जठरे धृतवानित्यर्थः ३१ स्वदंष्ट्रयाविलग्नां महीमुद्धृत्य स भगवान् रसायाः सकाशादुत्थितः संरुरुचे तत्रापि च
सिगदया आपतंतं गदामुद्यम्यागच्छंतं रुंधानं प्रतिबध्नंतमसह्यः विक्रमो यस्य तमादिदैत्यं हिरण्याक्षं सुनाभेन संदीपितः उ
ज्वलः स चासौ तीव्रमन्युश्च भगवान् मृगराट् सिंह इभमिव गजं इव लीलया जघान हतवान् यथा गजेंद्रः जगतीं वप्रां विभिं
दन् रुधिरगंडतुंडो भवति तद्वत्तस्य रक्तमेव पंकस्तेनांकितो गंडौ तुंडं च यस्य स जघानेति पूर्वेणान्वयः ३३ तमालवन्नीलं
सितदंतकोट्याग्रेण क्ष्मां महीं गजस्येव लीलया उत्क्षिपंतं उद्धरंतं ईशं भगवंतं प्रज्ञाय हे अंग हे विदुर विरिंचिप्रमुखास्ततः बद्धां
जलयः संतः अनुवाको वेदस्तद्भागस्तत्संदृशैर्वाक्यैरुपतस्थुः समीपे स्थित्वाभिदधुस्तुष्टुवुरित्यर्थः ३४ ॥

स्यात्तयाप्र

नेतुभ्यं नमो नमः आद्यादिद्विरुक्तिः यद्वा पूर्वभागवेद्यत्वं तदुपबृंहणवेद्यत्वरूपं गुणमेवं विशिष्टाकारभेदात् तदये स्यान नमसो
द्विरुक्तिः कथंभूताय ते क्रियात्मने क्रिया आत्मा शरीरं यस्य तस्मै यद्वा क्रियारूप आत्मा तस्मै इत्यर्थः अनेनस्मान्वेदानादि
क्रियात्मत्वमुक्तं ... सर्वक्रतवे सर्वक्रतुशरीरायेत्यर्थः अनेन श्रौतयज्ञात्मत्वमुक्तं यज्ञसाधनानामपि तदात्मकत्वमुच्यते अखि
लमंत्रदेवताद्रव्यायेति मंत्राः द्रव्यदेवताप्रकाशकानि वेदवाक्यानि देवताः इन्द्रेश्यविशेषा इन्द्रादयो द्रव्याणि आज्यदधिपयःसोमादी
नि अखिलानि मंत्रदेवताद्रव्याणि यस्य तस्मै अखिलमंत्रादिशरीरायेत्यर्थः तत्र मंत्रप्रकाशित तत्तद्द्रव्यदेवतानिष्पाद्य यागहोमा
दिक्रियाबोधकपूर्वभागशरीरवाचकशब्दस्य शरीरपर्यन्तत्वन्यायेन भगवत्यात्वमुक्तं भवति यज्ञानां भगवच्छरीरत्वं बृहदारण्य
के माध्यंदिनपाठे यस्यात्मा शरीरमित्यारभ्य यस्य यज्ञाः शरीरमिति निष्कृतं गुणक्रियाणामपि शरीरत्वमाश्रयत्वद्वारोपपन्नमि
२८ त्यवधेयं एवं पूर्वभागस्य भगवत्परत्वमुक्तं अथोत्तरभागस्य तत्परत्वं वक्तुं ते विशिनष्टि वैराग्येति वैराग्यं शब्दादिविषयेष्वनास

63

नमो नमस्तेऽखिलमंत्रदेवताद्रव्याय सर्वक्रतवे क्रियात्मने वैरा
ग्यभक्त्यात्मजयानुभावितज्ञानाय विद्यागुरवे नमो नमः ४०

क्तिः भक्तिः श्रवणकीर्तनस्मरणार्चनवंदनादिरूपा साधनभक्तिः आत्मजयोऽन्तःकरणजयः एतैरनुभावितं निष्पादितं ज्ञानं ध्रुवास्मृ
तिरूपं ज्ञानं यस्य तस्मै अन्यपदार्थप्रधानबहुव्रीहि बलत्वभ्यसंबंधसामान्यस्य प्रसादयितृत्वप्रसादनीयत्वरूपविशेषे पर्यवसानं
तत्र वैराग्यादिनिष्पाद्य ध्रुवानुस्मृत्यात्मकज्ञानं यत्प्रसादहेतुस्तस्मै इत्यर्थः अत्र वैराग्यशब्दे विवेकादिसाधनसाधनसप्तकं तदर्भू
तविमोक उच्यते भक्तिशब्देन क्रिया आत्मजयशब्देनानुद्धर्षः अत्र केषांचिदुक्तिरन्येषामप्युपलक्षणार्था एवं चानेन विवेकादिसाधनस
प्तकानुनिष्पाद्यभगवत्प्रसादहेतुभूतध्रुवानुस्मृतिबोधकस्योत्तरभागस्य भगवत्परत्वसिद्धिः विद्यागुरव इत्यनेन न्यासविद्याप्रतिपाद
नार कोत्तरभागैकदेशतदुपबृंहणमपि तत्परत्वमुक्तं विद्यागुरवे न्यासविद्याप्रवर्त्तकेन इत्यर्थः न्यासविद्याप्रवर्त्तित्वं भगवद्वाराहराम
कृष्णाद्यवताराणां वाराहपुराणश्रीरामायणश्रीभगवद्गीतादिषु प्रसिद्धं अत्रापि गुणभेदविशिष्टाकारभेदान्नमसो द्विरुक्तिः ४०॥

च्छंदांसि गायत्री त्रिष्टुबादीनि यज्ञांगानि छंदांस्यासन्नित सपक्रम क्रियापदं विपरिणामेनान्वयः रोमसु बर्हिः कुशाः बर्हिरोमस्विसत्रा
षत्वात्तस्योपट्टुतिर्हैर्घिभवः दृशि हव्यं आज्यमंघ्रिषु चातुर्होत्रं [illegible] चतुर्होतृशब्दवाच्यं यज्ञवेषं कर्म ३६ स्रक्तुंडे मुखा
ग्रे आसीत् स्रुव ईशत्व दंष्ट्री नासिकयोरासीदिसनुषंगः एवमुत्तरत्र इडाहविर्भक्षणपात्रं उदरे च मसोमपात्राणि च तत्र क
र्णरंध्रे आसन् प्राशित्रं ब्रह्मभागपात्रं आस्ये मुखे आसीत् ग्रहाः सोमपात्रविशेषाः ग्रसने ग्रसनेमुखांतर्विवरे च्छिद्रे तस्मिन्नासन् हे
भगवन् यदग्निहोत्रमग्निहोत्रनामकं कर्म तत्ते तव चर्वणं भक्षणमासीत् ३७ दीक्षा दीक्षणीयेष्टिस्तवानुजन्म अवतारस्वरूपमित्या
ष्टिः उपसदः उपसदाख्या इष्टयः तव शिरोधरं ग्रीवा प्रायणीय आरंभेष्टिः उदयनीयः अवसानेष्टि प्रायणीयोदयनीये दंष्ट्रे
यस्य [illegible] प्रवर्ग्यः महावीरः जिह्वा आसीत् सभ्यो होमरहितोग्निः आवसथ्यः औपासनाग्निः तयोर्द्वंद्वैक्यं कृतोः क्रतुरूपस्य तव शी
र्षकं शिरः चितयः इष्टकाबंधनविशेषाः ते तवासवः प्राणाः ३८ सोमस्तु रेतः सवनानि प्रातःसवनादीनि त्रीण्यवस्थितिरवस्थानं

स्रुक्तुंडं आसीत् स्रुव ईश नासयोरिडोदरे चमसाः कर्णरंध्रे प्राशित्रमास्ये ग्रसने ग्रहास्तु ते यच्चर्वणं ते भगवन्नग्निहोत्रं ३७
दीक्षानुजन्मोपसदः शिरोधरं त्वं प्रायणीयोदयनीयदंष्ट्रः जिह्वा प्रवर्ग्यस्तव शीर्षकं क्रतोः सभ्यावसथ्यं चितयोसवो हि ते ३८
सोमस्तु रेतः सवनान्यवस्थितिः संस्थाविभेदास्तव देह धातवः सत्राणि सर्वाणि शरीरसंधिस्त्वं सर्वयज्ञक्रतुरिष्टिबंधनः ३९

बाल्याद्यवस्था वा संस्थाविभेदाः अग्निष्टोमात्यग्निष्टोम उक्थ्य षोडशी वाजपेयातिरात्रो आप्तोर्याम इति सप्त ते देहधातवः त्व
गसृगादि सप्त धातवः सत्राणि बहुयजमानकानि कर्माणि सर्वाणि तव शरीरसंधयः त्वं सर्वयज्ञक्रतुः सोमयागाः सयूपाः क्र
तवः तद्रूपस्त्वमित्यर्थः यद्वा [illegible] क्रतुशब्दोनुष्ठेयमात्रपरः उपासनेष्वपि क्रतुशब्दप्रयोगात् तत्र अयज्ञरूपः क्रतुरनुष्ठे
यं कर्म यस्याराधने स सर्वयज्ञक्रतुस्त्वमित्यर्थः इष्टिर्यजिमानमनुष्ठानं तदेव बंधनं मध्याकाय प्रवेशोपायस्य स त्वं इत्यर्थः ३९ एवं भाग
द्वयात्मके वेदे पूर्वभागविहितयज्ञतदंगानि स्तुत्यत्वेनाथ कृतभगवत्स्वरूपत्वयवत्वेन रूपयित्वाथ भगवतो भागद्वयात्मकवेदतत्तु
पबृंहणरूपस्य निवेदितप्रतिपिपादयिषया पूर्वभागोदितयज्ञतदंगयवानां भगवच्छरीरत्वं तदाराधनरूपतां उत्तरभागोदितत
न्यासोपासनानां च तत्प्रसादहेतुत्वेन तस्यापि भागस्य भगवत्परतां च वदंतो नमस्कुर्वंति नमो नम इति ॥ ॥ ॥ ॥

सा:२

३९

४२

भा.त.टी. ६४

स्वकृतार्थतामाविष्कुर्वंति विधुन्वतेति हे ईश वेदमयं निजं वपुः शरीरं विधुन्वता कंपयता त्वया कर्दूसटानां शिखाभिरग्रैरुद्धूता उच्छलि-
ताः ते च ते शिवाम्बुबिन्दवः तैः करणैर्विमृज्यमानाः जनस्तपःसत्यनिवासिनो वयं पाविताः पवित्रीकृताः कृतार्थाश्च भृशमेतिभावः ४५ ॥ भृशमत्यंतं २
वं कृतार्थतां ख्यापयित्वा प्रकृतं भगवत्कर्मणोऽचिंत्यत्वं स्तुतिरेकमुखेन वदंतः तस्य भगवतोनुग्रहं प्रार्थयंते स वा इति अपारकर्मणः
जगत्सृष्ट्याद्यनंतव्यापारस्य तव कर्मणां पारमवधिं यः इच्छति कः स्तोतुमिच्छतीत्यर्थः स वै भ्रष्टमतिः अपाराणां कर्मणां पारं जिज्ञा-
सुर्बुद्धिहीन इत्यर्थः हे भगवन् यस्य तव या योगमाया त्वत्संबंधिनी विचित्र[illegible] सर्गकारिणी शक्तिस्तस्या ये गुणाः सत्त्वादयस्तेषां योगेन
विद् संबंधेन मोहितं समस्तं विश्वं शं सुखं विशिष्टसुखं यथा भवति तथा तेतिक्रियाविशेषणं वा विधेहि कुरु ४६ एवं स्तुतः प्रार्थितो भगवान्

64

विधुन्वता वेदमयं निजं वपुर्जनस्तपःसत्यनिवासिनो वयं सटाशिखोद्धृतशिवाम्बुबिंदुभिर्विमृज्यमाना भृशमीश पाविताः ४५
स वै बत भ्रष्टमतिस्तवैष ते यः कर्मणां पारमपारकर्मणः यद्योगमायागुणयोगमोहितं विश्वं समस्तं भगवन्विधेहि शं ४६ मैत्रे-
य उ० इत्युपस्थीयमानस्तैर्मुनिभिर्ब्रह्मवादिभिः सलिले स्वखुराक्रांत उपाधत्तावितावनीं ४७ स इत्थं भगवानुर्वीं विष्वक्सेनः
प्रजापतिः रसाया लीलयोन्नीतामप्सु न्यस्य ययौ हरिः ४८ य एवमेतां हरिमेधसो हरेः कथां सुभद्रां कथनीयमायिनः शृण्वी-
त भक्त्या श्रवयेत वोशतीं जनार्दनोऽस्याशु हृदि प्रसीदति ४९

न्किं तत्तोऽकरोदित्यत्राह इतीति तैर्ब्रह्मवादिभिः वेदतुल्यवाक्यानि भाषद्भिर्मुनिभिर्मरीच्यादिभिरित्युक्तप्रकारेण उपस्थीयमानः सम्-
यस्थैः स्तूयमानः अविता रक्षिता भगवान्स्वखुराक्रांते सलिले अवनीं भूमिं उपाधत्त स्थापयामासेत्यर्थः स्वखुराक्रांत इत्यनेन निम्नत्वाभावः
त्रतत्त्वं सूच्यते ४७ वराहावतारकथां उपसंहरति स इति प्रजापतिः प्रजानां संरक्षकः भगवान् सर्वैर्गुणैः विष्वक्सेनः सर्वत्र हरिर्ली-
लया क्रीडया रसायाः सकाशादुन्नीतामुद्धृतां उर्वीं भूमिमप्सु न्यस्य प्रतिष्ठाप्य ययौ स्वं धामेत्यर्थः ४८ एतत्कथाश्रवणफलमाह राम
य इति वर्णनीया अपि शङ्कामतः हरिमेधसः यद्विषया मेधा हरति संसारं तस्य हरेः भगवतो [illegible] वराहस्य सुभद्रां सुमंगलां उशतीं कम-
नीयां पवित्रां कथां एवमुक्तप्रकारेण यः पुरुषः [illegible] शृण्वीत शृणुयात् कुर्वन् श्रावयेत्तु वा तस्य हृदि जनार्दनः आशु प्रसीदतीति ४९ ६४

ये१

एवंभागवत्यात्मकवेदवेद्यंभगवंतंनमस्कृत्यपश्चादभीष्टंप्रार्थयितुंतत्रप्रकृतवराहावतारचरित्रंतदवतारसौष्ठवंचविज्ञापयंतिद्वाभ्यां
दंष्ट्राग्रेति हेभगवन्त्वयाकर्त्रादंष्ट्राग्रकोट्याकरणेनसभूधरासपर्वताभूर्महीधृतासतीविराजतेहेभूधरभूधर्त्र तत्रदृष्टांतः यथाव
नान्निःसरतःनिर्गच्छतःमतंगजेंद्रस्यगजश्रेष्ठस्यदतादंतेनधृतापंकयुक्तपद्मिनीविराजतेतथेत्यर्थः अभूतोपमेयंनहिक
चिदपिपद्मिनीगजदंतेनोधृतादृष्टा ४१ त्रयीमयमिति हेनाथदंताग्रेणधृतेनभूमंडलेनतेतववेदंत्रयीमयंमखयज्ञत्वेनरूपितंवेदवि
हितकर्मप्रचुरमिदंसौकरंरूपंचकास्तिशोभते अत्रदृष्टांतःभूयसाविपुलेनशृंगोढघनेनशृंगेणऊढोधृतोघनोमेघोयेनकुलाचलेंद्रस्य
कुलाचलपर्वतश्रेष्ठस्यविभ्रमोविलासोयथातद्वदित्यर्थः ४२ स्वाभिप्रेतंविज्ञापयंतोनमस्कुर्वंति सतस्थुषांसस्थावराणांजगतां
जंगमानांलोकायस्थापनार्थंतवपत्नींजगतांमातरमेनांभूमिंसंस्थापयप्रतिष्ठापययतस्त्वंजगतांपितासिपालकोऽसि ए न

दंष्ट्राग्रकोट्याभगवंस्त्वयाधृताविराजतेभूधरभूःसभूधरा यथावनान्निःसरतोदताधृतामतंगजेंद्रस्यसपंकपद्मिनी ४१ त्र
यीमयंरूपमिदंचसौकरंभूमंडलेनाथदताधृतेनते चकास्तिशृंगोढघनेनभूयसाकुलाचलेंद्रस्ययथैवविभ्रमः ४२ संस्थापयै
नांजगतांसतस्थुषांलोकायपत्नीमसिमातरंपिता विधेमचास्यैनमसासहत्वयायस्यांस्वतेजोऽग्निमिवारणावधाः ४३ कः
श्रद्दधीतान्यतमस्तवप्रभोरसांगतायाभुवउद्विबर्हणं नविस्मयोऽसौत्वयिविश्वविस्मयेयोमाययेदंससृजेऽतिविस्मयं ४४

वंसतितत्रस्थितासंतोवयंत्वयापित्रासहास्यैमात्रेनमसाविधेननमस्कुर्यामनमस्कारेणपरिचरेमेतिस्वतेजोधारणाशक्तिं
याज्ञिकामंत्रतोग्निमरणाविवमंथनकाष्ठेइवयस्यांभूमावधाःनिहितवानसि ४३ एवंस्वाभिप्रेतंविज्ञाप्यस्वकृतार्थतामाविष्कुर्वंति
तस्यभगवतोनंतानिचरितानिविविधविचित्रशक्तेस्तवकेषेतरेरेचितं [illegible] मित्याहुः कइति हेप्रभोऽन्यतमइतरःप्राकृतःकःपुरुषस्तव
रसातलंप्रतिगतायाभुवःउद्विबर्हणंउद्धरणंश्रद्दधीतसत्यमितिविश्वसितुमुत्सहेत तत्रास्ताश्चर्यत्वेननकोपिनिवक्तुंप्रभवेदित्यर्थः
तथापिपुनरसौविस्मयोनभवति यतोविश्वविस्मये विश्वेसर्वेविस्मयायस्मिन्विश्वस्यविस्मयोवायस्मिन्सविश्वविस्मयः ए
वंभूतोभगवांस्त्वंस्वमायया आश्चर्यशक्त्याऽतिविस्मयमत्याश्चर्यमिदंजगत्ससृजेसृष्टवान् अचिंत्यविविधविचित्रसंनिवेशंजग
[illegible] सृजतस्तवेदंभुवउद्विबर्हणंकियदाश्चर्यकरमितिभावः ४५ ॥ ॥ ॥ ॥ ॥ ॥

अथ प्रश्नप्रकारमेवाह द्वाभ्यां तेनेति श्रुतोपजीवनेन ब्रह्मावतारद्योतनाय श्रमं नुवदन्पृच्छति विदुरः तेनेति हे मुनिश्रेष्ठ मैत्रेय येन भू-
मिरुद्धृता तेनैव यज्ञशरीरेण हरिणा आदिवराहेण आदिदैत्यो दैत्यानां प्रथमः वराहकल्पस्यादौ सद्यः प्राप्य स मत्र विव-
क्षितं हिरण्याक्षः हतः आदिवराहेण निहत इत्यनुशुश्रुम त्वत्तः श्रुतवंतो वयं २ प्रश्नं पृच्छति तस्येति स्वदंष्ट्राग्रेण क्षोणीं भूमिं
लीलया उद्धरतस्तस्यादिवराहस्य हिरण्याक्षस्य च मृधः युद्धं कस्माद्धेतोरभूत् युद्धनिमित्तं मितं पृच्छ ३ एवमापृष्टो मैत्रेयः सविस्त- कि ४
रं तत्कथां प्रस्तोष्यन् तावत्प्रश्नमभिनंदति साध्विति द्वाभ्यां हे वीर त्वया साधु पृष्टं साधुत्वं कुतः मर्त्यानां मरणशीलानां मृत्युपाशं
तिमर्द्ध विशातयति मोचयतीति मृत्युपाशविशातनीं तां हरेरवतारकथां त्वं पृच्छसि ४ यया मुनिना नारदेन यया भगवत्कथया उत्तानपदः पु- गीतयार्द्ध

65

विदुर उ० तेनैव नु मुनिश्रेष्ठ हरिणा यज्ञमूर्तिना आदिदैत्यो हिरण्याक्षो हत इत्यनुशुश्रुम २ तस्य चोद्धरतः क्षौणीं स्वदंष्ट्राग्रे-
ण लीलया दैत्यराजस्य च ब्रह्मन्कस्माद्धेतोरभून्मृधः ३ मैत्रेय उ० साधु वीर त्वया पृष्टमवतारकथां हरेः यत्त्वं पृच्छसि मर्त्यानां
मृत्युपाशविशातनीं ४ ययोत्तानपदः पुत्रो मुनिना गीतयार्भकः मृत्योः कृत्वैव मूर्ध्न्यङ्घ्रिमारुरोह हरेः पदं ५ अथात्रापीतिहा-
सोऽयं श्रुतो मे वर्णितः पुरा ब्रह्मणा देवदेवेन देवानामनुपृच्छतां ६ दितिर्दाक्षायणी क्षत्तर्मारीचं कश्यपं पतिं अपत्यकामा
चकमे संध्यायां हृच्छयार्दिता ७

त्रोऽर्भकः ध्रुवः मृत्योर्मूर्ध्नि अंघ्रिं कृत्वा पादं विन्यस्य हरेः परं स्थानं प्रति ध्रुवगतिमारुरोह आरूढवान् ईदृशभगवत्कथायाः प्रश्नः साधिष्ठ इ-
त्यभिप्रायः ५ एवं प्रश्नमभिनंद्य हिरण्याक्षोत्पत्तिहेतुतां तं वक्ष्यन् तदुत्पत्तेः स्वांशप्रदर्शिकत्वमाह अथेति नु हे विदुर अत्रापि त्वया पृष्टे-
ऽपि अयं इतिहासः मे मया श्रुतः कृतः इत्यपेक्षायामाह देवानामपि देवेन ब्रह्मणा चतुर्मुखेनानुपृच्छतां देवानां पुरा पूर्वकाले व- राम.
र्णितः स एव परंपरया मया श्रुत इत्यर्थः ६ तमेवेतिहासं प्रस्तोष्यन् तदुपोद्घातरूपमितिहासं प्रस्तौति दितिरित्यादिना दक्षस्याप-
त्यं स्त्री दाक्षायणी दितिः दितिनाम्नी हे क्षत्तः मरीचेरपत्यं मारीचं मरीचेः पुत्रं कश्यपं पतिं भर्तारं स्वयमपत्यं कामयमाना हृच्छयः कामः तेन पीडिता ६५
अत एव संध्यायां चकमे कामितवती इत्यर्थः ७

किंतत्प्रसादेनेत्यत आह तस्मिन्निति सकलाशिषां सर्वपुरुषार्थानां प्रभौ दातरि तस्मिन् भगवति प्रसन्ने सति दुर्लभं दुर्लभं किमस्ति किमपि
नास्तीत्यर्थः अतो लवात्मभिः तुच्छाभिः ताभिराशीर्भिरलं पर्याप्तं फलं भक्तस्य पादेन प्रार्थनीया इति भावः नचैतावतास्य भजनस्य
विफलत्वं शंकनीयमित्याह अनन्यदृष्ट्या एकांतभक्त्या स्वात्मशरीरकत्वेनेत्यर्थः भजतां नितरां गुहाशयः हृदयकुहरे निविष्टः परः परम
पुरुषः स्वयं परां निरतिशयां स्वगतिं स्वप्राप्तिं विधत्ते संपादयति ४८ अतो निरतिशयपुरुषार्थसाधनभक्त्यां कर्णरसायनां पवित्रां क-
थां श्रुत्वैव ततोऽनंतरं विना को नाम तत्त्येदित्याह क इति पुरुषार्थानां धर्मादीनां सारं चेतीतितया धर्मस्य ह्यापवर्ग्यस्य नार्थोऽर्थायोपक
ल्पते इति प्रथमस्कंधोक्तरीत्या पुरुषार्थसारभिज्ञः को नाम पुराकथानां पूर्ववृत्तांतानां मध्ये भगवत्कथैव सुधा तां कर्णावेवांजलयः तै

तस्मिन्प्रसन्ने सकलाशिषां प्रभौ किं दुर्लभं ताभिरलं लवात्मभिः अनन्यदृष्ट्या भजतां गुहाशयः स्वयं विधत्ते स्वगतिं परः परां ४८
को नाम लोके पुरुषार्थसारवित्पुराकथानां भगवत्कथासुधां आपीय कर्णांजलिभिर्भवापहामहो विरज्येत विना नरेतरं ५१ इ
ति श्रीमद्भा° तृतीयस्कंधे पृथिव्युद्धरणं नाम त्रयोदशोऽध्यायः १३ श्रीशुक उ° निशम्य कौषारविणोपवर्णितां हरेः कथां कारणसू
करात्मनः पुनः स पप्रच्छ तमुद्यतांजलिर्न चातितृप्तो विदुरो धृतव्रतः १

रापीय [illegible] समंतात्पीत्वा किंभूतां भगवत्कथासुधां भवापहां संसारनिवर्तिनीं नरेतरं पशुं विना कः
विरज्येत न कोऽपि विरक्तो भवेदित्यर्थः अहो इति भगवच्चरित्रस्यात्याश्चर्यद्योतकमव्ययं ५१ इति तृतीये त्रयोदशः १३ एवं संग्रहेणाश्रु
तवराहचरितो विदुरः पुनस्तच्चरित्रांतर्भूतहिरण्याक्षवधवृत्तांतं विस्तरबुभुत्सया पृच्छतीत्याह भगवान्शुकः निशम्येति कौषार
विणा मैत्रेयेणोपवर्णितां कारणसूकरात्मनो हरेः कथां निशम्य श्रुत्वा धृतव्रतः धृतं व्रतं भगवत्कथाशुश्रूषारूपं व्रतं येन स अ
तएव न चातितृप्तः संतृप्तः तत्कथाश्रवणेन तृप्तिमलभमानः समुद्यतः हस्तद्वयमेकीकृत्य उद्यतः अंजलिः अंजलिः परमासुप्रासि
प्रंदेवप्रसादिनी मुद्राविधायेन सः विदुरः पप्रच्छ पृष्टवान् १ ॥ ॥ ॥ ॥ ॥ ॥ ॥

एवमुक्तः काश्यपः किमाहेत्यत आह इतीति इत्थं वल्गुभाषिण्या कृपणां दीनां दितिं प्रति वीरमरीचः जितेन्द्रियः काश्यपः प्रवृद्धो योऽनङ्गः का
मस्तेन कश्यपस्तो मोहो यस्यास्तां वाचाऽनुनयन्सान्त्वयन्प्रत्याह प्रत्युवाच १५ उक्तिमेवाह एषत इत्यादिना अनलादयो यत्कृतसेतुपालाः इत्यतेन
अत्र संध्याकालक्षेपापभार्यां प्रशंसन्ति एषत इति पंचभिः हे भीरु यदिच्छसि तत् प्रियं प्रीतिविषयं ते तुभ्यमहं विधास्यामि करिष्यामि तत्
स्यात् तादृशाया भार्यायाः काममभिलषितं को न कुर्यात् सर्वोपि कुर्यात् एवेत्यर्थः कीदृशी चासौ यस्याः कामं सर्वः कुर्यादित्यत आह सिद्धि
रिति यतः यस्याः पत्न्याः सकाशात् त्रैवर्गिकी धर्मार्थकामरूपा सिद्धिः फलं भवेदित्यर्थः १६ परं परत्यातुरीयपुरुषार्थोपि भार्यातः सि
ध्यतीत्याह कलत्रवान्भार्यावान्पुरुषः स्वाश्रमेण सर्वाश्रमानितरान्त्रीनाश्रमानुपादायोपकृत्य सर्वाश्रमोपकारको गृहस्थाश्रम

मैत्रेय उ० इति तां वीरमारीचः कृपणां बहुभाषिणीं प्रत्याहानुनयन्वाचाऽप्रवृद्धानंगकश्मलां १५ कश्यप उ० एष तेऽहं विधास्या
मि प्रियं भीरु यदिच्छसि तस्याः कामं न कः कुर्यात्सिद्धिस्त्रैवर्गिकी यतः १६ सर्वाश्रमानुपादाय स्वाश्रमेण कलत्रवान् व्यसना
र्णवमत्येति जलयानैर्यथार्णवं १७ यामाहुरात्मनो ह्यर्द्धं श्रेयस्कामस्य मानिनि यस्यां स्वधुरमध्यस्य पुमांश्चरति विज्वरः १८ या
माश्रित्येन्द्रियारातीन्दुर्जयानितराश्रमैः वयं जयेम हेलाभिर्दस्यून्दुर्गपतिर्यथा १९ न वयं प्रभवस्तां त्वामनुकर्तुं गृहेश्वरि अप्या
युषा वा कार्त्स्न्येन ये चान्ये गुणगृध्नवः २०

इति भाव व्यसनं इन्द्रियाणां विषयप्रावण्यं रूपं दुःखमेवार्णवस्तमत्येति तरति तत्र दृ
ष्टान्तः जलयानैर्नौभिरर्णवं समुद्रं यथात्येति इन्द्रियजयादिद्वारा तुरीयपुरुषार्थसाधनभूता पत्नीत्यर्थः १७ यामिति श्रेयस्कामस्य
स्वर्गा[illegible]पवर्गाख्यश्रेयस्कामस्यात्मनोऽर्द्धमित्यनेन स्वर्गापवर्गसाधनेषु [illegible] द्वयोः सहाधिकारित्वं सूच्यते यच्छब्दानां तां त्वा
मिति तृतीयश्लोकस्थतच्छब्देनान्वयः यस्यां पत्न्यां स्वस्य धुरं दृष्टादृष्टकर्म अध्यस्य निक्षिप्य विज्वरः निश्चिन्तः पुमान् चरति १८
यां पत्नीमाश्रित्येतराश्रमैर्ब्रह्मचर्याद्याश्रमैर्दुर्जयान् जेतुमशक्यानिन्द्रियाण्येवारातयः शत्रवस्तान् हेलाभिर्वयं जयेम तत्र दृष्टां
तः दुर्गपतिर्दस्यून्दुष्टजीवनांश्चोरादीन्यथेति १९ तामुक्तविधोपकर्त्रीं त्वां कार्त्स्न्येनानुकर्तुं प्रत्युपकर्तुं हे गृहेश्वरि पुरुषायुषादिवा न
प्रभवः न समर्था एवमन्येपि गु[illegible]गृध्नवः गुणकांक्षिणः गुणदर्शिनि इत्यावत् तेपि पूर्णेन पुरुषायुषा शतवर्षेण जन्मान्तरैरपि न प्रभवः
इत्युक्तं २०

कथंभूतं त्वकमेइत्यत्राह हुत्वेति यजुषां यज्ञानां पतिं पुरुषं परमपुरुषमग्निजिह्वमग्निशरीरकं हुत्वा ऽर्के स्तये निम्लोचति सत्य
स्तं गच्छति सति अग्न्यागारे ऽग्निहोत्रशालायामासीनमुपविष्टं समाहितचित्तं च ८ तदुक्तिमेवाह एष इत्यादिना यमेकुवितं ते
१२ न हे विद्वन् काश्यपात्तं उपात्तं शरासनं धनुर्येन स एषः कामः त्वत्कृते त्वदर्थं त्वया सह संगं सर्पद्दीनां रूपेण मां विक्रम्य दुनोति परिता
पयति पीडयति वा अत्र दृष्टान्तः रंभां कदलीं मतंगजो गजइवेति ९ तत्तस्मात्प्रजावत्तीनां सपत्नीनां [illegible] समृद्धिभिः दह्यमाना
यामपि भवाननुग्रहमर्हति युक्तं कर्तुमर्हति तुभ्यं भद्रं मंगलमस्तु १० भर्त्तरि भर्त्तुः सकाशाद्धि भाक्षेव्यत्ययः आर्षः आशोरुमानानां प्राप्तब
हुमानानां स्त्रीणां यशः लोकान्ति त्राविशते लोकेषु विस्तृतं भवतीत्यर्थः कीदृशं तद्बहुमानमित्यपेक्षायां तद्विशदयति भवद्विधः भ
वादृशः पतिर्भर्त्ता यासां मादृशस्त्रीणां प्रजया प्रजारूपेणानुजायते १ हे शवदः तज्जाया भवति यदस्यां जायते पुनरिति श्रुतेः सिद्धं यो

हुत्वाग्निजिह्वं पयसा पुरुषं यजुषां पतिं । निम्लोचत्यर्क आसीनमग्न्यागारे समाहितं ८ द्विजरू एष मां त्वत्कृते विद्वन्काम आ
त्तशरासनः दुनोति दीनां विक्रम्य रंभामिव मतंगजः ९ तद्भवान्दह्यमानायाः सपत्नीनां समृद्धिभिः प्रजावतीनां भद्रं ते मय्या
युङ्क्तामनुग्रहं १० भर्त्तर्याप्तोरुमानानां लोकानाविशते यशः पतिर्भवद्विधो यासां प्रजया ननु जायते ११ पुरा पिता नो भगवा
न्दक्षो दुहितृवत्सलः कं वृणीत वरं वत्साइत्यपृच्छत नः पृथक् १२ स विदित्वात्मजानां नो भावं संतानभावनः त्रयोदशाददत्ता
सां यास्ते शीलमनुव्रताः १३ अथ मे कुरु कल्याणकामं कंजविलोचन आर्तोपसर्पणं भूमन्नमोघं हि महीयसि १४ ॥ ॥ ॥

त्पत्तिः इदमेव तद्बहुमानं यत्स्वभार्यायां पतिः प्रजारूपेण जायते इति भावः ११ किंच पुरा पूर्वकाले यो ऽस्माकं पिता दुहितृवत्सलः पुत्रीषु
वात्सल्यवान् दक्षः अस्मान्प्रति पृथक् प्रत्येकं हे वत्से कं वरं वृणीते त्यपृच्छत १२ स संतानं भावयति वर्द्धयतीति संतानभावनो दक्षः
आत्मजानां दुहितॄणां नः भावमभिप्रायं विदित्वा ज्ञात्वा तासां आत्मजानां मध्ये याः ते तव शीलं स्वभावमनुव्रताः ता अस्मान् त्रयोदश
अददत् त्रयोदशानाम यस्माकं त्वयि भावसाम्ये सति वैषम्याचरणमनुचितमित्यभिप्रायः १३ अथ तत्तः हे काश्यप हे कल्याणमंगल
रूपमे मम कामं अभिलषितं कुरु हे कंजविलोचन हे भूमन् महात्मन् महीयसि महत्तरे पुरुषे आर्त्तानामुपसर्पणं अनु[illegible]छंदनं मोघं
नभवति १४

भा. स्क. टी.

६१

नेति यस्य रुद्रस्य स्वजनः परः अस्वजनो वा लोके नास्ति नात्यादृतो वादरणविषयः कश्चिद्विगर्ह्यः निंद्योपि नोत नास्त्येव प्राकृतस्य हि विषयह र्षः स्वार्थापेक्षिणः स्वजनादिविभागः अस्य तु समदृष्टेरुपेक्षितसांसारिकलोकतद्भूतेर्न स्वजनादिविभागोस्तीति भावः एतदेवाह व यमिति सांसारिकाभिप्रायेणैव यामस्युक्तं तत्त्वदर्शिनोपि स्वस्य पतनशंकास्यत्वाद्यसंसारिणः लोका यस्य रुद्रस्य चरणाभ्यामपविद्धां नि र्माल्यवद्दूरतः परित्यक्तां तेन भुक्तभोगामजां मायां तन्मयीं विभूतिं व्रतैर्नानाविधैश्चर्यसाधनैराशास्महे प्रार्थयामहे २४ ननु श्मशा नेष्वपि शोचवच्चरतोस्य चेरस्मात्किमाशंकस्याद्गुप्त्याह यस्येति यस्य रुद्रस्यानवद्यं निर्दुष्टमाचरितं चरित्रं मनीषिणः बुद्धिमंतः अवि द्यायाः पटलमावरणं विभित्सवः भेत्तुमिच्छवः ज्ञानार्थिन इत्यर्थः गृणंति कीर्तयंति आरोग्यं भास्करादिच्छेच्छ्रियमिच्छेद्धुताशनात् शंकरा ज्ज्ञानमन्विच्छेन्मोक्षमिच्छेज्जनार्दनादित्युक्तरीत्या फलविशेषार्थिभिरुपास्यत्वात्कैश्चिज्ज्ञानार्थिभिस्तच्चरितमुपादेयमिति न पिशाच वच्चरतीति समन्विरनी यइति भावः तर्हि किमर्थं स पिशाचवच्चरतीति तत्राह स्वयं निरस्तसाम्यातिशयोपि निरस्तं साम्यमतिशयश्च

67

न यस्य लोके स्वजनः परो वा नात्यादृतो नोत कश्चिद्विगर्ह्यः वयं व्रतैर्यच्चरणापविद्धामाशास्महे जां बत भुक्तभोगां २५ यस्यानवद्या चरितं मनीषिणो गृणंत्यविद्यापटलं बिभित्सवः निरस्तसाम्यातिशयोपि यः स्वयं पिशाचचर्यामचरद्गतिः सतां २६ हसंति यस्या चरितं हि दुर्भगाः स्वात्मन्रतस्याविदुषः समीहितं यैर्वस्त्रमाल्याभरणानुलेपनैः श्वभोजनं स्वात्मतयोपलालितं २७ ॥ ॥

रा०२

यस्मात्तथाभूतोपि सतां गतिः ज्ञानोपायः सन्पिशाचचर्यांचरति स्वोपासकैरपि जिज्ञासुभिरेवं वर्तितव्यमिति तच्छिक्षार्थं पिशाचवच्चर्यां चरतीति भावः तथा च श्रुतिः यथाक्रतुरस्मिंल्लोके पुरुषो भवतीति निरस्तसाम्यातिशयत्वं च ज्ञानप्रदत्वे वेदितव्यं प्रकरणत्वात् यद्वैतत्सर्वं रुद्रशरीरकपरमात्मदृष्ट्योक्तमिति वेदितव्यं २६ एवमन्वयमुखेन तच्चरित्रस्यानिंद्यत्वमुक्त्वा व्यतिरेकमुखेनाप्याह हसं तीति स्वात्मनिरतस्य स्वात्मानुभवैकनिष्ठस्य समीहितं चेष्टितमविदुषः आर्षत्वाद्धस्य येन द्वितीया अविद्वांसः यस्य रुद्रस्याचरितं हसं ति निंदंति ते दुर्भगाः के ते विद्वांसः ये तस्याचरितं हसंतीत्यत्राह यैः कर्तृभिः वस्त्रादिभिः करणैः श्वभोजनं शुनां भोज्यं स्वशरीरं स्वात्मत या स्वात्माभिन्नत्वेन उपलालितं आर्यदेह एवात्मेति बुद्ध्या देह एव यैर्वस्त्रादिभिरुपक्रियते तेऽविदुष इत्यर्थः २७ ॥ ॥ ॥

राम

६१

अथापि त्वदुपासनानुरूपेण उपकर्तुमशक्तत्वे पितेप्रजार्थेप्रजननाय पुत्रोत्पत्तये इति यावत् यः कामः तमेतं काममलं पर्याप्तं कर
वाणीयथा कृते मां प्रति त्वं नाभिवाच्यं तीभवसि तथा करवाण्येव किंतु मुहूर्तं मुहूर्तकालं प्रतिपालय प्रतीक्षस्व २१ किमर्थं मुहूर्तं प्र
तीक्षणं इत्याशंक्याह तस्य मुहूर्तस्य रहस्यमनुपयुक्ततां कथयति एषेति एषा वेला घोरतमा अत्यन्तमाघोरा एणामपि घोरदर्शनानां घोरं द्र
ष्टव्यं इति तथा यस्यां संध्यावेलायां भूतेशो रुद्र इत्यस्यानुचरा अभिभूतानि प्रमथाख्यभूतानि चरंति संचरंत्यतोपि नायमवसर इति
भावः २२ चरंति चेद्भूतानि तर्हि तत्संचारविषयप्रदेशो वर्जनीय इत्यत्राह एतस्यामिति हे साध्वि एतस्यां संध्यायां भूतभावनो भूता
नां सर्वजीवानां भावयिता सृजयितेति यावत् भगवान् भूतराट् रुद्रः भूतपरिषद्भिः प्रथमगणैः परीतः परिवेष्टितः वृषेण स्ववाहनभू

अथापि काममेतं ते प्रजार्थे करवाण्यलं यथा मां नाभिवाच्यंति मुहूर्तं प्रतिपालय २१ एषा घोरतमा वेला घोराणां घो
रदर्शना चरन्ति यस्यां भूतानि भूतेशानुचराणि ह २२ एतस्यां साध्वि संध्यायां भगवान्भूतभावनः परीतो भूतपर्षद्भिर्वृ
षेणाटति भूतराट् २३ श्मशानचक्रानिलधूलिधूम्रविकीर्णविद्योतजटाकलापः भस्मावगुंठामलरुक्मदेहो देव
स्त्रिभिः पश्यति देवरस्ते २४

तेन वृषभेण नंदिकेश्वरेण सह अटति चरति २३ किंच श्मशानेषु यश्चक्रानिलः वात्या तेन यो धूलिस्तेन धूम्रा विकीर्णाः विक्षिप्ता
विद्योतमाना अग्न्याभा जटाः तासां कलापः समूहो यस्य सः भस्मना अवगुंठः अवलिप्तः अमलः रुक्मो देहो यस्य सः देवः रुद्रः त्रिभिर्न
यनैरिति शेषः पश्यति सर्वं साक्षात्करोति ततस्तद्दर्शनाविषयप्रदेशो नास्तीति भावः पश्यतु देवस्तथापि तमनादृत्य प्रवर्ते इत्यत्रा
ह सतु रुद्रस्ते देवरः त्वद्भगिन्या उमायाः पतिरित्यर्थः ननु पतिभ्रातृत्वे देवरत्वं संभवात् कश्यपो हि मरीचिपुत्रः न तु ब्रह्मपुत्रः स्वजनत्वा
दादरणीय इति भावः यद्वा एकस्य जामातरः परस्परं भ्रातर इति व्यवहारः तेन कृत्वा देवर इत्युक्तं २४ यद्धि स्वजनत्वादादरणीयस्तर्हि
तत एव स्वजनानामस्माकं सर्वं समेतं ते व रुद्र इत्यत्राह ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

भा॰ त॰ टी॰

६८

अथाध्यायशेषो दितिकश्यपयोरुत्तरप्रत्युत्तररूपेण प्रवृत्तस्तत्र तावद्दितिरुवाचेत्याह दितिरिति तेन कर्मावद्येन कर्मदोषेण व्रीडिता ल-
ज्जिता दितिः हे भारत विदुर उपसंगम्य समीपे आगत्य अधोमुखी सती विप्रर्षिं कश्यपं प्रत्यभाषत उक्तवती ३२ भाषणमेवाह मेति
हे ब्रह्मन् कश्यप भूतानामृषभः पतिः रुद्रः मे मम इमं गर्भं मावधीन्माहन्यात् यस्माद्भूतानां रुद्रः पतिर्मतः यस्य रुद्रस्याहमपराधम
हमकरवं कृतवत्यतो मावधीदित्यर्थः ३३ एवं स्वाभिप्रेतमाद्येन नमस्कुर्वन्ती रुद्रं प्रसीदयति नम इति द्वाभ्यां रुद्राय नमः कथंभूताय
महते देवाय महादेवायेत्यर्थः विश्वसंहर्तृत्वादिं द्वाघ्रपेक्षायां महत्त्वं विवक्षितं उग्राय उग्ररूपिणे मीढुषे सकामेषु फलसेचनकर्त्रे
यद्वा रेतःसेकसमाय निष्कामेषु शिवाय पवस्कतो न्यस्तदंडाय संसारे मन्यवे ३४ स इति भामो भगिनीभर्त्ता उरुरनुग्रहो यस्य स उमायाः
पतिर्भगवान् देवो रुद्रः व्याधस्याप्यनुकंप्यानां दयनीयानां स्त्रीणां नोऽस्माकं प्रसीदतां प्रसन्नो भूयात् ३५ एवं भाषंतीं कश्यपः

धृतदंडाय ६

दितिस्तु व्रीडिता तेन कर्मावद्येन भारत उपसंगम्य विप्रर्षिमधोमुख्यभ्यभाषत ३२ दितिरु॰ मा मे गर्भमिमं ब्रह्मन् भूतानामृ-
षभोऽवधीत् रुद्रः पतिर्हि भूतानां यस्याकरवमंहसं ३३ नमो रुद्राय महते देवायोग्राय मीढुषे शिवाय न्यस्तदंडाय धृतदं-
डाय मन्यवे ३४ स नः प्रसीदतां भामो भगवानुर्वनुग्रहः व्याधस्याप्यनुकंप्यानां स्त्रीणां देवः सतीपतिः ३५ मैत्रेय उ॰ स्वगर्भ-
स्याशिषं लोक्यामाशासानां प्रवेपतीं निवृत्तसंध्यानियमो भार्यामाह प्रजापतिः ३६ कश्यप उ॰ अप्रायत्यादात्मनस्ते दो-
षान्मौहूर्तिकादुत मन्नियोगातिचारेण देवानां चातिहेलनात् ३७ भविष्यतस्तवाभद्रावभद्रे जाठराधमौ लोकान्सपालांस्त्री-
श्चंडि मुहुराक्रंदयिष्यतः ३८

68

स्याः ६ १

लोकेश्रस्थिं वा

प्रत्याह मैत्रेय इति स्वगर्भस्य लोक्यां लोकनीयां आशिषं शुभमाशासानां प्रार्थयंतीं प्रवेपंतीं परिकंपंतीं भार्यां
निवृत्तः संध्यायां यो नियमः स यस्य सः प्रजापतिः कश्यपः आह उवाच ३६ तदुक्तमेवाह चतुर्भिः अप्रायत्यादिति ते आत्मनः चित्तस्याशु-
द्धत्वात् अशुद्धिभावान्मौहूर्तिकान् संध्यामुहूर्तकालसंबंधिनो दोषात् उत अपि मम यो नियोगः आज्ञा तस्य योऽतिचारोऽतिक्रमः तेन देवानां
रुद्रादीनां हेलनादपचारात् अपि च ३७ अभद्रौ लोकामंगलकारावत एव जाठराधमौ पुत्राधमौ हे अभद्रे तव भविष्यतः जाठरयोरभद्रत्वमे-
वाविशदयति लोकानित्यर्द्धेन चंडि क्रूरे सपालान् लोकपालैः सहितान्त्रीन्लोकान्मुहुः पुनःपुनराक्रंदयिष्यत इत्यर्थः ३८ ॥ ॥

राम

६८

एवमन्वयव्यतिरेकाभ्यांतच्चरित्रमनिंद्यमित्युक्त्वा तस्या पिशाचचर्याविडंबनमात्रमेवेत्याह ब्रह्मादयोयत्कृतसेतुपालाइत्याद्युक्तिः रु
द्रप्रशंसंघोतिनी ब्रह्मादयइतिअतद्गुणसंविज्ञानोबहुव्रीहिः चित्रगुमानयेतिवत् ब्रह्मणोर्वाचीनाइत्यर्थः अन्यथाद्रुयपरविरोधात्
ब्रह्मणः सर्वभूत्वा तद्दत्तनामधेयत्वंचश्रागुक्तंतेनब्रह्मणोनमस्कार्यत्वंचवस्यतेतोपथोरूपएवार्थः यद्वाब्रह्मादयः पुनस्सपुत्त्रहा दयःन
वब्रह्माणइत्येतेपुराणेनिश्चयंगताइतितेवाब्रह्मशब्दवाच्यत्वावगमात् यद्वारुद्रशरीरपरमात्मइष्टोद्दमुक्तमित्यरगंतव्यं ब्रह्मादयोयेन
रुद्रेण कृताः सेतवः मर्यादास्ताःपालयंतीतितथाइदंविश्वंयत्कारणंयोरुद्रकारणंयस्यतद्दिनिवहुव्रीहिः विश्वयत्कारणमित्यर्थः रुद्रस्यविश्व
संहर्तृत्वा त्तदभिप्रायेण विश्वंयत्कारणमित्युक्तं मायाचयस्याज्ञाकरीमायाहप्रकृतिस्तत्कार्यत्वात्यस्याज्ञाकरीअधिष्ठातृत्वात्तस्यवि
भूम्नोमहीयसोरुद्रस्यापिशाचचर्यारूपंचरितंविडंबनमनुकरणमात्रमेव अहोइत्याश्चर्येस्वितएवंविधस्यमहीयसः पिशाचचर्यानुकरणमाश्च

ब्रह्मादयोयत्कृतसेतुपालायत्कारणंविश्वमिदंचमाया आज्ञाकरीतस्यपिशाचचर्या अहोविभूम्नश्चरितंविडंबनं २८ मैत्रेयउ०
सैवंसंविदितेभर्त्रीमन्मथोन्मथितेंद्रिया जग्राहवासोब्रह्मर्षेर्वृषलीवगतत्रपा २८ सविदित्वाथभार्यायास्तंनिर्बंधंविकर्मणि नत्वादिष्टा
६२ य. हमसितयाप्योपविवेशह ३० अथोपस्पृश्यसलिलंप्राणानायम्यवाग्यतः ध्यायन्जजापविरजंब्रह्मज्योतिः सनातनं ३१ ॥

पस्प२

र्थमित्यर्थः २८ एवमुक्तापिदितिस्ततः किमकरोदित्यत्राहसेत्तिभर्त्राकिएषपेनैवमुक्तप्रकारेणसंविदितेज्ञापितेंसतिमन्मथेनउन्मथितानी
द्रियाणियस्याः सातएववृषलीववेश्येवगतत्रपानिर्लज्जासतीविप्रर्षेःकश्यपवासोवस्त्रंजग्राहवासोगृहीत्वाविचकर्षेत्यर्थः २८ सकश्यपः
भार्यायादितेः विकर्मणिसंध्यायांप्रतिषिद्धरतिकर्मणितंनिर्बंधंवासोग्रहणरूपंविदित्वा दृष्ट्वादिष्टायदैवरूपायनमस्कृत्वातयाभार्ययासह
रहस्येकांतेउपविवेश उपविवेशेत्यनेनमैथुनंलक्ष्यते ३० अथोपवेशनानंतरंसलिलमुपस्पृश्यसलिलेस्नात्वेत्यर्थः प्राणानायम्यनियम्य
वाग्यतः धृतमौनः विरजंनिर्विकारंज्योतिः ज्ञानस्वरूपंसनातनंनित्यंब्रह्मध्यायन् अत्रविरजशब्देनसत्यपदार्थः ज्योतिशब्देनज्ञानपदा
र्थः सनातनशब्देनानंतपदस्यार्थः स्फुरितः विरजशब्देनरजः कार्यविकाररहितत्वस्यज्योतिःशब्देनप्रकाशरूपत्वस्यसनातनश
ब्देनकालपरिच्छेदराहित्यस्यचोक्तत्वात् जजाप एवंविधब्रह्मप्रतिपादकंप्रणवंजजापेत्यर्थः ३१ ॥ ॥ ॥ ॥

किंच यस्य त्वत्पौत्रस्य शीलमनुवर्तितुं निर्वैरादिभिर्गुणैरात्मानमंतःकरणं साधवो भावयिष्यंति शोधयिष्यंते तत्र दृष्टांतः योगैः सार्वाह्निसंयोगैः दुर्वर्णं हेमस्ववर्णमिव ४५ किंच यत्प्रसादाद्भगवतः प्रसादादनुग्रहात् इदं विश्वं प्रसीदति भगवदनुग्रहं विश्वे कृत्स्नं विश्वमपि प्रसादमेव कुर्यादित्यर्थः यदात्मकं भगवानेवात्मा यस्य तत् हि स्वयं भगवदात्मकं सत्स्वदृक् करणानिरपेक्षं सर्वं साक्षात्कुर्वाण इत्यर्थः भगवान् यस्य त्वत्पौत्रस्यानन्यया ऽव्यभिचारिण्या दृशा भक्त्या नोष्यते संतोषं प्राप्नोति ४६ स वै त्वत्पौत्रः महाभागवतः निरतिशयभगवद्भक्तः महानुभावः महात्मा निर्मलांतःकरणः महतां महात्म्यवतामपि मध्ये महीयः निरतिशयमहात्म्यवान् प्रवृद्धया भक्त्या ऽनुभाविते संशोधिते आशये चित्ते वैकुंठं भगवंतं निवेश्य अवस्थाप्य तद्भगवद्व्यतिरिक्तमेव

योगैर्हेमेव दुर्वर्णं भावयिष्यंति साधवः । निर्वैरादिभिरात्मानं यच्छीलमनुवर्तितुं ॥ ४५ यत्प्रसादादिदं विश्वं प्रसीदति यदात्मकं । स स्वदृग्भगवान्यस्य तोष्यतेऽनन्यया दृशा ॥ ४६ स वै महाभागवतो महात्मा महानुभावो महतां महिष्ठः । प्रवृद्धभक्त्यानुभाविताशये निवेश्य वैकुंठमतद्विहास्यति ॥ ४७ अलंपटः शीलधरो गुणाकरो हृष्टः परर्ध्या व्यथितो दुःखितेषु । अभूतशत्रुर्जगतः शोकहर्ता नैदाघिकं तापमिवोडुराजः ॥ ४८ अंतर्बहिश्चामलमब्जनेत्रं स्वपूरुषेच्छानुगृहीतरूपं । पौत्रस्तव श्रीललनाललामं द्रष्टा स्फुरत्कुंडलमंडिताननं ॥ ४९

यदितरं विहास्यति त्यक्ष्यति ४७ किंच अलंपटः अलोलुपः शीलधरः सत्स्वभावः गुणानामाकरः परर्ध्या परेषां ऋद्ध्या समृद्ध्या हृष्टः परेषु दुःखितेषु सत्सु स्वयमपि व्यथितः दुःखितः न भूतो न जातः शत्रुर्यस्य सो ऽभूतशत्रुः जगतः शोकं हरतीति तत्था तत्र दृष्टांतः नैदाघिकं निदाघो ग्रीष्मकालः तत्र भवं तापं उडुराजश्चंद्र इव यथा हरतीति ४८ किंच तव पौत्रः श्रीललनाललामं श्रीः लक्ष्मीरेव ललना तस्या ललामं भूषणं भर्त्तारं नाम परं नार्या भूषणादपि भूषणमित्युक्तेः श्रीत्वाभूषणभूतं ह्रियः पतिं अंतः स्वहृदये कमलमध्ये च बहिश्च द्रक्ष्यति द्रष्टा इष्यते कथंभूतं श्रीललनाललामं स्फुरती ये कुंडले ताभ्यां मंडितं भूषितं आननं मुखं यस्य तं कुंडलयोः श्रोत्रालंकारत्वेपि गंडस्थलादिषु तत्प्रतिफलनवशात् मुखस्यापि शोभातिरिच्यते स्वपुरुषाः स्वभक्तास्तेषां इच्छानुरूपं गृहीतं अप्राकृतं दिव्यशरीरं येन तं अब्जनेत्रं कमलनेत्रं अमलं निरस्तहेयगुणं ४९ ॥ ॥ ॥ ॥

69

राम
६९

प्राणिनां हन्यमानानां सतां कथंभूतानां दीनानां कृपणानाम् अकृतमागः अपराधो यैस्तेषां स्त्रीणां च निगृह्यमाणानां सतीनां
महात्मसु कोपितेषु सत्सु ३८ तदा क्रुद्धो रोषितः विश्वेश्वरः लोकभावनः पालकः स्वयं तीति लोकभावनो सौ भगवान् अवतीर्य वएहन
हृप्ताभ्यां २ रोसं हाभ्यां मा भूय हनिष्यतीति तत्र दृष्टांतः अद्रीन् पर्वतान् वज्रायुधरः इंद्रः यथेति ४० एवमुक्ते पुनर्दितिराह द्वाभ्यां सुनाभं चक्रं
तेनोदारः सुंदरो बाहुर्यस्य तेन भगवता साक्षान्मम पुत्रयोर्वधमाशासेनुमन्ये किं तु हे प्रभो क्रुद्धाद्ब्राह्मणान्नानुमन्ये कोपि
तेषु महत्सु चेत्युक्तत्वात् कोपिताद्ब्राह्मणाद्वधमाशंकमाना एवं प्रार्थयते क्रुद्धान्मा भूदिति ४१ ननु सर्वत्र ब्राह्मणादन्यतो वा
कृतस्मिन्न वधस्तत्र को विशेष इत्यत आह नेति ब्रह्मदंडदग्धस्य ब्राह्मणशापहतस्य भूतानां भयप्रदस्य च नारकाः अ
पि नरकवासिनोपि नानुगृह्णंत्यनुग्रहं न कुर्वंति नरकवासिनो हि सर्वस्मै लोकाय दुःखं मा भूदिति मन्यंते ते प्येतयोः कृपां

दी२ प्राणिनां हन्यमानानां दीनानामकृतागसां स्त्रीणां निगृह्यमाणानां कोपितेषु महत्सु च ३८ तदा विश्वेश्वरः क्रुद्धो भ
गवान् लोकभावनः हनिष्यत्यवतीर्यासौ यथाद्रीञ्छतपर्वधृक् ४० दितिरु० वधं भगवता साक्षात्सुनाभोदारबाहु
नू२ ना आशासे पुत्रयोर्मह्यं मा क्रुद्धाद्ब्राह्मणात्प्रभो ४१ न ब्रह्मदंडदग्धस्य न भूतभयदस्य च नारकाश्चानुगृह्णंति यां
यां योनिमसौ गतः ४२ कश्यप उ० कृतशोकानुतापेन सद्यः प्रत्यवमर्शनात् भगवत्युरुमानाच्च भवे मय्य
पि चादरात् ४३ पुत्रस्यैव तु पुत्राणां भवितैकः सतां मतः गास्यंति यद्यशः शुद्धं भगवद्यशसा समं ४४ ॥

न कुर्वंति दूरतोपि पापिनौ ब्रह्मदंडदग्धभूतभयदौ इत्यर्थः किंच यां यां योनिमसौ ब्रह्मदंडदग्धो लोकभयदश्च गतः प्रा
प्तो भवति तत्रस्था अपि नानुगृह्णंतीत्यर्थः ४२ एवमुक्ते मुनिराह कृतेत्यादि सप्तभिः कृतो योऽपराधः तेन शोकः [illegible]
[illegible] तस्माद्योनुतापः तेन सद्यः प्रत्यवमर्शनाद्युक्तायुक्तविचाराद्भगवति परमपुरुषे उरुमानाच्च भवे रुद्रे मय्यप्यादरा
द्धेतोः ४३ पुत्राणां मार्षत्वाद्बहुवचनं पुत्रयोर्मध्ये एकस्य पुत्रस्य हिरण्यकशिपोः एकः पुत्रः सतां मतः प्रह्लादः पुत्रो भ
विता भविष्यति तमेव वर्णयति गास्यंतीति सार्द्धैः पंचभिः यस्य तव पौत्रस्य यशः भगवद्यशसा समं सहसदृशं वा गास्यंति पञ्च
प्रह्लादस्य सत्वादिस्तुतेरत्रान्वयः ॥ ॥

द्रु४

एवं परमात्मावेशावतारत्वेन ब्रह्मशरीरकपरमात्मदृष्ट्या तस्य सर्वज्ञतामभिधाय पुनस्तद्दृष्ट्यैव तस्मै विशिष्टत्वेन नमस्कुर्वन्ति नम इ
ति ते तुभ्यं नमः कथंभूताय तेऽव्यक्तरूपो न येष्वव्यक्तं कार्यत्वस्य जगतस्तस्य योनये कारणाय नहि व्यक्तरूपो निः किं तु परमात्मेत्यत आहुः गृही
तगुणभेदाय गुणानां भेदः रजोगुणो यस्य सगुणभेदः ब्रह्मा गृहीतः शरीरत्वेन गुणभेदः रजोगुणप्रधानः ब्रह्मा येन तस्मै रजोगु
णप्रधानब्रह्मशरीरकपरमात्मा यो जगत्स्रष्टा स त्वमेवेत्यर्थः नेदं तद्रूपेणावस्थानं परमात्मनः कर्मायत्तमित्याह
मायया संकल्परूपज्ञानेनैव इदं ब्रह्माख्यं शरीरं उपेयुषे गताय एतदुपपादकत्वेन विशिनष्टि विज्ञानवीर्यायेति ज्ञानं ए
व वीर्यं बलं यस्य तस्मै ५ एवंविधस्य तव प्रजानां त्वन्निर्देशवर्तिनामस्माकमन्यैः परिभवोऽनुचित इति सत्तुयन्तो नमस्कुर्वन्ति
त्रिभिः ये त्विति आत्मं जीवान् देवमनुष्यादिरूपेण भावयन्तीत्यात्मभावनस्तमात्मनि स्वात्मन्येव प्रोतं संदर्भितं भुवनं येन तं श्र

नमो विज्ञानवीर्याय माययेदमुपेयुषे गृहीतगुणभेदाय नमस्तेऽव्यक्तयोनये ५ ये त्वानन्येन भावेन भावयन्त्यात्मभावनं
आत्मनि प्रोतभुवनं परं सदसदात्मकं ६ तेषां स्वपक्वयोगानां जितश्वासेन्द्रियात्मनां लब्धयुष्मत्प्रसादानां न कुतश्चित्प
राभवः ७ यस्य वा वाचा प्रजाः सर्वा गावस्तन्त्येव यन्त्रिताः हरन्ति बलिमायत्तास्तस्मै मुख्याय ते नमः ८ स त्वं विधत्स्व शं भूमंस्तम
सा लुप्तकर्मणां अदभ्रदयया दृष्ट्या आपन्नानर्हसीक्षितुं ९

तस्मादि १ तदेवं सदात्मकं कार्यकारणस्वं वस्तु तत्त्वः [illegible] परं [illegible] लक्षणं त्वां येनानन्येनाव्यभिचारेणाभावेन भक्त्या भावयन्त्युपासते ६ ते-
षां कथंभूतानां जितश्वासेन्द्रियात्मनां जिताः श्वासाः प्राणाः इन्द्रियाणि ज्ञानकर्मेन्द्रियाणि आत्मान्तःकरणं च यैस्ते तेषामत्र
त एव स्वपक्वः परिपक्वयोगः भक्तियोगो येषां तेषामत एव लब्धः युष्मत्प्रसादो भवदनुग्रहः यैस्तेषां कुतोऽपि पराभवो नास्ति ७
यस्य तव वा वेदात्मिकया सर्वाः प्रजाः [illegible] गावस्तन्त्येव यन्त्रिताः बद्धाः आपन्नास्त्वदधीनाः सत्यः बलिं त्वत्प्रयोजनं हरन्ति कुर्वन्ति
तस्मै मुख्याय श्रेष्ठाय ते नमः अनेन त्वत्संबन्धिनां त्वन्निदेशवर्तिनामन्यैः परिभवोऽनुचित इति सूचितं भवति ८ एवं नमस्कृत्य
स्वाभीप्सितं प्रार्थयन्ते स त्वमिति हे भूमन् स [illegible] त्वं विधत्स्व तमसा होरात्रविभागाभावेन लुप्तानि कर्माणि येषामस्माकं शं सुखं वि
धत्स्व कुरु आपन्नानापद्गतानस्मान् अदभ्रानल्पा दया यस्यां तया दृष्ट्या ईक्षणेन ईक्षितुं द्रष्टुमर्हसि ९ ननु किमिदानीं भ[illegible]व
तां व्यसनमुपस्थितं तत्राहुः ॥१

दितिकश्यपयोः प्रश्नोत्तरेणानिगमयति श्रुत्वेति दितिर्भागवतं पौत्रं जनिष्यमाणं श्रुत्वा भृशममोदत जहर्ष कस्माद्भगवतः पु
त्रयोर्वधं भावि नं वेदित्वा ज्ञात्वा महामनाः हरिणा सह युद्धेन पुत्रयोर्मरणे कीर्तिः स्यादिति अभवेदिति महोत्सवचित्ता आसीदि
५० इति तृतीये चतुर्दशः १४ एवं देवर्षिब्रह्मसंवादरूपेतिहासोपोद्घातरूपं इतिहासान्तरं प्रसक्तं सेदानीं ब्रह्मनारदसंवादप्र
स्तौ तु तावद्देवानां ब्रह्मणः सन्निधावुपसत्तिहेतुं वदन् पूर्वमितिहासं वर्णयिष्यमाणो निहासेन संगमयति मैत्रेयः प्राजाप
त्यमिति परेषां तेजो हरतीति तथा प्राजापत्यं कश्यपसंबंधि तेजो वीर्यं दितिः सुरार्दनात् शङ्कमाना इन्द्रः कदाचित्किं कु
र्यादिति शङ्कमाना सती शतं वर्षाणि दधार गर्भं धृतवतीत्यर्थः १ तेन गर्भतेजसा हतालोके निरस्तरूपादिप्रकाशे हतौ
जसो ... लोकपाला दिशां ध्वांतेनांधतमसेन व्यतिकरं व्यत्यासं इयं पूर्वादिरियं पश्चिमेति ज्ञानाभावं विश्वसृजे चतु

मैत्रेय उ० श्रुत्वा भागवतं पौत्रममोदत दितिर्भृशं पुत्रयोश्च वधं कृष्णाद्विदित्वासीन्महामना ५० इति श्रीम० भा० तृ
तीयस्कंधे दितिगर्भधारणं नाम चतुर्दशोध्यायः १४ मैत्रेय उ० प्राजापत्यं तु तत्तेजः परतेजोहनं दितिः दधार वर्षाणि
शतं शङ्कमाना सुरार्दनात् १ लोके तेन हतालोके लोकपाला हतौजसः न्यवेदयन्विश्वसृजे ध्वांतव्यतिकरं दिशां
२ देवा ऊचुः त्वमेवैतद्विभो वेत्थ संविग्ना यद्वयं भृशं न ह्यव्यक्तं भगवतः कालेनास्पृष्टवर्त्मनः ३ देव देव जगद्धातर्लोक
नाथशिखामणे परेषामपरेषां त्वं भूतानामसि भाववित् ४ र्मुखत्वात्प्रत्यवेदयन् ब्रह्मसमीपमागत्य विज्ञापयामासु
रित्यर्थः २ निवेदनमेवाह त्वं इति हे विभो ब्रह्मन्त्वमेवैतत् ... द्वेत्थ जानासि किं तदित्यत आहुः यद्यस्माद्वयं भृशं संवि ... ग्नाः
भीताः तत्त्वमेव वेत्सीत्यर्थः अहमपि त्वादृश एवातः कथं जानामीत्याशंक्याह परमात्मनः आवेशावतारत्वात्त्वं सर्वं जानासी
त्यभिप्रेत्याह नहीति कालेनास्पृष्टं वर्त्म ज्ञानं यस्य कालवशादसंकुचितज्ञानिनो भगवतः साक्षि ततः करिष्यामीत्वामाविश्य प्र
जापते रित्युक्तेः तेत्वया व्यक्तमविदितं भगवच्छरीरभूतस्य तवास्ति इत्यर्थः ३ एतदेवाविशदयंति हे देव देव देवानामिंद्रादी
नामपि देव हे जगद्धातः जगन्निर्मातः लोकनाथशिखामणे लोकानां नाथानां शिखामणे परेषामपरेषामस्मदपेक्षया
एवं तेषामर्वाचीनानां च भाववित् दभिप्रायज्ञोसि इति ४ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

य

७१

तमएतदिति पाठांतरं २

यत्र च वैकुंठे शब्दगोचरः शास्त्रैकप्रमाणकः भगवान् षाड्गुण्यपूर्णः आद्यः परमकारणभूतः वृषः श्रेष्ठः पुमान् परमपुरुषः विरजं रजोगुणेन [illegible] नानुविद्धं सत्त्वं शुद्धसत्त्वमयं देहं विष्टभ्य धृत्वा स्वानां नः स्वकीयानस्मान् मृडयन् सुखयन्नास्ते १५ यत्र श्रीवैकुंठे निःश्रेयसं नाम निःश्रेयसाख्यं वनमस्ति कथंभूतं सर्वर्तुश्रीभिः सर्वेषु ऋतुषु याः श्रीः पुष्पादिसंपत्तयस्ताभिः [illegible] कामदुघैः सर्वाभीष्टवर्षद्भिर्द्रुमैः विभ्राजत् विशेषेण भ्राजमानं मूर्तिमत्कैवल्यमिव स्थितं १६ पुनस्तमेव वर्णयति त्रिभिः वैमानिकाः विमानारूढाः सललनाः सस्त्रीकाः यत्र निःश्रेयसवने लोकमलं भगवतो लोकानां शमलानि पापानि क्षपयंति निरस्यंतीति तथा चरितानि चरित्राणि गायंति कथंभूतास्सतो गायंति अंतर्जले अनुविकसदनुस्पंदमानं मधुमकरंदो यासां माधवीनां वासंतिक माधवीपुष्पाणां गंधेन सुगंधेन पिहिता अंतरिता धीर्येषां तथाभूताश्च पि अनिलं तत्प्रापकं वायुं क्षिपंतः तिरस्कुर्वतः चरित्रा

यत्र चाद्यः पुमानास्ते भगवाञ्छब्दगोचरः सत्त्वं विष्टभ्य विरजं स्वानां नो मृडयन् वृषः १५ यत्र निःश्रेयसं नाम वनं कामदुघैर्द्रुमैः सर्वर्तुश्रीभिर्विभ्राजत्कैवल्यमिव मूर्तिमत् १६ वैमानिकाः सललनाश्चरितानि यत्र गायंति लोकशमलक्षपणानि भर्तुः अंतर्जलेऽनुविकसन्मधुमाधवीनां गंधेन पिहितधियोप्यनिलं क्षिपंतः १७ पारावतान्यभृतसारसचक्रवाकदात्यूहहंसशुकतित्तिरिबर्हिणां यः कोलाहलो विरमतेऽचिरमात्रमुच्चैर्भृंगाधिपे हरिकथामिव गायमाने १८ ॥ ॥

निगायंतीत्यर्थः अनेन भोग्यभोगोपकरणभोगस्थानसंनिधेपि तदनादरेण तच्छ्लोकस्थानां भगवद्गुणानुभवै[illegible] तिशयाभिलाषः सूचितः १७ किमुत [illegible] तत्रस्थानां पुरुषाणां गुणानुभवासक्तिरिति यत्तत्तिरश्चां तत्स्थानां भगवत्परतामाह पारावतादयः शकुनिविशेषाः अन्यभृताः कोकिलादात्यूहाः चातकाः बर्हिणो मयूराः पारावतादीनां यः कोलाहलः कलकलः भृंगाधिपे भृंगश्रेष्ठे हरिकथामिव उच्चैर्गायमाने गानं कुर्वति सति अचिरमात्रं क्षणमात्रं विरमते समाप्तो भवति वनस्थाः पारावतादयः कोलाहलं कुर्वंतो भृंगध्वनिमाकर्ण्य स किमपि भृंगराजो हरिकथां गायतीति वयं श्रवणं कुर्म इत्यभिप्रायेणास्य कोलाहलं सत्क्षणमात्रं भृंगध्वनिमेवोपश्रृण्वंतीत्यर्थः १८

वृष्व८

एष इति हे देवा दितेर्गर्भे अर्पितं निहितं काश्यपं कश्यपसंबंधि ओजः वीर्यं सर्वा दिशः तिमिरयन् अंधीकुर्वन् एधसि दारुणि च यथाग्निरिवैधते वर्द्धते १० एवं देवैरुक्तो ब्रह्मा तान् प्रत्याहेत्याह मुनिः स इति शब्दगोचरः वेदवेद्यः स भगवानात्मभूर्ब्रह्मा प्रहस्य विहस्य हे महाबाहो विदुर मधुरया गिरा प्रीणयंस्तर्पयन् देवान् प्रत्याचष्ट उक्तवान् ११ उक्तिमेवाह मानसा इत्यारभ्याध्याय शेषेण हे मानसाः मनःसमुत्पन्नाः पुत्राः युष्मत्पूर्वजाः सनकादयः लोकेषु विगतस्पृहा विषयाभिलाषा येषां तथोक्ताः अपि लोकान् विहायसा नभोमार्गेण चेरुः संचरितवंतः १२ ते सनकादयः एकदा एकस्मिन् काले अमलात्मनः शुद्धसत्त्वमयदिव्यमंगलविग्रहस्य वैकुंठस्याप्रतिहतैश्वर्यस्य भगवतः वैकुंठस्य संबंधि निलयं स्थानं प्रति कथंभूतं सर्वलोकैरर्वाचीनैर्लोकवासिभिर्नमस्कृतं ययुर्गतवंतः तत्र वैकुंठनिलयमिति विष्णुलोकमुपरिस्थानमुच्यते न तु नित्यविभूतिः अष्टमस्कंधे वैकुंठः कल्पितो येन लोको लोकनमस्कृत इति वस्यमाणत्वात् ब्रह्मणापि समाधिगम्यस्य परमाकाशस्य प्रकृतियुक्तैर्गंतुमशक्यत्वात् स्वर्गचूडामणिमालमधिष्ठ्यमिति स्वर्गलोकचूडामणित्वेन वस्य

एष देवा दितेर्गर्भ ओजः काश्यपमर्पितं दिशस्तिमिरयन्सर्वा वर्द्धतेग्निरिवैधसि १० मैत्रेय उ० स प्रहस्य महाबाहो भगवान् शब्दगोचरः प्रत्याचष्टात्मभूर्देवान्प्रीणन्रुचिरया गिरा ११ ब्रह्मोवाच मानसा मे सुता युष्मत्पूर्वजाः सनकादयः चेरुर्विहायसा लोकाल्लोकेषु विगतस्पृहाः १२ त एकदा भगवतो वैकुंठस्यामलात्मनः ययुर्वैकुंठनिलयं सर्वलोकनमस्कृतं १३ वसंति यत्र पुरुषाः सर्वे वैकुंठमूर्तयः येऽनिमित्तनिमित्तेन धर्मेणाराधयन् हरिं १४

माणत्वाच्च कैवल्यमिव मर्त्यमिदिति वस्यमाणत्वेन भक्तिप्राप्य भूमित्वाभावावगमाच्च वैकुंठशब्दवाच्यत्वं च विकुंठस्य भगवतः स्थानत्वादुपपन्नमिति विज्ञेयं १३ तमेव वैकुंठं वर्णयति वसंतीत्या दिद्वाभ्यां भिः यत्र वैकुंठे अनिमित्तनिमित्तेन निमित्तं फलमनिमित्तं निमित्तेनानिमित्तं समप्रवर्त्तकं निमित्तं फलं यस्मिन् कामादिनिमित्तेन रहितेनेत्यर्थः धर्मेण हरिमाराधयन् आराधितवंतः ये पुरुषा वसंति ते सर्वे वैकुंठस्य भगवतः मूर्त्तिराकारो येषां ते तथोक्ताः आराधयन् वसंतीत्यनेन विष्णुलोकवासिनामपि भगवदुपासकत्वमुक्तं धर्मधुवावस्थास्ति येषां यत्र ते लोकसाक्षिः एक इत्यादिना लोकाख्यातिः पूर्वमाराध्यो हागत्य वसंतीत्यपि विनविरोधः नचैकमेन धर्मेण भगवंतमाराधयंतां नित्यविभूतिरेव प्राप्यानित्यसाधनात्तर्हि वैकुंठलोकः सत्यं तत एवकृतत्वात् प्रतिबंधात्प्रथमं नित्यविभूतिमनवाप्य मं वैकुंठमागत्य नत्र भगवदनुभवेन निरस्तप्रतिबंधाः कालांतेनतो नित्यविभूतिं गमिष्यंतीत्यतो न विरोधः अत्रयत्रेत्यादीनां पदानां तद्धिगुर्वधिकृत्यामिसुत्तरत्रान्वयः १४ ॥ ॥

वारि२

भा. त. टी.

७२

वापीष्विति अंग हे देवाः यत्र लोके श्रीः भगवतोच्छेषितं चुंबितं इत्यमतामन्यत किं कुर्वती किं कृत्वा विद्रुममयानि तटानि यासां तासु अमृतवत् अमला निर्मला अमृततुल्या आपो यासु तासु वापीषु निजवने स्वकीयक्रीडावने प्रेष्याभिः स्वकीयपरिचारिकाभिः स्त्रीभिरन्विता तुलसीभिरीशं भगवंतमर्चंती पूजयंती तद्वदके प्रतिबिंबितं स्वलकं शोभना अलकाः चूर्णकुंतला यस्य उन्नता नासिका यस्य तत्स्ववक्त्रं वीक्ष्य दृष्ट्वा निरतिशयविमलासु वापीनामप्सु तुलसीभिरीशमर्चयंती लक्ष्मीरुदकसमीपे स्वमुखं निधाय तत्र प्रतिबिंबितं स्वमुखं भगवन्मुखेन संधाय हो भगवान्मन्मुखं चुंबतीति मेने इत्यर्थः अनेन लक्ष्म्या सौगंध्यमलमुक्तं २२ पुनः कथंभूतं तद्वैकुंठस्थानं इत्यत्राह यद्वैकुंठनिलयं ते न व्रजंति नानुवंति के तदित्यत्राह अघं पापं भिनत्तीति निरस्यतीत्यघभिद्धरिस्तस्माद्न्यविषयाः अर्थकामादिविषयाः अतएव रचनानुवादात् रचनासंपाद्यं तेऽनघेति रचना रूपायास्तस्या अनुवादादनुकीर्तना स्वसपाद्नो पापबोधकदंडनीतिकामतंत्रादिकमनुकीर्तिता मतिघ्नीः बुद्धिभ्रंशकराः कुकथा ये शृण्वंति ते इत्यर्थः पुनः कुकथा एव विशिनष्टि यास्तु कुकथाः हतभगैर्निर्भाग्यैर्नृभिः नरैः श्रु

वापीषु विद्रुमतटास्वमलामृताप्सु प्रेष्यान्विता निजवने तुलसीभिरीशं अभ्यर्चती स्वलकमुन्नसमीक्ष्य वक्त्रमुच्छेषितं भगवतेत्यमतांग यच्छ्रीः २२ यन्न व्रजंत्यघभिदो रचनानुवादाच्छृण्वंति येऽन्यविषयाः कुकथा मतिघ्नीः यास्तु श्रुता हतभगैर्नृभिरात्तसारास्तांस्तान् क्षिपंत्यशरणेषु तमःसु हंत २३ येऽभ्यर्थितामपि च नो नृगतिं प्रपन्ना ज्ञानं च तत्त्वविषयं सहधर्म यत्र नाराधनं भगवतो वितरंत्यमुष्य संमोहिता विततया बत मायया ते २४

ताः अतएव आत्तसाराः आत्तः स्वीकृतः सारः श्रोतॄणां पुण्यं याभिरेवंभूताः सत्यस्तान् श्रोतॄन् अशरणेषु निराश्रयेषु तमस्सु नरकेषु क्षिपंति पातयंति २३ प्रसंगाद्वानेवार्थपरान् श्रोतॄन् शोचति यदिति ये हतभाग्या अभ्यर्थितां प्रार्थनीयां नृगतिं मनुष्यजन्म प्रपन्ना अपि यत्र मनुष्यजन्मनि सहधर्मनिवृत्तिधर्मसहितं ज्ञानं तत्त्वज्ञानं नोपपन्नाः न प्राप्ताः अतएव भगवत आराधनं सि

तं २४ द्धसाधनं भजनं नवं तिन कुर्वंति किंत्वमुष्य भगवतः विततया मायया ते हतभाग्याः संमोहिता भवंति वेति स्वेदे पुनः तत्त्वज्ञानं सहधर्म यत्र यस्मिन्मनुष्यजन्मनि यन्मनुष्यत्वं धात्रा दुर्लभं नृगतिं प्रपन्नाः भगवत आराधनं न कुर्वंति किं तत्र माया संमोहिताः एवेत्यर्थः अस्मिन्पक्षे अभ्यर्थितामपि नो इत्यत्र न अस्माभिरमर्त्यैरपि प्रार्थनीयां नृगतिमित्यर्थः २४ एवं भगवत्कथादिविमुखानां लक्षोक्त्वा सामान्यमभिधाय तां श्रानुशोच्य तत्कृपाश्रवणप्रवणचित्तेस्त श्लोकस्य प्राप्यत्वमाह ॥ ॥ ॥ ॥

तै

७२

र्थ२ संमोहिता

वनस्पतीनां स्थावराणामपि भगवत्परत्वमाह मंदारपारिजातौ सुरतरुविशेषौ कुंदो तिमुक्तलता कुरबकस्तिलकवृक्ष
विशेषः उत्पलं रात्रिविकासि अंबुजं दिवाविकासि नागो नागकेसरः अर्णः पुष्पवृक्षविशेषः मंदारा [illegible] दयः सुमनसः
सुगंधाः अपि तुलसिकाभरणेन भगवता तस्याः तुलस्या गंधे अर्चिते संमानिते सति यस्मिन्वने न स्यास्तत्तस्याः तपः बहुमा-
नयंति तद्वनस्पतयः पारिजातादयो माहशेषु सुगंधिपुष्पेषु सत्स्वपि तुलस्याः कृतो [illegible] भगवान् तुलसीमेव बहुमनुते
अहो [illegible] त तस्यास्तपो महत्सुराकृतमिति बहुमानयंतीत्यर्थः १९ एवं
निःश्रेयसवनमुपवर्ण्य पुनस्तमेव लोकं वर्णयति यदिति यदिति पदद्वयं कुंठं नित्यं भक्तानां विमानैः संकुलं व्याप्तं कथंभूतैः
विमानैः हरेर्भगवतः पदयोः [illegible] र्या आनतिः प्रह्वीभावः अनेन तत्पूर्विका भक्तिर्लक्ष्यते आनतिमात्रदृष्टैर्न कर्मयोगा
दिभिः प्राप्तैरित्यर्थः वैडूर्यादीनां विकारैर्येषां यद्विमानारूढानां कृष्णात्मनां बृहत्कटितटानि यासां स्मितेन शोभीनि मुखा
नि यासां ता अपि स्त्रियः [illegible] उत्स्मयाद्यैः परिहासादिभिः रजः रजोगुणसमुद्भवं कामं नादधु
कृ१ धुर्नजनयामासुः कृष्णात्मनामिति हेतुगर्भं विशेषणं [illegible] भगवत्सेवनिहितचित्तं कामं नादधुरित्यर्थः २० श्रीः लक्ष्मीरूपिणी नौ

मंदारकुंदकुरबोत्पलचंपकार्णपुन्नागनागबकुलांबुजपारिजाताः गंधेर्चिते तुलसिकाभरणेन तस्या यस्मिंस्तपः सुमन
सो बहुमानयंति १९ यत्संकुलं हरिपदानतिमात्रदृष्टैर्वैडूर्यमारकतहेममयैर्विमानैः येषां बृहत्कटितटाः स्मितशोभि
मुख्यः कृष्णात्मनां न रज आदधुरुत्स्मयाद्यैः २० श्रीरूपिणी क्वणयती चरणारविंदं लीलांबुजेन हरिसद्मनि मुक्तदोषा सं
नुं४ लक्ष्यते स्फटिककुड्य उपेतहेम्नि संमार्जतीव यदनुग्रहणेन्ययत्नः २१ मूर्तिमती हरिसद्मनि [illegible] वैकुंठलोकस्थे भगवद्वेश्मनि ली

लांबुजेन लीलार्थं धृतेन कमलेन संमार्जती संमार्जनं कुर्वती संलक्ष्यते इव कथंभूता श्रीः चरणारविंदं क्वणयती नूपुरेण शब्दयंती
मुक्तदोषा मुक्ता दोषा येन तत्स्वरूपा यया सा यद्वा मुक्तदोषेति लीलांबुजविशेषणं मुक्तः प्रसारितो दोः भुजो यस्य तेन इति कथंभूते वे
श्मनि [illegible] स्फटिकमयानि कुड्यानि यस्मिन्नुपेतहेम्नि शोभार्थं मध्ये तत्र तत्र उपेतं संयुक्तं हेम सुवर्णं यस्मिन् तस्मिन्निति पुनः श्रीः यदि
शनविषयदनुग्रहणे यस्याः श्रियः अनुग्रहनिमित्ते श्रीरस्मास्वनुग्रहं कुर्यादिति ब्रह्मादीनां यत्नः आराधनरूपो यत्नः स्यादि
त्यर्थः यद्यपि भगवद्वेश्मनि संमार्जे [illegible] रजो नास्त्येव तथापि स्वसर्यादिकालांछितस्फटिकमयभित्तिषु प्रतिफलिता सती तत्रैवं लक्ष्यते
इवाभूदिति भावः अलमति विस्तरेण २१ श्रीमते रामानुजाय नमः वेंकटेशाय नमोनमः त्रिभागेषु हेमचुंबैः [illegible] पद्मरागपुंजे वि
चित्रीकरणार्थं संमार्जती निरन्तरमेव निर्मलता स्फटिकभित्ति ॥ ॥ ॥ ॥

नीव२

भा· त· टी· ७३

द्वारीति एतयोर्देवयोर्मिषतोः पश्यतोः सतोः तावनाहत्या पृष्टा वयाः पूर्वाद्वाराः कनकवज्रमयकपाटिकयाः पथानिर्विविशुः तथान्यांस्समावां द्वारि निविविशुरित्यर्थः अपृष्ट्वैव ... कारणमाहयस्मात्ते मुनयः अविषमयासमयाविद्याविनयसंपन्नेबुद्ध्या लोगविहारिणीसुकृविधयास्वेच्छयाविगताभिशंकाः अतएवसर्वत्राविहताअनिवारिता स्मरंतैश्शतिपाठे चमनयः सर्वत्राविहतास्मरं तैर्विविशु ॥ कोन्वयः २८ तानिति भगवत्प्रतिकूलशीलौ तौ देवौ वातरशना ... न्वृद्धानपि दशार्द्धवयसः पंचवर्षबालकवदवस्थितान् विदित्वा लतत्वपरमात्मयाथात्म्ये लान्मुनीन्वीक्ष्य तेजः तेषांप्रभावंविहस्याहो आपिमव तांधार्ष्ट्यमिति ३० हरेर्भगवतः प्रतिहारपाभ्यां ताभ्यां देवाभ्यामनिमिषेषु न्येषु देवेषु ... वस्यय शपत्रास स्क्रअर्हतमाः स्वयं पूज्या अपिनिषिध्यमानानिवारणेन परिभूताः अतएवस्फुरितमोभगवोस्तस्संदर्शितं ... दर्शने ... कान्ता

द्वार्येते योर्निविविशुर्मिषतोरपृष्टा पूर्वा यथापुरटवज्रकपाटिकर्याः सर्वत्र तेऽविषमयामुनयः स्वदृष्ट्याविचरंस विहताविगताभिशंकाः २८ तान्वीक्ष्यवातरशनांश्चतुरः कुमारान्वृद्धान्दशार्द्धवयसोविदितात्मतत्वान् वेत्रेणचा स्खलयतामतदर्हणांस्तौ तेजोविहस्य भगवत्प्रतिकूलशीलौ ३० ताभ्यांमिषत्स्वनिमिषेषुनिषिध्यमानाः स्वर्हत्तमा ह्यपिहरेः प्रतिहारपाभ्यां ऊचुःस्सुहृत्तमदिदृक्षितभंगईषत्कामानुजेनसहसात उपप्लुताक्षाः ३१ मुनयऊचुः कोवामिहैत्यभगवत्परिचर्ययोच्चैस्तद्धर्मिणांनिवसतां विषमः स्वभावः तस्मिन्प्रशांतपुरुषेगतविग्रहेवांकोवात्मवत्कुहकयोः परिशंकनीयः ३२

ता२

का२

तथाभूताः संतऊचुः ३१ उक्तिमेवाहत्रिभिः कइति उच्चैर्महत्याभगवत्परिचर्यया इहास्मिन्वैकुंठलोके एत्यप्राप्यअमलोकंप्राप्यत्यर्थः निवसतांत ... धर्मिणांतत्समानधर्मिणांमध्ये कोवांविषमः स्वभावः इहवसतांविषमस्वभावोनुपपन्नइत्यर्थः ननुद्वारपालयोरावयोरयंधर्मएवनूतनपुरातनप्रतिनिरोधनिरोधावन्यथास्वामिकृतदंडपाताप तेरित्याशंक्यापामाहुः तस्मिन्नितिप्रशांतापुरुषायस्मिन्गतोविग्रहः कलहोयस्मात्तस्मिन्प्रोके वाच्यारुषारिवाद्यादिदोषरहितेऽस्मिन्नोके ... आत्मवदात्मिवान्योपि कश्चित्कुटिलः प्रविशेदित्येवपरिशंकनीयः कुहकयोः कुटिलचित्तेवपुवयोः कोवास्तियदिपरिशंकनीयः त्वाहद्युः कश्चि

स्थु: कुटिलो नास्ति येद्वपंशंकनीयाभिवारुणीपान्नौ अन्यथाप्रभोर्देशपातापतिश्च यतश्च स्तत्तु प्राकृतवाक्यारुषाविवादादि ... दोषरहितायंदेशः अतइत्यमाशंकानुपपन्नेत्यर्थः

७३ ३२

सनर

यच्चेति यद्वैकुण्ठनिलयमनिमिषां देवानां ऋषभः श्रेष्ठो भगवांस्तस्यानुवृत्त्या भक्त्या व्रजंति कथंभूता व्रजंति दूरे यमा ह्युपरि नः स्पृह
णीयशीलाः दूरे चिरकालेन यमा ह्युपरि तैः श्लाघ्यशीलाः दूरेयमा ह्युपरि नः स्पृहणीयशीला इत्यपि पाठः तत्रेड उपरि स्थितं यद्वैकुण्ठ
निलयं व्रजंतीति कथंभूताः नः अस्माकं [illegible]भिरपि स्पृहणीयं श्लाघनीयं शीलं येषां ते दूरे चिरकालेन यमः यमोपलक्षितः शमद
मादिगुणो येषां ते किंच भर्तुर्हरेः सुयशसः मिथः परस्परं कथनेन योऽनुरागस्तेन यद्वैक्लव्यमधार्ष्ट्यं तेन या बाष्पकला तया पु
लकीकृतं उद्धर्षितरोम अंगं शरीरं येषां ते व्रजंतीत्यर्थः २५ एवं वैकुण्ठनिलयमनुवर्ण्य यानं तत्र कथा प्रस्तौति तदिति मुनयः
सनकादयः तद्विधं वैकुण्ठनिलयं योगमायाबलेन अणिमाद्यैश्वर्यबलेन उपेत्य प्राप्य चैकान्त्येन परां उत्कृष्टां मुदं संतोष
मापुः प्रापुः कथंभूतं विकुण्ठं अपूर्वमदृष्टपूर्वं विबुधाग्र्या देवश्रेष्ठास्तेषां विमानैः शोचिः प्रकाशो यस्मिन् विचित्रमद्भुतं दिव्य

यच्च व्रजंत्यनिमिषामृषभानुवृत्त्या दूरेयमा ह्युपरि नः स्पृहणीयशीलाः भर्तुर्मिथः सुयशसः कथनानुरागवैक्लव्यबाष्प
कलया पुलकीकृतांगाः २५ तद्विश्वगुर्वधिकृतं भुवनैकवंद्यं दिव्यं विचित्रविबुधाग्र्यविमानशोचिः आपुः परां मुदम
पूर्वमुपेत्य योगमायाबलेन मुनयस्तदथो विकुण्ठं २६ तस्मिन्नतीत्य मुनयः षडसज्जमानाः कक्षाः समानवयसावथ सप्त
मायां देवावचक्षत गृहीतगदौ परार्ध्यकेयूरकुण्डलकिरीटविटंकवेषौ २७ मत्तद्विरेफवनमालिकया निवीतौ विन्यस्तयासि
तचतुष्टयबाहुमध्ये वक्त्रं भ्रुवा कुटिलया [illegible]स्फुटनिर्गमाभ्यां रक्तेक्षणेन च मनाग्रभसं दधानौ २८ ॥ ॥

नं४

ममानुष्टं भुवनैः एकं प्राधान्येन वंद्यं वक्तुमेतद्यं तत्र हेतुः विश्वगुरुणा भगवताऽधिकृतमधिष्ठितं २६ तस्मिन् वैकुण्ठे षट्
कक्षाः आकारद्वाराणि अतीत्य अतिक्रम्यासज्जमानाः भगवद्दिदृक्षया तत्रैवाद्भुतदर्शने आसक्तिमकुर्वाणाः मुनयः
रादिभिः विटंको रुचिरः वेषो ययोस्तौ देवौ इति २७ पुनस्तावेव वर्णयति मत्तेति असितं नीलं यद्बाहुचतुष्टयं तस्य मध्ये
विन्यस्तया मत्ताः द्विरेफाः भ्रमरा यस्यां तया वनमालया निवीतौ वनमालां कंठालंबिनीं कृतवंतावित्यर्थः किंच कुटिलया भ्रु
वा स्फुटौ विकसितौ यौ निर्गमौ श्वासमार्गौ [illegible]नासापुटे ताभ्यां च रक्तेक्षणेन रक्तनेत्रेण च मनाक् ईषद्रभसं उद्वेगं यथा
भवति तथा वक्त्रं दधानौ देवौ २८

भा.त.टी.
७४

तत्तस्मादमुष्य परमस्य सभाभाग्यधिकरहितस्य विकुंठभर्तुर्वैकुंठनाथस्य मंदबुद्धिभ्यां युवाभ्यां वैकुंठनाथसंबंधिभ्यां [illegible] कर्तुं प्र
कृष्टं युक्तं तद्धीमहि विचारयामः किं तदिति चेत् इतः लोकाद्यो कान् व्रजतं गच्छतं कान् लोकान्नित्यत्राह अंतरभावदृष्ट्यापि
रकीयस्वकीयेषु वैषम्यसद्भावबुद्ध्या पापीयसः त्रयः कामक्रोधलोभरूपाः रिपवः यत्र येषु लोकेषु भवंति तान्व्रजतं इत्यर्थः य
द्वि भगवदभिप्रायेण वयं नापराधिनः युवामेवापराधिनौ ततो व्रजतं इत्याशयः अस्माकं वा यदुचितो युवयोः सद्दंडो येनागस
सौ वयमयुक्तं हि किल्बिषे प्रोतिवस्माणत्वात् ननु समहात्मासकृद्दुर्लभ इति भगवतागीतत्वात्कथं नित्यसिद्धानां शापानुभवः
ते हि सदा समस्तहेयरहिताः नित्यासंकुचितज्ञानैश्वर्यादिगुणाश्च नित्यज्ञानक्रियैश्वर्ययोगोपकरणान्विताश्च इति श्रूयते स सं
तथाविधाः परमाकाशवर्तिनः पुरुषाः श्रोतुर्यत्पालो परमव्योमनिलयनित्यसिद्धभगवत्परिजनरूपोस्फूर्तं विशेषाद्ध्व

७१

ध्वस्तस्याधिकारी अन्यथा भगवद्भक्तप्रातिकूल्यायोगाच्च स्वर्गाः प्रवेशनिवारणयोगाच्च साक्षाद्भगवत्परिजनानां नित्य
त्यज्ञानक्रियैश्वर्यवचनाद्भगवदभिप्रायानभिज्ञत्वं नोपपद्यते भगवदनुचरत्वप्राप्तिश्चानुष्ठानविशेषाद्भवतीति स्मर्यते

तद्वाममुष्य परमस्य विकुंठभर्तुः कर्तुं प्रकृष्टमिति धीमहि मंदधीभ्यां लोकानितो व्रजतमंतरभावदृष्ट्या पापीयसस्त्रय
इमे रिपवोस्य यत्र ३४॥

धर्मी

भूमौ गच्छ [illegible] चुविस्मोरत्नचुरो भवेश्चपादि यथानंतत्वेन तेषां तिरस्केण नागरूपवर्णज्ञातीयादयो विद्यंते एवं श्रुत
५२ तवशाद्देवैः सपरिजनतुल्यरूपतामापन्नावद्रवः संभवंति अत्रापि वसंति पत्र पुरुषाः सर्वे वैकुंठमूर्तयः येनिमित्तनिमित्ते
न धर्मेणाराधयन्हरिं इति सामान्यतउक्ताः को वा मिहे त्यभगवत्परिचर्ययोच्चैरित्यनयो भगवदाराधनेन तद्देशप्राप्तिर्वि
शेषतउक्ता किंचनंदः सुनंदोथ जयो विजः प्रबलो बलः कुमुदः कुमुदाक्षश्च विष्वक्सेनः पतत्रिराट् जयश्च भद्रस्तद्वेवश्च
पुष्पदंतश्च सात्वतः सर्वे नागायुतप्राणाष्टु जेया अस्फुरस्फुरेरिति त्रिविक्रमकाले जयविजयस्यान्नावगमाच्च प्राप्ताभि
भूतौ जयविजयौ भासाशाकृयविजयाभ्यां मन्यौ निश्चितौ कृष्णावतारे शापान्मोसमाणयोस्तयोर्वामनावतारे तयोः पारिष
दत्वापत्त्यनुपपन्ने अस्य लोकस्य परमाकाशत्वं दत्तं पूर्वमुपयादितं अतस्त्रिपाद्विभूतिवर्तिभगवत्परिजनव्यतिरि
क्तमनयोः सिद्धमितिन प्रमाणांतरविरोधः ३४ ॥ ॥ ॥ ॥ ॥ ॥ ॥

राम
७४

ल्व२

न२ वा१

नन्वस्त्वयं लोक एवंविधः नाप्यत्र तः कश्चित्कुहकः तथापि भगवतो मत्तः प्रवेशो भगवतो निषिद्ध इति मत्वो रयामइत्याह नहीति
समस्तविश्वं कुक्षौ यस्य तस्मिन्न भगवत्संतरमपमंतः प्रवेशो योग्योनापि सिद्धः नदंतरं वैषम्यं न ह्यस्तीत्यर्थः समस्तकुक्षावि
ति विशेषणेन भगवत्तास्त्वोदरे निवेशयमानं जगत्कुत्र क्वचिद्व्यवहितमित्यानवेति भगवत्संतराभावमेवाह यत्र यस्मिन्ना
त्मनि परमात्मनि आत्मानं जीवात्मानं नभसि महाकाशे नभः घटाकाशमिव धीराः योगिनः पश्यन्ति अयमर्थः किंविद्धत्वे नानु न:४
सदधत इत्यर्थः अत्राविभागेन साम्ये एव नभो दृष्टांतः ननु नादात्म्ये दृष्टांते घ्याकाशप्रदेशानां पार्थिवानां घटपटादीनाइ
वतादात्म्यासंभवादाकाशस्य प्रदेशभेदाननभ्युपगमे घटादेर्विभुत्वमाकाशस्यात्मत्वं वा प्रसज्येत नेनापि कं घटादेः कस्याः
काशेन संबंधः उत प्रदेशभेदेन एवं स्मिन्नसै घटादेर्विभुत्वमाकाशस्याल्पपरिमाणत्वं वा स्थितीयतु प्रदेशभेदांगीकारए
व वेदांतिभिर्नभसो निरवयवादो योसिद्धांतिनः वेदांतेषु तस्यांशभेदेन पंचीकरणप्रदेशादेशेन वायुत्वेन परिणामवादादुत्पत्ति
प्रलयदर्शनाच्च अतएव घटध्वंसे यथाकाशो नाभिन्नो नभसा तथा ब्रह्मलग्नाहं यविध्वंसे विस्वारयन तथा युमानेति शौनः
कवचनमपि नभसः शभेदाभिप्रायेण जीवस्य परस्मादात्मनः औपाधिकवैषम्यविरहे दृष्टांतसमर्पणपरं वेदितव्यं यथा
न ह्यंतरं भगवतीह समस्तकुक्षावात्मानमात्मनि नभो नभसीव धीराः पश्यन्ति यत्र युवयोः स्वरलिंगिनोः किं व्युत्पादितं ह्युदरभेदिभि" पंचतोस्य ३३
गिरयोः संहितः समानत्वमनुब्रजेदिति तत्रैव साम्यदृष्टांताभिधानात् तस्मात् जीवात्मनः परमात्मानं प्रतिशरीरत्वाच्छरीरस्या
प्यविक्षिप्तैकस्वाभाव्याज्जीवपरयोरवांतरवैषम्येपि ज्ञानैकाकारत्वे न साम्याच्चाविभाग एव नभोदृष्टांतः अतएव ह्यविभागे
नोपासनं मुक्तावनुभवश्च अस्त्विति आत्मेति तूपगच्छंति ग्राहयंति चाविभागेन दृष्टत्वादिति चात्तोपयोगः चार्थः अतो भ १८
गवतः सर्वात्मकत्वान्न वैषम्यमस्तीत्यर्थः स्वरलिंगिनोरनुकूलवेषयोर्युवयोः स्वरलिंगिभ्यां युवाभ्यां इत्यर्थः किं व्युत्पादितं राग
द्वेषरहिते स्मिन्नुदेशे किं भवद्भ्यामन्यनिवारणव्युत्पत्तिः कृता नह्यत्र द्वेषव्युत्पत्तिसंभवः अस्पदेशस्य उदरभेदिभिः उत अपि अस्तंभ
अरंभेरांतरं वैषम्यमिति यरति अल्पमप्यंतरं निमित्तमित्यर्थः एवंविधे भवंयतः कारणादेव गम्यते तादृशी व्युत्पत्तिः किंकृ
तेत्यर्थः यद्वा यथान्यस्यरोगादेरुदरभेदयुक्तं भयं भवति तथा स्याद्दृश्यत्वाद्भयं येन कारणेन स्वरवेषधारिणो युवयोर्विशेषाद्व्यु
त्पादितं तत्किंचिदित्यर्थः ३३ ॥ ॥

नकिं

भूतंर

भा. स्क. टी.
७५

अथागछंतं भगवंतं मनुवर्णयन्ति तमिति आगतमागछंतं भगवंतं तेमुनयः अचक्षताऽपश्यन् आपंचमाद्दिदमेवक्रियापदं क
थंभगवंतं स्वपुंभिः स्वपार्षदैः अभिहृतं प्रत्याहृतमौपयिकं छत्रचामरव्यजनपादुकाद्दियस्यतं स्वानांभक्तानां यः समाधिस्तस्य भाग्यं
फलमस्यापि विषयं समाधिभाग्यमधुनाखिलविषयतां गतमिवस्थितमित्यभिप्रायः हंसवच्छुक्लयोस्तयोर्व्यजनयोश्चामरयोर्यः शि
वःसुखरंभिः सुगंधवायुस्तेन पटुत्रोल्लकुल्भमातपत्रं छत्रं सएवशशीतस्यकेसरामुक्तादामविलंबास्तेभ्यः शीकरांबुनितेभ्योगलंतिश्च
बुकणानियस्मिन्नतं हंससदृशचामरेस्वरसमिस्वमंदस्वरस्यसुगंधवायुस्तेनचोलत्सुंद्र मंडलसदृशशुभ्रातपत्रविलंबिमुक्तादामलद
मितविंदुसंदोहालंकृतमित्यर्थः ३८ किंच तंन्त्वप्रसादसुमुखंतं तत्प्रसादेशरणोनुग्रहः तस्मिन्सुमुखं शरणं मनुग्रहं कुर्वंतमिवस्थितं

75 १५

तंत्वागतं प्रतिहृतौपयिकं स्वपुंभिस्तेचक्षताखिलविषयंस्वसमाधिभाग्यं हंसाग्र्यपक्षव्यजनयोः शिववायुलोलच्छुभ्रातपत्रश
शिकेसरशीकरांबु ३८ तत्प्रसादसुमुखं स्पृहणीयधामस्नेहावलोककलया हृदिसंस्पृशंतं श्यामे पृथावुरसि शोभि
तया श्रिया स्वश्चूडामणिं सुभगयंतमिवात्मधिष्ण्यं ३९ पीतांशुके पृथुनितंबिनि विस्फुरंत्या कांच्यालिभिर्विरुतया
वनमालया च वल्गुप्रकोष्ठवलयं विनतासुतांसे विन्यस्तहस्तमितरेण धुनानमब्जं ४० ॥ ॥ ॥ ॥ ॥

२४

इत्यर्थः स्पृहणीयानांकांतिसौकुमार्यादिगुणानां धाम आश्रयं स्नेहयुक्तोयोवलोकः तस्य कलया प्रसरणेन हृदि संस्पृशंतं चित्तमपहरं
तमित्यर्थः पृथौपीने विशालेच श्यामे उरसि शोभितया प्रकाशमानया श्रियालक्ष्म्या स्वर्लोकस्य चूडामणिरिवस्थितं आत्मधिष्ण्य
मात्मनः स्वस्यधिष्ण्यं स्थानं वैकुंठलोकं सुभगयंतमिवस्थितं ३९ किंच पृथुनितंबिनि विपुलनितंबे पीतांबरे विस्फुरंत्या कांच्या मेखलि
या पृथुनितंबोपरिधृतपीतांबरे परिविराजमानया कांच्येत्यर्थः अलिभिर्भ्रमरैर्विरुतया नादितया वनमालया च मधुपानमत्तेन
हृभ्रमरयेत्यर्थः उपलक्षितमित्यध्याहारः यद्वा सुभगयंतमिति पूर्वेणैव संबंधः वल्गुषु सुंदरेषु प्रकोष्ठेषु वलयानि यस्य तं विनता
सुतोगरुडस्तस्यांसे स्कंधे विन्यस्तः अर्पितो हस्तः वामहस्तो येन तं इतरेण दक्षिणेन हस्तेनाब्जं सनालकमलं धुनानं लीलया भ्रामयंतं
इत्यर्थः ४०

स्म.
७५

नि२ नितंब २४

अथैवमुनिभिरुक्तौ भगवद्दास्यौ तेषांपादमूले पतितौ विज्ञापयामासतुरित्याह ब्रह्मा तेषामितिद्वाभ्यां तेषांमुनीनांतद्धीरितं भाषितं कथंभूतं ब्रह्मदंडं ब्रह्मशापरूपमत एवास्त्रपूगैरस्त्रसमूहैरनिवारितमनिवारणीयं इत्युक्तप्रकारेणावधार्य कृत्वा सद्यः तदैव हरेरनुचरौ भृत्यावतिकातरेणातत्पादग्रहौ तेषांमुनीनांपादौ गृहीतवंतौ उरु विभ्यतः अपि किं विभ्यतः भीतान् अहो अस्माभिर्निरपराधाभ्यां भगवत्प्रभ्यां मपराद्धमनेन भागवतापचारेणावयमपि संसरमेति भयं कंपितान्मुनीन् तिअपततांदंडवत्प्रणाममपूर्वकं विज्ञापयामासतुरित्यर्थः ३५ विज्ञापनमेवाह भूयादिति अघोन्पराधवति यत उचितो दंडः भवद्भिः युष्माभिरकारिकृतः नात्र कश्चिद् भवतामपराधइतिभावः अतो सोदंडः नावावयोर्भूयात् अशेषंसुरहेलनं भवद्धि

ब्रह्मोवाच तेषामितीरितमुभाववधार्यघोरं तंब्रह्मदंडमनिवारणमस्त्रपूगैः सद्यो हरेरनुचरावुरु बिभ्यतस्तत्पादग्रहाव पततामतिकातरेण ३५ द्वारपावूचतुः भूयादघोनिभगवद्भिरकारिदंडोयोनौहरेत्तसुरहेलनमप्यशेषं मावोनुता पकलयाभगवत्स्मृतिघ्नो मोहोभवेदिहतुनौव्रजतोरधोधः ३६ ब्रह्मोवाच एवंतदैवभगवानरविंदनाभस्स्वानांवि बुध्यसदतिक्रममार्यहृद्यः तस्मिन्ययौ परमहंसमहामुनीनाना मन्वेषणीयचरणौचलयन्सहश्रीः ३७ ॥ ॥

रस्कार रूपं पापं च हरेतापनुद्यात् किंत्वधोधः मूढयोनिषु व्रजतोरपि नावावयोर्भगवद्विषयस्मृतिनाशको मोहः वः युष्मा कमनुतापकलयापिः कृपानिमित्तोनुतापः तस्यकलयालेशेनापिनभवेदिति अनुगृह्णीतेत्यर्थः ३६ एवंस्वानांमहदतिक्रममप राधंतदैवततक्षणमेवावबुध्य ज्ञात्वा आर्याणांभक्तानांहृद्यः मनोज्ञः अरविंदनाभो भगवान् तस्मिन्नत्रदेशे सनकादयो ध्या स्योचतत्रदेशे ययौ जगाम कथंभूतः सन् सहश्रीः लक्ष्मीसहितः परमहंसायेमहामुनयः सनकादयस्तैरन्वेषणीयौसंशीलनी यौ चरणौ चलयन्स्वचरणदर्शनं प्रतिघातहेतुकंक्रोधंतोदर्शयित्वाशमयिष्यामीतित्वराव्याजेनपद्भ्यामेवययौ इतिभावः मिथुनस्यैवोपास्यत्वप्राप्त्यर्थत्वं घैतेनायमातसंनिधौस्फुततरांकोपमुपशमयितुंचसश्रियः आगमनमित्यभिप्रायः ३७॥

भा०१२

एवंनिरतिशयसर्वगुणलावण्ययुक्तंभगवंतंस्वहृदिध्यात्वाप्य[ ]स्तुवन्तीत्याह पुंसामिति इहास्मिँल्लोके योगानां कर्मयोगज्ञान
योगभक्तियोगादीनां ये मार्गाः प्रकारास्तैर्गतिं स्वरूपं मृगयतां चिंतयतां कर्मज्ञानयोगयोः प्रकारो भक्तियोगसाधनतैकरूपो
भक्तियोगस्य तु मुक्तिसाधनतैकरूपः प्रकारः तैर्मार्गयतां ज्ञानकर्मयोगानुगृहीतभक्तियोगेन गतिस्वस्वरूपं चिंतयतामित्यर्थः
तेषां पुंसां ध्यानास्पदं ध्यानस्य विषयभू[ ]तं बहुमतं मत्यादरास्पदं मतं एवं नयनयोरभिरामं पौंसं पौरुषं वपुः शरीरं दर्शयानं
दर्शयंतमनन्यसिद्धैः स्वासाधारणैरौत्पत्तिकैः स्वाभाविकैरष्टभोगैरणिमाद्यष्टविभूतिभिः यद्वा अहिंसाप्रथमं पुष्पं [ ] पुष्प
वतं ६ मिंद्रियनिग्रहः इत्याद्युक्तैर्भोगैर्युतं युक्तं भगवंतं समगृ[ ]णन् सम्यग् स्तुवन् ४५ स्तुतिमेवाह यावदध्यायसमाप्तिः तत्र चिरमा

76

पुंसां गतिं मृगयतामिह योगमार्गैर्ध्यानास्पदं बहुमतं नयनाभिरा
मं पौंस्नं वपुर्दर्शयानमनन्यसिद्धैरौत्पत्तिकैः समगृणन्युतमष्टभो
गैः ४५ सनकादय ऊचुः योऽन्तर्हितो हृदि गतोऽपि दुरात्म[ ]नां त्वं सो
द्यैव नो नयनमूलमनंत राद्धः यर्ह्येव कर्णविवरेण गुहां गतो नः
पित्रानुवर्णितरहा भ[ ]वदुद्भवेन ४६ ॥ ॥ ॥ ॥

स्माभिर्हृदये ध्यातमतस्त्वमस्मद्भाग्यवशाद् घनयनविषयतां गतोसीत्यात्मनः कृतार्थतामाहुः य इति दुरात्मनामयोगिनां
हृदि गतोपि विद्यमानोपि अंतर्हितस्तिरोहितः स त्वमद्यैव नोऽस्माकं नयनमूलं नयनविषयतां हे अनंत राद्धः प्राप्तः यर्ह्येव यद
त्व२ दैवैत उत्पन्नेन पित्रा अस्मत्पित्रा चतुर्मुखेनानुवर्णितरहा उपदिष्टस्वरूपगुणादिविभूतिर्भवान् भक्तहृद्विकर्णविवरेण नोऽस्मा
कं गुहां हृदयगुहां प्रविष्टः त्वत्पुत्रादस्मत्पितुश्चतुर्मुखादुपदिष्टरहस्यं तन्मूर्त्तिं तावन्नृहृदये ध्यात इदानीं नयनमूलं गतोसि
अतो वयं कृतार्था इति भावः ४६ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

ती॰

किंच विघतं तडित्तं क्षिपंती तिरस्कुर्वती ये मकराकृत कुंडले ताभ्यां यन्मंडनमलंकरणं तस्मिन्नर्हे गंडस्थले यस्मिं तत् चुंतदुन्नसं चोदग्र
नासिकं मुखं च यस्य तं मणियुक्तं किरीटं यस्य तं दोर्दंडानां यः खंडः समूहः तस्य विवरे मध्ये स्थितेन हरता मनोहरेण परार्ध्य उत्कृ
ष्टो यो हारो मुक्ताहारस्तेन कंधरायां कंठगतेन स्थितेन कौस्तुभेन च उपलक्षितं ४१ किंच इंदिरायाः अहं निरतिशयसौंदर्यनिधिरिति
यद्गर्वस्पात्तत्स्मितं अहमयं विस्मयशक्तिया वल्लत्तद्वभगवतो विग्रहे विस्मयेज यस्त्वमुत्तमभूतं मत्तोमन्येदं निरतिशयसौंदर्यं इति स्व
स्वाङ्गस्मितं तदङ्गे देहे... निरतिशयसौंदर्यवत्तात्तस्या अपि स्कंदरामस्पर्शः सुनाभक्रान्तो धिया विरचितं भक्तैः स्वमनस्येव
वितर्कितं इत्यर्थः बहुसौष्ठवेन निरतिशयसौंदर्येण ऊं युक्तं मह्यं मम ब्रह्मणः भवस्य रुद्रस्य भवतां च भजंतं भजनीयं कमणिश
तद्रूपतया आर्षत्वात् अंग हे देवा निरीक्ष्य दृष्ट्वा न वितृप्ता दृशः न वितृप्ता दृष्टा ययोस्ति मधापि ताः आत्मलीये षां ते मुनयः कैः

धिघृतं क्षिपन्मकरकुंडलमंडनार्हगंडस्थलोन्नसमुखं मणिमत्किरीटं दोर्दंडखंडविवरे हरता परार्ध्यहारेण कंधरगतेन च
कौस्तुभेन ४१ अत्रोपसृष्टमिति चोत्स्मितमिंदिरायाः स्वानां धिया विरचितं बहुसौष्ठवाढ्यं मह्यं भवस्य भवतां च भजंतमंग
नेमुर्निरीक्ष्य नवितृप्तदृशो मुदा कैः ४२ तस्यारविंदनयनस्य पदारविंदकिंजल्कमिश्रतुलसीमकरंदवायुः अंतर्गतः
स्वविवरेण चकार तेषां संक्षोभमक्षरजुषामपि चित्ततन्वोः ४३ ते वा अमुष्य वदनासितपद्मकोशमुद्वीक्ष्य सुंदरतराधर
कुंदहासं लब्धाशिषः पुनरवेक्ष्य तदीयमंघ्रिद्वंद्वं नखारुणमणिश्रयणं निदध्युः ४५ शिरोभिः मुदा नेमुर्नमश्चक्रुः ४२ त

स्यारविंदनयनस्य पुंडरीकाक्षस्य भगवतः पदारविंदयोः किंजल्का अंगुलयः तैर्मिश्रितो यस्तुलसीमकरंदरस्तस्य वायुः स्ववि
वरेण स्वनासारंध्रेण अंतर्गतः सन्नक्षरजुषामप्यात्मानुसंधाने नावबद्धमनसामपि तेषां मुनीनां चित्ततन्वोः संक्षोभं चकार चित्त
संक्षोभ आनंदपारवश्यं तनुक्षोभो रोमांचः ४३ संक्षोभकारित्वं संभ्रममाह ते इति ते मुनयः अमुष्य भगवतः वदनमेवासितपद्म
कोशमुद्वीक्ष्य ऊर्ध्वं वीक्ष्य श्यामवर्णत्वादसितपद्मकोशो हस्यंतितः अनूनोपमेयं रूपभूतं सुंदरतराधरकुंदहासं सुंदर
तरे अरुणे अधरोष्ठे कुंदवत्हासो यस्मिंस्तं लब्धाशिषः लब्धमनोरथाः संतः पुनस्तदीयं भगवतः संबंधि नखा एवारुणमणयस्तेषां श्र
यणमाश्रयमंघ्रिद्वंद्वं निरीक्ष्य पुनः पुनरेव निरीक्ष्य उपसर्वं गिल्याव एष ग्रहणाशक्ताः पद्माङ्घ्रिं दध्युर्ध्यातवंतः ४५ ॥ ॥

कामममिति हे भगवन्स्ववृजिनैः स्वेषामस्माकं वृजिनैर्दुरितैः कामं नोस्माकं निरयेषु निरयप्रायेषु नीचयोनिषु भवो जन्मस्यान्नु विं
तर्केयदि नूनं ते तव पदयोः नश्चेतश्चित्तं मलिवद्भृंगवद्रमेत पदि नः वाचः गिरः तुलसीवत्तेंघ्रिशोभाः अंघ्रीशोभयंती तांघ्रिशो
भाः स्तुति परा स्युरित्यर्थः यदि नः कर्णरंध्रः ते गुणगणैः पूर्येत नित्यं त्वद्गुणगणाश्रवणपरास्यादित्यर्थः इदं शेषः पापादीनां
भगवद्दर्शनार्चनादिरूपलक्षणं न तद्दुरितानुसारेण जन्मसत्त्वान्न तत्र शोकः इदं तु भगवंतं प्रति प्रार्थनीयमवशिष्यते यच्चेत आदी
नां भवत्पादारविंदध्यानादिप्रावण्यमिति तेषां वत्तैवकृतार्था भवेयुरित्यर्थः ४८ इदं तु लोकदृष्ट्याक्रमं यत्त्वदृष्ट्यास्वकृतार्थतां
वदंतो नमंति प्रादुरिति हे पुरु[illegible] हूत बहुभक्तसर्वोपनिषद्वेद्येत्यर्थः यद्रूपविशेषणं पुरु[illegible] मिदं तं वेद्यं पंचोपनिषत्प्रति
पाद्यमित्यर्थः यदिदं रूपं दिव्यमंगलविग्रहं प्रादुश्चकर्थ प्रकटीकृतवानसि तेन रूपेण तद्दर्शनेनेत्यर्थः हे ईश अस्माकं दृशः

कामं भवः स्ववृजिनैर्निरयेषु नः स्याच्चेतोलिवद्यदि नु ते पदयो रमेत वाचश्च नस्तुलसीवद्यदि तेंघ्रिशोभाः पूर्येत ते गु
णगणैर्यदि कर्णरंध्रः ४९ प्रादुश्चकर्थ यदिदं पुरुहूत रूपं तेनेश निर्वृतिमवापुरलं दृशो नः तस्मा इदं भगवते नम इद्
विधेम योनात्मनां दुरुदयो भगवान्प्रतीतः ५० इति श्रीमद्भा० तृतीयस्कंधे जयविजययोः सनकादिशापो नाम पंच
दशोध्यायः १५ ब्रह्मोवाच इति तद्गृणतां तेषां मुनीनां योगधर्मिणां प्रतिनंद्य जगादेदं वैकुंठनिलयो विभुः १ ॥ ॥

नेत्राणि निर्वृतिं सुखमलं भृशमवापुः प्रापुः अनात्मनां न विद्यते आत्मांतःकरणं स्ववशं येषां तेषामयोगिनां दुरुदयः
दुरवगमः यो भगवानिती त्यमवधारणेवा प्रतीतः दृष्टः अस्माभिरिति शेषः तस्मै भगवते तुभ्यं इदं नमः कुर्म इत्यर्थः ५० इ
ति तृतीये पंचदशः १५ एवं मुनिभिरावेदितस्वरूपगुणविभूतिस्तत्प्रसादितो भगवानाश्रितफलभः प्रियो हि ज्ञानिनो त्य
र्थमहं स च मम प्रियः ज्ञानी त्वात्मैव मे मतमिति स्वगीतोक्तरीत्यानिरतिशयस्वंतीति विषयान्मुनीन्प्रसादयितुमुवाचेत्याह
ब्रह्मा इतीति मुनीनां शुभश्रयसंशीलनशीलानां योगधर्मिणां भगवद्भक्तियोग एव धर्मो येषामस्तीति तेषां इत्युक्तप्रका
रेण गृणतां स्तुवतां तेषां सनकादीनां तद्भाषितं प्रतिनंद्य शिरसा संश्लाघ्य वैकुंठः स्थानं निलयो यस्य स विभुर्भगवानिदं वक्ष्यमा
णं जगाद उक्तवान् १ ॥

77

वं० ४

श्लो०

७७

ननु भवत्प्रियो यदि वयं मद्यद्वहं त्वं तत्कथं मद्दर्शनेन कृतार्थतेत्यत्राहुः तमिति हे परम परो मायस्यास्य परमः सर्वोत्कृ
ष्टस्तस्य संबोधनं सर्वोत्कृष्ट भगवन्सत्वेन शुद्धसत्वमयदेहेन एषां भक्तानां संप्रति सम्यक्प्रतिक्षणं रतिमनुरागं रचयं
तं न वा अरे पत्युः कामाय पतिः प्रियो भवति आत्मनस्तु कामायेति स्मारितं पूर्वोक्तप्रविधं त्वामेवात्मतत्त्वं प्रियोपदिष्टमात्मत
म४ त्वं विदामः प्रत्यभिजानामः किं तदात्मतत्त्वं यन्मु [illegible] भिजानन्तीत्यत्राहुः अनुतापविदितैरनुतापः संसारनिर्वेदस्तेन लब्धैर्दृढै
र्भक्तियोगैर्विरागा विगतशब्दादिविषयाभिलाषा उद्ग्रंथयो निरहंकारास्ते प्रसिद्धा मुनयो हृदि यदात्मतत्त्वं विदुरुपासीरन्मु
निभिरुपास्यं शुद्धसत्वमयविग्रहं वदेवात्म तत्त्वमस्माभिस्त्राप्युपयदि वामिति प्रत्यभिज्ञातमेव जानीम इति कृतार्थता उपपन्नेते
ति भावः ४७ ननु कथं मद्दर्शनमात्रेण कृतार्थता यतो धर्मादीनामेव पुरुषार्थमित्याशंक्य कैमुत्यन्यायेन दर्शनस्य कृता त्व७

तं त्वां विदाम भगवन्परमात्मतत्त्वं सत्वेन संप्रतिरतिं रचयंतमेषां यत्ते
ऽनुतापविदितैर्दृढभक्तियोगैरुद्ग्रंथयो हृदि विदुर्मुनयो विरागाः ४७ ना
त्यंतिकं विगणयंत्यपि ते प्रसादं किं त्वन्यदर्पितभयं भ्रुव उन्नयैस्ते येंऽग
त्वदंघ्रिशरणा भवतः कथायाः कीर्तन्यतीर्थयशसः कुशला रसज्ञाः ४८

र्थतापादकत्वमाहुः नेति अंग हे भगवन् ये त्वदंघ्रिरेव शरणं स्वरक्षणोपायो येषां ते भगवच्छरणागता इत्यर्थः अत एव कु
शलाः स्वक्षेमोपायेभ्यो निवृत्तत्वात् कीर्तन्यं कीर्तनीयं तीर्थं पवित्रं यशो यस्य तस्य भगवतः कथायाः रसज्ञाः रसानुभवपराः संतः ते
तव प्रसादरूपमात्यंतिकं मोक्षमपि न गणयंति ते तव भ्रुवः उन्नयैर्विक्षेपैरर्पितं निहितं भयं यस्मिंस्तत्स्वर्गस्वाराज्यादिकं न वि
गणयंतीति किमु वक्तव्यमित्यर्थः त्वत्कथाश्रवणमात्रेण स्वात्मनः कृतार्थतां मन्यमानास्त्वच्छरणागताः परमपुरुषार्थमो
क्षमपि नाद्रियंते किमुत वाङ्मनसागोचरस्वरूपस्वभावभवद्दर्शनेनास्माकं कृतार्थतेति भावः ४८ किं बहुना दर्शनस्य कृतार्थ
तापादकत्वं कथनीयमेतावतैव [illegible] सर्वेषां कृतार्थता स्यादिति सूचयंतस्तद्देव प्रार्थयंतो नमस्कुर्वंति द्वाभ्यां श्लोकाभ्यां ॥ ॥

भा. तृ. टी.
७८

एवं स्वस्य भक्तेषु निरतिशयप्रीतिं तद्द्रोहेण निरसनं चाभिप्रेत्य माविष्कृत्य प्रशस्तिं सा राज्ञोयद्यपि चतुरी कृत्य कृपण मिति न्यायेन स्वप्र
शंसार्थं स्वभक्तान्ब्राह्मणान् प्रशंसति य सेवयेत्यादिचतुर्भिः ननु कर्ममात्रप्रशंसानि दिता भगवता क्रियत्ते इति न प्रकंकनीयं सर्वविधमा
नगुणारोपणेनात्मप्रशंसायां निंदितत्वा ... दियं तु प्रशंसा स्वाभाविकी ज्ञान वल्लोके या चेति स्फुतरं विधया स्वाभाविक गुणा
नुकथनरूपेति न दोषः य सेवया येषां ब्राह्मणानां सेवया चरणपं ... यो ... तः पवित्रो रेणुर्यस्य तस्य पादरेणूनां पवित्रत्वं ब्राह्मणसे
सेवयालब्धमिति भावः अत एव सद्यः सतो निरस्ताखिलमलो येन तं प्रतिलब्धं प्राप्तं शीलं येन तं एतेगुणाब्राह्मणा
सेवयैव स्वेन लब्धाः इति भावः एवं विधं विरक्तमपि मां श्रीलक्ष्मीर्न जहाति तदस्यागोपि ब्राह्मणसेवयैवेत्यिदयं कीदृशी चासौ लक्ष्मी

वि. १ पिमां नजहाति इत्युच्यते तत्राह यस्यालस्याः प्रेक्षालवार्थं कृतास्ते शब्रसारणायेतरे ब्रह्मादयः नियमान्व्रतानि वहंति कुर्वंति ब्रह्मा

भि. ८ दिरूपा सा सा सौलक्ष्मीरनादृतवंतमपि मां ब्राह्मणसेवाप्रभावेणैव न विजहातीत्यर्थः १ किं च नेति विताने यज्ञे श्च्योतद्घृतप्लुतं श्च्योततां घृते

न सेवया चरणपद्माश्रित रेणुः सद्यः क्षताखिलमलं प्रतिलब्धशीलं नश्रीर्विरक्तमपि मां विजहाति यस्याः प्रेक्षालवार्थमितरे
नियमान्वहंति १ नाहं तथाद्मि यजमानहविर्विताने श्च्योतद्घृतप्लुतमदन्हुतभुङ्मुखेन यद्ब्राह्मणस्य मुखतश्चरतोनुघासं तुष्टस्य
मय्यवहितैर्निजकर्मपाकैः ८ नश्च्योतंविलोडितंयजमानहविः यजमानसंबंधि हविः तेनदेवोद्देशे नत्यक्तं चपुरोडाशादिरूपं हवि

रित्यर्थः हुत ... भुङ्मुखेनाग्निमुखेनाहमन्नमश्नन् यहंतथा ... नाश्नामि यथा यामय्यवहितैरर्पितैर्निजकर्मपाकैः स्ववर्णोचि
तकर्मफलैस्तुष्टस्य निजकर्मफलानि मय्यपि समर्प्य स्वत एव तुष्टस्येत्यर्थः अनुग्रासं प्रति कवलं चरतो भुंजानस्य ब्राह्मणस्य मुखतः
मुखेनाश्नामि अहं हि सर्व यज्ञानां भोक्ता च प्रभुरेव चेति स्फुरी सा सर्व यज्ञफलप्रदः ... तद्देवाग्निस्तद्वायुरित्यादिश्रुतेः सा नाग्नांघृत तया

न्न. मित्वेन यागीयं हविर्भुंजानो भगवान्यथा ब्राह्मणमुखेन भुंजन्नतुष्यति तथा न तुष्यतीत्यर्थः यजमानहविर्विताने रित्यपि पाठः तदा
निजकर्मपाकैः स्वपुण्यफलरूपैः मय्यवसितैरर्पितैर्यजमानहविर्वितानैः यजमानसंबंधिहविर्विस्तारैर्हुतभुङ्मुखेन तथा ना
श्नामि यथाश्च्योतंघृतप्लुतमनुग्रासं चरतः स्वत एव तुष्टस्य ब्राह्मणस्य मुखेनाश्नि सन्वयः फलाभिसंधिरहितयज्ञैर्भगवदाराधनस्य

...ग्निमुखेन

उक्तमेवाह एकादशभि एताविति जयो विजय एव चेत्येतौ मह्यं मम पार्षदौ मां कदर्थीकृत्यावज्ञाय यस्माद्युष्मभ्यं बहु महान्तमा-
तिक्रमम् अपचारमक्रान्तामकृतां २ तस्मान्मामनुव्रतैर्भगवद्भिरेतयोर्यो दंडः धृतः स एव दंडः अस्माभिर्हे मुनयः देवहेलनाद्देवा
नां युष्माकं हेलनादवज्ञानान्निमित्तादनुमतोङ्गीकृतः ३ तन्नस्मादस्मद्भृत्यकृतत्वाद्विषयापचरणाद्वः युष्मानद्याधुना
नाप्रसादयामि समापयामि ननु स्वस्यापराधे कृष्णा एव समापयितव्या इत्यत आह हि यस्माद्ब्रह्म ब्राह्मणा मे मम परं उत्कृष्टं दैवम
तो वः प्रसादयामि ननु किमपराद्धं भगवता येन प्रसादयामीति भाषसे इत्यत आह स्वपुंभिरसत्कृता अवज्ञाता इति यत्तद्धि आत्मकृ
तं मया कृतमिति एवमन्ये ४ भृत्यकृतमागः स्वामिन्येव पर्यवस्यतीत्याह यदिति भृत्ये कृतागसि कृतापराधे सति यन्नामानि पूज्य
स्वामिनो नामानि च जनः गृह्णाति अनेन स्वामिना भृत्यद्वारा एवमेवमसाधुकृतमतो यं दुरात्मेत्यादेवं निंदकनामानि लोको व

श्रीभगवानुवाच। एतौ तौ पार्षदौ मह्यं जयो विजय एव च कदर्थीकृत्य मां यद्वो बह्वक्रातामतिक्रमं २ यस्त्वेतयोर्धृतो दंडो भवद्भि-
र्मामनुव्रतैः स एवानुमतोस्माभिर्मुनयो देवहेलनात् ३ तद्वः प्रसादयाम्यद्य ब्रह्म दैवं परं हि मे तद्धीत्यात्मकृतं मन्ये यत्स्वपुंभि-
रसत्कृताः ४ यन्नामानि च गृह्णाति लोको भृत्ये कृतागसि सोसाधुवादस्तत्कीर्तिं हंति त्वचमिवामयः ५ यस्यामृतामलयशः-
श्रवणावगाहः सद्यः पुनाति जगदाश्वपचाद्विकुंठः सोहं भवद्भ्य उपलब्धसुतीर्थकीर्तिश्छिंद्यां स्वबाहुमपि वः प्रतिकूलवृत्तिं ६

दति स असाधुवादः तत्कीर्त्तिं तस्य स्वामिनः कीर्त्तिं हंति नाशयति त्वचमामय इवामयो व्रणश्वेतकुष्ठादिरोगः स यथा त्वच्युत्पन्नः तदुत्तं
सौंदर्यं हंति तथैव सर्वः भृत्यकृतापराधनिमित्तोऽसाधुवादः स्वामिन्यपर्यवसन्न तत्कीर्त्तिमेव नाशयतीति भावः ५ तस्मादाश्रितसौ
लभ्यादिकल्याणगुणइति यशः संपन्नोहं निरतिशयाश्रिताणां भवतां विरोधिचे स्वागमपि लुनामीत्याह यस्येति यस्य ममामलामृतय
शः श्रवणावगाहः। अमलं पवित्रममृततुल्यं च यद्यशः तस्य श्रवणावगाहः श्रोत्रप्रवेशः आश्वपचं श्वपाकपर्यंतं जगत्सद्यः पुना
ति पवित्रयति सोहं विकुंठः श्रोत्रप्रवेशमात्रेण सद्यो जगत्पावनकरयशः संपन्नः। विकुंठः प्रतिहतिरहितः भवद्भिर्निमित्तभूतैर्भवद्भ्य
इति पंचम्यंतपाठे पितृभ्यो भवद्भ्यो हेतुभ्य उपलब्धसुतीर्थकीर्तिराश्रितसुलभे इत्याधिक्षिप्तकीर्त्तिरहं वः युष्माकं प्रतिकूलावृत्तिर्यस्य तं स्वबा
हुमपि छिंद्यां तः प्रतिकूलवृत्तिं श्रेस्वबाहुमपि लुनीयेत्यर्थः ६

म

ना५

प्रशा२

एवं ब्राह्मणानां शास्त्यार्थमुनिविहितं दंडं स्वयमप्यनुमनुते तन्म इति तस्मात् स्वभर्त्रोः स्वयोरात्मनो भर्त्तुर्ममावसायमुक्त्वा विधं निश्चममलक्षमाणौ जानंतौ युष्माकं यो ऽतिक्रमो ऽपराधः तस्य गतिं फलं प्रतिपद्य सद्यः आशु भूयः पुनः ममांतिकं सन्नि पइतां प्राप्नुतां यद्यस्मादितौ दंड एव भगवतानुमतश्च तत्र को भक्त्यानुग्रहकारिते तत्राह भक्तयोर्भयोरस्विरत आशु विवासः युष्मद्व्यतिक्रमगतिं समाप्तिः कल्पतां [illegible] कल्पत इति यत्तदेव मे ऽनुग्रहः महदतिक्रमफलमवाप्य पुनराशु मत्समीपागमनं एवमदनुग्रह इत्यर्थः १२ एवमाश्लिष्टस्तो लभासो शील्यादिगुणसंपन्नेन भगवता निरूप्य निजब्रह्मदेवं परं हि मे यस्सेवया चरणपद्मपवित्ररेणुनं श्रीर्विरक्तमापि जहाति येषाममलांघ्रिरजः किरीटे बिभर्मि इत्यादिवचास्याश्रुत्य सुनयस्तद्देवतानां परमं च देवतं इत्यादिक्तातिभिः परमदैवतत्वेन कीर्तितो भगवान् किमस्मदुचनापेवं वदत्यहो स्विद्धर्मसंस्थापनार्थं यद्यदाचरति श्रेष्ठस्तत्र

तन्मे स्वभर्त्तुरवसायमलक्ष्यमाणौ युष्मद्व्यतिक्रमगतिं प्रतिपद्य सद्यः भूयो ममांतिकमितां तदनुग्रहो मे यत्कल्पतामचिरतो भृतयोर्विवासः १२ ब्रह्मोवाच अथ तस्योशतीं देवीमृषिकुल्यां सरस्वतीं नास्वाद्य मन्युदष्टानां तेषामात्माप्यतृप्यत १३ सतीं व्यादाय शृण्वंतो लघ्वीं गुर्वर्थगह्वरां विगाह्यागाधगंभीरां न विदुस्तच्चिकीर्षितं १४ ॥ ॥

निर्द्धीपर

देवेन रोज्ञ न इति स्वगीतानुसारेण वदतीति तात्पर्यं [illegible] मजानंतो नूनमसौ न भक्तान्वंचयति किंतु धर्मसंस्थापनार्थमेव वदतीति पुनर्निश्चिचीषया तदुक्तानि वाक्यान्यन्यतात्पर्यकत्वेन प्रतिपादयिषंतः संप्रत्यूचुरित्याह ब्रह्मा त्रिभिः अथो ऽकविध भगवताक्यश्रवणानंतरं तस्य भगवतः ऋषिकुल्यावेदसजीवां उशतीं कमनीयां देवीममानुषीं सरस्वतीं गिरमास्वाद्यानुभूयाक्रुत्य मन्युनाविषसमानेन [illegible] दष्टानां याप्तानां तेषां मुनीनामात्मांतःकरणं नातृप्यत तद्वाक्यतात्पर्यज्ञानान्मन्युदष्टत्वाच्च विसंनात इति प्रसन्नमभूदित्यर्थः १३ सतीं साध्वीमल्पाक्षरां गुरुभिर्बृहद्भिरर्थैर्गह्वरं दुर्विज्ञेयामगाधगंभीरामभिप्रायेणागाधामर्थे तो गंभीरां सरस्वतीमित्यनुषंगः शृण्वंतः विगाह्य विलोड्य नारायणस्येदमेषां वाक्यानां तात्पर्यमिति परिष्कृत्य इत्यर्थः तेन भगवताकर्तुमिष्टं न विदुः विचार्य परिष्कृत्य न विदुः किंतु तस्मीमायातत्तो विदुरित्यर्थः १४

रेशुभ८

नं

किंच येषां ब्राह्मणानाममलं पवित्रं पदांघ्रिरजः पादरेणुं किरीटैर्बिभर्मि तान् विप्रान् को न विषहेत तिरस्कुर्वतोपि ब्राह्मणान् को न क्षमेत कथंभूतोहमखंडं ततो विकुंठं प्रतिहति रहिता योगमायाविभूतिः स्वाप एव कुक्षिस्थत्वेन युज्यमाना ऐश्वर्यं यस्य अकुंठा विभूतिः कया तेन कीदृशा विभवो यस्य सः यस्य ममार्हणां भःतीर्थोदकरूपा गंगा सहचंद्रललामं लोकान् चंद्रो ललामं चिह्नं यस्य सः शिवः शि यस्य सम हादेवस्ते सहिता लोकान् पुनाति तत्पावनं यस्य ते ... चंद्रशेखरेण तीर्थेन मूर्ध्नि धृतेन शिवः शि वो भूदित्येवं परमपावनो यः अहं स्वहिरजो बिभर्मीति भावः ८ एवं ब्राह्मणान् प्रस्तुत्य तत्तानेव स्तुवन् तेषु कृतापराधिनो मत्त्विग्रहविषया कृतोपचारास्ते मदनुग्रहविषया इत्याह द्वाभ्यां ये म इति मे मम तनूः शरीरभूतान् द्विजवरान् मदीया म... शरीरभूताः हतीः गाः ... दुहती घुक्षिः अलब्धशरणानि रक्षकहीनानि भूतानि म... शरीराणि भूतानि ग

येषां बिभर्म्यहमखंडविकुंठयोगमायाविभूतिरमलांघ्रिरजः किरीटैः विप्रांस्तु को न विषहेत यदर्हणां भः सद्यः पुनाति सह चंद्रललामलोकान् ८ ये मे तनूर्द्विजवरान्दुहतीर्मदीया भूतान्यलब्धशरणानि च भेदबुद्ध्या द्रक्ष्यंत्यघक्षतदृशो ह्यहिमन्यवस्तान् गृध्रा रुषा मम कुषंत्यधिदंडनेतुः १० ये ब्राह्मणान्मयि धिया क्षिपतोर्चयंतस्तुष्यद्धृदः स्मितसुधोक्षितपद्मवक्त्राः वाण्यानुरागकलयात्मजवद्गृणंतः संबोधयंत्यहमिवाहमुपाहृतस्तैः ११

णि च ये पुरुषा अघं पापं तेन क्षता अनुविद्धा दृशो नेत्राणि येषां ते त एवाहिमन्यवः अहेः सर्पस्येव मन्युः क्रोधो येषां तथाभू ताः संतो द्रक्ष्यंति भेदबुद्ध्या ... तान् मम अधिदंडनेतुः यमस्य ... गृध्राः यमदूताः कुषंति तेषां नेत्रा णि तुदंतीत्यर्थः १० ये पुनः क्षिपतः तिरस्कुर्वतोपि ब्राह्मणान् मयि धिया मद्बुद्ध्या अर्चयंतः पूजयंतः तुष्यद्धृदः संतुष्टचित्ताः स्मितं हासः तदेव सुधा तयोक्षितं सिक्तं पद्ममिव वक्त्रं येषां ते अनुरागकलया अनुरागेण कलया ... युक्तया वाचा गिरा आ त्मजवत् पुत्रमिव गृणंतो भाषंतः संबोधयंति तैरहं मेवं उपाकृतः उपकारितः ते मदनुग्रहविषया इति भावः ११ ॥ ॥

उपाहृत इति पाठे वशीकृत इत्यर्थः ११

२ ... ८३

अतो धर्मसंस्थापनार्थायैव ब्रह्मदेवमि सूक्ष्ममन्यथेदमनुपपन्नमित्याहुः तरंतीति निवृत्ताः निवृत्तिधर्मनिष्ठाः योगिनः मृत्युं संसारं यदनुग्रहाद्यस्य तवानुग्रहादंजसा सौकर्येण तरंति तथा च श्रुतिः अमृतस्यैष सेतुरिति सेतुः प्रापकः स भगवान्परैरन्यैर्नोरनुगृह्येत किंस्विदिति काकुः नानुगृह्येत इत्यर्थः अनुग्राहयते परमिति पाठे तर्हि तदपरं ब्राह्मणामनुग्रहक[...]र्थं करोषि किमित्यर्थः १९ यदुक्तं नभ्रोर्विक्रममपि मां विविजहातीति तदपि पद्याश्रुताभिप्रायकत्वे संतानुपपन्नमिति मत्वा तात्पर्यं परिष्कुर्वंत आहुः सार्द्धेन यमिति यं त्वां विभूतिर्लक्ष्मीः कथंभूता अर्था[...]भिस्त्वन्यैर्विधपुरुषार्थार्थिभिः स्वशिरसा धृतः पादरेणुर्यस्याः सा तथा चोक्तं अकिंचनैकशरणाः केचिद्भाग्याधिकाः पुनः तस्याः दांभोरुहद्वंद्वं प्रपद्य प्रीतमानसाः लक्ष्मीपुरुषकारेण वृतवंतीवरानने इत्येवंभूता लक्ष्मीः धन्यार्पितांघ्रितुलसीनवदामधाम्नः धन्यैर्भागवतैरर्पितं नूतनतुलसीमाल्यायाः स्थानं यस्य तस्य मधुव्रतपतेर्भृंगराजस्य लोकं स्थानं श्रीपादपद्मं कामयमानेव यं त्वामनुवेलं तत्तदुचितावसरेषूपयाति सेवते तां लक्ष्मीं विविक्तैः

तरंति ह्यंजसा मृत्युं निवृत्ता यदनुग्रहात् योगिनः स भवान् किंस्विदनुगृह्येत यत्परैः १९ यं वै विभूतिरुपयात्यनुवेलमन्यैरर्थार्थिभिः स्वशिरसा धृतपादरेणुः धन्यार्पितांघ्रितुलसीनवदामधाम्नो लोकं मधुव्रतपतेरिव कामयाना यस्तां विविक्तचरितैरनुवर्त्तमानां नात्याद्रियत्परमभागवतप्रसंगः २०

परिपूर्णैः रचितैः सम्यगनुवर्त्तमानां सेवमानां यो भवान्नात्याद्रियन्नादृतवान् कुतः यतस्त्वं परमभागवतेष्वेव प्रकृष्टसंगवान् अयं भावः एवं हि सा लक्ष्मीर्मन्ये अयं हि सारग्राही मधुव्रतो [...] चंचलश्चार्पितांघ्रिगतायां तुलस्यामुपरि हरे । निश्चलः सन् रमते इतांघ्रिर्न्नवरूपमाधिक्यस्याः तत्तोहं वक्षसि स्थितापि योगिजनादिवत्सेवकसंमर्दमंगीकृत्यापि तु तत्स्या सहसा पद्मेनापि चरणो सेविष्यामीति एवमौत्सुक्येनानुवर्त्तमानामपि तां त्वं परमभागवतप्रसंगेनावसरमलभमानो नात्यादृतवानिति २० यदुक्तं यः सेवया चरणपद्मपवित्ररेणुमिति तदपि पवित्रमभिप्रेत्य द्विजोत्तमाः सेवितव्या इत्येतत्तात्पर्यकमित्यभिप्रेत्याप्य येषाममलांघ्रिरजो विभर्मीत्यस्य तात्पर्यं परिष्कुर्वंत आहुरर्द्धेन ॥ ॥ ॥ ॥ ॥ ॥ ॥

धन्यार्पितेत्यपि पाठस्तदापि विशेषणं २

४०
१

पिं ५
पा ७
राम
८०

कृतो ५

स्म १

योगमायया विचित्रसर्गकारिण्या प्रकृत्या आरब्धस्य कृतस्य जगतः यत्पारमेष्ठ्यं सर्वोत्कृष्टमाधिपत्यं तस्योदयो यस्मात्तम् स्वदाधिपत्यदातारमित्यर्थः तं भगवंतं विप्रा नु चितत्वचः संशयाव हृद्वाक्यश्रवणेन नु छित्तसंशया तेषामक्ष्णाः निरतिशयकल्याणगुणगणाकरस्यात्मदैवतस्य भगवतो दर्शनेन तत्संभाषणेन तत्कृपावलोकनेन च द्विजा नितरां हर्षयुक्ताः प्रांजलयः प्रोचुः २५ उक्तिमेवाहुर्दशभिः नेति हे भगवन् देवत त्वया चिकीर्षितं वयं न विद्मः किं भवानस्माननुजिघृक्षति उत निजिघृक्षतीति त्वत्तः स्वयं विशिष्य न जानीमः किं नु मे महद्व्रत्यै ना भिप्रायेणोक्तवचनं नुग्रहश्चेत् अनुग्रहः कृतः दृष्टा पातितो विद्मः आपाततो नुग्रहः कृतः कथं ज्ञानीयित्यत्राह यद्यस्मादध्यासः वाङ्मनसागोचरस्त्वमसि विषयः प्रभावः २६ एवं स्वात्मनां तदभिप्रायानभिज्ञत्वमावेद्य तदुक्तौ नातात्पर्यं क्रीडां कुर्वतां ब्रह्मदेवं परं हि मे इत्याद्युक्तयो धर्ममर्यादापालनप्रवृत्त्योपपन्ना न पोलां इत्येवमभिः ब्रह्मण्यस्येति हे प्रभो ब्राह्मणस्य ब्राह्मणा तन्मर्यादापालनं ब्राह्मणाः परं दैवतं किल किलेत्यनेन लोकशिक्षा सूचिता यदि भवान् ब्राह्मणान्परदेवत्त्वभावे

ते योगमायया रब्धपारमेष्ठ्यमहोदयं प्रोचुः प्रांजलयो विप्राः प्रहृष्टाः क्षुभितत्वचः २५ न वयं भगवन्विद्मस्तव देव चिकीर्षितं कृतो मेनुग्रहश्चेति यदध्यासः प्रभावः २६ ब्रह्मण्यस्य परं दैवं ब्राह्मणाः किल ते प्रभो विप्राणां देवदेवानां भगवानात्मदैवतं २७ त्वत्तः सनातनो धर्मो रक्ष्यते तनुभिस्तव धर्मस्य परमो गुह्यो निर्विकारो भवान्मतः २८ ॥ ॥ ॥

न नातु वर्त्मसेतत्तत्स्वतो वरजना ब्राह्मणान्नवकुमन्यंतः नश्येयुरतो लोकशिक्षार्थमेव ब्रह्मदेवं परं हि हि मे इत्युक्तमिति भावः वस्तुतस्तु देवदेवानां देवेनतया पिदे वानां च कुमतत्वानां च विप्राणां भगवान्साङ्गुरूपपूर्णं आत्मदेवतमात्मदैवतं शतिहेतुगर्भ आत्मदैवतस्य तव न देवतांतरसंभवतीत्यर्थः तथा च श्रूयते पतिं विश्वस्यात्मेश्वरं यस्मात्परं नापरमस्ति न तस्य शेक्श्च न तस्य नाम महद्यशः स्वे महिम्नि प्रतिष्ठित इत्यादि २७ ब्रह्मण्यत्वमेव प्रपंचयंति त्वत्त इति धर्मश्चातुर्वर्ण्यचातुराश्रम्यव्यवस्थापावस्थितः सनातनो धर्मः त्वत्त एव प्रवृत्तः तव तनुभिरवतारैः रक्ष्यते च हे शास्य धर्मस्य परमः निसोनिरतिशयगुह्यः फलं निर्विकारो भवानेवमतः ज्ञातः श्रुतिभिस्तिशेषः तथा च श्रूयते हृवापूर्वं बहुधा जातं जायमानं विश्वं बिभर्ति भुवनस्य नाभिः एष भूतपाल एष सेतुर्विधारणः अविघ पाम सुतोत्वं विघ्वयामृतमश्नुत इत्यादि निर्विकार इत्यनेन कर्मस्फुरुचिमात्रजनकानामवांतरफलानां सोपि स्तुतं

धुनयभक्तु १

निना

निर्विकल्पो २

येन२

भा० स्कं० ३ — ८१ — 81

वर्त्तेयं जातु कर्म्मण्यतंद्रितः मम वर्त्मानुवर्त्तन्ते मनुष्याः पार्थ सर्वशः उत्सीदेयुरिमे लोका न कुर्यां कर्म्म चेदहं संकरस्य च कर्त्ता स्यामु
पहन्यामिमाः प्रजाः इति त्वयैव गीतत्वात् इदं मार्गनाशनं तव वाञ्छितमेवेत्याह तर्हि इति सत्वनिधेः शुद्धसत्वाश्रयस्य ते एव जनाय वृ
मं विधातुं कर्त्तुमिच्छोः निजशक्तिभिः निजावतारैरुद्धृताः निर्मूलिताः अरयो धर्म्मविरोधिनो यस्य तेन तव हे इदं मार्गनाशनमन
भीष्टमिति वा न भीष्टमेवेत्यर्थः हे अधिपते त्रिलोकाधिपते विश्वस्य भर्त्तुर्धारकस्य पोषकस्य वेत्तत्स्वाज्ञालुम्पने तस्य अस्त्र
णं तस्यै निरजो धारणस्य अत्युपलक्षणं तावता अश्रणाति मात्रेण तेजः प्रभावः न स्तं न विहतं किंतु सम्प्रणमः ते विनोदः लोकस्य
रक्षारूपः २४ एवं यथा मतिभगवदुक्तीनां तात्पर्यं परिष्कृत्य विकीर्षितमजानंतः स्वापराधानुगुणं दंडधारणं च निवेदयंत आ
हुरेकेन यामिति हे अधीश भगवन् नयोर्भक्तयोः यं वा दम अस्माभिर्विहितमन्यं वा दंडं वृत्तिं यथा एवमत्र लोके वर्त्तनं चावधत्ते तत्र

तन्नेन भीष्टमिव सत्वनिधेर्विधित्सोः क्षेमं जनाय निजशक्तिभिरुद्धृतारेः नैतावता अधिपते बत विश्वभर्त्तुस्तेजः क्षतं त्ववनत
स्य सते विनोदः २४ यं वानयोर्दममधीश भवान्विधत्ते वृत्तिं नु वा तदनुमन्महि निर्व्यलीकं अस्मासु वा य उचितो ध्रियतां स दंडो
येनागसौ वयमपुंस्महि किल्बिषेण २५ श्रीभगवानुवाच एतौ सुरेतरगतिं प्रतिपद्य सद्यः संरंभसंभृतसमाध्यनुबद्धयोगौ भू
यः सकाशमुपयास्यत आशु यो वः शापो मयैव निमितस्तदवेत विप्राः २६ ब्रह्मोवाच अथ ते मुनयो दृष्ट्वा नयनानंदभाजनं वै
कुंठं तदधिष्ठानं विकुंठं च स्वयंप्रभं २७ निर्व्यलीकं सत्यं यथा अनुमन्महे अनुमन्यामहे अस्मासु चोचितः स्वापराधानुरूपः यो दंडः
सन्नेयतां विधीयतां भवद्भिः किमपराधमिति चेत् येन वयं अनागसौ निरपराधिनौ किल्बिषेण शापेन अपुंस्महि योजितवंतः द्वा
स्थयोरपवर्ज्जननिवारणं स्वाभाविकमित्यभिप्रायेण अनागसाविति तुक्तेः २५ एवं मुनिभिरावेदिते हार्दे मुनीनामल्पयोच्छ्रान्त
ग्रहमानो भगवान्मुनीन्प्रत्याह हे केन एतौ पार्षदौ सुरेतरगतिमासुरं जन्म प्राप्ते पद्य सद्यः जन्मप्रभृति मापितः संरंभः क्रोधस्तेन
संभृतः संजातः समाधिरनवरतभावना तेनानुबद्धो नुबद्धः योगः मत्संबंधो ययोस्तौ तावत एवाशु पुनः सकाशमत्समीपमुपयास्यतः
हे विप्राः वः युष्माकं यः शापः स मयैव तन्मुखेन विहितः इत्यवैत जानीत इत्यावृत्त २६ एवं भगवतोक्ता मुनयः कोपपरिसा
न्त्वाभ्यां अथानंतरं नयनयोरानंददर्शनभाजनं विषयं वैकुंठं तस्य वैकुंठस्याधिष्ठानं स्थानं स्वप्रकाशं वैकुंठलोकं च दृष्ट्वा ते मुनयः २७

८२ — ८१ — मन्य३ — तिप्रणा४ — दे१ — रम — णं — ८१

६

म१ तं इति तं धर्मर्य्यादाद्युतिशातारं श्रियोऽपि समाश्रणीयं लावण्यनिधिं त्वां द्विजानामनुपथं पथि यद्यपि त्वं अपपुण्यरजः तत्पाः श्रीव
त्सलक्ष्म च श्रीवत्सचिह्न त्वं किं पुनीतः पवित्रीकुरुतः किं किमर्थं ते उभे भगभाजनः निरतिशयसौंदर्यास्पदः त्वमगाः प्राप्तवा
नसि भूषणत्वेन स्वीकृतवानसि पुनीत इति पाठांतरं तदा द्विजानुपथपुण्यरजः पुनीते किं न पुनीत इत्यर्थः तर्हि कृष्णरजो
विभर्मीति श्रीवत्सलक्ष्म किं किमर्थमगाः भूषणत्वेनेति चेत् इन्नोऽपि तत्पैव विभर्षीति शंको चरत्वेन व्याख्येयं २१ एवमल्लं का
राद्येव रजो विभर्षी तदभिधायात्यलोकमर्यादापालकेन भगवता वर्ण्यं तत्कर्त्तव्यमेवेति प्रतिपादयिषतो वर्ण्यं लोकमर्यादा ग१ पि१
भवता पाल्या तथा सीदेयुरिमे लोका इत्समुमर्थमन्वयव्यतिरेकाभ्यामुपपादयंत आहुस्त्रिभिः हे त्रियुग त्रीणि युगानि
युग्मानि ज्ञानशक्त्यादिगुणानां यस्येति त्रियुगस्तस्य संबोधनं धर्मस्य धर्मरूपस्य ते तव त्रिभिः स्वैरसाधारणैः पद्भिस्तपोदा
जे१ नदयाल्मकैः द्विजदेवतार्थं द्विजदेवतासंरक्षणार्थं निजदेवतार्थमिति पाठे तु स्वकीयदेवतासंरक्षणार्थं तदभिघाति ते बांधर्म

तं त्वां द्विजानुपथपुण्यरजः पुनीतः श्रीवत्सलक्ष्म किमगा भगभाजनस्त्वं २१ धर्मस्य ते भगवतस्त्रियुग त्रिभिः स्वैः पद्भि
श्चराचरमिदं द्विजदेवतार्थं नूनं भृतं तदभिघाति रजस्तमश्च सत्वेन नो वरदया तनुवा निरस्य २२ न त्वं द्विजोत्तमकुलं य
दि हात्मगोपं गोप्ता वृषः स्वर्हणेन ससूनृतेन तर्ह्येव नंक्ष्यति शिवस्तव देव पंथा लोकोऽग्रहीष्यदृषभस्य हि तत्प्रमाणं २३

पदानामभिघातकं पद्मजन्म रजस्तमः प्रचुरांस्तान् सत्वेन शुद्धसत्वमयेन तन्वा मूर्त्या वितारैः इत्यर्थः निरस्य चराचरा
त्मकमिदं जगत् भृतं नूनं स्वेच्छोपात्ता प्राकृतदिव्यमंगलशुद्धसत्वमयमूर्त्या द्विजदेवतार्थं धर्मविरोधिनो रजस्तमः प्रचुरान्नि
रस्य कृत्स्नं जगत्तपोदानमयाख्यैः धर्मपदैः पोषयसीत्यर्थः २२ न त्वमिति आत्मनां भवता गोपं गोपनीयं रक्षणीयं द्विजो
त्तमानां कुलमर्हणेन सुमर्हणेन सूनृतेन प्रियवाक्येन च यदि श्रेष्ठस्त्वं गोप्ता रक्षिता न चेत् स्वयं धर्माननुतिष्ठ लोकास्तेषु प्रव
र्तयसे न चेदित्यर्थः तर्ह्येव तत् देव शिवः श्रेयः संपादकः तव पंथाः सर्ववेदप्रतिपाद्यो वेदमार्गः कर्मोपासनात्मकः नंक्ष्यति नाशं प्रा
प्स्यति हि यस्मादृषभस्य श्रेष्ठस्य यद्यदाचरितं तत्तदेव लोकः प्रमाणं प्रमाणत्वेनाग्रहीष्यत् तदेव गीतं यद्यदाचरति श्रेष्ठस्तत्तदेवे
तरो जनः स यत्प्रमाणं कुरुते लोकस्तदनुवर्त्तते इति २३ न मे पार्थास्ति कर्त्तव्यं त्रिषु लोकेषु किंचन नानवाप्तमवाप्तव्यं वर्त्त एव च कर्म
णि यदि ह्यहं न

पु१

तयोरसुरयोरासुरजन्मनोर्ययोः सहैव गर्भं प्रविश्य उत्पन्नयोः समानयोस्तेजसा [illegible]वः युष्माकं तेजः आसीत्तमभिभूतमेतर्हि इदानीं भ-
गवान्नूतं वर्ता तेजः विधास्यति नो निहतं भवत्तेजः यथावस्थितं करिष्यतीत्यर्थः ३६ भगवान्कदा विधास्यति विधातुं समर्थश्चेति शंका
द्वयं परिहरन्निति हासं निगमयति विश्वस्य जगतः स्थितिलयोः सन्निहेतुरत्रावाघः सर्वैः आगादिविकारत्वेन स्थितः कथं निर्विकारस्य
स्रष्ट्रादिहेतुत्वं इत्यत्राह योगेश्वरैरपि योगपरिप्रुह्यमानैरविदुरत्यया दुर्विवेचनीया आत्मीया विचित्रसर्गकारिणी शक्तिर्यस्यानेन
संहारकस्रष्ट्रादिहेतुत्वमिति फलितं एवंभूतस्त्र्यधीशः त्रिलोकाधिपतिः यो भगवान्स एव नोस्माकं क्षेमं विधास्यति सत्वगुणोत्कर्षका
लेकरिष्यतीत्यत्रेहतया भूते एतस्मिन्भगवत्य[illegible]स्मदीयस्य स्वस्वेषस्य विमर्शेन कियानर्थः किं प्रयोजनं कृत्स्नविश्वस्थितिलयोद्भ
वलीलस्याचिंत्यविविधविचित्ररचनासमर्थमायाधीशस्य षाड्गुण्यपूर्णस्य त्रिलोकाधिपतेः स्वाश्रितास्मदीयाविमर्शनमत्यल्पप्रयो

तयोरसुरयोरघतेजसा यमयोर्हि वः आसीद्यत्तेज एतर्हि भगवांस्तद्विधेसति ३६ विश्वस्य यः स्थितिलयोद्भवहेतुराद्यो योगेश्वरैर
पिदुरत्यययोगमायः क्षेमं विधास्यति स नो भगवांस्त्र्यधीशस्तत्रास्मदीयविमर्शेन कियानिहार्थः ३७ इति श्रीमद्भागवते महापु
राणे तृतीयस्कंधे जयविजययोर्वैकुंठात्पतनं नाम षोडशोध्यायः १६ मैत्रेय उ० निशम्यात्मभुवा गीतं कारणं शंकयोज्झिताः
ततः सर्वे न्यवर्तंत त्रिदिवाय दिवौकसः १ दितिस्तु भर्तुरादेशादपत्यपरिशंकिनी पूर्णे वर्षशते साध्वी पुत्रौ प्रसुषुवे यमौ २

जनमिस्पर्धा ३७ इति तृतीये षोडशः १६ एवमध्यात्रापीति हासोपक्रान्तो मे वर्णितः पुरा ब्रह्मणा देवदेवेन देवानामनुपृच्छतामि
त्युपक्रान्तं विप्रसंवादरूपमितिहासं प्रस्तुत्य तमेव निगमयन्परमप्रकृतं हिरण्यस्य वधं प्रस्तुतुं ब्रह्मनारदसंवादोपाख्यातमितिहासं
तरपरमप्रकृतेन संगमयन् हिरण्याक्षजन्मप्रभृतिवृत्तांतमाह मैत्रेयः निशम्येति आत्मभुवा ब्रह्मणा गीतं कारणं स्वव्यसनकारणं निश
म्य कंशयोज्झिताः क्षेमं विधास्यतीति वचनात्त्यक्तभयाः सर्वे त्रिदिवौकसः देवास्ततः ब्रह्मलोकान्त्रिदिवाय त्रिदिवं स्वर्गं प्रतिजग्मुः १
दितिस्तु भर्तुः कश्यपस्यादेशात् लोकान्सपालांस्त्रीन्चंडिमुज्झ राक्षसांपि घातः इति वाक्यात् स्वापत्याभ्यां देवोपद्रवमाशंकमाना सतीव
र्षशते पूर्णे सति यमौ द्वौ पुत्रौ प्रसुषुवे प्रसूतवती युगपज्जातौ यमावित्युच्यते २ ॥ ॥ ॥ ॥ ॥

भगवंतं परिक्रम्य प्रदक्षिणीकृत्य प्रणिपत्य प्रणम्य अनुमान्य अनुज्ञाप्य चैष्णवीं भागवतीं श्रियं संपदं शंसंतः प्रशंसंतः प्रमुदिताः प्रतिज
ग्मुः २९ मुनिगमनानंतरं द्वास्थौ सात्वयन् भगवानुवाच तत्राह द्वाभ्यां भगवाननुगावभ्येत्य प्रत्याह उवाच उक्तिमेवाह यातं गच्छतं मा भै
ष्ट भयं मा कुरुतं शं सुखं एव गच्छतोऽपि युवयोरस्तु यद्यप्यावयोरनुग्रह एव भगवता क्रियते तर्हि ब्रह्मदंड एव किं न निरस्यते इत्यत्राह
ब्रह्मतेजः ब्रह्मदंडं तेजः कार्यत्वाद् दंडस्यापि तेजः शब्देन निर्देशः हंतुं निरसितुं समर्थोऽपि न इच्छे कुतः हि यस्मात् तत् मम मतं ... २९ न के
वलं ममैवेदं ब्रह्मतेजो मतं किंतु लक्ष्म्या अपीत्याह एतत्पुरैवेति एतत् युवयोः इतो निर्गमं पुरा पूर्वकाले क्रुद्धया रमया तस्यैव निर्दिष्टं पुरा
कदेत्यत्राह मयि उपारते प्रणयकलहवशात् सुप्ते शयाने सति मन्निलयात् गृहात् निर्गत्य पुनरंतः प्रविशंती द्वारि युवाभ्यां यदा निवारि
तात देत्यर्थः ३० अतेमपि संरंभः क्रोधः तस्य योगो नवरत संबंधः तेन ब्रह्मविद् अपराधजन्यं फलं निस्तीर्य निखशेषमपोह्याल्पी

भगवंतं परिक्रम्य प्रणिपत्यानुमान्य च प्रतिजग्मुः प्रमुदिताः शंसंतो वैष्णवीं श्रियं २९ भगवाननुगावाह यातं मा भैष्टमस्तु
शं ब्रह्मतेजः समर्थोऽपि हंतुं नेच्छे मतं तु मे २९ एतत्पुरैव निर्दिष्टं रमया क्रुद्धया यदा उपारते मयि द्वारि युवाभ्यां यल्लिवारिता
३० मयि संरंभयोगेन निस्तीर्य ब्रह्महेलनं प्रत्येष्यतं निकाशं मे कालेनाल्पीयसा पुनः ३१ द्वास्थावादिश्य भगवान् विमानश्रे
णिभूषणं सर्वातिशयया लक्ष्म्या जुष्टं स्वं धिष्ण्यमाविशत् ३२ तौ तु गीर्वाणऋषभौ दुस्तराद्धरिलोकतः हतश्रियौ ब्रह्मशा
पादभूतां विगतस्मयौ ३३ तदा विकुंठधिषणात् तयोर्निपतमानयोः हाहाकारो महानासीद्विमानाग्र्येषु पुत्रकाः ३४ तावेव
ह्यधुना प्राप्तौ पार्षदप्रवरौ हरेः दितेर्जठरनिर्विष्टं काश्यपं तेज उल्बणं ३५

गच्छतं ३१ एवं द्वास्थावादिश्य भगवान् स्वस्थानमाविवेशेत्याह भगवान् द्वास्थावादिश्य ज्ञात्वा विमानश्रेण्यः एव भूषणं यस्मि
न् सर्वातिशयया निरतिशयया लक्ष्म्या संपदा जुष्टं युक्तं जुष्टं प्रियं स्वं धिष्ण्यं स्वकीयं स्थानं लक्ष्म्याः सहाविशत् इति ३२ अथ तौ किमभू
तां किमकुर्वतां चेत्यत्राह ताविति गीर्वाणऋषभौ देवश्रेष्ठौ तौ द्वास्थौ दुस्तरात् ... हरिलोकतः एव हतश्रियौ भ्रष्टतेजसौ अत एव वि
गतस्मयौ विनष्टगर्वौ बभूवतुः ३३ तदा विकुंठस्थानात् तयोर्निपतमानयोः सतोः हे पुत्रकाः देवाः विमानाग्र्येषु वसतां महान् हाहाकार आसी
त् ३४ तावेव हरेः पार्षदश्रेष्ठौ दितेर्जठरे कुक्षौ निविष्टं कश्यपसंबंधि उल्बणं उग्रं तेजः वीर्यं प्रविश्य अधुना आप्तौ प्राप्तौ भवतः ३५ ॥ ॥

भौ० कार्ष्ट्र

भा॰ त॰ टी॰
८३

खराश्च गर्दभाः कर्कशैः कठिनैः खुरैर्धरातलं घ्नंतः ताडयंतः खार्कारो गर्दभजातिशब्दः तस्मिन्‌ रभसः संभ्रमस्तेनाम त्ताः रभसः संभ्रमोऽपे
क्षांत इति वा वरूथशः संघशः पर्यधावन्‌ ११ रासभत्रस्ताः रासभध्वनिभीताः खगाः रुदंतो ध्वनिं कुर्वंतो नीडात्‌ कुलायात्‌ उदपतन्‌ उद्य
म्यानिपेतुः घोषे आभीरपल्ल्याम् अरण्ये च ये पशवः ते शकृत्‌ पुरीषं मूत्रं चाकुर्वत उत्ससृजुः १२ गावो असृग्दोहाः रक्तं दुहंत्यः अत्रसन्‌ उ
द्विग्नं वत्यः तोयदा मेघाः पूयवर्षिणः कश्मलवर्षिणो भूवन्‌ देवता प्रतिमाः व्यरुदन्‌ अश्रूणि मुमुचुः अनिलं वायुं विना तरवः वि
द्रुमाः पेतुः १३ पुण्यतमान्‌ शुभकरान्‌ ग्रहान्‌ गुरुबुधादीन्‌ भगणान्‌ नक्षत्राणि च अन्ये क्रूरग्रहाः अंगारकादयो अतिदीपिताः
प्रज्वलिताः आर्षत्वात्‌ पौडाकराः अति चेरुः अतिक्रम्य जग्मुः [illegible]मुः वक्रगत्या प्रत्यावृत्त्या परस्परं युयुधुश्च १४ अन्यांश्च
[illegible] मोक्षादन्यांश्च महोत्पातान्‌ दृष्ट्वा तत्त्वविद् तत्तु त्पातफलमजानंतः ब्रह्मपुत्रान्‌ सनकादीन्‌ ऋते तेभ्यः एते सर्वाः प्र

खराश्च कर्कशैः क्षत्तः खुरैर्घ्नंतो धरातलं खार्काररभसा मत्ताः पर्यधावन्वरूथशः ११ रुदंतो रासभत्रस्ता नीडादुदपतन्खगाः
घोषेऽरण्ये च पशवः शकृन्मूत्रमकुर्वत १२ गावोऽत्रसन्नसृग्दोहास्तोयदाः पूयवर्षिणः व्यरुदन्देवलिंगानि द्रुमाः पेतुर्वि
नानिलं १३ ग्रहान्पुण्यतमानन्ये भगणांश्चापि दीपिताः अतिचेरुर्वक्रगत्या युयुधुश्च परस्परं १४ दृष्ट्वान्यांश्च महोत्पा
तानतत्तत्त्वविदः प्रजाः ब्रह्मपुत्रानृते भीता मेनिरे विश्वसंप्लवं १५ तावादिदैत्यौ सहसा व्यज्यमानात्मपौरुषौ ववृधातेऽश्म
सारेण कायेनाद्रिपती इव १६ दिविस्पृशौ हेमकिरीटकोटिभिर्निरुद्धकाष्ठौ स्फुरदंगदाभुजौ गां कंपयंतौ चरणैः पदे पदे कट्या सु

जाः भीताः विश्वसंप्लवं जगत्संहारं मेनिरे मन्यंते ब्रह्मपुत्रास्तु कैवल्यवस्तु विषयज्ञानसंपन्नाः न भीता इत्यर्थः १५ तौ जातौ तावादिदैत्यौ स
हसा आशु व्यज्यमानं प्रकटीभवत्‌ आत्मपौरुषं पूर्वसिद्धं स्वपौरुषं ययोः तौ अश्मसारेण अयस्तुल्येन कायेन अद्रिपती इव पर्वतश्रेष्ठाविव ववृधाते १६ पुन
स्तावेव विशिनष्टि दिवीति हेमकिरीटकोटिभिः स्वर्णमयमुकुटाग्रैः दिविस्पृशौ दिवस्पृशंतौ निरुद्धाः काष्ठा दिशो याभ्यां तौ निरुद्ध काष्ठौ
विति पाठे भुवनरुद्धकाष्ठौ इत्यर्थः स्फुरत्स्फुरंति अंगदानि येषु ते भुजा ययोस्तौ अंगदे सार्वतत्त्वभावं स्मरतः पादैः पदे पदे प्रतिपदं विन्यासं गां भू
मिं कंपयंतौ चालयंतौ सुशोभनां कांचीं मेखलां यस्याः तया कट्या अर्कं सूर्यमतीत्य अतिक्रम्य तस्थतुः स्थितवंतौ १७ ॥ ॥

83

त॰

कां सार्कमती

राम॰
८३

१ तत्र तत्र देशे तयोर्जायमानयोः सतोर्दिवि भुवि चान्तरिक्षे बहवः विचित्राः लोकस्योरुभशं भयावहाः भयंकराः उत्पाता निपेतुः पतिता उद्भभूवुरित्यर्थः ३ तानेव प्रपंचयति सहेत्यादिभिरेकादशभिः सहाचलाः सपर्वताः भुवः भूभागाः चेलुश्चलिताः वत्सः सर्वा दिशः प्रजज्वलुः वह्निज्वालापुञ्जा बभूवुः सोल्काः सांगाराः अशनयश्च पेतुः पतिताः आर्त्तिहेतवः लोकपीडास्य चकाः केतवः धूमकेत्वादयः उद्बभूवुरिति शेषः ४ खरः स्पर्शः कठिनस्पर्शः फुत्कारानितिवा पुष्पायानुकरणानास्मुहुः ईरयन्वध नयन्नगपतीन्वृक्षश्रेष्ठानुन्मूलयन् वात्याश्च क्रवायवः तेषामनीकः समूहो यस्य रजएव ध्वजो यस्य वात्यानीतेति पाठे वात्या भिरानीतं उद्धतं रज एव ध्वजो यस्य सोर्थः एवं विधो वायुर्वबौ प्रासरत् ५ उच्चैर्हसंत इव तडितो येषु तेषामंभोदानां मेघानां घट यासमूहेन नष्टो भागणः सर्वा दिशः ...न ... लोना... सूर्यादिप्रभासमूहो यस्मिन् व्योम्नि प्रविष्टतमसा प्रविष्टगाढांधकारे
उत्पातावहवस्तत्र निपेतुर्जायमानयोः दिविभुव्यंतरिक्षे च लोकस्योरुभयावहाः ३ सहाचलाभुवश्चेलुर्दिशः सर्वाः प्रजज्व लुः सोल्काश्चाशनयः पेतुः केतवश्चार्त्तिहेतवः ४ ववौ वायुः सुदुःस्पर्शः फुत्कारानीरयन्मुहुः उन्मूलयन्नगपतीन्वात्या नीकोरजोध्वजः ५ उद्धसत्तडिदंभोदघटया नष्टभागणे व्योम्नि प्रविष्टतमसा न स्म व्यादृश्यते पदं ६ चुक्रोश विमनावार्द्धि रुदूर्मिः क्षुभितोदरः सोदपानाश्च सरितश्चुक्षुभुः शुष्कपंकजाः ७ मुहुः परिधयोभूवन्सराह्वोः शशिसूर्ययोः निर्घाता र थनिर्ह्रादा विवरेभ्यः प्रजज्ञिरे ८ अंतर्ग्रामेषु मुखतो वमंत्यो वह्निमुल्बणं सृगालोलूकटंकारैः प्रणेदुरशिवं शिवाः ९ संगीत वद्रोदनवदुन्नमय्य शिरोधरां व्यमुंचन्विविधा वाचो ग्रामसिंहास्ततस्ततः १०
वहद्दूर्मिभि ४
६ वार्द्धिः समुद्रः विमना इव विमनस्क इव चुक्रोश चुक्रुश चित्तः उदूर्मिभिः क्षुभितं उदरं उदरस्थ्या मकरादयो यस्य सः उदपानाः कूपास्तेषु प्रदृश्यते पदं अपि न दृश्यते स्म पथः ना उदपानै सहिता सरितः शुष्कपंकजाः अतएव शुष्कपंकजाः ... तानि चुक्षुभुः ७ सराहोः राहुग्रस्तयोः शशिसूर्ययोः मुहुः पुनः पु नः परिधयः परिवेषाः अभूवन् निर्घाताः निरभ्रगर्जितानि रथनिर्ह्रादा रथध्वनितुल्यध्वनयः विवरेभ्यः गिरिगह्वरेभ्यः प्रजज्ञि रे जाताः ८ अंतर्ग्रामेषु ग्राममध्येषु मुखतो मुखैः उल्बणं वह्निं वमंत्य उद्गिरंत्यः शिवाः ग्रामयवः सृगाला नाउलूकानां च टंकारैः ९

तस्मिन् हिरण्यपुरे प्रविष्टे सति वरुणसैनिकाः यादोगणाः ससाध्वसा भययुक्ताः अत एव सन्नधियः विशीर्णबुद्धयः यद्वा एव सन्नबुद्धयः दुःखिताः चिन्ताकुलाः इति यावत् अहन्यमानाः अपि तस्य ओजसा स्पर्धया तेजसा प्रधर्षिताः अभिभूताः सन्तो दूरतरं प्रदुद्रुवुः पलायिताः २५ वर्षपूगान् बहून् संवत्सरान् उदधौ समुद्रे चलन् चरन् श्वसनेन पवनेन ईरितान् उत्थितान् महोर्मीन् उच्चैस्तरं गान् मुहुर्मौर्व्या अभिघ्नन् याचितः आगत्य महाभुजः सन् विभावरीं प्रचेतसः वरुणस्य पुरीं मासेदिवान् प्राप्तः २६ तत्र विभावर्याम् अस्मराणां यादसां लोकपालं पातालस्य ... यादोगणानाम् ऋषभम् अधिपतिं प्रचेतसं वरुणं उपलभ्य समीपं प्राप्य स्मयन् नीचवत् प्रणिपत्य ... अधिराज वरुण मे मम युद्धं देहीति जगाद मया सह युध्यस्वेत्युक्तवान् २७ तस्य दुष्प्रापमिति पादाद्विषयाह त्वं लोकपालानाम्

तस्मिन् प्रविष्टे वरुणस्य सैनिका यादोगणाः सन्नधियः ससाध्वसाः अहन्यमाना अपि तस्य तेजसा प्रधर्षिता दूरतरं प्रदुद्रुवुः
२५ स वर्षपूगान् उदधौ महाबलश्चरन्महोर्मीन् श्वसनेरितान्मुहुः मौर्व्याभिघ्नन् गदया विभावरीमासेदिवांस्तात पुरीं प्रचेतसः
२६ तत्रोपलभ्यासुरलोकपालकं यादोगणानामृषभं प्रचेतसं स्मयन्प्रलब्धुं प्रणिपत्य नीचवज्जगाद मे देह्यधिराज संयुगम् २७
त्वं लोकपालोऽधिपतिर्बृहच्छ्रवा वीर्यापहो दुर्मदवीरमानिनाम् विजित्य लोके खिलदैत्यदानवान्यद्राजसूयेन पुरायजत्प्रभो २८
स एवमुत्सिक्तमदेन विद्विषा दृढं प्रलब्धो भगवानपां पतिः रोषं समुत्थं शमयन्स्वया धिया व्यवोचदङ्गोपशमं गता वयम् २९
पश्यामि नान्यं पुरुषात्पुराणाद्यः संयुगे त्वां रणमार्गकोविदम् आराधयिष्यत्यसुरर्षभेहि तं मनस्विनो यं गृणते भवादृशाः ३०

धिपतिः बृहच्छ्रवा महायशाः दुर्मदाः ये वीरमानिनः तेषां वीर्यापहन्ता कथमहमेवंविधस्तव पानिस्थितः इत्यत्राह यद्यस्मात् खिलान् दैत्यान् दानवांश्च विजित्य राजसूयेनायजः इष्टवान् २८ हे प्रभो सः भगवान् अपां पतिः वरुणः उत्सिक्तमदेन विद्विषा असुरेण तथा दृढं प्रलब्धो विप्रलब्धः समुत्थं रोषं स्वया धिया ... शमयन् उवाच हे असुर वयं उपशमं शान्तिं गताः प्राप्ताः २९ किं च सनातनात् पुरुषात् परमपुरुषात् हे असुरर्षभ युद्धमार्गेषु कोविदं निपुणं त्वां संयुगे आराधयिष्यति तं मन्ये न पश्यामः अतस्तं परमपुरुषं एहि गच्छ कीदृशोऽसौ पुरुषः परमेश्वरः इत्यत्राह भवादृशा मनस्विनः स्वैराः यं पुरुषं गृणते स्तुवन्ति ३० ॥

॥ तयोर्यमयोर्मध्ये यः स्वदेहात्प्रथमम् अजायत तं हिरण्यकशिपुं प्रजा विदुः सा दितिर्यं प्रथमम् असूत तं हिरण्याक्षं यथा विदुः तथा नामधेयं प्र
जापतिः कश्यपः आकार्षीत् कृतवान् अयं भावः यद्यपि गर्भाधानसमये योनिपुष्यं विशन्नीयं द्विधा विभक्तं मा दितेः प्राक् प्रथमं प्राप्तं तेन
प्रविशन्नितराय सोऽभवत् स्वपितृतः प्रवेशक्रमविपर्ययेणमातृतः प्रसूतिः यद्यपि विशुद्धि द्विधा भूतं वीर्यं पुष्पं परिस्फुरमू होतद्गर्भा

त्रिदि ४

वतो गर्भौ स्मृतिर्वै विपर्ययादिति पितृसिद्धिः स्मरणात् अतः स्वदेहात् प्रथमो जातस्तस्य हिरण्यकशिपुरिति दितेः प्रथमं प्रसूतस्य
हिरण्याक्ष इति नाम कृतवानित्यर्थः १८ हिरण्यकशिपुः स्वदोर्भ्यां भुजाभ्यां उद्धतः ब्रह्मणश्चतुर्मुखस्य वरेण अकुतोमृत्युः कुतश्चिदपि म
त्युरहितः सपालान् लोकपालसहितान् लोकान् वशे चक्रे स्वाधीनान् अकार्षीत् १९ तस्य हिरण्यकशिपोरनुजः पितृमातृनुजः हि

ज० १

रण्याक्षः प्रियः प्रीतिविषयः अन्वहं स्वयमपि प्रीतिकृत् गदापाणिः यस्य स युयुत्सुः योद्धुमिच्छुः रणं रणयुद्धं मृगयन् दिवं यातः गतः

प्रजापतिर्नाम तयोरकार्षीद्यः प्राक् स्वदेहाद्यमयोरजायत तं वै हिरण्यकशिपुं विदुः प्रजा यं तं हिरण्याक्षमसूत साग्रतः १८ चक्रे हि
रण्यकशिपुर्दोर्भ्यां ब्रह्मवरेण च वशे सपालाँल्लोकांस्त्रीनकुतोमृत्युरुद्धतः १९ हिरण्याक्षोऽनुजस्तस्य प्रियः प्रीतिकृदन्वहं गदा
पाणिर्दिवं यातो युयुत्सुर्मृगयन् रणं २० तं वीक्ष्य दुःसहजवं रणत्काञ्चननूपुरं वैजयन्त्या स्रजा जुष्टमंसन्यस्तमहागदं २१ मनोवी
र्यवरोत्सिक्तमसृण्यमकुतोभयं भीता निलिल्यिरे देवास्तार्क्ष्यत्रस्ता इवाहयः २२ स वै तिरोहितान् दृष्ट्वा महसा स्वेन दैत्यराट् सेन्द्रा
न्देवगणान्क्षीबानपश्यन्व्यनदद्भृशं २३ ततो निवृत्तः क्रीडिष्यन् गम्भीरं भीमनिस्वनं विजगाहे महासत्त्वो वार्धिं मत्त इव द्विपः २४ ॥

२० तं हिरण्याक्षं दुःसहजवं दुःसहबलं रणन्ती क्वणन्ती काञ्चनमये नूपुरे यस्य तं वैजयन्त्या स्रजा पुष्पपत्रादिनिर्मितस्रग्विशेषो वैजयन्ती त

म० २

या स्रजा जुष्टं सेवितं अंसे स्कन्धे न्यस्ता निहिता महती गदा येन तं २१ मनसा वीर्येण बलेन वरेण च उद्रिक्तं गर्वितमसृण्यं तिरस्कु

देवा० ३

मकुतोभयं कुतश्चिदपि भीतिमकुर्वन्तं वीक्ष्य भीताः सन्तो निलिल्यिरे तिरोहिताः तत्र दृष्टान्तः तार्क्ष्याद्गरुडात् त्रस्ताः अहयः सर्पा इवेति २२
स दैत्यराट् हिरण्याक्षः स्वेन महसा तेजसा तिरोहितान् सेन्द्रान् इन्द्रसहितान् देवगणान् ज्ञात्वा क्षीबो मत्तः तान् अपश्यन् क्षीबानपश्यन्निति पाठे पौ
रुषहीनान् अपश्यन् व्यनदत् भृशं नितरां अदध्वनत् २३ ततो दिवः निवृत्तः प्रत्यागतः क्रीडिष्यन् विहरिष्यन् गम्भीरमगाधं भीमः निस्वनः
तरङ्गजन्यो ध्वनिर्यस्मिंस्तं वार्धिं समुद्रं महासत्त्वो महाबलः हिरण्याक्षः द्विपो गज इव विजगाहे विलोडितवान् २५ ॥ ॥ ॥

शुष० २

मत्तगज० १

मा० त० टी०
८५

किंच त्वमिति सपत्नैः स्फुरैर्नोस्माकमभवाय नाशाय त्वं भृतः पुष्टः किंच परोक्षजित्सरोक्षं जयतीति परोक्षजित् यो मायया असुरान्हंसि त्वां योगमाया आत्ममायैव बलं यस्य तमत एवाल्पपौरुषं बलं संस्थाप्य हत्वा हे मूढ स्फुरद्रांशुचः आत्मनो प्रमृजे स्फुतिवसनेः सपत्नैरभवाय मोक्षाय भृतः किमाशीर्वैतः किं यो भवान्परोक्षे संग्रामाद्बहिर्गत्वा मायया आत्मीयसंकल्पेनोऽसुरान्हंसि न तु तवास्ति वैयम्यं किं तु लीलयैवेत्यर्थः योगमायाबलमात्मीयमन्वित्सबलं अपवाल्पपौरुषमल्पं पौरुषं यस्मात्त्वां संस्थाप्य हत्वा संप्रकृभंशुचास्यादपि त्वा दृष्टीकृत्सेत्यर्थः हेमूढ प्रमृजान्याप्ति आप्याययतीति मूढ प्रः तं संबोधनं प्रमृज्मिति धातुः स्फुरद्ववधुनोऽपृचः संसारदुःखानि मज्जेनाशयामि यतस्त्वं स्मर्तुं बंधवानपि मोचयसीत्यर्थः ४ त्वयीति अस्मरुजच्युतया अस्मद

६२

त्वंनः सपत्नैरभवाय किं भृतो यो मायया हंत्यसुरान्परोक्षजित् त्वां योगमायाबलमल्पपौरुषं संस्थाप्य मूढ प्रमृजे स्फुरद्रुचः

शी०टी०२ ४ त्वयि संस्थिते गदया शीर्णशीर्षण्यस्मदुजच्युतया येच तुभ्यं बलिहरंत्वृषयो ये देवाः स्वयं सर्वे न भविष्यंत्यमूलाः ५ सतु घमानो रिदुरुक्तितोमरैर्दंष्ट्राग्रगां गामुपलभ्य भीतां तोदं मधन्निरगादंबुमध्याद्ग्राहाहतः सकरेणुर्यथेभः ६॥ ॥

85

त्तविसख्याशीर्णंभि न्नं शिरो यस्य तस्मिन्त्वयि संस्थिते हते सति तुभ्यं बलिं प्रजां येच ऋषयो देवा स्म हरंति कुर्वंति ते सर्वे स्वयमेव प्रयत्नमंतरेणामूलाः अनाश्रयाः संतः न भविष्यंति न शंतीत्यर्थः स्फुतिवसे त्वस्मद्गुजच्युतया गदया शीर्णं शीर्षण्यपि त्वयि संस्थिते सम्यक् स्थिते सति तुभ्यं बलिहरं तिस्म ऋषयो देवा श्चामूला न भविष्यंति किं तु दृढमूला एव भवि

६२ ष्यंतीत्यर्थः ५ स भगवान् दैत्यरसदुरुक्तयएवतोमराः शास्त्रविशेषास्तैः स्फुघमानः व्यथमानः भीतां दंष्ट्राग्रगतां गां भू

मिं उपलभ्य तोदं दुरुक्तिव्यथां मधन्सहमानः अंबुमध्यात् ग्राहेण मकरेण हतः सकरेणुर्हस्तिनीसहितः इभो गज इव निरगान्निर्गतः ६॥

राम०
८५

ह

वीरं तं परमपुरुषमारात्समीपे ऽभिपद्य विस्मयो विगतगर्वः वीरशय्ये रणप्रदेशे ऽस्त्रैरभिवृतः परिवेष्टितः शयिष्यसे भवानिवसो ऽपि न युयुत्सति चेत्किं विधेयमित्यत आह यो भगवांस्त्वद्विधानामसत्तां प्रशान्तये विनाशाय सतामनुग्रहेच्छया च रूपाणि वरगाहाद्यवतारान् धत्ते बिभर्त्ति ३१ इति तृतीये सप्तदशः १७ एवं क्रूरेणाभाषितो ऽसुरस्तं भगवंतमन्वेषयन् गतः इत्याह मुनिः तदेवं क्रूरप्रकारेण जले शभाषितं वरुणभाषितमाकर्ण्य निशम्य महामनाः प्रतियोद्धारं श्रुत्वा ऽमर्षचित्तः दुर्मदः अत एव शयिष्यसे इति यदुक्तं तदविगणय्य त्वां गदेत्विदुरहरेर्भगवतो गतिं मार्गं नारदाद्विदित्वा ऽऽगात्वरान्वितः रसातलं निर्विविशे प्रविवेश वा न् १ तत्र रसातलं भितः सर्वतः जयतीं त्वभिजितं हरिं दंष्ट्राग्रेण भूतं धराधरं भूधरं पर्वतं इव स्थितं मग्नदं भूयादंष्ट्राग्रेण प्रोन्नीयमानां भूर्नीयमानां वनिर्येन तमरुणाक्षियाभ्यां स्वरुचा [illegible] हिरण्याक्षस्तं जोसिहरंतं अभुरुहारुणाक्षियं इति पाठे साकरुणं

संवीरमारादभिपद्य विस्मयः शयिष्यसे वीरशये श्वभिर्वृतः यस्त्वद्विधानामसतां प्रशान्तये रूपाणि धत्ते सदनुग्रहेच्छया ३१ इ तिश्री॰ तृतीयस्कंधे सप्तदशो ऽध्यायः १७ मैत्रेय उ॰ तदेवमाकर्ण्य जलेशभाषितं महामनास्तद्विगणय्य दुर्मदः हरेर्विदित्वा गतिमंग नारदाद्रसातलं निर्विविशे त्वरान्वितः १ ददर्श तत्राभिजितं धराधरं प्रोन्नीयमानावनिमग्रदंष्ट्रया मुष्णंतमक्ष्णा स्वरुचो ऽरुणश्रिया जहास चाहो वनगोचरो मृगः २ आहैनमेह्यज्ञ महीं विमुंच नो रसौकसां विश्वसृजेयमर्पिता न स्वस्ति यास्यस्यनया ममेक्षतः सुराधमासादितसूकराकृते ३ कुरुहाक्षियं मुष्णंतं इत्यर्थः दृष्ट्वा हो वनगोचरः वने पुजातेषु तस्य मागं मगोत्र इव पशुपत इति जहासापहसितवांश्च २ ततएनं भगवंतमाहोवाच च अज्ञि मे वाहर धाग ज्ञमेहीं विमुंच रसौ पातालवासिनां नोस्माकं विश्वसृजा ब्रह्मणा इयं मही अर्पिता नयथा पातालावतरणमस्याः न घटते इति भावः हिरण्याक्षे लोधि से पाय प्रयुक्तापीयं भारती यस्तु तोभगवंतं स्तौति तथाहि वनगोचरः जलपयोनारायणः स एव योगिभिर्मृग्यत इति मृगः इत्थाद्विहिंतुं मृगयुत इति वा अज्ञ नास्ति ज्ञो यस्मात्सर्वज्ञ इत्यर्थः हे सुराधम मम मे सतः पश्यतः सतः अनया भूम्या सह स्वस्तिमंगलं पयातथा न यास्यसि स्वास्तिं प्रेत सुरा अधमा यस्मात्तत्हे सुरोत्तम मे समाणस्यापि सतः मामनादृत्य त्वनया सह वर्त्तमानो नो ऽस्मद्दीयसमस्तं मंगलं यास्यसि तथा ऽस्मत्क्रूपया विमुंचेत्यर्थः [illegible] सादितानीलया स्वीकृता सूकराकृतिर्येन संततस्य बोधनं ३ ॥ ॥ ॥ ॥

म२

तद्वाक्ये विपर्यये पर्यवसाययन्नाह एते वयमिति रसौकसां रसातलवर्त्तिनां पुरुषाणां न्यासहरा एतेन वयं न्यस्तं निक्षिपंति पादावस्मिन्निति न्या
सः आधारः भवतामाधारभूः हरा वयं अयं काकुः न हीयं भूमिः रसातलवर्त्तिनां न्यास इत्यर्थः एते वयं गतलज्जाः तेत्वया कर्त्री
गदया द्राविताः धाविताः अयमपि काकुः अस्माभिरेव यूयं द्राविता इत्यर्थः अथापि गदया द्राविता अपि कथंचित्के
नापि प्रकारेण आजौ संग्रामे तिष्ठामहे स्थातुमिच्छामहे बलिनो त्वया सह वैरं विरोधं उत्पाद्य क्व यामः कुत्र गमिष्यामः अत्रापि भव
द्रूपेण स्वया विलसन्तेनैव प्रकारेण आजौ तिष्ठामहे स्थातुमिच्छामहे बलिभिरस्माभिर्विरोधमुत्पाद्य क्व यास्यसीति विपर्यये पर्यवसान
मभिप्रेतं ११ त्वमिति पद्रथानां पदातीनां यूथपास्तेषामधिपस्त्वं न अस्माकमस्वस्तये [illegible] रभवाप्यसु घटस्व यतस्व अनू
हः अशंकस्त्वमस्मान्संस्थाप्य हत्वा स्वकानामश्रु प्रमृज यः पुमान्स्वीयां प्रतिज्ञां नातिपिपर्त्ति न पूरयति प्रतिज्ञातार्थं न निर्वर्त्तने

एते वयं न्यासहरा रसौकसां गतह्रियो गदया द्राविताः ते तिष्ठामहेऽथापि कथंचिदाजौ स्थेयं क्व यामो बलिनोत्पाद्य वैरं ११
त्वं पद्रथानां किल यूथपाधिपो घटस्व नोऽस्वस्तय आश्वनूहः संस्थाप्य चास्मान्प्रमृजाश्रु स्वकानां यः स्वां प्रतिज्ञां नातिपि
पर्त्यसभ्यः १२ मैत्रेय उ॰ सोऽधिक्षिप्तो भगवता प्रलब्धश्च रुषा भृशं आजहारोल्बणं क्रोधं क्रीड्यमानोऽहिराडिव १३ सृजन्न
मर्षितः श्वासान्मन्युप्रचलितेंद्रियः आसाद्य तरसा दैत्यो गदयाभ्यहनद्धरिं १४ भगवांस्तु गदावेगं विसृष्टं रिपुणोरसि अ
वंचयत्तिरश्चीनो योगारूढ इवांतकं १५ ॥ ॥

[illegible] न समापयति स असभ्यः सभायामनर्हः अत्रापि त्वं पद्रथानामित्यादिशब्दैरपि विपर्यये पर्यवसायित्वं
भगवतोऽभिप्रेतं १२ भगवताधिक्षिप्तः तिरस्कृतः उपहासः रुषा भृशं प्रलब्धः प्रहसितश्चासुरः उल्बणं क्रोधमाजहार स्वीकृतवां
स्तु क्रोधे इत्यर्थः यथा क्रीड्यमानः अहिराट् सर्पश्रेष्ठः तथेति दृष्टांतः १३ अमर्षितः क्रुद्धः अत एव श्वसान्निश्वासान्सृजन्मन्युनैव म
न्युना प्रचलितानींद्रियाणि यस्य स दैत्यः आसाद्य समीपमागत्य तरसा बलेन गदया हरिमभ्यहनत्ताडितवान् १४ भगवांस्तु रिपु
णा स्फुरेण उरसि निसृष्टं गदावेगं तिरश्चीनः सन् अंतकं मृत्युं योगारूढः निष्पन्नयोगीवावंचयत्परिहृतवानित्यर्थः १५ ।

न्युनाम

86

निःसरंतं सलिलान्निर्गच्छंतं भगवंतं गाढं यथा झषो मकरस्तथानुद्रुतः अनुधावन् हिरण्यकेशो हिरण्याक्षः करालाभयंकरा दंष्ट्रा य
स्य सः अशनिनिःस्वनो ऽस्य सः अब्रवीत् तदेवाह गतह्रियानिर्लज्जो नामसतां किं नु विगर्हितमस्ति निंदाभयाभावात् सलायनेनापुंस्त्व
मिति भावः ७ तिपसेनुगतह्रियामस्माकं किं विगर्हितमस्ति लोकोपकारार्थं भुवमुद्धरंतं प्रसस्ततामस्माकमनुद्रवणमुचितमेवेत्य
र्थः ७ स भगवान् सलिलस्योदस्तादुपरि गोचरे स्थवहारगोचरे देशे गां भूमिं विन्यस्य निधाय तस्यां गवि स्वसत्त्वं बलरूपामाधारश — नं४
क्तिमदधान्निहितवान् अरेः शत्रोर्हिरण्याक्षस्य पश्यतः सतः विश्वसृजा ब्रह्मणाभिष्टुतः स्वया साधुकृतमित्येवमुक्तः विबुधैर्देवैः कु
सुमैः प्रसूनैः पुष्पैः करणैः शर्यमाणः विकीर्यमाणः पद्माभिष्टुतः तं हिरण्याक्षं वै भाषे इत्युत्तरेणान्वयः ८ परानुषक्तं तपनीयोप

तं निःसरंतं सलिलादनुद्रुतो हिरण्यकेशो द्विरदं यथा झषः । करालदंष्ट्रोऽशनिनिःस्वनोऽब्रवीद्गतह्रियां किं त्वसतां विगर्हितं ७
सगामुदस्तात्सलिलस्य गोचरे विन्यस्य तस्यामदधात्स्वसत्त्वं । अभिष्टुतो विश्वसृजा प्रसूनैरापूर्यमाणो विबुधैः पश्यतोऽरेः
८ परानुषक्तं तपनीयोपकल्पं महागदं कांचनचित्रदंशं । मर्माण्यभीक्ष्णं प्रतुदंतं दुरुक्तैः प्रचंडमन्युः प्रहसंस्तं बभाषे ९ श्री — प्र२
भो — भगवानु० सत्यं वयं वनगोचरा मृगा युष्मद्विधान्मृगये ग्रामसिंहान् । न मृत्युपाशैः प्रतिमुक्तस्य वीरा विकत्थनं तव गृह्णं
त्यभद्र १०

तोऽनुषक्तमनुलग्नमनुद्रुतं तपनीयोपकल्पं तपनीयं सुवर्णं तन्मयान्युपकल्पानि भूषणानि यस्य तं महती गुर्वी गदा यस्य तं कां
चनमयं चित्रं दंशं यस्य तं दुरुक्तैर्दुर्वाक्यैरभीक्ष्णं पुनः पुनः मर्माणि प्रतुदंतं व्य[illegible]थंतं मस्करं प्रति प्रचंड उत्कृष्टः मन्युः क्रोधो यस्य सः
भगवान् प्रहसन्स बभाषे उवाच सोपालंभमिति शेषः ९ तद्वचनमेवाह सत्यमिति अस्करवयं वनगोचराः मृगा इति यदुक्तं — भो
तत्सत्यमेव किं तु युष्मद्विधान् भवादृशान् ग्रामसिंहान् श्वानः मृगयन् मृगः अन्वेषयन् मृगयितुमहं मृगो जात इत्यर्थः मृगये इति
पाठे तु मृगये न्वेषयामीत्यर्थः मृत्योः पाशैः प्रतिमुक्तस्य बद्धस्य तवाभद्र अमंगल त्वं विकत्थनं श्लाघनं धीराः महान्तः न गृह्णंति नादि
नाभिनंदंति मृत्युपाशैः प्रतिमुक्तस्येति हेतुगर्भं मृत्युपाशप्रतिबद्धत्वाद्घद्विकत्थनं तत्र गृह्णंतीत्यर्थः १० ॥ ॥ ॥

भा॰टी॰ ९७ गपर आगस्कृन्निर्निमित्तमपराधकृत्तत्परिहारापप्रवृत्ते भयकृन्दीनान्ज्ञात्वादुःकृदर्पप्राणादिहर्ता अस्मतोऽस्मद्धोलब्धोवरोयेनसत्व यमप्रतिरथः प्रतिपक्षरहितः अन्वेषयन्प्रतिरथम् ... कटकइवलोकान्सटतिचरति २३ हेदेवमायाविनंविचित्रचतुरंगादि बलोत्पादकाश्चर्यशक्तिसपन्नमत्तएवदृप्तंगर्वितंनिरंकुशंनिरंकुशगजमिवस्थितमसत्तमंदुरात्मानंएनंदैत्यंप्रसुस्थितमाशीविषं सर्पंपुच्छाकर्षणादिनाबालकवन्माक्रीडं २४ दारुणउग्रएषदैत्यः यावस्वांस्वबलकरींवेलांसंध्यारूपांप्राप्यनवर्द्धेततावदेवस्वामात्मी यांमायांबलमास्थायाश्रित्यजहिपक्षस्वांएवोत्क्रांविधांमायामास्थायपस्वांवेलांप्राप्ययावदेषनवर्द्धेततावज्जहीत्यन्वयः हेअच्युतानाश्रि तान्नच्यावतेइत्यच्युत २५ कोसावयास्यतियांप्राप्यवर्द्धेतेत्युच्यतेइत्यत्राह हेप्रभोलोकछंवट्करीलोकानांप्रतिकूलकरीलोकस्तब्धक

आगस्कृद्भयकृद्दुष्कृदस्मद्राद्धवरोऽसुरः अन्वेषन्नप्रतिरथोलोकानटतिकंटकः २३ मैनंमायाविनंदृप्तंनिरंकुशमसत्तमं आक्रीडबालवद्देवयथाशीविषमुत्थितं २४ नयावदेषवर्द्धेतस्वांवेलांप्राप्यदारुणः स्वांदेवमायामास्थायतावज्जह्यघमच्युत २५ एषाघोरतमासंध्यालोकछंवट्करीप्रभो उपसर्पतिसर्वात्मन्सुराणांजयमावह २६ अधुनैषोभिजिन्नामयोगोमौहूर्तिकोह्यगात् शिवायनस्त्वंसुहृदामाशुनिस्तरदुस्तरं २७ दिष्ट्यात्वांविहितंमृत्युमयमासादितःस्वयं विक्रम्यैनंमृधेहत्वालोका नाधेहिशर्मणि २८ इतिश्रीमद्भा॰ तृतीयस्कंधेहिरण्याक्षयुद्धंनामाष्टादशोध्यायः १८

रीतिपाठेमोहनकरीत्यर्थः घोरतमाभयंकराएषासंध्याउपसर्पत्याप्नोत्यास्थानेहेसर्वात्मन्सुराणांजयमावहसंपादय सुराणांजयावहेतिपाठेसंध्याविशेषणं २६ अधुनाइदानींएषअभिन्नामाभिजिदाख्यःमौहूर्तिकःमध्याह्नमुहूर्तरूपः योगःपुण्यःकालःअगात्आगतः ततस्मात्सुहृदांशिवायसत्वलयेदुस्तरंदुर्जयंदैत्यमाशुनिस्तरजहि २७ दिष्ट्या तिविहितंत्वयैवशापानुग्रहकालेविहितं यद्वातदाविष्वेरःकृतोभगवाञ्छोकभावनः हनिष्यत्यवतीर्यासौयाभ्यामितिशेत पर्वध्यातितिपित्राकश्यपेनैवविहितंमृत्युंत्वामयमसुरः स्वयंदिष्ट्यादैवेनैवासादितः एनमसुरंमधेयुद्धेविक्रम्यपदाक्रम्य [illegible] हत्वेत्यर्थः लोकान्शर्मणिसुखेआधेहिस्थापयेत्यर्थः २८ इतिवीरराघवीटीकायांतृतीयेष्टादशः १८

87

जि॰२

राम॰

९७

भा०टी०

पुनस्तामप्राप्तामेव गदां स्वां आभीक्ष्णशः पुनः भ्रामयंतमसकृत् भ्रामयन्तं क्रोधात् हरिस्तत एव संरंभात्क्रोधाद्दष्टदच्छदः दष्टाधरः अभ्यधावत् १६ ततश्च अभिधावनानंतरं प्रभुर्भगवान्स्वगदया अरातिं शत्रुं दक्षिणस्यां भुवि दक्षिणपार्श्वे आजघ्ने प्रजहार हे सौम्य विदुर सत्त्वस्फारः कोविदः गदायुद्धकुशलो तत एव तां स्वगदां दक्षिणस्यां भुवि हृदि रणपुष्पं गदामप्राप्तामेव गदया अहनत् दाजघ्ने १७ एषोऽसुरः हरिश्च सुसंरब्धौ जिगीषया अन्यो-

२४ न्यं तु मिथः गुर्वीभ्यां गदाभ्यां अन्योन्यं परस्परं सुभिजघ्नतुः १८ तयोर्हर्यक्षयोः स्पृधोः स्पर्द्धमानयोः तीक्ष्णाभ्यां [illegible] तीक्ष्णाभ्यां गदा-

टी०२ भ्यां हतानि ताडितान्यंगानि ययोस्तत एव क्षतानि स्रवंतीति क्षतास्रवं रुधिरं तस्य घ्राणेन विवृद्धः मन्युर्ययोस्तयोस्तत एव इलायां पृथिव्यां निमित्तभूताया इला-

र्थमिति वा स्पर्द्धिनः जिगीषया परस्परजयेच्छया विचित्रमार्गान् गदायुद्धक्रमान् प्रभेदांश्चरतो मृधः संग्रामः शुष्मिणोर्मत्तवृषभयोरि-

पुनर्गदां स्वामादाय भ्रामयंतमभीक्ष्णशः अभ्यधावद्धरिः क्रुद्धः संरंभाद्दष्टदच्छदः १६ ततश्च गदयारातिं दक्षिणस्यां भ्रुवि प्रभुः आजघ्ने स तु तां सौम्य गदया कोविदोऽहनत् १७ एवं गदाभ्यां गुर्वीभ्यां हर्यक्षो हरिरेव च जिगीषया सुसंरब्धावन्योन्यमभिजघ्नतुः १८

२३ तयोः स्पृधोस्तिग्मगदाहतांगयोः क्षतास्रवघ्राणविवृद्धमन्व्योः विचित्रमार्गांश्चरतोर्जिगीषया व्यभादिलायामिव शुष्मिणोर्मृधः १९ दैत्यस्य यज्ञावयवस्य मायागृहीतवाराहतनोर्महात्मनः कौरव्य मह्यां द्विषतोर्विमर्दनं दिदृक्षुरागादृषिभिर्वृतः स्वराट् २० आसन्नशौंडीरमपेतसाध्वसं कृतप्रतीकारमहार्यविक्रमं विलक्ष्य दैत्यं भगवान्सहस्रणीर्जगाद नारायणमादिसूकरं २१ ब्रह्मोवाच एष ते देव देवानामंघ्रिमूलमुपेयुषां विप्राणां सौरभेयीणां भूतानामप्यनागसां २२ ॥ ॥ ॥ ॥

वत्राभाद्बभौ १९ दैत्यस्य हिरण्याक्षस्य यज्ञावयवस्य यज्ञमूर्तेर्मायया स्वेच्छया गृहीता वाराहतनुर्येन महात्मनः दैत्ययज्ञ-वराहयो-

से वर्णाचित्रस्य भगवतश्च हे कौरव्य विदुर मह्यां भूम्यां निमित्तभूतायां द्विषतोर्युध्यमानयोर्विमर्द्दनं युद्धं दिदृक्षुर्द्रष्टुमिच्छुः स्वराट् ब्रह्मा ऋषिभि-

र्मरीच्यादिभिर्वृतः आगत आसन्नं सहस्रणीः देवसहस्राणि नयतीति सहस्रणीः ते ताभगवान्ब्रह्मा दैत्यमालक्ष्य आदिसूकरं नारायणं जगाद कथं-

भूतं दैत्यं आसन्नं प्राप्तं शौंडीरं मदो येन तं अपेतमपगतं साध्वसं भयं यस्य तं कृतप्रतीकारः प्रतिहरणरूपा प्रतिक्रिया येन तं अहार्योऽसह्यः

विक्रमो यस्य तं इति २१ उक्तिमेवाह एष इत्यादिना यावत् अध्यायसमाप्ति एष दैत्यः हे देव नारायण ते तव अंघ्रिमूलं पादमूलं उपेयुषां शरणंगता-

नां देवानां विप्राणां सौरभेयीणां धेनूनां अनागसां निरपराधिनामपि भूतानां सर्वजीवानां च २२ ॥ ॥ ॥ ॥ ॥ ॥

सत्रासुरः पद्मपलाशस्मात्तरथांगं चक्रं येन तं भगवंतं निशाम्य दृष्ट्वा अग्रतो व्यवस्थितं च विलोक्य आमर्षेण क्रोधेण परिप्लुतानि व्या-
प्तानीन्द्रियाणि यस्य सः रुषा क्रोधेन श्वसन् स्वदंतच्छदं स्वाधरोष्ठमादशत् समंताद्दष्टवान् ७ करालदंष्ट्रः भयंकरदंष्ट्रोऽसुरः चक्षुर्भ्यां
दहन्निव संचक्षाणः संपश्यन् अभिप्लुत्य अभिमुखमागत्य हरिं भगवंतं हतोसीत्युच्चरन् स्वगदया आहनत् प्रजघान ८ यज्ञसूकरः यज्ञमूर्त्तिरा-
दिसूकरो भगवान् वातरंहसं वायुवेगां तामसुरप्राप्तामेव गदां सव्येन पदा वामपादेन शत्रोर्मिषितः पश्यतः सतः लीलया प्राहरत् ९ तत
आयुधमादत्स्व गृहाण घटस्व यत्नस्व त्वमेवं मां जिगीषसि इत्याह चोक्तवांश्च एवमुक्तः सोऽसुरः तया पदा ताडितया पुनर्गृही-
तया गदया भूयः पुनर्भगवंतं ताडयन् भृशं व्यनदत् नादं चकार १० तामसुरेण प्रयुक्तामापतंतीमागच्छंतीं गदां वीक्ष्य भगवान् सम-
वस्थितः यथावद्देवावतिष्ठन् प्राप्तां स्वसमीपं प्राप्तां गदां गरुत्मान् पन्नगीं सर्पीमिव लीलया जग्राह ११ एवं स्वपौरुषे स्ववीर्ये प्रतिहते

सतं निशाम्यात्तरथांगमग्रतो व्यवस्थितं पद्मपलाशलोचनं विलोक्य चामर्षपरिप्लुतेंद्रियो रुषा स्वदंतच्छदमादशच्छ्वसन् ७
करालदंष्ट्रश्चक्षुर्भ्यां संचक्षाणो दहन्निव अभिप्लुत्य स्वगदया हतोसीत्याहनद्धरिं ८ पदा सव्येन तां साधो भगवान् यज्ञसूक-
रः लीलया मिषतः शत्रोः प्राहरद्वातरंहसं ९ आह चायुधमादत्स्व घटस्व त्वं जिगीषसि इत्युक्तः स तदा भूयस्ताडयन् व्यनद-
द्भृशं १० तां स आपतंतीं वीक्ष्य भगवान् समवस्थितः जग्राह लीलया प्राप्तां गरुत्मानिव पन्नगीं ११ स्वपौरुषे प्रतिहते हतमानो
महासुरः नैच्छद्गदां दीयमानां हरिणा विगतप्रभः १२ जग्राह त्रिशिखं शूलं ज्वलज्ज्वलनलोलुपं यज्ञाय धृतरूपा-
य विप्रायाभिचरन् यथा १३

प्रतिहते सति हते सति हतः विगतो मानो गर्वो यस्य सोऽसुरः अत एव विगतप्रभः विनष्टतेजाः हरिणा दीयमानां स्वगदां नैच्छत् गृ-
हीतुमिति शेषः १२ किंतु त्रिशिखं तिस्रः शिखा अग्रभागा यस्य तत् ज्वलन् यो ज्वलनः अग्निस्तद्वल्लोलुपं स्वकार्यकरणे चपलं शूलं
लेधत वराह रूपाय यज्ञाय यज्ञमूर्त्तये जग्राह आहिणोत् यज्ञाय धृतरूपायेति सर्वत्र यज्ञांगे संबंधः यज्ञोऽक्ररितत्फलप्रदेसे-
च्छोयाता प्राकृत दिव्यवराहरूपे भगवति फलस्य स्वकार्यकिरणं सूचितं एतदेव दृष्टांतेन स्पष्टयति विप्राय ब्रह्मविदि ब्रह्महृ-
द्य अभिचरन् मारणयागं कुर्वन् यथा नमारयति तथा इत्यर्थः ज्वलत्समिद्धः १३ ॥ ॥ ॥ ॥ ॥

४४

एवं ब्रह्मणा भाषितो भगवांस्तद्वचो मिनं घ्रास्फरणां बलकर्णामपि वेलायां सपराक्रममेव दृष्टविषपापुनर्युयुधे इत्याह मुनिः अवधा
र्येति वि रं च स्य ब्रह्मणो निर्मलो कान्तिदेषु मम तत्तुल्यं च वचो वधार्यं कृत्वा प्रहस्य कालात्मः सर्वसंहर्ता मिमापि शत्रुर्वला इयं ब्रवीति विह
स्य स भगवान्प्रेमगर्भेण प्रेमसहितेन वागेन कृता सेन तद्विक्रमेण न मधे हत्वा लोकनाथेहि शर्मणोति वचो ग्रहीं जुहीवान् १ ततः वचो गृ
हणानंतरमकुतोभयमकुतश्चिद्भीतमत एवमुखतः अभिमुखतस्त्वरं तं सपत्नमस्फरम सज्ञो ब्रह्मणोद्यागोविन्दयाविर्भूतो भगवानुरु
सो हृत्स्य गदया हतो कपोलस्थाधो देशो जघान २ सा भगवत्प्रयुक्ता प्राप्नेव गदा तेनास्फरेण कर्णागदया हता भगवत्कराद्विहता भगवत्क
राद्विहता च्युता सती विघूर्णिता घूर्णिता ध्वनयंती अपतन्ती रजेरराजत अंगवत्कराद्विहत्य यतने अच्युत्तपथपतामार्ग्यमिवाभवत् ३

मैत्रेय उ० अवधार्य विरिंचस्यानिर्मलीकामतं वचः प्रहस्य प्रेमगर्भेण तदयां गेन सोभ्यहीत् १ ततः सपत्नं मुखतः अरं तमकुतोभयं
जघानो रस्य गदया हत्वा वस्फरमसजः २ सा हता तेन गदया विहता भगवत्कराद् विघूर्णिता पतद्रजे तदद्भुतमिवाभवत् ३ स तदा
लब्धवती यापि निवधाधेमि राबुध मानयन्समये धर्मविष्वक्सेनं प्रकोपयन् ४ गदायामपविद्धायां हाहाकारे विनिर्गते मोनया
मास तद्गंभस्कन्नाभेश्चास्मराद्धिभुः ५ तं यागचक्रं हितिपुत्राभिधेन स्वपार्षदमुख्येनविषज्जमानं चित्रा वाचो अत दिदंखेचराणां तत्र
स्मासन्स्वस्तितेमु जहीति ६ सोस्फरस्तस्तु लब्धवतीयेपि ल्धावकाशोपि निरायुधमायुधरहितं विष्वक्सेनं भगवंतमधे युद्धे ध
र्मं सिमानयन्प्रकोपयन्नवबाधेन प्राहरत् समधे इति पाठः तु सलब्धवती यापि निवबाधे समीनयन्नभूवेति वाक्यभेदेनान्वयात् पौन
रुक्त्यं बोध्यं ४ गदायामपविद्धायां स्वहस्तोद्विहतायां सत्यां पश्यतां हाहाकारे च विनिर्मिते च सति विभुर्भगवांस्तस्य दैत्यस्य धर्मं निरा
युधावाधनरूपं धर्मं मानयामास वह्नमन्यत स्कन्नाभं चक्रमस्मरच्च स्वहस्तगतमकरोदित्यर्थः ५ तं भगवन्तास्मृत्तंहितिपुत्राभि
धेन दितिपुत्र इतिनाम्ना व्यवह्रियमाणेन स्वपार्षदमुख्येन विषज्जमानं विशेषेणासंगं प्राप्नुवंतं यागचक्रं संभ्रमयुक्तं चक्रं प्राप्ति द
[illegible] स्तुतिशेषः अतदिदं चक्रप्रभावमविदां खेचराणां चित्रा विविधा वाचः अस्मुमस्फरं जहि तेतुभ्यं स्वस्तित्येवमादिकाः तत्र यु
द्धदेशे आसन्सम्बभूवुरित्यर्थः ६

नरु

गिरयः पर्वताः नानायुधमुचः नानायुधानि मुंचंतः प्रत्यदृश्यंत दृष्टा बभूवुः तथा यातुधान्यश्च प्रत्यदृश्यंत कथंभूता दिग्वाससः
दिगंबराः शूलिन्यः शूलधारिण्यः मुक्ताः प्रसारिता मूर्द्धजाः केशा याभिस्ताः २० तथा आततायिभिर्हिंसाशीलैर्बहुभिर्यक्षरक्षोभिः
[illegible]ः पत्तिः पदातिः अश्वादिभिश्च उत्सृष्टाः प्रयुक्ताः अतिवैशसा अत्युग्रा हिंस्राः क्रूराः छिंधि भिंधीत्येवंरूपाः वाचः प्रत्यदृश्यंत अ
श्वादिशब्दैरश्वाद्यारूढा उच्यंते २१ प्रादुःकृतानां प्रादुर्भूतानां मायानां आसुरीणां असुरसंबंधिनीनां मायानां विनाशयन् विनाशयितुं मा
यामिति द्वितीयार्थे षष्ठी विनाशनमिति पाठे तु यथाश्रुतेव षष्ठ्युपपन्ना दयितं स्वस्यातिशयप्रियं सुदर्शनास्त्रं त्रिपाद्भग
वान् त्रिपाच्छब्देन त्रिपाद्विभूतिमानुपचाराद्विवक्षितः प्रायुंक्त ववि २२ तदा भर्तुः कश्यपस्यादेशं लोकभावनो भगवानवतीर्यो

ना४ — प्रयुंक्तं

गिरयः प्रत्यदृश्यंत नानायुधमुचोऽनघ दिग्वाससो यातुधान्यः शूलिन्यो मुक्तमूर्द्धजाः २० बहुभिर्यक्षरक्षोभिः
पत्त्यश्वरथकुंजरैः आततायिभिरुत्सृष्टा हिंस्रा वाचोऽतिवैशसाः २१ प्रादुष्कृतानां मायानामासुरीणां विनाश
यन् सुदर्शनास्त्रं भगवान् प्रायुंक्त दयितं त्रिपात् २२ तदा दितेः समभवत्सहसा हृदि वेपथुः स्मरंत्या भर्तुरादेशं स्त
नाच्चासृक्प्रसुस्रुवे २३ विनष्टासु स्वमायासु भूयश्चाव्रज्य केशवं रुषोपगूहमानोऽमुं ददृशेऽवस्थितं बहिः २४ तं मुष्टिभि
र्विनिघ्नंतं वज्रसारैरधोक्षजः करेण कर्णमूले हन् यथा त्वाष्ट्रं मरुत्पतिः २५ स आहतो विश्वजिता ह्यवज्ञया परिभ्रमद्गात्र उ
दस्तलोचनः विशीर्णबाह्वंघ्रिशिरोरुहोऽपतद्यथा नगेंद्रो लुलितो नभस्वता २६ यांऽस्त्येवंरूपं निदेशं स्मरंत्या दितेर्हृदि सहसा

89 शां२ आदेशं

वे आमूर्त्वेपथुः कंपः समभवदुत्पन्नः स्तनाच्चासृग्रुधिरं च प्रसुस्रुवे २३ स्वमायासु विनष्टासु असुरः भूयः पुनश्चाभिमुखमागत्य
६२ रुषा केशवं उपगूहमानः बाह्वोरंतरे निधाय संपीडयन्नमुं केशवं बहिर्बाहुमध्याद्बहिरवस्थितं ददर्श २४ वज्रसारैर्वज्रवद्दृढाभेद्यैर्मु
ष्टिभिर्निघ्नंतं ताडयंतं तं नमस्करं [illegible] करेण हस्तेन कर्णमूले हन् जघान यथा मरुत्पतिरिंद्रस्त्वाष्ट्रं विश्वरूपं २५ विश्वजा भगव
ताऽवज्ञया निमित्तभूतया आहतः सोऽसुरः भगवताऽवहेलनं तद्धि निमित्तमित्यवज्ञा पेत्यनेन सूचितं परिभ्रमद्गात्रं श
रीरं यस्य उद्गते बहिर्निर्गते लोचने यस्य विशीर्णाश्छिन्ना बाह्वादयो यस्य सोऽपतत् यथा नभस्वता वायुना लुलितः उत्पाटितः नगेंद्रः
महाद्रुमः २६

रम. ८८

पु३ टि२ स्था

ओजसा वीर्येण दैत्यानां मध्ये महाभटेन महाशूरेणार्पितं प्रयुक्तं उदीर्णा उत्कटा दीधितयो यस्य तदन्तःखे आकाशमध्ये चका
सत्प्रकाशमानं तच्छूलं निशातनेमिना निशितधारेण चक्रेण चिच्छेद हरिरिंद्रो यथोज्झितं तार्क्ष्यपतत्रं तार्क्ष्येणोज्झितं पत
त्रं पक्षमिवेत्यर्थः पुरा खलु देवान्निर्जित्यामृतकलशं नयता गरुडेनेंद्रप्रेरितस्य वज्रायुधस्य मोघत्वमानेतुं पत्रमेकं त्यक्तं तच्चें
द्रो वज्रेणाच्छिनदितीतिहासोऽत्रानुसंधेयः १४ अरिणा चक्रेण स्वशूले बहुधा वृक्णे छिन्ने सति प्रवृद्धः रोषो यस्य सोऽसुरः प्रत्येत्या
भिमुखमागत्य स्वकठिनतरमुष्टिना विभूतिमत्समृद्धमाश्रयभूतं विस्तीर्णं हरेर्भगवत उरः वक्षः प्रहृत्य प्रताड्यांतरधीयतांत
र्हितवान् १५ हे क्षत्तः तेनासुरेणेत्थं मुष्टिना आहतस्ताडित आदिवराहो भगवान्मनागीषदपि नाकंपत न चलितवान् स्रजा पुष्प
मालया हतो गज इव वेत्ति १६ अथांतर्धानानंतरं योगमायेश्वरे युज्यंत इति योगाः तासां मायानां ईश्वरे स्वसंबंधिनीनां मायाश्रये शक्ती

तदोजसा दैत्यमहाभटार्पितं चकासदंतःख उदीर्णदीधिति चक्रेण चिच्छेद निशातनेमिना हरिर्यथा तार्क्ष्यपतत्रमुज्झितं १४
वृक्णे स्वशूले बहुधारिणा हरेः प्रत्येत्य विस्तीर्णमुरो विभूतिमत् प्रवृद्धरोषः स कठोरमुष्टिना नदन्प्रहृत्यांतरधीयतासुरः १५
तेनेत्थमाहतः क्षत्तर्भगवानादिसूकरः नाकंपत मनाक्क्वापि स्रजा हत इव द्विपः १६ अथोरुधासृजन्मायां योगमायेश्वरे ह
रौ यां विलोक्य प्रजास्त्रस्ता मेनिरेऽस्योपसंयमं १७ प्रववुर्वायवश्चंडास्तमः पांसवमैरयन् दिग्भ्यो निपेतुर्ग्रावाणः क्षेपणैः
प्रहिता इव १८ द्यौर्नष्टभगणाभ्रौघैः सविद्युत्स्तनयित्नुभिः वर्षद्भिः पूयकेशासृग्विण्मूत्रास्थीनि चासकृत् १९ ॥ ॥

नांनेतस्मिन् हरौ भगवत्युरुधा बहुधा मायामसृजत् कथंभूतां मायां यामसृजदित्यपेक्षायामाह यां मायां विलोक्य दृष्ट्वा त्रस्ता भीताः स
र्वाः प्रजा अस्यादिपुरुषस्योपसंयमं प्रलयं मेनिरेऽमन्यंत १७ मायाः प्रपंचयति प्रववुरित्यादिभिश्चतुर्भिः प्रचंडाः [illegible]ः प्रचंडवेगा वाय
पु२ वः पांसवं पांसुमयं तमः ऐरयन् प्रसृतवंतः संतः प्रववुः ग्रावाणः अश्मानि क्षिप्ताः क्षेपणैः यंत्रविशेषैः प्रहिताः प्रयुक्ता इव निपेतुः १८
पूयं दुर्गंधि असृक् रक्तं विट् विष्ठा इत्यादीनि सकृत्पुनः वर्षद्भिः सविद्युत्स्तनयित्नुभिः विद्युत्सहितं यथा तथा ध्वनयद्भिर्मेघौघैः
नष्टभगणा नष्टो नक्षत्रगणो यस्याः तथाभूताभूद्दिस्मर्थः नष्टभगणत्वेन चतुर्मुखोक्तसंध्यावेलातिक्रमः सूचितः अह्नि नक्षत्राणा
पुनः
मसंभवादिति भावः १९ ॥ ॥

अतिदुष्करमिदं भगवता कृतमिति त्वया न विस्मयः कार्य इत्याह मयेति हे रुक्मित्र विदुर कृतावतारस्य वराहरूपस्य हरे
श्चेष्टितं मे मया ते तुभ्यमनुक्रमं अनुक्रम्योक्तं यथा [illegible] नायासेनैव आदिकथितं तथा उदारविक्रमं उरुपराक्रमः हिरण्याक्षः
मृधे युद्धे क्रीडनवत् क्रीडनमिव निराकृतः भगवतेति शेषः यथा हिरण्याक्ष इति पाठे यथा येन प्रकारेण क्रीडनवद्भगवता
हिरण्याक्षो निराकृतः तं प्र[illegible]कारमंतिक्रमेव यथानुक्रमं गुरुक्रममनतिक्रम्य हरेश्चेष्टितं मया उवादीति निगमनपरत्वेनान्वेत
व्यं ३२ एवं निशम्य वाचं वदतो मुनेरित्यादिनोपक्रांतभगवच्चरित्रप्रसंगानुप्रसक्तं स्वायंभुवमनुचरित्रं तत्तु प्रसक्तं वराहचरि
त्र प्रश्नोत्तररूपं विदुरमैत्रेयसंवादमुपसंहरति भगवान् श्रीशुकः यावदध्यायं इत्युक्तप्रकारेण कौषारवाख्याता मैत्रेयकथिता
भगवत्कथा[illegible] भगवत्कथागर्भां स्वायंभुवकथामित्यर्थः भगवत्कथाया एव प्राधान्येन कथनीयत्वात् भगवत्कथामिति निर्देशः यद्वा
भगवत्कथा निगमनेनैव तदुपक्रमरूपा स्वायंभुवकं निगमितप्रायैवेत्यभिप्रेत्य भगवत्कथामित्युक्तं आकर्ण्य आकर्ण्य महाभा

मया यथानुक्रममवादि ते हरेः कृतावतारस्य सुमित्र चेष्टितं यथा हिरण्याक्ष उदारविक्रमो महामृधे क्रीडनवन्निराकृतः ३२ श्री
शुक उ० इति कौषारवाख्यातामाश्रुत्य भगवत्कथां सत्तानंदं परं लेभे महाभागवतो नृप ३३ अन्येषां पुण्यश्लोकानामुद्दा
मयशसां सतां उपश्रुत्य भवेन्मोदः श्रीवत्सांकस्य किं पुनः ३४ यो गजेंद्रं झषग्रस्तं ध्यायंतं चरणांबुजं क्रोशंतीनां करेणूनां
कृच्छ्रतोऽमोचयद्द्रुतं ३५ म०

गवतः सत्ता विदुरः उत्कृष्टमानंदं लेभे हे नृप परीक्षिद्राजन् महाभागवत इति हेतुगर्भं यतोऽसौ सत्तामहाभागवतस्ततो भगवत्क
थामाश्रुत्य परमानंदं लेभे इत्यर्थः ३३ एतदेव कैमुत्येन येनाह अन्येषामिति पुण्यशीलानां पुण्यश्लोकानां उद्दामयश
सां उद्दीर्ण[illegible]कीर्तीनां मन्येषामपि कथामाश्रुत्य मोदो भवेत् श्रीवत्सांकस्य भगवतः कथामुपश्रुत्य मोदो भवतीति किं पु
नर्वक्तव्यमित्यर्थः ३४ एवं कैमुत्येन भगवत्कथाश्रवणादानंदं तावदभिधाय आश्रितार्तिनिरसनैकशीलस्य आश्रितकामलाभ
स्यार्पितपुरुषार्थस्य भगवतः कथाकृतश्रवणं नरेणाको न सेवेतेत्याह द्वाभ्यां य इति झषेण ग्राहेण ग्रस्तं गृहीतं त्वच्चरणांबुजं ध्याय
तं गजेंद्रं करेणूनां स्त्रीणां क्रोशंतीनां रुदतीनां सतीनां यो भगवान् कृच्छ्रात् झषग्रसनदुःखात् द्रुतमाशु अमोचयत् जोपि [illegible]तवानित्यर्थः ३५

ग्रहोहतिर

क्षितौ भूम्यां शयानं तं प्राप्य प्रतिहततेजस्कं भयंकरदंष्ट्रं परितो दष्टाधरोष्ठं तमसुरमागत्ता अजादयो ब्रह्मादयो दृष्ट्वा शशंसुः
तदेवाह आश्चर्यं इमां ईदृशीं भगवते सर्पः संस्थितिं मरणं को नु लभेत न कोपीत्यर्थः २७ एतदेव प्रपंचयन्ति द्वाभ्यां योगिनो सततः
अचेतनपरिणामात् लिंगात् देहात् मुमुक्षया मोक्षमिच्छया संसारनिवृत्तये इत्यर्थः योगसमाधिना समाधियोगेन यद्वा कर्मज्ञान
योगाभ्यां युक्तो यः समाधिस्तेन यद्वा युज्यंते इति योगा विवेकविमोकादयः तद्युक्तो यः समाधिस्तेन रहः एकांते यं भगवंतं ध्यायंति
भजंति तस्यैव भगवतः पदा पादेन दैत्यर्षभो हतः वराहपूर्वपादयोरेककरत्वात्करेणाहन्निति चाविरुद्धं मुखं भगवतो मुखं प्रप
श्यन् तनुं शरीरं उत्ससर्ज तत्याज ह आश्चर्ये २८ एतौ हिरण्याक्षहिरण्यकशिपू अस्य भगवतः पार्षदौ शापाद्ब्राह्मणशापाद
सतिमसुरयोनिं यातौ प्राप्तौ पुनः कतिपयैर्जन्मभिः स्थानं भगवतः स्थानं प्रपत्स्येते गमिष्यतः २९ एवं तत्संस्थितिं प्रशस्य भगव

क्षितौ शयानं तमकुंठवर्चसं करालदंष्ट्रं परिदष्टदच्छदं अजादयो वीक्ष्य शशंसुरागता अहो इमां को नु लभेत संस्थितिं २७
यं योगिनो योगसमाधिना रहो ध्यायंति लिंगादसतो मुमुक्षया तस्यैष दैत्यर्षभः पदाहतो मुखं प्रपश्यंस्तनुमुत्ससर्ज २८ ए
तौ तौ पार्षदावस्य शापाद्यातावसद्गतिं पुनः कतिपयैः स्थानं प्रपत्स्येते ह जन्मभिः २८ नमो नमस्तेखिलयज्ञतंतवे स्थितौ
गृहीतामलसत्वमूर्तये दिष्ट्या हतोयं जगतामरुंतुदस्त्वत्पादभक्त्या वयमीश निर्वृताः ३० एवं हिरण्याक्षमसह्यविक्रमं
स सादयित्वा हरिरादिसूकरः जगाम लोकं स्वमखंडितोत्सवं समीडितः पुष्करविष्टरादिभिः ३१ तं प्रणमंत आहुर्देवा अखि
लयज्ञतंतवे समस्तयज्ञोत्पत्तिहेतवे प्रवर्तकायेत्यर्थः स्थितौ जगद्रक्षणे निमित्ते गृहीता स्वेच्छोपात्ता अमला रजस्तमोभ्याम
ननुविद्धा सत्वमूर्तिर्येन तस्मै ते नमो नमः आदराद्द्विरुक्तिः जगतां लोकानां अरुंतुदः मर्मच्छेत्ता अयमसुरः दिष्ट्या दैवादतः हे ईश त्वत्
पादयोर्भक्त्या वयं निर्वृताः सुखिताः त्वत्पादभक्तिरेवाभिलषितश्रेयःसाधनं अत एव वयं निरस्तशत्रवः सुखिता इति भावः ३० ए
वं विदुरेण तेनैव तु मुनिश्रेष्ठ हरिणा यज्ञमूर्तिना इत्यादिना पृष्टं हिरण्याक्षवधवृत्तं सप्रपंचमभिधाय निगमयति मैत्रेयो द्वाभ्यां
असह्यविक्रमं दुर्धर्षपराक्रमं हिरण्याक्षमेवं युद्धप्रकारेण साधयित्वा निहत्य आदिसूकरो भगवान् पुष्करविष्टरादिभिः समीडितः सं
स्तुतः अखंडितः अनंतः उत्सवो यस्मिन् तत् स्वीयं लोकं वैकुंठं जगाम ३१

केन १

भा॰ त॰ टी॰
८१

यद्यपि परीक्षित्प्रश्न एव शौनकप्रश्नः शुकोत्तरमेव सूतेनापि वक्तव्यं न तु विदुरप्रश्नं नापि मैत्रेयोक्तं सूतेन वक्तव्यं सूतप्रोक्तं शौनकसंवा
दस्य शुकपरीक्षित्संवादरूपत्वात्तथापि विदुरप्रश्ने नैव पारीक्षितप्रश्नोऽपि एष इत्यभिप्रेत्य स साक्षाद्विदुरप्रश्नमेव पृच्छति
शौनकः महीमिति हे सौते सूत स्वायंभुवमहर्षिगणस्य पुत्र महीं भूमिं प्रतिष्ठां यथास्थानमध्यास्य प्राप्य स्वायंभुवो मनुरेवमर्वाचीनं २३
जन्म येषां तेषां मार्गाय मार्गप्राप्त्यै इति मार्गः धर्मादिचतुर्विधरूपः पुरुषार्थस्तस्मै कानि द्वाराणि उपायानन्वतिष्ठदनुष्ठितवान् यद्यदा
चरति श्रेष्ठ इति न्यायेन कानुपायान्लोकमर्यादां लनाय स्वयमन्वतिष्ठदित्यर्थः १ एवं प्रकृतमनुचरित्रं पृष्ट्वा परमप्र काप
कृतप्रजासृष्टिभेदाः वैदुरिकप्रश्ने नैव पृष्टप्राया इत्यभिप्रेत्य वैदुरिकप्रश्नापि पृच्छिषया प्रथमं विदुरं प्रशंसति क्षत्तेति त्रिभिः
क्षत्ता विदुरः महाभागवतः निरतिशयभगवद्भक्तियुक्तः अत एव कृष्णस्य भगवतः एकान्तिकः असाधारणः सुहृत् निरतिशयप्री
तिविषयः अत्र प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रिय इति भगवदुक्तेः स भगवानपि तस्य सुहृदिति बोध्यं सुहृत्त्वमेव स्पष्टय

९२

शौनक उ॰ महीं प्रतिष्ठामध्यास्य सौते स्वायंभुवो मनुः कान्यन्वतिष्ठद्द्वाराणि मार्गायावरजन्मनां १ क्षत्ता महाभागवतः कृष्णस्यै
कान्तिकः सुहृत् यस्तत्याजाग्रजं कृष्णे सापत्यमघवानिति २ द्वैपायनादनवरो महित्वे तस्य देहजः सर्वात्मना श्रितः कृष्णं तत्प
रांश्चाप्यनुव्रतः ३ किमन्वपृच्छन्मैत्रेयं विरजास्तीर्थसेवया उपगम्य कुशावर्त आसीनं तत्त्ववित्तमं ४

ति यः सन्यासापत्यं दुर्योध
नाद्यपत्यसहितमग्रजं धृतराष्ट्रं कृष्णे भगवत्यघवान्कृतापराध इति तत्याज त्यक्तवान् श्रीकृष्णोक्तमत्र नादरात् उग्रवत् प्रियबुध
र्ममर्यादानुवर्तिषु पाण्डुतनयेषु द्रोहाचरणात्कृष्णेऽघवानिति भावः २ किंच महत्त्वे माहात्म्ये द्वैपायनाद्वैपायनेन हेतो विदुरः दे२
अनवरः अन्यूनः सर्वात्मना समस्तभावेन मातापितृभ्रातृतानि वासः शरणं कृष्ण इति नारायणः इत्युक्तभावेनेत्यर्थः कृष्णं भ
गवन्तमाश्रितः तत्परान् भगवत्परांश्चानुव्रतोऽनुवर्तमानः सेवमान इत्यर्थः ३ एवं विदुरप्रशंसां तत्पृष्टमनुपृच्छति किमिति सा राम
दिभिश्चतुर्भिः तीर्थानि गंगादिपुण्यस्थलानां सेवया निषेवणेन स्नानादिना विरजाः धूतपापाः भातरमलः विदुरः कुशावर्ते हरिद्वारक्षे
त्रगतं विल्वकनीलपर्वतकनखलरवानि पंचतीर्थानि गंगाद्वारे संति तत्र कुशावर्ते आसीनं तत्त्वविदग्रेसरं मैत्रेयमुपगम्य किमन्वपृच्छ ८१
त्पृष्टवानित्यर्थः ४

तेभगवंतंकथंभूतमनन्यशरणैः रक्षणंतत्परैः नृभिर्नरैःऋजुभिरुपायैरितिशेषः सुखेनाराधयितुंशक्यमसाधुभिर्दुरारा
ध्यंकृतज्ञःकोनसेवेतकृतघ्नानं तरेणसर्वोपिसेवेतेत्यर्थः ३६ एवंभगवत्कथाःसर्वैरुपादेयेत्यभिधायप्रकृतहिरण्याक्षवध
वृत्तांतश्रवणकीर्त्तनानुमोदनं फलमवांतरंप्रधानंचाह यइतिद्वाभ्यांमहदद्भुतंमत्स्याविस्मयनीयंकारणसूकरात्मनःजगदुद्ध
पं४ रणार्थंधृतसूकरशरीरस्य भगवतोविक्रीडितंक्रीडारूपंहिरण्याक्षवधंयोद्विजोहेद्विजाः शृणोतिगायतिकथयतिअनुमोदतेभिनंद
तिवासअंजसाआशुब्रह्मवधा[illegible] द्वयहत्याख्यमेधाभ्यांनापरंपुण्यपापयोरितिनिरतिशयपापत्वेनकीर्त्तितांब्रह्मवधादपि तृ२
विमुच्यतेसज्जते ३७ एतद्धिरण्याक्षवधवृत्तांतरूपंभगवच्चरितंमहापुण्यसंपादकमतएवालंभृशंपवित्रंधन्यंधनसंपादकंयशस्यं
यशःसंपादकमायुषः आशिषांप्रार्थितपुरुषार्थानांचपदंपद्यतेनेनेतिप[illegible]दंसाधनंयुधियुद्धेप्राणानामिंद्रियाणांचशौर्यवर्द्धनं
सामर्थ्यवर्द्धनं एवमवांतरफलमुक्त्वाप्रधानफलमाह अंगहेराजन् शृण्वतांनृणामंतेदेहांतेनारायणोगतिःफलंतस्मात्सैरेवफल

तंसुखाराध्यमृजुभिरनन्यशरणैर्नृभिः कृतज्ञःकोनसेवेतदुराराध्यमसाधुभिः ३६ योवैहिरण्याक्षवधंमहाद्भुतंविक्रीडितंकारण
द्वि२ सूकरात्मनः शृणोतिगायत्यनुमोदतेंजसाविमुच्यतेब्रह्मवधादपिद्विजाः ३७ एतन्महापुण्यमलंपवित्रंधन्यंयशस्यंपदमायुराशिषां
प्राणेंद्रियाणांयुधिशौर्यवर्द्धनंनारा[illegible]णोंतेगतिरंगशृण्वतां ३८ इतिश्रीमद्भागवतेमहापुराणेतृतीयस्कंधेएकोनविंशोध्यायः १९

मित्यर्थः ३८ इतितृतीयेएकोनविंशः १९ द्वितीयस्कंधांतेयथासौभगवान्सूतस्तत्राभागवतोसमस्त्यादिनाविदुरमैत्रेयसंवादे
शौनकेनपृष्टोराज्ञापरीक्षितापृष्टोयदवोचइत्यादिनातथापृष्टएवविदुरमैत्रेयसंवादोराज्ञापृष्टः शुकेनोक्तः अतोऽत्रशुकप्रश्नोत्त १।२
रानुसारेणैवविदुरमैत्रेयसंवादंवर्णयामीत्युपक्रम्यास्ततेनैकोनविंशत्यध्यायगणेनवर्णितेसतिपुनः शौनकः सवैस्वायंभुवःसम्रा
डित्यादिनाविदुरपृष्टंयच्चस्वायंभुवस्यकर्मइतिमैत्रेयेणोपक्रांतंस्वायंभुवचरित्रंप्रष्टुकामः परमप्रकृतान्दशमाध्यायादौअंतर्हि
तेभगवतिब्रह्मालोकपितामहः प्रजाःससर्जकतिधादैहिकीर्मानसीर्विधुरितिविदुरपृष्टान्दैहिकमानसिकप्रजासृष्टिभेदान्का२
श्चमैत्रेयेणवर्णितानेवसूतमुखाच्छ्रोतुमवशिष्टान्तद्देशान्प्र[illegible]कृत्तंमनुचरित्रंचपृच्छतिशौनकः नवभिःश्लोकैः १ ॥ ॥

वि

कथंइतिस्वामिएवमेवप्रकारस्फनिमुखान्त्रिभिश्लोकैःविकल्पयतिसद्वितीयाःसभार्याःकिमसृजन्किंशब्दःप्रश्नेउताहोस्वित्कर्म
कस्यच्छान्दित्यापरेषुस्वतंत्राभार्यानिरपेक्षाअहोस्वित्सर्वेमरीच्यादयःसंहताःपरस्परसापेक्षाइदंविश्वंसमकल्पयन्नसृजन्स्म ११
एवमापृष्टौमैत्रेयःसर्गभेदान्प्रतिपिपादयिषयाएवेत्तिकिंमहदादयोविधापंचपर्वातांसृष्टिमनुवदतिसप्तभिःदैवेनेतिदुर्वितर्केण
चिंत्यप्रभावे[illegible]नेश्वरेणकर्त्राऽपरेणप्रकृतिपुरुषविलक्षणपरमात्मकेनानिमिषेणचकालेनचहेतुनाजातःक्षोभःकार्योन्मुख
रूपव्यापारोयस्यातस्माद्भगवतःभगवत्संबंधिनःतच्छरीरभूतादित्यर्थःगुणत्रयात्मकात्प्रधानान्महत्तत्त्वमासीत्अत्रभगवतोगुण
त्रयादित्यनेनब्रह्मात्मकप्रधानस्योपादानत्वकथनेनब्रह्मणःसृष्ट्यादिव्यापारेउपकरणांतरनैरपेक्ष्यंअनिमिषेणगुण
त्रयादितिकालप्रधानयोःसृष्टेःप्रागपिसद्भावावगमेनतदाविजानीयत्वंसत्त्वंदुर्वितर्केणेत्यनेनभिन्नत्वोपादानत्वोपयुक्ताचिं

सद्वितीयाःकिमसृजन्स्वतंत्राउतकर्मसु अहोस्वित्संहताःसर्वेइदंस्मसमकल्पयन् ११
मैत्रेयउ॰ दैवेनदुर्वितर्केणपरेणानिमिषेणच जातक्षोभाद्भगवतोमहानासीद्गुण
त्रयात् १२ रजःप्रधानान्महतस्त्रिलिंगोदैवचोदितात् जातःससर्जभूतादिर्वियदादीनि
पंचशः १३ तानिचैकैकशःस्रष्टुमसमर्थानिभौतिकं संहत्यदैवयोगेनहैममंडमथा
सृजन् १४

त्वसर्वज्ञत्व[illegible]सर्वशक्तित्वसत्यकामत्वादिप्रभाववैलक्षण्यावगमेनस्वगतभेदसत्त्वंतयोरूपलक्षणत्वेनगणत्वेनसजाती
यजीवभेदसत्त्वंचोक्तंभवति १२ रजइति दैवेनभगवताचोदितात्रजःप्रधानान्महतःसतःसत्त्वप्रधानेपिमहतःकार्योन्मुखदशा
पन्नस्यतमस्सत्त्वयोरुभयोरप्युपग्राहकत्वेनरजःप्रधानादित्युक्तं जातस्त्रिलिंगकःपंचमहाभूतज्ञानकर्मेंद्रियात्मकभूतादि
रहंकारःवियदादीन्याकाशादीनिआदिशब्देनतन्मात्राणिज्ञानेंद्रियाणिचोक्तानि पंचशःप्रत्येकंपंचसंख्याकानिससर्ज १३ ता
निचवियदा[illegible]दीनि एकैकशःपरस्परमसमेतानिभौतिकंमंडंस्रष्टुमसमर्थान्यभवन् अथततोदैवयोगेनभगवदनुप्रवेशे
नसंहत्य[illegible]सनेनपंचीकरणविवक्षितंहैमंप्रकाशवद्धुलमंडंब्रह्मांडमसृजन् १४ ॥ ॥ ॥ ॥ ॥

९२

त॰५ सु॰७ ज रा॰म॰ ८२

यत्किमत्र पृच्छेत्तितनाीत्य आह हे सूत तयोर्विदुरमैत्रेययोः संवदतोः संवादं कुर्वतोरमलाः प्रश्नवत्त्वोक्तपाविन्यो प्रवृत्ता भवेयुः अ
मलत्वे दृष्टान्तः हरेर्भगवतः पादांबुजाश्रयाः पादांबुजप्रसूताः अघघ्न्यः पापशातनाः अघनिवर्त्तकाः गांगा गंगासंबंधिन्यः आपइ
वेति ५ कीर्त्तन्योदारकर्मणः कीर्तनीयजगत्पापादिनिवर्त्तकचेष्टितस्य भगवतस्ताः कथाः नोऽस्माभ्यं कीर्त्तय कथय ते तुभ्यं भ
द्रं मंगलमस्तु पुनः पुनः भगवत्कथामेव किं पृच्छसीत्याह रसज्ञः भगवत्कथारसज्ञः हरेर्लीलैवामृतं तत्पिबन् को नु तृप्येत न कोपी
नेत्यर्थः अतोऽतृप्त्यान्पृच्छामीत्यभिप्रायः ६ नैमिषं निमिषक्षेत्रमयनं स्थानं येषां तैः नैमिषक्षेत्रवासिभिः शौनकादिभिरेवमुक्ते
प्रकारेण पृष्ट उग्रश्रवाः सूतः भगवत्यर्पितं निहितमध्यात्मं मनः करणं येन सः तान्नैमिषायनान्प्रति श्रूयतामित्याह एवं विधा
निर्वचनानि एतत् अध्यायकृतानैकाल्यज्ञानेन भगवता वादरायणेन स्वकृते ग्रंथे तत्र तत्र स्तोत्रवत्क्रमेणाभिविनीप्रवृत्ति माल्तो

तयोः संवदतोः सूत प्रवृत्ता ह्यमलाः कथाः आपो गांगा इवाघघ्नीर्हरेः पादांबुजाश्रयाः ५ ता नः कीर्त्तय भद्रं ते कीर्त्तन्योदारक
र्मणः रसज्ञः को नु तृप्येत हरिलीलामृतं पिबन् ६ सूत उ० एवमुग्रश्रवाः पृष्ट ऋषिभिर्नैमिषायनैः भगवत्यर्पिताध्यात्मस्ता
नाह श्रूयतामिति ७ सूत उ० हरेर्धृतक्रोडतनोः स्वमायया निशम्य गोरुद्धरणं रसातलात् लीलां हिरण्याक्षमवज्ञया हतं सं
जातहर्षो मुनिमाह भारतः ८ विदुर उ० प्रजापतिपतिः सृष्ट्वा प्रजासर्गे प्रजापतीन् किमारभत मे ब्रह्मन् प्रब्रूह्यव्यक्तमार्गवित्
९ ये मरीच्यादयो विप्रा यस्तु स्वायंभुवो मनुः ते वै ब्रह्मण आदेशात्कथमेतदभावयन् १० चात्तसंदर्शनार्थं निपातानि अतइ
दं वचनं द्वैपायनीयमेवेति सांप्रदायिकाः तच्छिष्यप्रशिष्यैः संदर्भाय विरचय्य न्यस्तानीति परे ७ एवमापृष्टः सूतो हृष्टेन विदुरेण क
थाश्रवणजातहर्षो विदुरः प्रकृतं स्वार्थं भवचरितं प्रस्तुमाणः परमप्रकृतान्प्रजासृष्टिभेदान्पृच्छन्नित्याह केन हरेरिति स्वीययोस्व मा
संकल्पेन धृतक्रोडतनोर्धृतवराहरूपस्य हरेर्लीलां लीलारूपं रसातलाद्गोर्भूमेरुद्धरणमवज्ञया हतं हिरण्याक्षं च निशम्य श्रुत्वा सं
जातहर्षो विदुरः मुनिं मैत्रेयमाह ८ उक्तिमेवाहाभिः प्रजापतीनां मरीच्यादीनां पतिर्ब्रह्मा प्रजासर्गे निमित्ते प्रजापतीन् सृष्ट्वा किमा
रभत किमकुर्वत मे मह्यं प्रब्रूहि हे ब्रह्मन् यतस्त्वमव्यक्तमार्गविद्भगवत इत्यव्यक्तमतीन्द्रियं तस्य मार्गस्य स्वरूपं वेत्सीति तथा नत्वं ब्रवीतु सम
र्थ इत्यर्थः ९ मरीच्यादयो ये विप्राः स्वायंभुवो मनुश्च ते वै ब्रह्मणः स्रष्टुर्मुख्यादेशादाज्ञया एतद्विश्वं कथमभावयन्नसृजन् १० ॥ ॥

देवो ब्रह्मा संविग्नः भीतः तान् यक्षादीन् प्रति मां मत्कायं मा यत्त न भक्षयत किंतु रक्षत ते त्वाह अहो हे यक्षरक्षांसि यूयं मे प्रजाः पुत्रा बभूविथ जाता एव तमःस्वभावा जाता इत्यर्थः तत्र ये यक्ष्याम इत्यूचुस्ते यक्षा ये तु मा रक्षतेत्यूचुस्ते राक्षसा इति ज्ञेयं २१ प्रभया छायया प्रतियोगिन्या जातेइत्यर्थः दिव्यन् प्रकाशमानः ब्रह्मा प्रमुखतः प्राङ्मुखं यथा या देवता असृजत् ते देवाः देवयन्तः द्योतमाना विसृष्टां त्यक्तां महः प्रहोर्धमरूपां प्रभां महाहरि स्वीकृतवंतः २२ देवः ब्रह्मा जघनतः जंघनादेः अतिलोलुपान् अतीव कामासक्तान् अदेवान् असुरान् सृजति स्म अतिलोलुपेन भावेनासृजत्ते देवा अतिलोलुपतया अतिकामासक्ततया मैथुनाय एनं ब्रह्माणमभिपेदिरे अभितः प्राप्ताः २३ स भगवान् ब्रह्मा हसन् निरपत्रपैः निर्लज्जैः अन्वीयमानः अभिपद्यमानः अत एव क्रुद्धो भीतः तरसा आशु परापतत् पर्यधावत् २४ स ब्रह्मा भक्तानामनुग्रहायानुरूपं तत्तद्भक्तबुद्ध्यनुरूपमात्मानं दर्शयतीति तं प्रपन्नार्तिहरं वरदमभीष्टार्थदं हरिं भगवन्तमभिव्रज्य समीपमेत्याहेति

देवस्तानाह संविग्नो मा मां यत्त रक्षत अहो मे यक्षरक्षांसि प्रजा यूयं बभूविथ २१ देवताः प्रभया या या दीव्यन् प्रमुखतोऽसृजत् ता अहार्षुर्देवयन्तो विसृष्टां तां प्रभामहः २२ देवो देवान् जघनतः सृजति स्मातिलोलुपान् त एनं लोलुपतया मैथुनायाभिपेदिरे २३ ततो हसन् स भगवानसुरैर्निरपत्रपैः अन्वीयमानस्तरसा क्रुद्धो भीतः परापतत् २४ स उपव्रज्य वरदं प्रपन्नार्तिहरं हरिं अनुग्रहाय भक्तानामनुरूपात्मदर्शनं २५ पाहि मां परमात्मंस्ते प्रेषणेनासृजं प्रजाः ता इमा यभितुं पापा उपाक्रामन्ति मां प्रभो २६ त्वमेकः किल लोकानां क्लिष्टानां क्लेशनाशनः त्वमेकः क्लेशदस्तेषामनासन्नपदां तव २७ सोऽवधार्यास्य कार्पण्यं विविक्ताध्यात्मदर्शनः विमुञ्चात्मतनुं घोरामित्युक्तो विमुमोच ह २८

शेषः २५ उक्तिमेवाह हे [illegible] हे परमात्मन् मां पाहि पालय यतः तव प्रेषणेन संकल्पेन प्रजा अहमसृजं ताः त्वत्संकल्पेन मया सृष्टाः पापा इमा असुररूपाः प्रजा यभितुं मैथुनं कर्तुं मामुपाक्रामन्ति परिवेष्टयन्ते २६ हे प्रभो त्वमेक क्लिष्टानां दुःखितानां लोकानां क्लेशनाशनः बाधानिवर्तकः किल तव ना[illegible] सर्वेनाश्रितौ पादौ यैस्तेषां तव पादमनाश्रितानां लोकानां त्वमेव क्लेशदः क्लेशसंपादकः २७ विविक्ताध्यात्मदर्शनः विविक्तं विशदं यथा तथा अध्यात्मदर्शनं परमात्मज्ञानं यस्य सः भगवान् अस्य ब्रह्मणः कार्पण्यं क्लेशमुपधार्य ज्ञात्वा घोरां मतिकालुष्यरूपामात्मतनुं मात्मनो भावं विमुञ्चेत्याहेति शेषः एवमुक्तो भगवता ब्रह्मा तां तनुं भावं विमुमोच विससर्ज २८

दी४

अंडकोशः निरात्मकः अधिष्ठातृचेतनरहितः अधिसलिलं सलिले अनेनांडस्य आगुरु[illegible] स्थिरस्थायित्वं अशयिष्टाधाव
सत्तमंडकोशमीश्वरो निरुद्ध साग्रं सपूर्णं संवत्सरसहस्रमन्ववात्सीत् अन्ववेष्टित जलपर्यंकस्थो भगवानशेत इत्यर्थः १५ कोऽसौ
भगवान्योऽन्ववात्सीदित्यत्राह यस्यांडे शयानस्य भगवतो नाभेः सकाशात् सहस्रसंख्याकादित्यवत् प्रकाशं पद्ममभूत् सईश्वरोऽवा
सीदित्यर्थः कीदृशं पद्मं यन्नाभेरभूदित्यत्राह सर्वेषां जीवानां देवादीनां निकायः समूहः तस्य ओकः स्थानं यत्र पद्मे स्वराट् ब्रह्मा स्वयमभू
दुत्पन्नः तत्पद्ममभूदित्यर्थः १६ स ब्रह्मा भगवताऽनुप्रविष्टः संकल्परूपज्ञानेनेत्यर्थः कोऽसौ भगवान्येनानुप्रविष्ट इत्यत्राह सलिला
शये गर्भोदकस्याशये यः शेते तेनेत्यर्थः भगवतानुप्रविष्टो ब्रह्मा यथापूर्वं पूर्वकल्पानुसारेण लोकसंस्थां लोकानां संस्थानं वि
न्यासं [illegible] स्वया साधारणया संस्थया देवादिनामरूपात्मकया [illegible] कल्पितं कृतवान् १७ छायया तमो

सोऽशयिष्टाधिसलिलमंडकोशो निरात्मकः साग्रं वै वर्षसाहस्रमन्ववात्सीत्तमीश्वरः १५ तस्य नाभेरभूत्पद्मं सहस्रार्कोरु
दीधिति सर्वजीवनिकायौको यत्र स्वयमभूत्स्वराट् १६ सोऽनुविष्टो भगवता यः शेते सलिलाशये लोकसंस्थां यथापूर्वं निर्ममे
संस्थया स्वया १७ ससर्ज छायया विद्यां पंचपर्वाणमग्रतः तामिस्रमंधतामिस्रं तमो मोहो महातमः १८ विससर्जात्मनः कायं ना
भिनंदंस्तमोमयं जगृहुर्यक्षरक्षांसि रात्रिं क्षुत्तृट्समुद्भवां १९ क्षुत्तृड्भ्यामुपसृष्टास्ते तं जग्धुमभिदुद्रुवुः मा रक्षतैनं जक्षध्वमित्यू
चुः क्षुत्तृडर्दिताः २०

गुणेन पंचपर्वाणमविद्यां ससर्ज पंचपर्वाण्याह तामिस्रमित्यादिना तामिस्रादिस्वरूपं तु पूर्वमेव प्रपंचि
तं १८ एवं साधारणां सृष्टिमनूद्यासाधारणां सृष्टिभेदानाह विससर्जेत्यादिना यावदध्यायसमाप्ति नाभिनंदन् अनभिनंदन् तमोम
यं तमः प्रचुरं कायं तमःप्रचुरं कायं छायारूपां तनूं विससर्ज सर्वत्र तनुत्यागो नाम ततः तदवस्थापरं परां भावत्यागो विवक्षितः गृह
णं स्वततं [illegible] यक्षरक्षांसि विविसृष्टकायात् समुत्पन्नानि यक्षरक्षांसि तमेव कायं स्वात्मना स्वीकृतवंतः क्षुत्पिपासयोः समुद्भवो य
स्यास्तां रात्रीं रात्रि [illegible] रूपेण परिणम्यमानं जगृहुः १९ ते यक्षादयः क्षुत्तृड्भ्यामुपसृष्टाः पीडितास्तं कायं जग्धुं भक्षितुमभिदुद्रुवु
रभ्यधावन् यतो वयं क्षुत्तृड्भ्याम [illegible] र्दिताः ततस्तमेनं कायं पितेति कृपया रक्षतैनं केचिदूचुः परे पुनः पितरमपि जक्षध्वं भक्षयतेत्यूचुः २०॥

या३

मथितमनसां गां कां हे शालिनि निस्कंदादिपतत्पतंगं उत्प्लुत्य पतंतं कंदुकं मुहुः करतलेन घ्नंत्यास्तव पादपद्मं एकत्र न जयति न तिष्ठति बृहत्स्तो
:स्तनयोर्भाराद्भीतं कृशत्वं मध्यं विषीदति क्लिश्यति श्रांतेवा दृष्टिरमला मंदं प्रसरति सुशिखावान्समूहः शोभनकेशकलापः सुशिखा
वधानेति पाठे शोभनकेशग्रन्थि कीर्यमाणानवधानेसर्पः अत्र चास्तं गच्छन् सूर्य एव पतंगः मेघविच्छेदो मध्यविभागः तारकरूपा दृष्टिः तम
एव केशादि भ्रमरएवालकाइत्यादि द्रष्टव्यं ३५ इत्युक्तरीत्या प्रमदायतीं स्त्रीवाचरंतीं सायंतनीं संध्यां प्रलोभयंतीं मोहयंतीं स्त्रियं मत्वा मूढ
धियो मोहितबुद्धयोऽसुरा जगृहुरूपादद्युः ननु कथं छायाप्रभालोलुपानां ब्रह्मणोपात्तेत्यनारात्र्यहः संध्याकालरूपत्वं कालतो हि छाया
दीनामपि परिच्छेदकत्वेऽपि विलक्षणा एव सत्वं कालो हि रात्र्यहः संध्याकालैः परिच्छिद्यते परिच्छेद्यपरिच्छेदकयोर्भेदाविवक्षया छायाप्र

७५

नैकत्र ते जयति शालिनि पादपद्मं घ्नंत्या मुहुः करतलेन पतत्पतंगं मध्यं विषीदति बृहत्स्तनभारभीतं श्रांतेव दृष्टिरमला सुशिखासमूहः
३५ मैत्रेय उ० इति सायंतनीं संध्यामसुराः प्रमदायतीं प्रलोभयंतीं जगृहुर्मत्वा मूढधियः स्त्रियं ३६ प्रहस्य भावगंभीरं जिघ्रंत्या
त्मानमात्मना कांत्या ससर्ज भगवान् गंधर्वाप्सरसां गणान् ३७ विससर्ज तनुं तां वै ज्योत्स्नां कांतिमतीं प्रियां त एव चाददुः प्रीत्या विश्वा
वसुपुरोगमाः ३८ सृष्ट्वा भूतपिशाचांश्च भगवानात्मतंद्रिणा दिग्वाससो मुक्तकेशान्वीक्ष्य चामीलयद्दृशौ ३९ ॥ ॥ ॥

94

त्रिप्रभामहः लौलुप्यं संध्यामित्यभेदेन निर्देशः परमार्थतस्तु यं यं धर्मं ब्रह्मापादाय यान्यान्ससर्ज तेन तत्र तद्धर्मप्रधाना जाताः रात्र्यादि काल
विशेषाणां निद्रालितमःकार्यादिहेतुत्वात्स्वगुणानुसारेण तत्तत्कालविशेषमेव व्यवहारायोपादद्युरित्यभिप्रायः ३६ भगवान् ब्रह्मा भावेना
भिप्रायविशेषेण गंभीरं यथा तथा प्रहस्यात्मानं देहमात्मना स्वयं जिघ्रन्कांत्या सौंदर्येण गंधर्वाणामप्सरसां च गणान् ससर्ज प्रहसनं स्वा
त्मनः घ्राणं च सौंदर्यानुभवाय चातुर्यविकारः ३७ तां कांतिमतीं कांतिबहुलां प्रियां स्वाभिमतां ज्योत्स्नां प्रसंध्यारूपां तनुं विससर्ज एव
गंधर्वाप्सरसां गणाः विश्वावसुपुरोगमो मुख्यो येषां ते प्रीतास्तां तनुमाददुः ३८ भगवान् ब्रह्मा आत्मतंद्रिणा आत्मनः भूतगणान् तानि
पिशाचांश्च सृष्ट्वा एतान्मुक्तकेशान्विकीर्णकेशान् दिग्वाससः दिगंबरान्भूतानि पिशाचांश्च तान्वीक्ष्य दृशौ नेत्रे मीलयन्निमीलितवान् ३९

त
रम

सातेनविसृष्टातनुः सायंतनीसंध्याबभूवसाचकामोद्रेकवेला असुराराजससत्वास्त्रीलंपटाः यतस्तांसंध्यामेवस्त्रीरूपंकल्पयित्वासमभुञ्ज
रित्याह त्रिभिः तांसंध्यांरूपांस्त्रीत्वेनकल्पितांतन्वं कणंभृतांक्वणच्चरणांभोजांनूपुराभ्यांध्वनच्चरणकमलांमदेनविह्वलेलोचनेयस्या
स२ स्तांकांचीकलापेनमेखलारत्नभूषणेनविलसद्दुकूलंसौम्यवाससस्तेनछन्नोपिहितः रोधः नितंबप्रदेशोयस्यास्तां २८ अन्योन्याश्लेषे
णपरस्परोपमर्द्देनउत्तुंगावुन्नतौनिरंतरौश्लिष्टौपयोधरौस्तनौयस्यास्तांसुनासांतिलकपुष्पतुल्यनासिकांसुद्विजांकुंदकुड्मलस
दृशदंतपंक्तिंस्निग्धोहासोयस्मिंस्तल्लीलावलोकनंयस्यास्तां २९ व्रीडयालज्जयाआत्मानंदेहंगूहंतींवस्त्रांचलेनावृण्वतींनीलानामल
कानांचूर्णकुंतलानांवरूथः समूहोयस्यास्तांस्त्रियमुपलभ्यमत्वासर्वेसुराहेधर्मविदुरसंमुमुहुः ३० संमुह्यमानानामसुराणांप्रलाप
माहपंचभिः अहोइत्याश्चर्येरूपमाकारः स्थैर्यंलावण्यंवयः यौवनंकामयमानानामस्माकंमध्येऽकामेवाकामयमानेवाविसर्पन्तीगच्छ

तांक्वणच्चरणांभोजांमदविह्वललोचनां कांचीकलापविलसद्दुकूलछन्नरोधसं २८ अन्योन्याश्लेषयोत्तुंगनिरंतरपयोधरां
सुनासांसुद्विजांस्निग्धहासलीलावलोकनां २९ गूहंतींव्रीडयात्मानंनीलालकवरूथिनीं उपलभ्यासुराधर्मसर्वेसंमुमुहुःस्त्रियं
३० अहोरूपमहोधैर्यमहोअस्यानवंवयः मध्येकामयमानानामकामेवविसर्पति ३१ वितर्कयंतोबहुधातांसंध्यांप्रमदाकृतिं
अभिसंभाव्यविस्रंभात्पर्यपृच्छन्कुमेधसः ३२ असुराऊचुः कासिकस्यासिरंभोरुकोवार्थस्तेत्रभामिनि रूपद्रविणपण्येनदु
र्भगान्नोविबाधसे ३३ याबाकाचित्त्वमबलेदिष्ट्यासंदर्शनंतवउत्सुनोषीक्षमाणानांकंदुकक्रीडयामनः ३४ ॥ ॥ ॥

ति ३१ बहुधावितर्कयंतः रूपगुणैरीदृशमस्यारूपादिकमित्यूहयंतः प्रमदाकृतिंस्त्रीस्वरूपत्वेनकल्पितांतांसंध्यामभिसंभाव्यसत्कृत्य
विस्रंभात्प्रणयात्कुमेधसः कुबुद्धयोऽसुराः पर्यपृच्छन् ३२ पृच्छामेवाहत्रिभिः कासिकिंदेवताउतमानुषीजनास्याकस्यसंबंधिनीअ विट२
सि [illegible] हेरंभोरुरंभाकदलीतद्वदूरूयस्याः हेभामिनिनिकोपनेअत्र अस्मन्मध्येतेतवकोवार्थः किंप्र
योजनंरूपमेवद्रविणमनर्घ्यवस्तुतदेवपण्यंक्रयार्हंतेनतत्समर्पणेनदुर्भगान्भाग्यहीनान्नोऽस्मान्निबाधसेक्लेशयसे ३३ किंजातिकु
लादिप्रश्नेनयावाकाचित्त्वमसिहेअबलेदिष्ट्याअस्माकंभाग्यवशंदर्शनंजातंईक्षमाणानांपश्यतांनोअस्माकंमनः कंदुकक्रीडयाउत्सुनोषि
हरसिसुष्ठ्वासीतियावत् ३४

तेतुकिंनराइत्यूचुः परमेष्ठिनात्यक्तंतत्स्वरूपंकांतंजगृहुः रतएवतेकिंनराः किंपुरुषाश्चपरस्परंमिथुनीभूयकिंवप्रतिविं-
बयोर्यदृशोऽभिमानस्तमभिमानंकृत्वातमेवब्रह्माणंमुषसिकर्मभिःस्वचेष्टितस्तुतिरूपैः तोत्रैर्गायंतोबभूवुः आत्मभासंवि-
लोकयन्नितिपाठेत्वात्मभासंस्वप्रकाशंत्रिलोकयंतमात्मानंस्वविशेषत्वेनस्वाभिन्नंमन्यमानस्तेन ... स्मनात्मप्रकाश-
नाम्सृजदतएवतेततःसृष्टाःगानाख्यकर्मणिपरस्परंगुणप्रधानभावेनाभिन्नप्रयोजना ... मिथुनीभूयगायंतोबभूवुरित्य-
र्थः ४५ भोगवतासौकुमार्यवतादैर्घ्यवतावाबहुचिंतयाशयानःसर्गेऽनुपचितेप्रवृद्धेसतिक्रोधाद्वपुः भोगक्रोधबहुचिंतारू-
पंविससर्ज ४६ येऽमुतःभोगवतोदेहाद्धेकेशाअहीयंतप्रच्युताः तेकेशाअहयोजज्ञिरेअंगहेविदुर प्रसर्पतःपादाद्याकुंचनैःप्र-
चलतोमुख्याद्धेसर्पाअजायंतजज्ञिरेप्रसर्पतोजातत्वाद्देवतेनागानगच्छंतीतिनगानननगानागाअतिवेगाइत्यर्थः क्रोधाच्च

तेतुतज्जगृहूरूपंत्यक्तंयत्परमेष्ठिना मिथुनीभूयगायंतस्तमेवोषसिकर्मभिः ४५ देहेनवैभोगवताशयानोबहुचिंतया स
र्गेऽनुपचितेक्रोधादुत्ससर्जहतद्वपुः ४६ येऽहीयंतामुतःकेशाअहयस्तेंगजज्ञिरे सर्पाः प्रसर्पतःक्रूरानागाभोगोरुकंधराः
४७ सआत्मानंमन्यमानःकृतकृत्यमिवात्मभूः तदामनून्ससर्जांतेमनसालोकभावनात् ४८ तेभ्यःसोऽसृजत्स्वीयंपुरंपु
रुषमात्मवान् तान्दृष्ट्वायेपुरासृष्टाःप्रशशंसुःप्रजापतिं ४९ अहोएतज्जगत्स्रष्टःसुकृतंबततेकृतं प्रतिष्ठिताःक्रियायस्मि
न्साकमन्नमदामहे ५०

क्रोधात्प्रापाक्रांतत्वात्क्रूराः बहुचिंताक्रांताद्भोगवतोजातत्वाद्भोगाःफणस्पर्शदेहाद्दीर्घाच्चशयानाज्जातत्वा
द्दीर्घकंधराः ४७ सआत्मभूर्यदात्मानंकृतकृत्यंइवमन्यमानआसीत्तदाऽन्तेसाक्षात्स्वकर्तृकसर्गांतेमनसालोकभावनान्प्रजाःसृजत
४८ तेभ्योमनुभ्यःसब्रह्माआत्मनःतस्यपुरुषाकारंपुरंदेहमसृजत्दत्तौआत्मवत्सुपुरुषाकारदेहविशिष्टानकरोदित्यर्थः पुरापुरुषा
कारदेहेनतद्विशिष्टत्वेनरूपेणसर्पाःयेपुरासृष्टाइतिहेतुगर्भंपदंपुरुषाकारदेहाविशिष्टेनसृष्टा अतस्तेपुरंदृष्ट्वाप्रजापतिंप्रशशं
सुः ४९ प्रशंसामेवाह अहोइतिहेजगत्स्रष्टः तेत्वयाकृतंनिर्मितंएतत्पुरुषाकारंशरीरंमहोसुकृतंसम्यक्कृतंयस्मिन्पौरुषेदेहेक्रियाः
स्वर्गापवर्गसाधनभूताःक्रियाःप्रतिष्ठिताःसर्वाःक्रियाःपौरुषशरीरसाध्याइत्यर्थः अतःसाकंपौरुषशरीरेणसहान्नंभोग्यजातंअदाम
हेतुभवेम ५०॥

तं द्विरालस्यं जृम्भणं निद्रोन्मादरूपश्चतुर्विधः तत्रालस्यादीनां उत्तरोत्तरहेतुत्वं स च यन्निद्रोन्मादयोः स्वरूपं वक्ष्यति भूतपिशाचानां चतुर्विधं तं द्वि
प्रधानत्वमाह जगृहुरिति सार्धेन ब्रह्मणो विसृष्टां प्रभोर्ब्रह्मणस्तां जृम्भणाख्यां तनुं जगृहुः रूपान्तरः तद्देश्चातुर्विध्यं सूचनाय तत्तद्वाक् तत्तद्भेदे न
जृम्भणाख्यामिति निर्देशः यया जृम्भणाख्यया इन्द्रियविक्लेदः इन्द्रियविस्रंसस्तं इन्द्रियवैक्लव्यं भूतेषु दृश्यते तां निद्रां प्रचक्षते इत्युत्तरत्रान्वयः ये
नेन्द्रियविक्लेदेन उच्छिष्टान् परिभुञ्जानं धर्षयन्ति सहन्ते स्वाधीनान्कुर्वन्ति च तं धर्षणं उन्मादं इति प्रचक्षते भूतपिशाचाश्चायं तं चतुर्विधं तं द्विप्रधा
ना इति भावः ४० प्रभुर्भगवानजो ब्रह्मा आत्मानमूर्जस्वन्तं बलवन्तं मन्यमानः साध्यान् गणान् साध्यानां गणान् गणानां गणिनां ..... भेदा
विवक्षया सामानाधिकरण्येन निर्देशः पितृगणांश्च परोक्षेणाभिमुखमसृजत् ४१ आत्मसर्गमात्मनैं साध्यानां पितॄणां च सर्गं उत्पत्तिं यस्मात्त

जगृहुस्तद्विसृष्टां तां जृम्भणाख्यां तनुं प्रभोः निद्रामिन्द्रियविक्लेदो यया भूतेषु दृश्यते येनोच्छिष्टान्धर्षयन्ति तमुन्मादं प्र
चक्षते ४० ऊर्जस्वन्तं मन्यमान आत्मानं भगवानजः साध्यान्गणान्पितृगणान्परोक्षेणासृजत्प्रभुः ४१ ते त्वात्मसर्गं त
त्कायं पितरः प्रतिपेदिरे साध्येभ्यश्च पितृभ्यश्च कवयो यद्वितन्वते ४२ सिद्धान्विद्याधरांश्चैव तिरोधानेन सोऽसृजत्
तेभ्योऽददात्तमात्मानमन्तर्धानाख्यमद्भुतं ४३ स किन्नरान्किंपुरुषान्प्रत्यात्म्येनासृजत्प्रभुः मानयन्नात्मनात्मानमात्माभासं वि
लोकयन् ४४

तत्कायं स्वलक्षणं रूपं पितरः प्रतिपेदिरे पितर इति साध्यानामुपलक्षणं ऊर्जस्वन्तो भवन्तीति भावः अत ऊर्जस्वत्वं दृष्टान्तयति इज्यन्त इत्याह
कवयः कर्मकुशलाः साध्येभ्यश्च पितृभ्यश्च यद्धव्यं कव्यं वितन्वते यज्ञे तन्तु साधयन्ति साध्यान् संसाध्य कोऽपि शं तं तु तन्वानं ... त्यजेदिति द्वि
तीयस्कन्धोक्तरीत्या कृतित्वसंततिं विद्याधादिभिरात्मनो बलसंपादनाय साध्यान्पितॄंश्च यजन्तीत्यर्थः यद्वा ऊर्जं प्राणं बलं प्र
कृष्टजननं तद्वन्तं मन्यमानः साध्यादीन् सृजदत एवेहामुत्र च दिवक्षितत्वसंततस्यादिभिरिहामुत्र च प्राणनमिच्छाद्भिरिज्यंत इत्यर्थः ४२
स ब्रह्मा तिरोधानेन स्वतनोरेव हस्पत्व ... शक्त्या सिद्धान्विद्याधरांश्चासृजत् तेभ्यः सिद्धविद्याधरेभ्यः तमेतत् अन्तर्धानाख्यमात्मानं कायमद्भुत
माश्चर्यं ददौ तेऽन्तर्धानशक्तिप्रधाना अभवन्नित्यर्थः ४३ प्रभुर्ब्रह्मा ... आत्माभासमात्मप्रतिबिंबं विलोकयन्नात्मानं प्रतिबिंबरूपं
कायं मानयन् प्रत्यात्म्येन प्रतिबिंबेन किन्नरान् किंपुरुषानसृजत् ४४ ॥ ॥ ॥ ॥ ॥ ॥ ॥

त्या॰८ ५२

भा॰ ३ टी॰ ८६

एवमापृष्टो मैत्रेयः तद्यथावन्मनुपुत्रचरित्रं वक्ष्यमाणस्तावद्देवहूतेः स्वभार्यालाभाय कर्दमस्य तपश्चर्याप्रकारमाह द्वाभ्यां ब्रह्मणा चतुर्मुखेन प्रजाः सृजेत्युक्तो भगवान्कर्दमः सरस्वत्यां नद्यां सहस्राणां दश समाः दशसहस्रसंवत्सरान् तत्तेपे चचार पाकं पचतीतिवन्निर्देशः ६ ततस्तस्मिन्तपसि कर्दमः समाधिस्थित्यैकाग्र्यं तेन युक्तेन क्रियायोगेन स्ववर्णाश्रमोचितानभिसंहितफलभगवत्समाराधनरूपक्रियायोगेन भक्त्या धृत्वा तस्मात्स्तूपोपासनया च प्रपन्नानां वरदाशुषं वरप्रदं हरिं प्रपेदे निषेवे ७ कृतयुगे तावद्दशसहस्रवर्षपर्यन्तं तपश्चर्यानन्तरं पुण्डरीकाक्षो भगवांस्तथा प्रसन्नः तपसा तोषितः हे क्षत्तः शाब्दं पञ्चोपनिषन्मन्त्रवेद्यं ब्रह्म ... सौन्दर्यसौकुमार्यलावण्ययौवनाद्यनन्तकल्याणगुणाकरं वपुर्दिव्यमङ्गलविग्रहं दधद्बिभ्रत्कर्दमं प्रति दर्शयामास स्वात्मानमिति शेषः यद्वा तमिति विग्रहापेक्षया पुं-

मैत्रेय उ॰ प्रजाः सृजेति भगवान्कर्दमो ब्रह्मणोदितः सरस्वत्यां तपस्तेपे सहस्राणां समा दश ६ ततः समाधियुक्तेन क्रियायोगेन कर्दमः संप्रपेदे हरिं भक्त्या प्रपन्नवरदाशुषं ७ तावत्प्रसन्नो भगवान् पुष्कराक्षः कृते युगे दर्शयामास तं क्षत्तः शाब्दं ब्रह्म दधद्वपुः ८ स तं विरजमर्काभं सितपद्मोत्पलस्रजं स्निग्धनीलालकव्रातवक्त्राब्जं विरजोऽम्बरं ९ किरीटिनं कुंडलिनं शंखचक्रगदाधरं श्वेतोत्पलक्रीडनकं मनःस्पर्शस्मितेक्षणं १० विन्यस्तचरणांभोजमंसदेशे गरुत्मतः दृष्ट्वा खेऽवस्थितं वक्षःश्रियं कौस्तुभकंधरं ११ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

लिङ्गनिर्देशः तं विग्रहं दर्शयामासेत्यर्थः ८ तमेव भगवन्तमनुवर्णयन् तं प्रणम्यास्तौषीदित्याह चतुर्भिः स इति स कर्दमस्तं भगवन्तं दृष्ट्वा कथंभूतं विरजं निर्मलं अर्काभमर्कस्येवाभा यस्य तं सितानां पद्मानामुत्पलानां स्रजो माला यस्य तं स्निग्धनीलालकाः कुन्तलास्तेषां व्रातो वक्त्राब्जे मुखकमले यस्य तं विरजः निर्मलं अम्बरं पीताम्बरं यस्य तं ९ किरीटधारिणं कुण्डलधारिणं त्रिभिर्हस्तैः शंखचक्रगदाधरं चतुर्थहस्ते श्वेतोत्पलं क्रीडनं क्रीडासाधनं यस्य तं एकेन करेण लीलार्थं श्वेतोत्पलं वहन्तमित्यर्थः मनःस्पर्शि स्मितेक्षणं चित्तापहसितयुक्तावलोकनयुक्तं १० गरुत्मतो गरुडस्यांसदेशे स्कन्धप्रदेशे विन्यस्ते निहिते चरणपद्मे येन तं वक्षसि श्रीर्यस्य तं कौस्तुभं कन्धरायां यस्य तं खे आकाशेऽवस्थितं भगवन्तं दृष्ट्वा ११ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

रि॥२

तप२

विद्या भगवदुपासना तपः विवेकादिसाधनसप्तकं ताभ्यां युक्तः हृषीकाणामधीश्वराणामीशः जितेन्द्रियो वा ऋषिर्ब्रह्मा योगेन प्रकृतिविवि
क्तात्मया यो ज्ञानयोगेन समाधिनाधिनाथेनैकात्म्येण ऋषीनृषिरूपा अभिमताः प्रजाः ससर्ज ५१ अनन्तरं ब्रह्मा स्वस्य देहस्य शरीर
स्य एकैकमंशं तेभ्य ऋषिभ्यो दाद् दत्तवान् किं तत् यत्पदं यस्मै केकमशः [illegible] मदादित्यत आह यच्छरीरं तत्पो विद्यासमाधियोगाः एवेत्यर्थः कोटि
रणिमाद्यैश्वर्यं सिद्धिर्भक्तिर्विषयेषु निःस्पृहत्वं एभिर्युक्तमित्यर्थः ५२ इति तृतीये विंशः २० एवमसाधारणान्सृष्टिभेदानाकर्ण्य पुत्र
तं स्वायंभुवमनुचरित्रं तत्संप्रश्नं पृच्छतीति विदुरः पंचभिः स्वायंभुवस्य मनोः परम उत्कृष्टः संमतः सतामिति शेषः कथ्यतां यत्र वंशे मैथु
नेन कर्मणा प्रजा एधिरे ववृधुः १ स्वायंभुवस्य मनोः पुत्रौ प्रियव्रतोत्तानपादौ धर्मं यथावत् पातः ददुर्णाश्रमधर्माननतिक्रमेत्यर्थः सप्त

अ२१ तपसा विद्यया युक्तो योगेन सुसमाधिना । ऋषीनृषिर्हृषीकेशः ससर्जाभिमताः प्रजाः ५१ तेभ्यश्चैकैकशः स्वस्य देहस्यांशमदा
दजः यत्तत् समाधियोगर्द्धि तपो विद्याविरक्तिमत् ५२ इति श्रीमद्भागवते तृतीयस्कंधे विंशोध्यायः २० विदुर उ० स्वायंभुवस्य च म
नोर्वंशः परमसंमतः कथ्यतां भगवन्यत्र मैथुनेनैधिरे प्रजाः १ प्रियव्रतोत्तानपादौ सुतौ स्वायंभुवस्य वै यथाधर्मं जुगुपतुः स
प्तद्वीपवतीं महीं २ तस्य वै दुहिता ब्रह्मन् देवहूतीति विश्रुता पत्नी प्रजापतेरुक्ता कर्दमस्य त्वयानघ ३ तस्यां स वै महायो
गी युक्तायां योगलक्षणैः ससर्ज कतिधा वीर्यं तन्मे शुश्रूषवे वद ४ रुचिर्यो भगवान्ब्रह्मन्दक्षो वा ब्रह्मणः सुतः यथा ससर्ज
भूतानि लब्ध्वा भार्यां च मानवीं ५

द्वीपयुक्तां पृथिवीं यथा जुगुपतुः यथा रक्षितवंतौ तत्प्रकारं च कथ्यतामित्यर्थः २ तस्य
ति स्वायंभुवस्य दुहिता पुत्री देवहूतिरिति विश्रुता त्वत्तो मयेति शेषः हे ब्रह्मन् अनघेति द्वे संबोधने कर्दमस्य प्रजापतेः पत्नीति त्वयोक्ता च ३
योगलक्षणैः शमदमादिभिर्युक्तायां तस्यां देवहूत्यां महायोगी परिपक्वभगवदुपासनात्मकयोगनिष्ठः स वै कर्दमः कतिधा कतिभिः
प्रकारैः वीर्यं ससर्ज कत्यपत्यान्युत्सजदित्यर्थः तन्मे शुश्रूषवे श्रोतुमिच्छवे मेयं ब्रूहि वद कथय ४ हे ब्रह्मन् मैत्रेय भगवान् ब्रह्मणः पुत्रः
रुचिर्दक्षश्च ब्रह्मणश्चतुर्मुखस्य सुतः मानवीं मनुपुत्रीं आकूतिं प्रसूतिं च भार्यां लब्ध्वा भूतान्यपत्यानि यथा ससर्ज तत्प्रकारं मे वदे
ति पूर्वेणान्वयः ५

मूलपादमूलमित्यर्थः३

योहं काम कामिनो निंदयामि सोहमपि कामकामकामी ताह तथाहमपि गृहहोमधेनुं गार्हस्थ्यवर्द्धिनीं समानशीलां स्वसमानध
र्माहित्तानुकूलशीलं मित्यर्थः भार्यां परिवोढुकामः उपेयिवान्निष्कन्नतरस्तु दुराशयः दुष्टांतःकरणः कामदुघांघ्रिपस्य कल्पवृक्षस्य वेदर्षि
तार्थदस्य तेवाशेषमूलमशेषपुरुषार्थानां मूलं कारणं उपेयिवान्प्राप्तवानस्मि १५ नन्वेवं हे पापादेय स्विभागकुशलस्त्वं कथं का
मकामी मामुपेयिवानित्यत्राह प्रजापतेरिति हे अधीश प्रजापतेस्तव वचसा वेदात्मिकवचोरूपया तंत्या दाम्ना अयं लोकः संसारिको लो
कः कामहतः कामैरभिभूतः अनुबद्धः पशुरिव बद्धः यामिमां पुष्पितां वाचं प्रवदंत्यविपश्चितः वेदवादरताः पार्थ नान्यदस्तीति वादिनः
कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदां क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति इत्युक्तरीत्या कामात्मानः त्रैवर्गिकमेव फलं वहन्

तथापि चाहं परिवोढुकामः समानशीलां गृहहोमधेनुं उपेयि
वान्मूलमशेषमूलं दुराशयः कामदुघांघ्रिपस्य १५ प्रजा
पतेस्ते वचसाधीश तंत्या लोकः किलायं कामहतोनुबद्धः अ
हं च लोकानुगतो वहामि बलिं च शुक्लानिमिषाय तुभ्यं १६

97

न्वानास्तत्रैवासक्ताः अहमपि लोकान्सांसारिकलोका ननुगतोनुसृतः हे शुक्ल निर्मल भगवन् अनिमिषाय कालस्वरूपिणे तुभ्यं
बलिं गृहाम्नायोचितधर्मरूपबलिं हरामि यद्यप्यहं हे पापादेय विवेकसंपन्नस्तथापि त्वन्निदेशानुवर्त्यस्मि त्वत्राचतुर्मुखेन प्रजा सृजेत्य
नुशिष्टोहमत एव गृहमेधीयैरेव धर्मैस्त्वामाराधयितुं त्वां प्रार्थयामीति भावः अनिमिषायेति हेतुगर्भं यत्त्वं कालरूपेण संसारिणां
निरर्थकमायुः क्षपयस्यतोहं सांसारिकधर्माननुतिष्ठन् कालात्मकात्त्वत्तो भीतः सन्नस्य ह्यायुषः सद्व्ययं चिकीर्षुः पितानिदेशं वदा
लयन् कालरूपाय तुभ्यमेव बलिप्रजां वहामि तन प्रजां करोमीत्यभिप्रायः १६ ॥ ॥ ॥ ॥ ॥ ॥ ॥

जातहर्ष इति लब्धो दर्शनप्राप्तिरूपो मनोरथो येन सः अत एव जात उत्पन्नः हर्ष आनंदो यस्य सः क्षितौ भूम्यां मूर्ध्ना शिरसा पतन् दंडवत्प्र
णामं कुर्वन्नित्यर्थः ततः प्रीतिरेव स्वभाव [illegible] आत्मनो यस्य सः कृतः अंजलिर्येन सः गीर्भिः स्तुतिरूपगुणमहात्म्यप्रतिपादिकाभिर्गी
र्भिर्वचोभिः भगवन्तं स्वाभिप्रेतं निवेदयन् स्तौतीत्यर्थः १२ तदेवाह नन्विभिः जुषमिति हे ईश भक्त्या अखिलसत्त्वराशेः परिपूर्ण
गुणसत्त्वमयस्य तव दर्शनान्नोऽस्माकमसूनां नेत्राणां सांसिध्यं सिद्धिविषयभूतं फलमखिलं सुखं प्राप्तं वर्तते इति हर्षे यदा तव दर्शनमि
ति प्राप्तं तदा नोऽस्माकं सांसिध्यं संसिद्धिरूपस्य फलस्याव्यवहितसाधनं त्वद्दर्शनं यासां सांसिध्यं यत्फलं तत्त्वद्दर्शनरूपं तस्य सोऽगुर्दृष्ट्वा भक्ता
गुष इत्यर्थः दर्शनस्य सांसिध्यत्वमुपपादयति यस्य तव दर्शनं योगारूढः योगः रूढः आरूढो येस्ते प्राप्तयोगा इत्यर्थः सद्भिः सा

जातहर्षोऽपतन्मूर्ध्ना क्षितौ लब्धमनोरथः । गीर्भिस्त्वाभ्यगृणात्प्रीतिस्वभावात्मा कृताञ्जलिः ॥ १२ ॥
कर्दम उ॰ जुष्टं बताद्याखिलसत्त्वराशेः सांसिध्यमक्ष्णोस्तव दर्शनान्नः । यद्दर्शनं जन्मभिरीड्य
सद्भिराशासते योगिनो रूढयोगाः ॥ १३ ॥ ये मायया ते हतमेधसस्त्वत्पादारविंदं भवसिंधुपो
तं उपासते कामलवाय तेषां रासीश कामान्निरयेऽपि ये स्युः ॥ १४ ॥ ॥ ॥ ॥ ॥

३१ त्विकैर्जन्मभिरपि यत्नतस्तवदर्शनमेव [illegible] आशासते प्रार्थयंते आरूढयोगैर्बहुजन्मभिस्तत्तदेव निरतिशयं सांसिद्धि ॥ ॥ ५२
कफलमित्यर्थः १३ ननु धर्मादिचतुष्टयमेव पुरुषार्थः ननु मद्दर्शनमित्यत्राह यदिति ते मायया ये हतमेधसः मोहितबुद्धयः ते जना
भवः संसारः स एव सिंधुः समुद्रः तस्मिन्योतं नौकारूपं त्वच्चरणारविंदं कामलवाय कामस्यैतत्तद्द्विदिता कामाः सुखानि तेषां लवार्थं ये उपा
सते निरयेऽपि निरये नरकेऽपि ये कामाः स्युः तान्कामांस्तेषां तत्सुखलेशेन विनाऽपि राशि ददासि तथापि ते [illegible] कामरू
मासाद्य वराटिकाद्यन्वेषयंतश्च इव नित्यं निरतिशयानंदजलधिस्त्वा प्राप्य धान्यानंदलेशमाशासते नास्त्यन्यो वा हतबुद्धय एव अ
तो धर्मादिपुरुषार्थेच्छा त्वां भजन् मूर्ख एवेति भावः १४ ॥ ॥ ॥ ॥ ॥

उक्तिमेवाह दृशाभिः विदित्वेति तव चैत्यमभिप्रायं विदित्वा ज्ञात्वा मे मया तत्त्वदभिप्रेतं पुरैव समयोजि घटितं किं तदित्यत्राह यदर्थं यत्का
मलाभार्थमात्मनो नियमैः शमदमादिभिः त्वयाहमेव समर्चितः सम्यगाराधितः २३ हे प्रजाध्यक्ष मदर्हणं मदाराधनं जातु कदा
चिदपि वृथा व्यर्थं न स्यादेवमपि संगृहीतः सम्यग्गृभितः संगृहीतः एकाग्रीकृतः आत्मा मनः यैस्तेषु भवद्विधेषु भवादृशेषु सुतरा
मपि मदर्हणं न मृषेत्यर्थः गृभितात्मनामिति षष्ठ्यन्तपाठे तु संगृभितात्मा नां मदर्हणं न मृषैव भवद्विधेषु सुतरामपि न मृ
षेति योज्यं २४ यः प्रजापतेर्ब्रह्मणः पुत्रः सम्राट् सार्वभौमो विख्यातः मंगलं मंगलाचारो यस्य सप्रेैत तस्मात् सदाचार निष्ठो मनुः स्वा
यंभुवमनुः ब्रह्मावर्तं ब्रह्मावर्ताख्यं देशमधि वसेत्यधिष्ठाय वसन्सप्त अर्णवाः समुद्राः यस्यां तां महीं पृथ्वीं शास्ति धर्मतः पालयति

श्रीभगवानु॰ विदित्वा तव चैत्यं मे पुरैव समयोजि तत् यदर्थमात्मनियमैस्त्वयैवाहं समर्चितः २३ न वै जातु मृषैव स्यात्प्रजाध्य
क्ष मदर्हणं भवद्विधेष्वतितरां मयि संगृभितात्मसु २४ प्रजापतिसुतः सम्राट् मनुर्विख्यातमंगलः ब्रह्मावर्तं यो ऽधिवसन् शा
स्ति सप्तार्णवां महीं २५ स चेह विप्र राजर्षिर्महिष्या शतरूपया आयास्यति दिदृक्षुस्त्वां परश्वो धर्मकोविदः २६ आत्मजामि
सितापांगीं वयःशीलगुणान्वितां मृगयंतीं पतिं दास्यत्यनुरूपाय ते प्रभो २७ समाहितं ते हृदयं यत्रेमान्परिवत्सरान् सा त्वां
ब्रह्मन्नृपवधूः काममाशु भजिष्यति २८ ति २५ स च राजर्षिर्मनुः शतरूपाख्यया महिष्या भार्यया सह धर्मकोविदं धर्मेषु नि
दाराधन रूपेषु कुशलं त्वां दिदृक्षुः द्रष्टुमिच्छुः परश्वः इतोऽनागते द्वितीयेऽहन्यायास्यति २६ आयातु मम किमित्यत्राह असितापां
गी मतिनीलकनीनिका युक्तनेत्री वयसा शीलेन स्वभावेन सदृशा च गुणैर्जितेंद्रियत्वादिभिः अन्वितां पतिं स्वानुरूपं मृ
गयतीं रत्नप्रेषणादिभिः परिशीलयंतीमात्मजां देवहूत्याख्यां तनयां मनुरूपाय वयःशीलादिभिरनुरूपाय ते तुभ्यं दास्यति २७ हे
प्रभो वरे ऽपेक्षिय पत्रयस्यां मनुकन्यायां इमान्यावतः परिवत्सरान्संवत्सरान् अत्यंतसंयोगे द्वितीया ते हृदयं चित्तं समाहितं भो
गासक्तं तावत्संवत्सरपर्यंतं सा नृपवधूर्नृपकन्या हे ब्रह्मन् त्वामाशु शीघ्रं कामं भजिष्यति अनुभविष्यति त्वया सह बहुवर्षपर्यंतं कामा
न्सेवयाशु क्षणमात्रमिवानुभविष्यतीत्यर्थः २८ ॥ ॥ ॥ ॥ ॥ ॥ ॥

ननु कुत एतत्केवलकामकामिनोऽन्योल्पस्याभिलाषिणः इत्यत्राह नैतदिति हे अधीश मायया प्रकृत्या स्वसंकल्पेन वाहमहंकारं
तस्मादुत्पन्नं भूतसूक्ष्मं भूतान्याकाशादीनि तत्सूक्ष्माणि शब्दादीनि च तनुषे सृजसि भूतसूक्ष्ममिति समाहारद्वंद्वः ननु तनुषे भूतसूक्ष्ममि
ति पाठे तु भूतानां सूक्ष्मं कारणमहंकारमित्यर्थः कारणं हि कार्यात्सूक्ष्ममिति सूक्ष्मशब्देनाहंकारग्रहः मायया भूतसूक्ष्मं सृजसीति
यद्येनत्तत्पदं तवेप्सितं नाभिलषितं तत्सर्वाहंकारस्वरूपत्वादस्माभिस्तत्पदं नाभिलषितमित्यर्थः वर्तेत निर्वेदे यद्यप्य [illegible]
[illegible] तत्तत्पदं नाभिलषामि तथापि [illegible] मम नु गृह्यत्वत्पदमपि मम दुःखशान्तिमेवाति भातीत्याह अपि तु पापिमपात्वदेऽनाभिल
षितेपि यर्हि यदा लसत्तुलस्या लसंती तुलसीमाला यस्यास्तया मालया आश्रयविग्रहेण भगवान्विलक्षितः दृष्टः मयेति शेषः न देवा
नुग्रहाय त्वत्स्वरूपायणरूपानुग्रहार्थं भवानस्तु स्यादिति निश्चिनोमीत्याहारः अस्त्विति पाठे तु क्रियापदमात्रमध्याहर्तव्यं २० ननु
स्वात्मानुभवानंदं पूर्णमुदासीनं मां कथं जगत्कारणं प्रतिपादितवानसीत्याशंकां परिहरन्स्तुतिमुपसंहरति तमहमस्मदनुग्रहैकनिरू

नैतद्बताधीश पदं तवेप्सितं यन्मायया नस्तनुषे भूतसूक्ष्मं अनुग्रहायास्त्वपि यर्हि मायया लसत्तुलस्या तनुवा विलक्षितः २०
तं त्वानुभूत्योपरतक्रियार्थं स्वमायया वर्तितलोकतंत्रं नमाम्यभीक्ष्णं नमनीयपादसरोजमल्पीयसि कामवर्षं २१ मैत्रेय उवाच
इत्यव्यलीकं प्रणुतोऽब्जनाभस्तमाबभाषे वचसामृतेन सुपर्णपक्षोपरि रोचमानः प्रेमस्मितोद्वीक्षणविभ्रमद्भ्रूः २२ ॥

तं त्वामभीक्ष्णं पुनःपुनः नमामि कथंभूतमनुभूत्या स्वात्मानुभवेन उपरतः अनपेक्षितः क्रियार्थः जगद्व्यापाररूपक्रियाप्रयो
जनं यस्य तं मायया स्वमायया स्वलीलासंकल्पमात्रेण वर्तितं लोकतंत्रं जगद्व्यापारो येन तं अल्पीयसि स्वल्पमप्यस्य धर्मस्य त्रा
यते महतो भयादित्युक्तरीत्या ईषद्भवदीयाराधनं कुर्वत्यपि पुरुषे कामान्वर्षतीति तथा तं अत एव नमनीयं पादसरोरुहं यस्य
तं २१ एवं कर्दमेन स्तुतः तेन निवेदिताभिप्रायश्च भगवांस्तमुवाचेत्याह मैत्रेयः इत्येवं व्यलीकं विगतालीकं सत्यं यथा अव्यली
कमिति पाठेप्ययमेवार्थः प्रणुतः प्रकृष्टगुणविशिष्टत्वेन स्तुतः सुपर्णस्य गरुडस्य पक्षोपरि स्कंधदेशे रोचमानः प्रकाशमा
नः प्रेमस्मितेनोद्वीक्षणेन च विभ्रमंती भ्रूर्यस्य सोऽब्जनाभो भगवानमृततुल्येन वचसा तं कर्दमं प्रत्याबभाषे उवाचेत्यर्थः २२

गते भगवति कर्दमः किमकरोदित्यपेक्षायामनंतरवृत्तांतमाह अथेत्यादिना शुक्ले भगवति संप्रस्थिते सम्यक् प्रयाते सति भगवान्कर्द
मऋषिस्तं तं कालं दिदृक्षुस्त्वा परम्बुद्धि निर्दिष्टं काले प्रतिपालयन्प्रतीक्षमाणः बिंदुसरसि बिंदुसरस्तीरे आस्ते स उपविष्टः किल ३५ म
नुः स्वायंभुवः शातकौंभाः सुवर्णमयाः परिच्छदा अलंकारा यस्मिंस्तत्स्यंदनं रथमास्थायाधिष्ठायारुह्येत्यर्थः तत्र स्वां दुहितरमारोप्य
सभार्यः शतरूपया सहितः महीं दुहितुः पत्यन्वेषणार्थं पर्यटत् संचरन् ३६ भगवान्यद्देशः समादिशत् निर्दिष्टवान् तस्मिन्नहनि हे सुध
न्वन् विदुर शांतिव्रतस्योपशमशीलस्य मुनेराश्रमस्थानं प्रतिउपायात् उपागात् ३७ आश्रमपदं वर्णयति सप्तभिः यस्मिन्निति प्र

११

पन्ने कर्दमे भृशमत्यंतमर्पितया निहितया कृपया संपरीतस्य समाकुलितात् अस्य भगवतो नेत्रात् वृष्टविंदवः आनंदाश्रूणि य

अथ संप्रस्थिते शुक्ले कर्दमो भगवानृषिः आस्ते स्म बिंदुसरसि तं कालं प्रतिपालयन् ३५ मनुः स्यंदनमास्थाय शातकौंभ
परिच्छदं आरोप्य स्वां दुहितरं सभार्यः पर्यटन्महीं ३६ तस्मिन् सुधन्वन्नहनि भगवान्यत्समादिशत् उपायादाश्रमपदं मु
नेः शांतिव्रतस्य तत् ३७ यस्मिन्भगवतो नेत्रान्न्यपतन्नश्रुबिंदवः कृपया संपरीतस्य प्रपन्नेर्पितया भृशं ३८ तद्वै बिंदुसरो
नाम सरस्वत्या परिप्लुतं पुण्यं शिवामृतजलं महर्षिगणसेवितं ३९ पुण्यद्रुमलताजालैः कूजत्पुण्यमृगद्विजैः सर्वर्तु
फलपुष्पाढ्यं वनराजिश्रियान्वितं ४० मत्तद्विजगणैर्घुष्टं मत्तभ्रमरविभ्रमं मत्तबर्हिनटाटोपमाह्वयन्मत्तकोकिलं ४१

स्मिन्सरस्यपतन् ३८ तत्सरः बिंदुसरो नाम इति प्रसिद्धं इदमेव बिंदुसरः शब्दस्य प्रवृत्तिनिमित्तं पद्धरिहर्षबिंदुनिपतनोत्तरावधि
त्वाभिती सर्थः कथंभूतं सरस्वत्यानद्या परितः प्लुतं वलयितं पुण्यं उपस्पर्शनादिभिः पुण्यसाधनं शिवं मम तत्तुल्यं जलं
यस्मिंस्तत् महर्षिगणैः सेवितं महरहरुपस्पृश्यमानं ३९ कूजंतः पुण्या मृगा द्विजाः शकुनयश्च येषु तैः पुण्यानां द्रुमाणां
लतानां च जालैः समूहैः सर्वर्तुषु सर्वऋतुषु यानि फलानि पुष्पाणि च तैराढ्यं शालिनी या वनराजिर्वनपंक्तिस्तस्याः श्रिया शोभ
यान्वितं युक्तं ४० मत्तानां मधुपानमत्तानां ये भ्रमरास्तेषां विभ्रमो विलासो यस्मिन् मत्ता बर्हिणो मयूरा एव नटास्तेषामाटोपो न
त्यसंभ्रमो यस्मिन्नाह्वयंतो मिथः मत्ताः कोकिला यस्मिंस्तत् ४१ ॥ ॥ ॥ ॥ ॥ ॥ ॥

यादेवहूतिः ते त्वयात्मभृतमात्मनाधृतं स्वस्मिन् वीर्यं नवधा प्रसविष्यति त्वदीये वीर्ये तत्तु तत्रात्मनः स्वपुत्रीषु ऋषयः मरीच्याद
योंजसाप्सु आत्मनः पुत्रान् आत्मा वै पुत्रनामासीति श्रुतेः आधास्यंति उत्पादयिष्यंति २८ त्वं मेम मन्निदेशमाज्ञां सम्यगनुष्ठाय परि
पाल्य उशत्तमः कमनीयम् अराधनं निषः मपितीर्थीकृतः तीर्थशब्देन पात्रमुच्यते तेन यानेलस्यते तीर्थीकृतः समर्पितः अशेष
क्रियार्थः समस्तक्रियाफलं येन स मां प्रपत्स्यसे प्राप्स्यसि ३० आत्मवान् जितात्मा अतः करुणस्त्वं भूतेषु चराचरात्मकेषु दयां कृत्वा अभयं
च दत्वा मत्तः प्रविष्ट धारके मयि कृत्स्नं चराचरात्मकं जगदात्मानं च सह हे वइरसि व्याप्य धार्य चद्रक्ष्य [illegible] स्वात्म
निधायेस्वात्मनि च मां धारकं व्यापकं च द्रक्ष्यसीत्यर्थः ३१ स्वांशकलया स्वांशांशेन सह अहं च त्वद्वीर्येण द्वारभूतेन हे महामुने तव क्षेत्रे दे

यात्त आत्मभृतं वीर्यं नवधा प्रसविष्यति वीर्ये त्वदीये ऋषय आधास्यंत्यंजसात्मनः २८ त्वं च सम्यगनुष्ठाय निर्देशं मे उशत्तमः म
यि तीर्थीकृताशेषक्रियार्थो मां प्रपत्स्यसे ३० कृत्वा दयां च जीवेषु दत्वा चाभयमात्मवान् मय्यात्मानं सह जगद्द्रक्ष्यस्यात्मनि चापि मां
३१ सहाहं स्वांशकलया त्वद्वीर्येण महामुने तव क्षेत्रे देवहूत्यां प्रणेष्ये तत्वसंहितां ३२ मैत्रेय उ० एवं तमनुभाष्याथ भगवान्प्रत्य
ग्क्षजः जगाम बिंदुसरसः सरस्वत्या परिश्रितात् ३३ निरीक्षतस्तस्य ययावशेषसिद्धेश्वराभिष्टुतसिद्धमार्गः आकर्णयन् पत्ररथेंद्र
पक्षैरुच्चारितं स्तोममुदीर्णसाम ३४

क्षेत्रभूतायां देवहूत्यां मवतीर्येति शेषः तत्वसंहितां तत्वानां प्रकृतिपुरुषेश्वराणां
स्वरूपविवेचनीं संहितां प्रणेष्ये कथयिष्यामि ३२ एवं कर्दमं माभाष्य स्वस्थानं प्रति भगवान् गत इत्याह मैत्रेयः प्रत्यक् प्रत्याहृते
भ्यि इंद्रियेषु जायते आविर्भवतीति प्रत्यगक्षजो भगवान् तं कर्दममनुभाष्याथानंतरं सरस्वत्यानद्या परिश्रितात् परिवेष्टिताद्बिंदुस
रसः बिंदुसरोवरतीरस्थात् कर्दमाश्रमात् जगाम ३३ कथं जगामेत्याह निरीक्षत इति तस्य कर्दमस्य निरीक्षतः पश्यतः सतः अ
शेषसिद्धेश्वरैः सर्वयोगीश्वरैर भिष्टुतः सिद्धः स्वतःसिद्धः मार्गः कल्याणगुणगणरूपप्रकारो यस्य सः पत्ररथेंद्रो गरुडः तस्य पक्षै
रुच्चारितं उदीर्णं अभिव्यक्तं सामनी बृहद्रथंतरे यस्मिन् तं स्तोमं सामाधारभूतमृक्समुदायं बृहद्रथंतरे पक्षौ स्तोम आत्मेति श्रुतेः
आकर्णयन् श्रावयन्ययौ जगाम ३४

मध

हे देव मनोते नव चंक्रमणं पार्ष्णिनेसतां रक्षणाय असतां वधाय च यद्यस्मात् त्वं पालिनी जगत्पालिनी हरेर्भगवतः शक्तिः हरेर्जगत्पालक शक्ति युक्तस्त्वमित्यर्थः ५० प्रसंगात् स्वतं भगवंतं प्रणमति यदृति यो विष्णुरकादीनां रूपाणि शिल्पपुत्रकसदृशशरीरमिति वद मंदं सर्ग षष्ठी अर्कादि रूपाणि स्थितत्र रचितजगत्परिपालनावसरे आधसे विभर्षि तस्मै विष्णवे शुक्लाय निर्मलाय तेतुभ्यं भगवते न मः ५१ एवं विष्णुं प्रणम्य मुनिर्मनोरागमनप्रयोजनं प्रष्टुकामः प्रथमं तत्स्वप्रश्नेन जगद्रक्षणपर्यटनं मा के मर्थमागतोसीति किं पृच्छसीति मा वादीत्यभिप्रायेण प्रधान प्रयोजनं जगद्रक्षणमेवानुषंगिक मिहागमनप्रयोजनं यत्किंचिदस्तित्वेत्कथ्यता मित्याह यावदध्यायसमाप्ति नेति त्वं जैत्रं जयशीलं मणिगणैरर्पितरचितं रथमास्थायाधिरूढः चंडः परेषां भयजनकः कोदंडो धनु

कर्द्दम उ॰ ननं चंक्रमणं देव सतां संरक्षणाय ते वधाय चासतां यस्त्वं हरेः शक्तिर्हि पालिनी ५० योर्केन्द्वग्नीन्द्रवायूनां यमधर्मप्र चेतसां रूपाणि स्थान आधसे तस्मै शुक्लाय ते नमः ५१ न यदा रथमास्थाय जैत्रं मणिगणार्पितं विस्फूर्जच्चंडकोदंडो रथे नत्रासयन्नघान् ५२ स्वसैन्यचरणक्षुण्णं वेपयन्मंडलं भुवः विकर्षन्बृहतीं सेनां पर्यटस्यंशुमानिव ५३ तदैव सेतवः सर्वे वर्णा श्रमनिबंधनाः भगवद्रचिता राजन्भिद्येरन्बत दस्युभिः ५४ अधर्मश्च समेधेत लोलुपैर्व्यंकुशैर्नृभिः शयाने त्वयि लो कोयं दस्युग्रस्तो विनंक्ष्यति ५५ अथापि पृच्छे त्वां वीर यदर्थं त्वमिहागतः तद्वयं निर्व्यलीकेन प्रतिपद्यामहे हृदा ५६ इति श्रीमद्भागवते महापुराणे तृतीयस्कंधे कर्द्दमस्य वरप्रदानं नामैकविंशोध्यायः २१ नुर्यसासः विस्फूर्जन् चंडो दंडामितशोषः द्वितीयां तपाठेतु कर्मधारयः चंडकोदंडं विस्फूर्जन्वरथे नाघान्विरोधिनः त्रासयन् रञ्जयन् ५२ स्वसैन्यानां चरणैः क्षुण्णं संघट्टितं भुवो मंड लं वेपयन्कंपयन्महतीं सेनां विकर्षन् सूर्य इव यर्हि न पर्यटसे ५३ तदैव वर्णाश्रमप्रयुक्ता भगवता रचिताः कल्पिताः सर्वे सेतवः धर्ममर्यादाः हे राजन् दस्युभिः धर्मविरोधिभिः भिद्येरन् वर्ततेति खेदे ५४ व्यंकुशैः निःप्रतिपक्षैः लोलुपैः केवलमर्थकामपरायणैः नृभिरधर्मश्च समेधेत वर्द्धेत त्वयि शयाने सत्ययं लोकः दस्युग्रस्तः विनंक्ष्यति नाशं प्राप्स्यति ५५ अलीकेन निष्कपटेन हृदा चित्तेन प्रतिपद्यामहे गीकुर्महे ५६ इति श्रीवीरराघवीते तृतीयस्कंधटीकायामेकविंशोध्यायः २१ ॥ ॥ ॥ ॥ ॥ ॥

भिर्भि २

कदंबादिभिः पुष्पवृक्षैरलंकृतं ४२ कारंडवादिभिः पक्षिभिः वल्गुमधुरं संदरं यथा तथा कूजितं ४३ तथा हरिणादिभिर्मृगैर्वृतं तत्र क्रोडः सूकरः श्वाविन्छल्यकः मर्कटो मर्कटः तद्विशेषो गोपुच्छः हरिः सिंहः नाभिः कस्तूरीमृगः ४४ सहानुगैः सभृत्यः आदिराजो मनुः तन्नीर्थश्रेष्ठं प्रविश्य तस्मिंस्तीर्थे हुतः हुताशनो येन तं कृताग्निकार्यमित्यर्थः आसीनमुपविष्टं मुनिं ददर्श ४५ पुनर्मुनिं विशिनष्टि सार्द्धद्वयेन तपसा चिरमुग्रेणायुग्णो गोपस्यातेन वपुषा विद्योतमानं भगवतः स्नेहयुक्तं पदयांगावलोकनं कटाक्षप्रसरणं तस्मात्तस्य भगवतो व्याहृतभाषणमेवामृतमयस्य चन्द्रस्य कलातन्मया पीयूषं तत्स्वस्त्रवेणाचनातिशामंत प्रसादं कृश

कदंबचंपकाशोककरंजवकुलाशनैः कुंदमंदारकुटजैश्चूतपोतैरलंकृतं ४२ कारंडवैः प्लवैर्हंसैः कुररैर्जलकुक्कुटैः सारसैश्चक्रवाकैश्च चकोरैर्वल्गुकूजितं ४३ तथैव हरिणैः क्रोडैः श्वाविद्गवयकुंजरैः गोपुच्छैर्हरिभिर्मर्कैर्नकुलैर्नाभिभिर्वृतं ४४ प्रविश्य तत्तीर्थवरमादिराजः सहानुगः ददर्श मुनिमासीनं तस्मिन्हुतहुताशनं ४५ विद्योतमानं वपुषा तपस्युग्रयुजा चिरं नातिक्षामं भगवतः स्निग्धापांगावलोकनात् ४६ तद्व्याहृतामृतकलापीयूषश्रवणेन च प्रांशुं पद्मपलाशाक्षं जटिलं चीरवाससं उपसंसृत्य मलिनं यथार्हणमसंस्कृतं ४७ अथोटजमुपायांतं नृदेवं प्रणतं पुरः सपर्यया प्रत्यगृह्णात्प्रीतिनिंघानुरूपया ४८ गृहीतार्हणमासीनं संयतं प्रीणयन्मुनिः स्मरन्भगवदादेशमित्याह श्लक्ष्णया गिरा. ४९ ॥ ॥ ॥ ॥

मपि नातिकृशमित्यर्थः ४६ प्रांशुं उन्नतं जटिलं संजाततजटं उपसंसृत्य समीपमागत्य मलिनं ददर्शेति पूर्वेणान्वयः अधृतिनेनेः त्यर्हणं महारत्नं तदसंस्कृतम निर्णिक्तं यथा मलिनं भवति तद्वत् ४७ अथानन्तरं उटजं पर्णशालामुपायांतं प्राप्तं पुरः पादयोः समीपे प्रणतं नमस्कुर्वंतं नृदेवं मनुं प्रीतिनिंघाशीर्भिरभिनंद्य अनुरूपया सपर्यया पूजया प्रत्यगृह्णात्सत्कृतवान् ४८ गृहीतं प्रतिगृहीतमर्हणं पूजनं येन तमासीनमुपविष्टं संयतं तस्य वाक्यश्रवणे सम्यग्यतमानं मुनिः कर्दमः श्लक्ष्णया मधुरया गिरा स्वागतप्रश्नरूपया वाचा नृपं प्रीणयन्नूतप्रीतिं वक्ष्यमाणप्रकारेण जगाद ४९ ॥ ॥ ॥ ॥ ॥

एवमात्मनः कृतार्थतामावेद्य तं प्रसादयन् स्वाभिप्रेतं निवेदयति स इति सभाभिः दुहितृस्नेहेन परिक्लिष्टः आत्मा मनो यस्य तस्यात एव
दीनस्य मम याच्ञा श्रावितं विज्ञापितं स भगवान् कृपया श्रोतुमर्हसि किं तदित्यत्राह इयं स्वसृतिः प्रियव्रतोत्तानपदोः स्वसा भगिनी मम दु
हिता प्रियव्रतोत्तानपदोः स्वसेत्यनेन पुत्रीकरणशंका निरस्ता मम दुहितेत्यनेन क्षत्रियकन्यात्वं योग्येति दर्शितं वयःशीलादि
भिर्युक्तं पतिमन्विच्छतीत्येतेन स्वयंवरेति सूचितं ९ तदेव विशदयति यदा तु पूर्वं भवच्छीलादीन्नारदोपदेशाच्छृणोत्तदैव त्वयि
कृतः निश्चयः त्वमेव वरो भर्त्तेति निश्चयो यया सा १० तस्माद्धे द्विजाग्र्य मया श्रद्धयोपाहृतां समर्पितां त्वं गृहमेधेषु गार्हस्थ्येषु कर्मसु
सर्वात्मना सर्वप्रकारैरनुरूपामनुकूलामिमां कन्यां प्रतीच्छ प्रतिगृहाण ११ प्रक्षेपमहं असारख्यानशंकया तत्प्रोत्साहयन्नाहद्विभिः उ

स भवान्दुहितृस्नेहपरिक्लिष्टात्मनो मम श्रोतुमर्हसि दीनस्य श्रावितं कृपया मुने ८ प्रियव्रतोत्तानपदोः स्वसेयं दुहिता मम अ
न्विच्छति पतिं युक्तं वयःशीलगुणादिभिः ९ यदा तु भवतः शीलश्रुतरूपवयोगुणान् अशृणोन्नारदादेषा त्वय्यासीत्कृतनि
श्चया १० तत्प्रतीच्छ द्विजाग्र्येमां श्रद्धयोपाहृतां मया सर्वात्मनानुरूपां ते गृहमेधेषु कर्मसु ११ उद्यतस्य हि कामस्य प्रतिवादो न
शस्यते अपि निर्मुक्तसंगस्य कामरक्तस्य किं पुनः १२ य उद्यतमनादृत्य कीनाशमभियाचते क्षीयते तद्यशः स्फीतं मानश्चावज्ञ
या हतः १३ अहं त्वाशृणवं विद्वन्विवाहार्थं समुद्यतं अतस्त्वमुपकुर्वाणः प्रत्तां प्रतिगृहाण मे १४ ऋषिरु० बाढमुद्वोढुकामोऽह
मप्रत्ता च तवात्मजा आवयोरनुरूपोऽसावाद्यो वैवाहिको विधिः १५

उद्यतस्य हि दैवात्स्वतः प्राप्तस्य विषयस्य कामस्याभिलाषस्य प्रति
वादः प्रत्याख्यानं निर्मुक्तसंगस्यापि न शस्यते किं नु मिलितोऽपि कामासक्तस्य किं पुनः प्रतिवादेन शस्यत इति किं पुनर्वक्तव्यमित्यर्थः १२
प्रतिवादे किं स्यादित्यत्राह यः पुमानुद्यतं कामं मनाद्दृत्य पश्चात् कीनाशं कृपणमभियाचते स्फीतं प्रवृद्धमपि तस्य पुंसो यशः क्षीयते तेन
रूपति अवज्ञया यः स्वमानेन मानः बहुमानस्य हतः विनष्टो भवेत् १३ ननु सत्यं त्वदुक्तं सर्वं परं विवाहकामस्य हेतुनतादृश इत्यत्राह
अहमिति हे विद्वन् त्वाम् उद्वाहार्थं समुद्यतं यत्त्वमेव महं अशृणवं श्रुतवान् अतस्त्वमुपकुर्वाणः नैष्ठिकेतरब्रह्मचारी सावधिकब्र
ह्मचर्यवान् त्वं मे मया प्रत्तां कन्यां प्रतिप्रतिगृहाण १४ एवं मनुना विज्ञापितः कर्दम ऋषिरुवाच बाढमिति बाढमित्यंगी
कारे अहमुद्वोढुकामः परिणेतुकामः तवात्मजा पुत्री अप्रत्तान्यस्मै च न प्रतिश्रुता चात आवयोरनुरूप आद्यः ब्राह्मः वैवाहिकः विवाह
रूपः विधिर्विधानमस्त्विति शेषः १५

एवंकर्द्दमेनोक्तो मनुस्तमुवाचेत्याह मैत्रेयः एवमिति आविष्कृतानो गुणानां कर्मणां च उदयः उत्कर्षो यस्य स आत एव सव्रीड इव सकीर्त्ति
श्रवणाच्छजित इव स आह मनुरूपारत निवृत्ति धर्मनिष्ठं तं मुनिमुवाचहेति ६ष्टं १ उक्तिमेवाह त्रयोदशभिः मदीयेयं कन्याप दिशेयिते
तिविज्ञा पयिष्यांस्तावत्सुष्ठ्वादस्त सवंध ईश्वरेण ब्रह्मणएवमेव संघटितः इत्याह मनुः ब्रह्मेति सार्ध द्वयेन छंदोमयो वेदमयः चतुरः ब्रह्मा
स्वमुखात्तपः कर्मयोगः विद्या भगवदुपासना योगो ज्ञानयोगः एतैर्युक्तान् अलंपटान् विषयेष्वलालसान् युष्मान्वेदमयान् ब्राह्मणानात्म
पराप्सपावेदमयस्यात्मनः रिरक्षया आत्मज्ञानरूपावात्र ह्यशरीरकः परमात्ममुखादसृजत २ तेषां ब्राह्मणानां त्राणाय रक्षणाय क्षत्रान्
क्षत्रियान्सहस्रपात्सर्वतः पाणिपादः क्षिकार्यकर्त्ता भगवान्नूरोः सहस्राद्भुजसहस्रादसृजत् तस्य ब्रह्मणः हृदयं ब्रह्मकुलं सत्रं क्षत्रियकुलमं
गं प्रचक्षते ३ अतो वेदपालनाय ब्राह्मणान् ब्राह्मणपालनाय स्मान्क्षत्रियान्सृष्टवान् ततः ब्रह्मक्षत्रं चान्योन्यं मिथः आत्मानं रक्षतः एवप
मैत्रेय उ० एवमाविष्कृताशेषगुणकर्मोदयो मुनिं सव्रीड इव तं सम्राडुपारतमुवाचह १ मनुरु० ब्रह्मासृजत्स्वमुखतो युष्मानात्म
परीप्सया छंदोमयस्तपोविद्यायोगयुक्तानलंपटान् २ तत्त्राणायासृजच्चास्मान्दोःसहस्रात्सहस्रपात् हृदयं तस्य हि ब्रह्म क्षत्रमंग
प्रचक्षते ३ अतो ह्यन्योन्यमात्मानं ब्रह्मक्षत्रं च रक्षतः रक्षति स्माव्ययो देवः सदसदात्मकः ४ तव संदर्शनादेवच्छिन्ना मे सर्वसंशयाः
यत्स्वयं भगवान्प्रीत्याधर्ममाह रिरक्षिषोः ५ दिष्ट्या मे भगवान् दृष्टो दुर्दर्शो योऽकृतात्मनां दिष्ट्या पादरजः स्पृष्टं शीर्ष्णा मे भवतः
शिवं ६ दिष्ट्या त्वयानुशिष्टोऽहं कृतश्चानुग्रहो महान् अपावृतैः कर्णरंध्रैर्जुष्टा दिष्ट्योशतीर्गिरः ७ रक्षार्थं सृजन्मारण उभयमपि
सदसदात्मकः कार्यकरणरूपः एवमव्ययः कार्यगतविकारैरस्पृष्टः यद्वा सदसदात्मकः चेतनाचेतनशरीरकः अत एवाव्ययः नहि
शरीरगतैर्विकारैः शारीरी स्पृश्यते पादवत्सरक्षति ४ तस्मै स्वाभिप्रायं निवेदयितुं क्रमेण तद्दर्शनादिकं प्रशंसति त्रिभिः तवदर्शनादेव मे
सर्वेसंशयाः पूर्वूक्ता एवविषयाः छिन्ना हे भगवन्कर्द्दम यत्स्मात्स्वयमेव भगवान् रिरक्षिषोः प्रजाः पालयितुंइच्छोर्मधर्ममाहनयदारण्य
मास्थायेत्यादिनोक्तवान् ५ अकृतात्मना मकृतत्सफकृतानां दुर्दर्शः द्रष्टुमशक्यो भगवान्सोमया दिष्ट्या भाग्येन दृष्टः भवतः शिवं
मंगलकरं पादरजः मे शीर्ष्णा शिरसा स्पृष्टं धृतं ६ अनुशिष्टोनुशिक्षितः महाननुग्रहो नुशासनादिरूपः त्वया कृतः अपावृतैरनावृतैः क

तुमि २

कर्दमोक्तिमुपसंहरतिमैत्रेयः सइति हेउग्रधन्वन्विदुर कर्दमइयदेवएतावदेवाबभाषेउक्तवान् अनंतरमरविंदनाभंभगवंतंधि
योपगृह्णन्चिंतयन्तूष्णीमासीत्स्मितेनशोभितंयन्मुखंतेनदेवहूत्याश्चित्तंलुलुभेमोहितमभूत् २१ अतो
नंतरंसमनुःमहिष्याभार्यायाःदुहितुश्चव्यवसितंनिश्चितंस्फुटंअनुज्ञायज्ञात्वागुणगणैराढ्यायपुत्रायतस्मैकर्दमायतुल्यां
कन्यांप्रहर्षितःसन्दत्तवान् प्रधर्षितइतिपाठेगुणातिशयइत्यर्थः २२ महाराज्ञस्यमनोःस्त्रीशतरूपापारिबर्हानुपायनरू
पान्भूषादीन्वासांसिवस्त्राणिपरिच्छदाःक्रीडोपकरणानिदंपत्योर्दुहितृजामात्रोःपर्यदात् २३ सदृक्षायसदृशायप्रत्तांदत्तांदु

शा६ हितरंसम्राट्मनुःगतव्यथःनिरस्तदुहितृपत्यन्वेषदुःखः बाहुभ्यामुपगृह्यालिंग्यअयंभाषाबंधोनकेवलंमयैवकृतः किंतुसमस्त
जगदुदयस्थितिभवलयलीलेनभगवतैवनिर्वर्दिष्टइत्याह यतइति एवंदेवतिर्यङ्मनुष्यस्थावरादिभेदेनविचित्रंविश्वंयताभगव

२०२

यतोभवद्विश्वमिदंविचित्रंसंस्थास्यतेयत्रचवावतिष्ठते प्रजापतीनांपतिरेषमह्यंपरंप्रमाणंभगवाननंतः २० मैत्रेयउ॰
सउग्रधन्वन्नियदेवाबभाषेआसीच्चतूष्णीमरविंदनाभं धियोपगृह्णन्स्मितशोभितेनचेतोलुलुभेदेवहूत्याः २१ सोनुज्ञा
त्वाव्यवसितंमहिष्यादुहितुःस्फुटं तस्मैगुणगणाढ्यायददौतुल्यांप्रहर्षितः २२ शतरूपामहाराज्ञीपारिबर्हान्महाधनान् दंपत्योः
पर्यदात्प्रीत्याभूषावासःपरिच्छदान् २३ प्रत्तांदुहितरंसम्राट्सदृक्षायगतव्यथः उपगृह्यचबाहुभ्यामौत्कंठ्योन्मथिताशयः २४

मुखेन२

तः अभवदुदपद्यतयतइतिहेतौपंचमी हेतुत्वस्यनिमित्तोपादानसाधारणत्वान्नपृथक्यतोमित्रैमुतादुपादानभूतोचेत्यर्थः यत्रय-
स्मिन्कारणेभूतेभगवतिसंस्थास्यतेसंहारंयास्यति यत्रयस्मिन्नंतःप्रविश्यप्रशासनेनधारकेभगवतिअवतिष्ठतेप्रशासितत्वेनधा
तेर र्यत्वेनचावतिष्ठते सएषःप्रजापतीनांब्रह्मादीनामपिपतिरनंतःसत्यंज्ञानमनंतमित्युक्तलक्षणोभगवान्परंकेवलंप्रमाणंअस्म
दुक्तभाषाबंधेप्रमाणमित्यर्थः तथैवभगवताभिहितंसमाहितंतेहृदयामित्यारभ्येतिभावः २० औत्कंठ्येनपुत्रीप्रेमातिशये
नउन्मथितःक्षोभितःआशयोंतःकरणंयस्यसः २४ श्रीमतेरामानुजायनमः ॥ ॥श्रीः॥ ॥ ॥ ॥

यतेर तैर२
रामः

हे नरदेव ते तवास्याः पुत्र्याः यः समाम्नायविधौ वेदरूपचोदनायां प्रतीतः प्रख्यातः [illegible] स कामः विवाहः भूयात् एवं तद्विज्ञापितं मनुमन्यनाहं त्वत्प्रा साह नेन प्रतिगृहीष्यामि पित्तस्याः सौन्दर्यविराः शीलादीन् श्रुत्वा स्वयमेव कृतनिश्चयः भगवन्नादित्सुश्च प्रतीक्ष इति वदन् तावल्लपति कइत्यादिना ते सार्वभौम स्पत्तवत नयां को नाम नाद्रियेत कथंभूतां स्वयैव आभरणादिभिर्विना कांत्या सौन्दर्येण श्रियं भूषणादिकृतशोभां क्षिपतीमिव स्थितां भूषणान्यग्नीमित्यर्थः १६ किंच हर्म्यपृष्ठे प्रासादोपरि क्वणन्तौ नूपुराभ्यां शब्दं कुर्वतोरंघ्रोः पादयोः शोभायस्यास्तां विक्रीडतीं कंदुके विह्वले चले अक्षिणी यस्यास्तां यां तत्कन्यां विलोक्य संमोहेन विमूढं व्याकुलं चित्तं यस्य सः विश्वावसुर्नामकश्चित्गंधर्वः स्वाद्विमा[illegible] अपतत्तां को नानुमन्येतेत्युत्तरेणान्वयः ५७ पुनः कथंभूतां प्रार्थ-

कामः स भूयान्नरदेव तेऽस्याः पुत्र्याः समाम्नायविधौ प्रतीतः क एव ते तनयां नाद्रियेत स्वयैव कांत्या क्षिपतीमिव श्रियं १६ यां हर्म्यपृष्ठे क्वणदंघ्रिशोभां विक्रीडतीं कंदुकविह्वलाक्षीं विश्वावसुर्न्यपतत्स्वाद्विमानाद्विलोक्य संमोहविमूढचेताः ५७ तां प्रार्थयंतीं ललनाललाममसेवितश्रीचरणैरदृष्टां वत्सां मनोरुच्चपदः स्वसारं को नानुमन्येत बुधोऽभियातां १८ अतो भजिष्ये समयेन साध्वीं यावत्तेजो बिभृयादात्मनो मे अतो धर्मान्पारमहंस्यमुख्यान् शुक्लप्रोक्तान्बहु मन्येऽविहिंस्रान् १९

यंतीं पतिमिति शेषः ललनानां ललामं योषितां श्रेष्ठं भूषणभूतां श्रेष्ठामित्यर्थः असेवितावनुपासितौ श्रियो लक्ष्म्याश्चरणौ येस्तैरदृष्टां दृष्टुमशक्यां मनोस्तव वत्सां पुत्रीं उत्तानपदः तव पुत्रस्य भगिनीं स्वयमेव प्राप्तां बुधः कुशलः को नाम नानुमन्येत नानु[illegible]नां गीकुर्यात् १८ अतः अहं हे तु भगवन् मम तेजः वीर्यं यावद्विभृयात्तावत्समयेन कालेन साध्वीमिमां भजिष्ये स्वीकरिष्ये अपत्यजननावधिः स्वीकरिष्यामि इत्यर्थः अतः अनंतरं पारमहंस्यं परमहंसाश्रमे मुख्यान् प्राधान्येनोपदेयान् शुक्लेन भगवता प्रोक्तान् विहिंस्रान् हिंसारहितान् सात्त्विकान् धर्मान् [illegible] विवेकविमोक्षादीन् बहु मन्ये अनुष्ठास्यामि अपत्योत्पत्त्यनंतरं निवृत्तिधर्मनिष्ठो भविष्यामीति भावः १९ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

भा० स्क० टी०
२०५

विभुर्मनुर्यां बर्हिष्मतीं नाम पुरीं निर्विश्य पूर्वं समावसत् तस्यां पुर्यां आध्यात्मिकाधिभौतिकाधिदैविकरूपतापत्रयरहितं भवनं स्वगृहं प्रविष्टः सभार्यः सपुत्रश्च अन्याविरोधतः वर्णाश्रमप्रयुक्तभगवदाराधनरूपधर्माविरोधेन कामान् बुभुजे ऽनुबभूव ३३ एतदेवप्रपंचयति संगीयमानेत्यादिषड्भिः अनुबद्धेन प्रेमानुबद्धेन हृदा हरेः कथाः शृण्वन् कामान् बुभुजे इति पूर्वेणान्वयः ३३ मुनिं स्वाभाग्यवसशीलेन परं भगवद्गुणानुचिंतनपरं स्वायंभुवं मनुं भोगाः कामभोगाः योगमायासु भगवदाश्रयशक्तिकार्येषु कामेषु निष्णातमासक्तं यथा आभ्रंशयितुं भ्रंशयितुं च्युतं पातयितुं च यस्मात् न शेकुः न समर्था अतस्तस्य यामाः अयातयामा आसन् स्वान्तरेणान्वयः ३४ विष्णोः कथाः शृण्वतः ब्रुवतः कथयतः कुर्वतः भगवदाराधनमिति शेषः ध्यायतः विष्णुमिति शेषः तस्य मनोः स्वान्तरं मन्वन्तरात्मका

बर्हिष्मती नाम पुरी यां निर्विश्य समावसत् तस्यां प्रविष्टो भवनं तापत्रयविनाशनं सभार्यः सप्रजः कामान् बुभुजेऽन्याविरोधतः ३२ संगीयमानसत्कीर्तिः सस्त्रीभिः सुरगायकैः प्रत्यूषेष्वनुबद्धेन हृदा शृण्वन् हरेः कथाः ३३ निष्णातं योगमायासु मुनिं स्वायंभुवं मनुं यदाभ्रंशयितुं भोगा न शेकुर्भगवत्परं ३४ अयातयामास्तस्यासन् यामाः स्वान्तरयापनाः शृण्वतो ध्यायतो विष्णोः कुर्वतो ब्रुवतः कथाः ३५ स एवं स्वान्तरं निन्ये युगानामेकसप्ततिं वासुदेवप्रसंगेन परिभूतगतित्रयः ३६ शारीरा मानसा दिव्या वैयासे ये च मानुषाः भौतिकाश्च कथं क्लेशा बाधंते हरिसंश्रयं ३७

तं यापयंती नियंत्रे यामाः कालावयवाः प्रहराः अयातयामाः सफला आसन् यामाद्यतने नैकस्मिन्नपि [illegible] यामे भगवदाराधनाभावरहितं स चित्तं ३५ समनुरेवं भगवत्कथाश्रवणकीर्तनतद्ध्यानतदाराधनादिभिः युगानामेकसप्ततिपरिमाणं स्वान्तरं कालं वासुदेवप्रसंगेन परिभूतगतित्रयं ऊर्ध्वं गच्छंति सत्वस्था मध्ये तिष्ठंति राजसाः जघन्यगुणवृत्तिस्था अधो गच्छंति तामसा इत्युक्तं गतित्रयं येन सः [illegible] च त्वागतयो क्लेशास्तापत्रयं निरस्तं आध्यात्मिकादितापत्रयं इत्यर्थः ३६ एतदेव विशदयति शारीरा इति हे वैयासे [illegible] शारीरा व्याधिरूपा मानसा आधयः एते आध्यात्मिकाः क्लेशाः भौतिकाः शत्रुव्याघ्रचौरसर्पादिभूतप्रभवाः एते आधिभौतिकाः ये च सर्वे मानुषा मनुष्यैस्तु भाव्याः क्लेशाः हरिः संश्रयः आश्रयो यस्य तं कथं बाधेरन् आश्रितक्लेशहरभगवदाश्रयं मनुं न कथंचिदपि बाधेरन्नित्यर्थः ३७

203

राम
२०४

अत एव तस्या दुहितृविरहं विश्लेषमशक्नुवन्सोढुमिति शेषः अत एव मुहुः बाष्पकलाः नेत्राम्बुकणान्मुंचन् हे अंब हे वत्सेति संबो
धयन्नेत्रजलैर्दुहितुः शिखामासिंचत् २५ मुनिवरं कर्दममामंत्र्यानुज्ञापितेनानुज्ञातः सभार्यो रथमारुह्य नृपो मनुः सहानुगः
स्वपुरं प्रति प्रतस्थौ गतवान् २६ गच्छन्मनुर्वर्णयति द्वाभ्यां ऋषिकुल्यायाः ऋषिकुलहितायाः सरस्वत्याः उभयोः सुरोधसोः शो
भनतटयोः उपशान्तानां शमदयादिगुणसंपन्नानामृषीणामाश्रमेषु संपदः भगवदाराधनोपयुक्तं तुलसीपुष्प [illegible] दिसमृद्धीः
पश्यन् प्रतस्थे इति पूर्वेणान्वयः २७ आयांतमागच्छंतं पतिं मनुमभिप्रेत्य ज्ञात्वा प्रजाः प्रहर्षिताः ब्रह्मावर्तादेशाद्गीतसंस्तुति
मृदंगादिवाद्य [illegible] भिः प्रत्युज्जग्मुः ब्रह्मावर्तानिति द्वितीयान्तपाठे ब्रह्मावर्तान्प्रत्यायान्तमित्यन्वयः प्रजापतिमिति समस्तपा
ठे प्रजानां पतिं मनुं ब्रह्मावर्तस्य लोकाः प्रत्युदीयुरित्यन्वयः २८ कासौ पुरी यां प्रतस्थे इत्युक्तमपेक्षयाह बर्हिष्मती नाम पुरी के

अशक्नुवंस्तद्विरहं मुंचन्बाष्पकलां मुहुः आसिंचदंब वत्सेति नेत्रोदैर्दुहितुः शिखाः २५ आमंत्र्य तं मुनिवरमनुज्ञातः स
हानुगः प्रतस्थे रथमारुह्य सभार्यः स्वपुरं नृपः २६ उभयोरृषिकुल्यायाः सरस्वत्याः सुरोधसोः ऋषीणामुपशान्ता
नां पश्यन्नाश्रमसंपदः २७ तमायांतमभिप्रेत्य ब्रह्मावर्तात्प्रजाः पतिं गीतसंस्तुतिवादित्रैः प्रत्युदीयुः प्रहर्षिताः २८ ब
र्हिष्मती नाम पुरी सर्वसंपत्समन्विता न्यपतन्यत्र रोमाणि यज्ञस्यांगं विधुन्वतः २९ कुशाः काशास्त एवासन् शश्वद्धरितवर्चसः
ऋषयो यैः पराभाव्य यज्ञघ्नान्यज्ञमीजिरे ३० कुशकाशमयं बर्हिरास्तीर्य भगवान्मनुः अयजद्यज्ञपुरुषं लब्धा स्थानं यतो भुवं ३१

सी४

यं भूता सर्वाभिः संपद्भिरैश्वर्यैः युक्ता सापि कुत इत्यत आह यज्ञस्यादिवराहस्यांगं शरीरं विधुन्वतः कंपयतः सतः रोमाणि तनूरुहाणि

अ२

यत्रापतन् तत्र सेत्यर्थः २९ पतितानि रोमाणि किमासन्नित्यत आह त एव पतितानि रोमाणि शश्वत्सदा हरितद्युतयः कुशाः काशाश्चास
न्नुत्पन्नाः कस्तेषामुपयोग इत्यत आह यैः कुशैः काशैश्च यज्ञघ्नान्यज्ञविरोधिनो राक्षसान् पराभाव्य यज्ञमीजिरे कृतवन्तः पाकं
पचतीतिवन्निर्देशः यज्ञं यज्ञेन भगवन्तमीजिरे पूजितवन्तः भगवदाराधनयज्ञेषूपयुक्ता इत्यर्थः ३० अत एव भगवान् मनुः कुशकाशरूपं बर्हि
रास्तीर्य यतो भगवतो वराहाद्भुवः स्थानं प्रतिष्ठां लब्धवान् तमेव यज्ञपुरुषमयजत् यज्ञैराराधितवान् अनेनेदमेव बर्हिष्मतीप्रत्यासत्ति
ह्मस्तिनामित्यत्कुशकाशरूपबर्हिषां पुण्यत्वमित्युक्तं भवति ३१ ॥ ॥ ॥ ॥ ॥ ॥

उक्तिमेवाह त्रिभिः हे मानिनि परमया शुश्रूषया परया भक्त्या च मयि संमानमेतत्कुर्वत्यास्ते तुष्टस्त्वमघाधुनाहं तुष्टः प्रीतोस्मि देहिनामतीवस्फूर्तिप्रियतमो देहः स्वदेहः समुच्चितः क्लायो विपि देहः मदर्थे क्षपितुं कर्शितुं नापेक्षितः उपेक्षितः उच्चितमपि देहमनादृत्य समेदर्थेऽस्मि
पितवत्यसि दृ स्वदेहः समुच्चितः क्लाघ्योपि देहः समेदर्थे क्षपितुं कर्शितुं नापेक्षितः उपेक्षितस्त्वधर्मानिरतस्य स्वधर्मो श्रमधर्मेषु निरतस्य मे मया तपः कर्मयोगः समाधिध्यानैकाग्र्यविद्या भगवदुपासना आत्मयोगः प्रकृतिविविक्तात्मयाथात्म्यज्ञानयोगः एते
विजिताः लब्धा भगवत्प्रसादहेतुकाः प्रसादादिति पाठांतरं तदात् पश्यादिभिर्हेतुभिर्ये भगवत्प्रसादस्तस्माद्धेतोः निर्जितायेभोगप्रभा
वोपकरणभोगस्थानादयस्तानेवनविधत्ते भयनं संतीतिभयं यावद्भोगाभिलाषयेषु तान् अतएवाशोकानशोचानित्यर्थः मद
नुसेवनया मत्सेवया ऽवरूद्धान्त्वया शुशीकृतान्प्रपश्येन नवद्दिव्यां दृष्टिं वितरामि ददामि [illegible] ननु सर्वेपि भोगादीन्नादृत्य तपः आ
दिभिरर्जितान्विलक्षणान्वितरामीतिकिमुच्यते इत्याशंक्य [illegible] भयानशोकानितिस्तवेत इतरभोगणां तु तुच्छत्वं वदंस्त्वसंपादित
कर्दम उ॰ तुष्टोहमद्य तव मानविमानदायाः शुश्रूषया परमया परया च भक्त्या यो देहिनामयमतीव सुहृत्स्वदेहो नापेक्षितः
समुच्चितः क्षपितुं मदर्थे ६ ये मे स्वधर्मनिरतस्य तपः समाधिविद्यात्मयोगविजिता भगवत्प्रसादाः तानेव ते मदनुसेवनया व
रुद्धान्दृष्टिं प्रपश्य वितराम्यभयानशोकान् ७ अन्ये पुनर्भगवतो भ्रुव उद्विजृम्भविभ्रंशितार्थरचनाः किमुरुक्रमस्य सिद्धासि
भुंक्ष्व निजधर्मदोहान्दिव्यान्नरैर्दुरधिगान्नृपविक्रियाभिः ८ मैत्रेय उ॰ एवं ब्रुवाणमबलाखिलयोगमायाविद्याविचक्ष
णमवेक्ष्य गताधिरासीत् सप्रश्रयप्रणयविह्वलया गिरेषद्व्रीडावलोकविलसद्धसिताननाह ९ नामेवसर्वेत्विमलमाह अन्ये इतिउरुक्र
मस्य भगवतः पाभ्रुवस्तस्या उद्विजृंभं विक्षेपः तेनविभ्रंशिताः अर्थरचनाः प्रयोजनाभिलाषापेषु ते अन्ये पुनः किंतैः किमतितुच्छास्तद्व
र्थः अतोयतस्त्वं सिद्धासि पतिपारायणादिधर्मैर्मदनुग्रहविषयासि ततस्त्वं नरैर्दुरधिगम्यानदः प्राप्तान्निजधर्मैः पतिपारायणादिभि
र्दुग्धांस्तेषु एतन्नेतिपावत् तान्विभवाञ्भोगविस्तारान्नृपविक्रियाभिर्नृपाणां सार्वभौमानां येविक्रियाभोगाभिलाषस्तास्ताभिर्भोग्या
न्विसंपद्भिरिति शेषः भुंक्ष्वानुभव ८ नत्वेवमुक्ता देवहूतिस्तमुवाचेत्याह मैत्रेयः एवं केन एवमितिविद्वाणं भाषंतं अखिलायायोगमायाविचि
त्रसर्गकारिस्त्वसंबंधिसामर्थ्यापरपर्यायाः शक्तयः तासां विद्यास्वकार्यजननप्रवर्तनानुगुणं ज्ञानं तस्मिन्विचक्षणं निपुणं पतिमवे
लादेवहूतिर्गताधिर्गतमनोव्यथा आसीत् ततः सप्रश्रयः विनयः प्रणयः प्रेमातान्भ्यां विह्वला गद्गदा तया गिरा वाचा ईषद्व्रीडासहितो

हरिसंश्रयामि सनेन स्वचितं तस्य ज्ञानातिशयमाह यइति सर्वभूतहितः यो मनुर्मुनिभिः पृष्टः नृणां तत्रापि वर्णाश्रमाणां चात एव ना
नाविधान्शुभान् स्वर्गापवर्गसाधनभूतान् धर्मान् प्राह ३८ एवं वर्णितं मनुचरितं निगमयंस्तदपत्यं च रित्रमवतारयति एतदिति व
र्णनीयस्य कर्णनीय [illegible] कीर्तेरादिराजस्य मनोरद्भुतं विस्मयनीयमेतच्चरित्रं ते तुभ्यं वर्णितं मयेति शेषः अथ तस्य मनोरपत्ये देवहू
तिस्तस्या उदयं प्रभवं उत्कर्षं वा शृणु मत्त इति शेषः ३९ इति तृतीये द्वाविंशः २२ तदपत्योदयं शृण्विति प्रतिज्ञातमेव वर्णयितुमा
रभते मैत्रेयः पितृभ्यां मनुशतरूपाभ्यां प्रस्थिते गमनं कृते सति साध्वी इंगितकोविदा पत्युरभिप्रायज्ञा देवहूतिः प्रभुं भवं रुद्रं भवानीव
पतिं कर्दमं प्रीत्या पर्यचरदाराधितवती १ एतदेव प्रपंचयति द्वाभ्यां विस्रंभेण विश्वासेनात्मशौचेनांतःकरणस्य शौचेन शमेन स्थैः

यः पृष्टो मुनिभिः प्राह धर्मान्नानाविधान्शुभान् नृणां वर्णाश्रमाणां च सर्वभूतहितः सदा ३८ एतत्त आदिराजस्य मनोश्चरित
मद्भुतं वर्णितं वर्णनीयस्य तदपत्योदयं शृणु ३९ इति श्रीभ. म. तृतीयस्कंधे द्वाविंशोध्यायः २२ मैत्रेय उ. । पितृभ्यां प्रस्थि
ते साध्वी पतिमिंगितकोविदा नित्यं पर्यचरत्प्रीत्या भवानीव भवं प्रभुं १ विस्रंभेणात्मशौचेन गौरवेण दमेन च शुश्रूष
या सौहृदेन वाचा मधुरया च भो २ विसृज्य कामं दंभं च द्वेषं लोभमघं मदं अप्रमत्तोद्यता नित्यं तेजीयांसमतोषयत् ३ स वै देव
र्षिवर्यस्तां मानवीं समनुव्रतां दैवाद्गरीयसः पत्युराशासानां महाशिषः ४ कालेन भूयसा क्षामां कर्शितां व्रतचर्यया प्रेमगद्गदया
वाचा पीडितः कृपयाब्रवीत् ५

गौरवेण सर्वातिशयबुद्ध्या दमेन [illegible] बाह्येंद्रियनिग्रहेण शुश्रूषया हितानां हितयोः प्राप्तुमिच्छया
सौहृदेन सौहार्देन मधुरया वाचा च पतिमतोषयदिति सुत्रयेणान्वयः २ कामादीन् विसृज्य तत्र दंभः कापट्यं अघं निषिद्धाचरणं मदो गर्वः
अप्रमत्ता अनवधानरहिता उद्यता तस्मिन्निदेशाचरणे युक्ता तेजीयांसमतिशयतेजःसंपन्नं पतिं कर्दमं मतोषयत् ३ स वै देवर्षिवर्यः क
र्दमः तामनुव्रतां मानवीं मनोः पुत्रीं देवहूतिं प्रेमगद्गदस्वरया वाचा गिरा पीडितः आविनिः सत्त्वाकृपया ब्रवीत् कथंभूतां
मानवीं दैवाद्दैवात् गरीयसः गरीयस्त्वेनानुसंहितात् यद्वा दैवभावनानुसंहितात् अथ तस्मात्पत्युः भर्तुः शिष्टावमेव प्राज्ञिरूपा माशि बहु
रूपा एमाशासानां प्रार्थयंती व्रतचर्यया पातिव्रत्येन कर्शितां तत अपि भूयसा कालेन क्षामामतिकृशांगीं स्वपर्वा ५ ॥ ॥ ॥

भी२

उपर्युपरि विन्यस्तेषु विरचितेषु गृहेषु पृथक् पृथग् विभक्तं कल्पितैः कशिपुभिः शय्याभिः कान्तं कमनीयं तथा पर्यंकादिभि-
र्कान्तं १६ तत्र तत्र भित्त्यादिषु विनिक्षिप्तैर्विरचितैर्नानाविधैः शिल्पैरुपशोभितं महामरकतस्थल्या इन्द्रनीलमणिमयभूम्या
रचिताभिर्विद्रुमवेदिकाभिर्जुष्टं युक्तं स्थल्येति पाठे तया विद्रुमवेदिभिश्च युक्तं १७ द्वास्सु द्वारेषु विद्रुममयदेहल्या उदुम्बरेण भातं शो-
भितं वज्रखचितकपाटयुक्तं इन्द्रनीलमणिमयेषु शिखरेषु सुवर्णमयकलशैरधिष्ठितं चक्षुष्मत् इव ये पद्मरागाग्र्याः वज्रभित्तिषु
खचितास्तैर्युक्तं तथा विचित्रैर्वैतानसमूहैरनर्घ्यैर्हैममयतोरणैश्च जुष्टं १८ कृत्रिमानपि हंसादीन् स्वान् स्वजातीयान् मन्यमानैर्हंसा-

उपर्युपरि विन्यस्तनिलयेषु पृथक् पृथक् क्षिप्तैः कशिपुभिः कान्तं पर्यंकव्यजनासनैः १६ तत्र तत्र विनिक्षिप्तनानाशिल्पोपशोभितं
महामरकतस्थल्या जुष्टं विद्रुमवेदिभिः १७ द्वास्सु विद्रुमदेहल्या भातं वज्रकपाटवत् शिखरेष्विन्द्रनीलेषु हेमकुम्भैरधिश्रितं १८ च-
क्षुष्मत्पद्मरागाग्र्यैर्वज्रभित्तिषु निर्मितैः जुष्टं विचित्रवैतानैर्महार्हैर्हेमतोरणैः १९ हंसपारावतव्रातैस्तत्र तत्र निकूजितं कृत्रिमा-
न्मन्यमानैः स्वानधिरुह्याधिरुह्य च २० विहारस्थानविश्रामसंवेशप्राङ्गणाजिरैः यथोपजोषं रचितैर्विस्मापनमिवात्मनः २१ ई-
दृग्गृहं तत्पश्यन्तीं नातिप्रीतेन चेतसा सर्वभूताशयाभिज्ञः प्रावोचत् कर्दमः स्वयं २२ कर्दम उवाच निमज्ज्यास्मिन् ह्रदे भीरु विमान-
मिदमारुह इदं शुक्लकृतं तीर्थमाशिषां यापकं नृणां २३

नां पारावतानां च समूहैस्तत्र तत्राधिरुह्याधिरुह्य च निकूजितं २० यथो-
पजोषं यथासुखं रचितैः कल्पितैः विहारस्थानादिभिर्युक्तमिति शेषः यद्वा विहारस्थानादिभिरात्मनः स्वस्य मायाविनोऽपि विस्माप-
नमिव विस्मयजनकमिवावस्थितमाविरचीकरदिति पूर्वेणान्वयः तत्र विहारस्थानं क्रीडाप्रदेशः विश्रामः शयनगृहं संवेशः उप-
भोगस्थानं प्राङ्गणं गृहाद्बहिरजिरं प्राकाराद्बहिः २१ ईदृगेवंविधं तद्गृहं विमानं नातिप्रीतेन नातिसंतुष्टेन चेतसा पश्यन्तीं देवहूतिं
स्वयं सर्वभूतानामाशयमभिप्रायं जानातीति सः कर्दमः स्वयं प्रावोचत् २२ हे भीरु इदं तीर्थं शुक्लेन भगवता कृतमानंदाश्रुनि-
पातेन कृतं नृणां माशिषां [illegible] कांक्षितानां यापकमतोऽस्मिन् ह्रदे बिन्दुसरसि निमज्ज्य स्नात्वा इदं विमानं चारुह्याधिरुह २३

त्रिस्पर्थः४

गुक्तिमेवाह द्वाभ्यां राद्धमिति हे द्विजवर अमोघाः सत्यप्रयोजना या योगमायाः एवमुक्तास्तासामधिपे विभौ त्वय्येतत्सर्वं राद्धं सिद्ध
मेवेत्यवैमि जानामि वर्तते हि हे भर्तः तेत्वया यः सकृदंगस्य जननपर्यंतमंगसंगो यस्मिन्समयः कालोऽभिहितः स भूयात् य
स्माद्गरीयसि पत्यौ सतीनां यतो गुणप्रसवः गुणविस्तारो भवति अतः पुत्रोत्पत्त्या गुणविस्तारे जाते सति हरिं प्रपत्स्यामीत्यामी
त्यभिप्रायः ८ तत्रेति अंगसंगार्थमितिकर्तव्यतां च संपादयेत्याह तत्रेति हे ईश तत्रांगसंगे इतिकर्तव्यतां सा
धनकलापं यथोपदेशं कामतंत्रोक्तानुसारेणोपशिक्ष संपादय किं तदिति कृत्यमुपशिक्षस्व तत्राह तेत्वयैव कृतः उ
त्पादितः यो मनोभवः कामस्तेन धर्षितायाः पीडितायाः मम यात्मेति रिरंसया भर्त्रा रंतुमिच्छया कर्शितः अत एव दीनः शुष्कात्मा

देवहूतिरुवाच। राद्धं बत द्विजवृषैतदमोघयोगमायाधिपे त्वयि विभो तदवैमि भर्तः यस्तेऽभ्यधायि समयः सकृदंगसंगो भूयाद्गरी
यसि गुणप्रसवः सतीनां १० तत्रेतिकृत्यमुपशिक्ष यथोपदेशं येनैव मे कर्शितोऽतिरिरंसयात्मा सिद्ध्येत ते कृतमनोभवधर्षि
ताया दीनस्तदीश भवनं सदृशं विचक्ष्व ११ मैत्रेय उवाच प्रियायाः प्रियमन्विच्छन्कर्दमो योगमास्थितः विमानं कामगं क्षत्त
स्तर्ह्येवाविरचीकरत् १२ सर्वकामदुघं दिव्यं सर्वरत्नसमन्वितं सर्वर्द्ध्युपचयोदर्कं मणिस्तंभैरुपस्कृतं १३ दिव्योपकरणोपेतं
सर्वकालसुखावहं पट्टिकाभिः पताकाभिर्विचित्राभिरलंकृतं १४ स्रग्भिर्विचित्रमाल्याभिर्मंजुशिंजत्षडंघ्रिभिः दुकूलक्षौम
कौशेयैर्नानावस्त्रैर्विराजितं १५ देहः येनेतिकृत्येन सिध्येत कामशब्दैन्यादिपरिहारेणास्य स्थानं भोगस्थानं इदं भोगसाधनामप्यु
पलक्षणं ...... विचक्ष्व कल्पय ११ एवमुक्तः कर्दमो भोगसाधनं ससर्जेत्याह मैत्रेयः हे क्षत्तः प्रियायाः भार्यायाः प्रियमन्विच्छन्का
मितिशेषः कर्दमः योगजं योगमायामास्थितः कामेन यथेष्टं गच्छतीति तद्विमानं तर्ह्येव तत्क्षणमेवाविरचीकरत् आविर्भावयामास १२
तदेव विमानं वर्णयति नवभिः सर्वकामदुघं सर्वाभिलषितपूरकं दिव्यममानुषं सर्वर्द्धीनां सर्वसंपदामुपचयस्तस्योदर्कः उत्तरोत्तराभि
वृद्धिर्यस्मिन्मणिमयैः स्तंभैरुपस्कृतं १३ दिव्योपकरणैः परिकरैरुपेतं युक्तं सर्वस्मिन्कालेऽत एवावहतीति प्रापयतीति तथा पट्टिकाः
सूक्ष्मविस्तराः पट्टवस्त्रविशेषाः पताका विचित्राः ताभिरलंकृतं १४ विचित्राणि माल्यानि मालाः मणिमयानि पुष्पमाल्यास्ताभिः

भा० त० टी० १०७

स्फुरद्वा शोभनया भ्रुवा स्फुरदंतास्यं दरं दंतपंक्त्या भ्रला स्यो मनोहरः स्निग्धोपांगः प्रांतो यस्मिन् पद्मकोशस्पर्धा पद्मकोशस्पर्द्धिनाच
क्षणनिश्रेणा स्फुरद्वा च रूषैतिवज्ञाताविकुवचनं तथा नीलैरलकैश्च सन्मुखं यस्य तत् ३३ एवं भूतमात्मानं दृष्ट्वा यदा रूषीणां रूप
भंजकं दयितं प्रियं पतिं भर्तारं स्मरं स्मरत वती तदा यत्र सः प्रजापतिः कर्दमः अस्ते तत्र स्वयमपि स्त्रीभिः सहास्ते उपविवेशेत्य
र्थः ३४ भर्तुः पुरस्तादजे स्त्री सहस्रैर्वृतमात्मानं निशाम्य दृष्ट्वा तस्य भर्तुर्योगगतिर्योगप्रभावं प्रभावं प्रतिसंशयं प्राप्य घात कीदृशी

३२ यं योगगतिरिति संशयं विस्मयं प्राप्नुवतीत्यर्थः ३५ हे अरिमिर्हन् विदुर स्नाता रिपुदुर्गः स कर्दमः जातभावः सविवाहात्प्रागत्त आत्मनः स्व
स्यारूपं बिभ्रतीमत एव विशेषेण भ्राजमानां संवीतौ स्तनौ यस्याः तां पाठांतरे रूपविशेषेण शोभने वाससी यस्यास्तां ३७ अलुप्तम

दृष्ट्वेति शिषः

स्फुरद्वा स्फुरदताग्रस्या स्निग्धापांगेन चक्षुषा पद्मकोशस्पर्धा नीलैरलकैश्चलसन्मुखं ३३ यदा सस्मार ऋषभमृषीणां दयितं प
तिं तत्रैवास्ते सहस्त्रीभिर्यत्रास्ते स प्रजापतिः ३४ भर्तुः पुरस्तादात्मानं स्त्रीसहस्रावृतं तदा निशम्य तद्योगगतिं संशयं प्रत्यपद्यत

१०६

३५ स्नातां कृतमलस्नानां विभ्राजंतीमपूर्ववत् आत्मनो बिभ्रतीं रूपं संवीतरुचिरस्तनीं ३६ विद्याधरीसहस्रेण सेव्यमानां सुवास

२४ सं जातभावो विमानं तदारोहयदमित्रहन् ३७ तस्मिन्नलुप्तमहिमा प्रियया नुरक्तो विद्याधरीभिरुपचीर्णवपुर्विमाने बभ्राज उत्क
चकुमुदगणवानपीच्यस्ताराभिरावृत इवोडुपतिर्नभस्थः ३८ तेनाष्टलोकपविहारकुलाचलेंद्रद्रोणीष्वनंगसखमारुतसौभगासु सि
द्धैर्नुतो द्युधुनिपातशिवस्वनासु रेमे चिरं धनदवल्ललनावरूथी ३९ वैस्रंभके सुरसने नंदने पुष्पभद्रके मानसे चैत्ररथ्ये च स

रेमे रामया रतः ४० हिमालुप्तप्रभावः प्रियया भार्ययानुषक्तः अनुसंगतः विद्याधरीभिरुपचीर्णं सुश्रूषितं वपुर्यस्य सः स निः कर्दमः
तस्मिन्विमाने बभ्राज रराज तत्र दृष्टांतः उत्कचकुमुदगणवान् विकसत्कुमुदगणवान् पीच्यो दर्शनीयः ताराभिरावृतो नभस्थः उडु
पतिः पूर्णचंद्र इवेति पूर्णचंद्र इव मूर्तिः नभ इव विमानं तारा इव स्त्रियः कुमुदानीव तासां नेत्राणीति ज्ञेयं ३८ तेन विमानेनाष्टलोक
पालानां विहारा यस्मिन् सः कुलाचलेंद्रो मेरुः तस्य द्रोणीषु दरीषु कथंभूतासु अनंगस्य सखा मारुतः शीतः सुगंधः मंदोनिलः तेन
सौभगं सौंदर्यं यासु धुधुनी गंगा तस्याः पातेन शिवः स्वनो यासु तासु ललनावरूथी स्त्रीरत्नसमूहवान् धनद इव कुबेर इव
वरेमे ३९ वैस्रंभकादिषु देवोद्यानेषु मानसे सरसि सरतः प्रीतः सन् रामया स्त्रिया सह रेमे रमितवान् ४०॥ ॥ ॥ ॥ ॥

राम

१०६

ग

साकुवलयेक्षणा देवहूतिः भर्तुः कर्दमस्य वचः समादाय गृहीत्वा सरजं मलिनं वासः बिभ्रती वेणीभूतान् मूर्द्धजान् केशान् २४ मलपंकेन संछन्नमतएव विवर्णौ स्तनौ यस्मिंस्तत् दौर्बल्यशरीरं च बिभ्रती सती शिवानां निर्मलानां जलानामाशयं आश्रयं सरस्वत्याः परिश्रितमिति शेषः स्रवंतं पादेतेन मध्यास्थमित्यर्थः सा बिंदुसरः आविवेश प्रविष्टवती २५ सा अंतः सरसि निमग्नासती तत्र वेश्मस्थाः मंदिरस्थाः दश शतानि कन्यकाः ददर्श कथंभूताः सर्वाः किशोरवयसः उत्पलस्येव देहगंधो यासां ताः २६ तां देवहूतिं दृष्ट्वा दशशतानि स्त्रियः सहसा आप्लु सायजलस्थं वेश्मनो गृहाद्विनिर्गत्य प्रांजलयः वयं तु भवत्कर्मकरीः अस्मान् शाधि अनुशाधि यत्किंदास्यं करवामेति प्रोचुः २७ महार्हेण स्नेहतैलेन स्नानेन स्नानयोग्येन स्नगंधेन तैलादिना तां मनस्विनीं देवहूतिं स्नापयित्वा मानदाः स्त्रियः अस्यै देवहूत्यै एव निर्मले नूत्ने नवीने दुकूले द

सैत्यथ उ० सा तद्भर्तुः समादाय वचः कुवलयेक्षणा सरजं बिभ्रती वासो वेणीभूतांश्च मूर्द्धजान् २४ अंगं च मलपंकेन संछन्नं शबलस्तनं आविवेश सरस्वत्याः सरः शिवजलाशयं २५ सांतः सरसि वेश्मस्थाः शतानि दश कन्यकाः सर्वाः किशोरवयसो ददर्शोत्पलगंधयः २६ तां दृष्ट्वा सहसोत्थाय प्रोचुः प्रांजलयः स्त्रियः वयं कर्मकरीस्तुभ्यं शाधि नः करवाम किं २७ स्नानेन तां महार्हेण स्नापयित्वा मनस्विनीं दुकूले निर्मले नूत्ने ददुरस्यै च मानदाः २८ भूषणानि परार्ध्यानि वरीयांसि द्युमंति च अन्नं सर्वगुणोपेतं पानं चैवामृतासवं २९ अथादर्शे स्वमात्मानं स्रग्विणं विरजांबरं विरजं कृतस्वस्त्ययनं कन्याभिर्बहुमानितं ३० स्नातं कृतशिरःस्नानं सर्वाभरणभूषितं निष्कग्रीवं वलयिनं कूजत्कांचननूपुरं ३१ श्रोण्योरध्यस्तया कांच्या कांचन्या बहुरत्नया हारेण च महार्हेण रुचकेन च भूषितं ३२ ॥

दुःस्नानवत्य २८ तथा परार्ध्यानि श्रेष्ठतमानि द्युमंति दीप्तिमंति वरीयांसि तत्र स्त्रियः भूषणानि सर्वगुणोपेतं बहुरसोपेतं स्वादु असवं मादकं पानं पेयं चास्यै ददुः २९ असौ देवहूतिः स्वमात्मानं देहमादर्शे दर्पणे ददर्श इति शेषः कथंभूतं स्रग्विणं स्रजं बिभ्रतं विरजं निर्मलं अंबरं वासो यस्य तं विरजं मलहीनं कृतस्वस्त्ययनं मंगलं यस्य कन्याभिः संमानितं ३० स्नातं उद्वर्तनेन क्षालितं कृतं शिरःस्नानं अभ्यंगो येन तं सर्वैराभरणैर्भूषितमलंकृतं एतद्द्रम्मपंचयति निष्कं पदकं ग्रीवायां यस्य तं कूजता कांचनमयेन नूपुरेण युक्तं ३१ श्रोण्योर्नितंबयोरधस्तात् धृतया कांचनमय्या बहूनि रत्नानि यस्यां तया कांच्या मेखलया महार्हेण हारेण रुचकेन मंगलद्रव्येण चंदनकुंकुमादिना तद्बहुमूल्यं शोभकाग्रे रुचकं मंगलद्रव्यं ग्रीवाभरणं तेन भूषितं ३२ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

ति२

भा॰ त॰ टी॰ १०९

तदापत्योत्पत्त्यनंतरं प्रव्रजिष्यंतं पतिं तामालक्ष्य वित्तकर्षकमनीयाऽऽसा सती देवहूतिः बहिः स्मयमाना ईषद्धसमाना अंतस्तु विक्लवेन व्याकुलितेन चेतसा विदूयता परितप्यमानेन हृदा मनसा ४९ अधोमुखी नेत्राभ्यां वमलं यः तेषां श्रीः शोभा यस्मिंस्तेन पदा चरणेन भुवं लिखंती अनेन दुरंतां चिंतां सूच्यते अश्रुकलान् शनैः निरुध्य लग्नां तां मंदीवा वंजवाच ५० हे भगवन्नहं यद्यस्ति निष्कृतं तत्सर्वं उपावहः सपादितवान् तथापि प्रपन्नायामे अभयं दातुमर्हसि अभयप्रदानं करोषि ... चेत्कथं यामीति भावः ५१ उक्तं किंचिद्वक्तं आह हे ब्रह्मन् दुहितृभिः समाः वयःशीलादिभिः तुल्याः तासां भर्तारः तुभ्यं त्वया विभाक्ष्ये वास्य पश्चार्धः विमृग्या अन्वेषणीयाः त्वयि वनं प्रव्रजिते सति गते सति मम विशोका पविगतः शोको यस्मात् स विशोकः ब्रह्मज्ञानं तस्मान्ने शोकमात्म विहितिति कृतः तेन तपद् शीलस्य तेन तस्मैकश्चित्पुत्रः स्यात् किं मिस्पर्थः कश्चिदिति पाठे तरं तदा किं स्यात्पुत्र इति शेषः ५२ एवं स्वामि प्रेत निवेद्याप संसारात्स्व निर्वे

207

पतिं सा प्रव्रजिष्यंतं तदालक्ष्योशती सती स्मयमाना विक्लवेन हृदयेन विदूयता ४९ लिखंत्यधोमुखी भूमिं पदा नखमणिश्रिया उवाच ललितां वाचं निरुध्याश्रुकलां शनैः ५० देवहूतिरुवाच सर्वं तद्भगवान्मह्यमुपोवाह प्रतिश्रुतं अथापि मे प्रपन्नाया अभयं दातुमर्हसि ५१ ब्रह्मन्दुहितृभिस्तुभ्यं विमृग्याः पतयः समाः कश्चित्स्यान्मे विशोकाय त्वयि प्रव्रजिते वनं ५२ एतावतालं कालेन व्यतिक्रांतेन मे प्रभो इंद्रियार्थप्रसंगेन परित्यक्तपरात्मनः ५३ इंद्रियार्थेषु सज्जंत्या प्रसंगस्त्वयि मे कृतः अजानंत्या परं भावं तथाप्यस्त्वभयाय मे ५४ संगो यः संसृतेर्हेतुरसत्सु विहितोऽधिया स एव साधुषु कृतो निःसंगत्वाय कल्पते ५५ ॥ ॥

३

द... मावेदयंत्या हयावद्धा यं हे विभो इंद्रियार्थेषु शब्दादिविषयेषु प्रकृष्टासंगेन परित्यक्तः अतुपास्थितः परात्मा ... य यात् स्या मे मम व्यतीतेनातिक्रांतेन एतावता शतवर्षपरिमितेन कालेनालं ५३ स्वकृतमनुशोचंती इंद्रियार्थेषु सज्जंत्या आसक्तया मे मया ... त्वयि प्रसंगः प्रकृष्टासंगः कृतः तथापि परं भावं उत्कृष्टं भावमजानंत्या अपि मे मम अभयाय स्यात् ५४ त्वयि कृतः प्रसंगः अनर्थाय माभूदित्याह संग इति अधिया ज्ञानेनासत्सु विहितः कृतो यः संगः संसृतेर्हेतुः स एवाधिया कृतोपि संगः साधुषु भगवद्भक्तेषु कृतः सन्निःसंगत्वाय विरागत्वायैव कल्पते ऽवकल्पितः अतस्तो वैराग्यमेव जनयतीत्यर्थः धियेति वा छेदः तदा बुद्धिपूर्वकोप्यसत्सु विहितः संगः संसृतेर्हेतुः किमुताधिया साधुषु तूभयविधोपि संगः निःसंगत्वायैव भवतीत्यर्थः ५५॥ ॥ ॥ ॥

राम १०८

भ्राजिष्णुना प्रकाशमानेन महीयसा श्रेष्ठेन कामगेन विमानेनानिल इव सर्वत्राप्रतिहतगत्या चरन् वैमानिकान् लोकान् अत्यशेता
तिक्रम्य स्थितः ४१ कीदृशोयं मुनेः प्रभाव इति न विस्मयनीयमित्याह किमिति यैः पुंभिस्तीर्थपदः भगवतः व्यसनात्ययः तापत्र
यनाशनश्चरणः पादः आश्रितः तेषामुद्दामचेतसां योगपरिपुष्टमनसां पुंसां किं दुरापादनं दुःप्राप्यं किमस्ति सर्वथा ४२ स्व नकिमपीरु
संस्थया द्वीपवर्षादिसंस्थानेन यावान् भूगोलस्तं ... बह्वाश्चर्यमतिविस्मयनीयं भूतो गोलं तस्यै भार्यायै दर्शयित्वा महायोगी कर्दमः ये४
त५ पुनः स्वाश्रमाय न्यवर्त्तत स्वाश्रमं प्रत्यागतवान् ४३ नवधात्मानं विभज्य नवधा पत्नीमुत्पादयितुमिच्छामीति मनसा स्वीयं विभज्य तत्सुर
सुरते उत्सुकां उत्साहवतीं मनोः पुत्रीं रामां स्त्रियं च विशेषेण रमयन् वर्षपूगा ... न्वर्षगणान् मुहूर्त्तवद्रेमे ४४ तस्मिन् विमाने उ

भ्राजिष्णुना विमानेन कामगेन महीयसा वैमानिकानत्यशेत चरल्लोकान्यथानिलः ४१ किं दुरापादनं तेषां पुंसामुद्दामचेत
सां यैराश्रितस्तीर्थपदश्चरणो व्यसनात्ययः ४२ प्रेक्षयित्वा भुवो गोलं पत्न्यै यावान्स्वसंस्थया बह्वाश्चर्यं महायोगी स्वाश्रमाय
न्यवर्त्तत ४३ विभज्य नवधात्मानं मानवीं सुरतोत्सुकां रामां निरमयन् रेमे वर्षपूगान्मुहूर्त्तवत् ४४ तस्मिन्विमाने उत्कृष्टां श
य्यां रतिकरीं श्रिता न चाबुध्यत तं कालं पत्यापीच्येन संगता ४५ एवं योगानुभावेन दंपत्यो रममाणयोः शतं व्यतीयुः शरदः कामला
लसयोर्मनाक् ४६ तस्यामाधत्त रेतः तां भावयन्नात्मनात्मवित् नोधा विधाय रूपं स्वं सर्वसंकल्पविद्विभुः ४७ अतः सा सुषुवे
सद्यो देवहूतिः स्त्रियः प्रजाः सर्वास्ताश्चारुसर्वांग्यो लोहितोत्पलगंधयः ४८

त्कृष्टां निरतिशयसुखस्पर्शां रतिकरीं रतिवर्द्धिनीं श
य्यां श्रिता अपीच्येन सुंदरेण पत्या भर्त्रा संगता संयुक्ता सती तमनेकवर्षसमूहात्मकं कालं नाबुध्यत एतावान्कालो गत इति न ज्ञातवती त२
४५ कियान्कालो गत इत्यत आह एवमिति योगानुभावेन योगप्रभावेण कामासक्तयोर्दंपत्योः रममाणयोः सतोः शतं शरदः संवत्सरा म
नागीषत्काल इव व्यतीयुः अतिक्रान्ताः ४६ आत्मवित् जीवपरमात्मयाथात्म्यवित् कर्दमः तां प्रियामात्मनः देहार्द्धरूपेणात्मीयत्वेन आ
त्मना मनसा भावयन् चिंतयन् सर्वसंकल्पवित् सर्वसंकल्पं जानन् विभुस्तत्कर्तुं समर्थः स्वस्वरूपं वीर्यं नवधा विधाय विभ
ज्य तद्रेतः तस्यां पत्न्यामाधत्त निहितवान् ४७ ततः अनंतरं सा देवहूतिः सद्य आशु स्त्रियः स्त्रीः प्रजाः अपत्यानि सुषुवे प्रसूतवती कथं
भूताः प्रजाः ताः सर्वा नव स्त्रियः चारूणि सर्वाण्यंगानि यासां ताः लोहितोत्पलस्य रक्तोत्पलस्येव गंधो यासां ताः ४८॥ ॥ ॥

भा० तृ० टी०
१०९

एवमुक्त्वा देवहूतिस्तथा करोदित्याह मैत्रेय देवहूतिरपि प्रजापतेः कर्दमस्य संदेशं निदेशं गौरवेण सम्यक् श्रद्धाय विश्वस्य कूटस्थं निर्विकारं गुरुं सम्यग्ज्ञाननिवर्त्तकं पुरुषं परमपुरुषमभजत् ५ बहुतिथे बहुतरे काले गते सति भगवान्मधुसूदनः तस्यां देवहूत्यां कार्दमं कर्दमसंबन्धि वीर्यमापन्नः प्राप्तः दारुण्यग्निरिव जज्ञे कर्दमवीर्यसंश्लिष्टजीवविशेषमाविश्य अवततारेत्यर्थः अयमावेशावतारो जामदग्न्यवत् आवेशावतारो नाम जीवान्तरात्मतयावस्थितस्यैव भगवतः जीवद्वारा ज्ञानशक्त्यादिगुणविशेषाभिव्यक्तमाविर्भावः तावत्तैवतस्मिन्नु जीवे स्वस्यान्येषां च स्फुरत्त्वाभिमानः ६ तदावतरणसमये व्योम्नि वादित्राणि शंखमृदंगदुन्दुभ्यादीन्यवादयन्ध्वनयन् देवा इति शेषः घनाघना इत्येके पदवृषन्तो मेघाः अभूवन्नित्यर्थः सगन्धर्वाः किंनरादयः गायन्ति स्म गीतं वदन्तः अप्सरसः मुदा हर्षेण नृत्यन्ति स्म ७ खेचरैर्दिविजैरपवर्जिता मुक्ताः सुमनसः पुष्पाणि पेतुः पतितवन्तः सर्वा दिशः अम्भांसि जलानि मनांसि सर्वेषां चित्तानि च प्रसेदुः

मैत्रेय उ० देवहूत्यपि संदेशं गौरवेण प्रजापतेः सम्यक् श्रद्धाय पुरुषं कूटस्थमभजद्गुरुं ५ तस्यां बहुतिथे काले भगवान्मधुसूदनः कार्दमं वीर्यमापन्नो जज्ञेग्निरिव दारुणि ६ अवादयंस्तदा व्योम्नि वादित्राणि घनाघनाः गायन्ति स्म स गन्धर्वा नृत्यन्त्यप्सरसो मुदा ७ पेतुः सुमनसो दिव्याः खेचरैरपवर्जिताः प्रसेदुश्च दिशः सर्वा अम्भांसि च मनांसि च ८ तत्कर्दमाश्रमपदं सरस्वत्या परिश्रितं स्वयंभूः साकमृषिभिर्मरीच्यादिभिरभ्ययात् ९ भगवन्तं परं ब्रह्म सत्त्वेनांशेन शत्रुहन् तत्त्वसंख्यानविज्ञप्त्यै जातं विद्वानजः स्वराट् १० सभाजयन् विशुद्धेन चेतसा तच्चिकीर्षितं प्रहृष्यमाणैरसुभिः कर्दमं चेदमभ्यधात् ११ प्रसन्नान्यभूवन् ८ सरस्वत्या परिवेष्टितं तत्कर्दमाश्रमस्थानं प्रति स्वयंभूश्चतुर्मुखो मरीच्यादिभिः ऋषिभिः सोभ्यागच्छत् ९ हे शत्रुहन् विदुर अंशेन स्वाएक सिद्धविशेषरूपेण सत्त्वेन निरस्तसंकुचितज्ञानगुणेन परब्रह्मैव तत्त्वानां प्रकृतिपुरुषेश्वराणां संख्यानं याथात्म्यकथनं तेन विज्ञप्त्यै ज्ञापनाय प्रकृत्यादियाथात्म्यकथनेन तद्याथात्म्यं लोकं प्रति ख्यापयितुमित्यर्थः जातं भवन्तं भगवन्तं विद्वान् जानन् दृष्ट्वा स्वराडजो ब्रह्मा भगवदावेशावतारत्वाद्भगवद्दृष्ट्या प्रणम्य स्वयं हृत्तमकर्मवशत्वप्रयुक्तं १० तस्यावतीर्णस्य भगवतः चिकीर्षितं विशुद्धेन मनसा सभाजयन् संमानयन्नभिनंदयन्निति यावत् अत एव प्रहृष्यमाणैरसुभिरिन्द्रियैरानंदाश्रुपुलकरोमाविगद्गदस्वरादियुक्तेन वत्सलवागादीन्द्रियैरुपलक्षितः कर्दमं वक्ष्यमाणं देवहूतिं च प्रतीदं वक्ष्यमाणमभ्यधादभ्यभाषत ११

२०८

कृम्भ्याद८१

राम
१०९

५२

इह लोके यत्कर्म यस्य पुंसः स्वभावतः प्रवृत्तमपि कर्म धर्माय न कल्पते निसर्गतः प्रवृत्तमप्याहारचेष्टितनिद्रादिरूपं कर्म युक्ताहारविहार
स्य युक्तचेष्टस्य नित्यश युक्तस्वप्नावबोधस्य योगो भवति दुःखहेत्वङ्गीकारी स्यात् सात्त्विकान्नेव सेवेत शुक्तानुपेया हिताहि शास्त्रानुमत
द्रव्यकालादिविशेषविषयसत्त्वपरिहारेण भगवदाराधनरूपकर्मयोगाख्यधर्मनिर्वृत्तये न भवेदिति स र्थः सच धर्मो विरागाय विरा
गोऽनुयोगाय स्मात्सज्ञानयोगः रसोऽप्यस्य परं दृष्ट्वा निवर्तत इति भगवतैव गीतत्वात् तस्मै न कल्पते चेदित्यर्थः कर्मयोगस्य भक्तियोगाङ्ग
स्य ज्ञानयोगाङ्गत्वमतु पुष्पन्नेत्तथापि कर्मण्येव कर्मयः वृश्येत्कर्मणि च कर्मयद्दृसुत्पत्ती स्यात्कर्मयोगज्ञानयोगयोः परस्परोपकार्यत्व
मप्यस्तीति बोध्यं सच धर्मो विरागद्वारा तीर्थपदस्य भगवतः सेवायै भक्त्यै न कल्पते चेत् सः जीवन्नेव मृत एव मतो हि जीवच्छवः स्वल्विस्यर्थः
५६ स्वात्मानं प्रति निर्विद्यति साऽहं द्वियार्थेष्वेव सक्तास्मि भगवतो मायया देवी ह्येषा गुणमयी मम मेत्युक्तविधया दृढं वञ्चिता मोहिता या

नेह यत्कर्म धर्माय न विरागाय कल्पते न तीर्थपदसेवायै जीवन्नपि मृतो हि सः ५६ साऽहं भगवतो नूनं वञ्चिता मायया दृढं यत्त्वां विमुक्ति
प्रदं प्राप्य न मुमुक्षेय बंधनात् ५७ इति श्रीमद्भा० तृतीयस्कंधे त्रयोविंशोऽध्यायः २३ निर्वेदवादिनीमेवं मनोर्दुहितरं मुनिः दयालुः
शालिनीमाह शुक्लाभिव्याहृतं स्मरन् १ ऋषिरु० माखिदो राजपुत्रीत्थमात्मानं प्रत्यनिंदिते भगवांस्तेऽक्षरो गर्भमदूरात्संप्रपत्स्य
ते २ धृतव्रतासि भद्रं ते दमेन नियमेन च तपोद्रविणदानैश्च श्रद्धया चेश्वरं भज ३ स त्वयाराधितः शुक्लो वितन्वन्मामकं यशः छे
त्ता ते हृदयग्रन्थिमौदर्यो ब्रह्मभावनः ४ हं विमुक्तिदं मुक्तिसाधनज्ञानप्रदं त्वां प्राप्यापि बंधनात्संसारान्न मुमुक्षेयमोक्तुमिच्छां न कृत
वत्यस्मि ५७ इति तृतीये त्रयोविंशः २३ एवं निर्विण्णां भार्यां प्रत्याह कर्दम इत्याह मैत्रेयः एवमिति निर्वेदं कथयन्तीं मनोर्दुहितरं शालिनीं
स्वगृहिणीं प्रति मुनिः कर्दमः दयालुः शुक्लाभिव्याहृतं अहं च त्वां शकलयेति भगवद्वचनं स्मरन्नाह १ उक्तिमेवाह त्रिभिः हे राजपुत्रि अ
निंदिते नघाचारे आत्मानं प्रतीत्थं माखिदः खेदं माकार्षीः अक्षरो निरस्तप्राकृतगुणो भगवाननंतकल्याणगुणो हरिरदूरादाशु ते तव
गर्भं प्रपत्स्यते २ ते तुभ्यं भद्रं मंगलमस्तु धृतव्रतं भगवदाराधनरूपव्रतं यया सा सती त्वं दमेन बाह्येंद्रियनियमनेन नियमेनांतरिंद्रियनिय
मनेन वा श्रियत्वोश्चितनपसा द्रविणानां हिरण्यादीनां दानैश्च श्रद्धया ईश्वरं भगवदाराधनं त्वरया चेश्वरं भगवंतं भज ३ त्वया आरा
धितः शुक्लो भगवान्मदीयं यशो वितन्वन् विस्तारयन् औदर्यः त्वदुदरे जातः ब्रह्मभावनः तत्त्वज्ञानोपदेष्टा भूत्वा ते हृदयग्रंथिं अज्ञानं छेत्ता छेत्स्यतीति ४

.५४

ग्रं १

एवमुक्त्वा ब्रह्मा स्वलोकं ययावित्याह मैत्रेयः कर्दमं देवहूतिं चाप्यापृच्छ्य सान्त्वयित्वा जगत्स्रष्टा हंसो ब्रह्मा कुमारैः सहेति शेषः स
हनारदः नारदसहितश्च हंसेन यानेन वाहनेन त्रिधाम्नः स्वर्गात्परमं उपरिस्थितं सत्यलोकं प्रति ययौ २० शतधृतौ ब्रह्मणि गते
सति हे क्षत्तः तेन ब्रह्मणा चोदित आदिष्टः कर्दमः स्वदुहितॄः विश्वसृजां विश्वस्रष्टॄणां यथोदितं यथा तत्सूचितं प्रादात्प्रायच्छत् २१ कस्मै
कां प्रादादित्यत्राह मरीचय इति मरीचयेऽत्रयेऽङ्गिरसः पुलस्त्याय पुलहाय क्रतवे भृगुवसिष्ठाथर्वभ्यः यथाक्रमं कलानसूया श्रद्धा हविर्भू गति
क्रियाख्यात्यरुंधतीशांतयः स्युरित्यर्थः आयच्छत् दत्तवानित्यर्थः २२ तत्र युक्तां वय आदिभिरिति शेषः इदं सर्वं सामपुलस्त्यं २३ ययाशां

मैत्रेय उ० तावापृच्छ्य जगत्स्रष्टा कुमारैः सहनारदः हंसो हंसेन यानेन त्रिधामपरमं ययौ २० गते शतधृतौ क्षत्तः कर्दमस्तेन चो
दितः यथोदितं स्वदुहितॄः प्रादाद्विश्वसृजां ततः २१ मरीचये कलां प्रादादनसूयामथात्रये श्रद्धामंगिरसेऽयच्छत्पुलस्त्याय हविर्भुवं
२२ पुलहाय गतिं युक्तां क्रतवे च क्रियां सतीं ख्यातिं च भृगवेऽयच्छद्वसिष्ठायाप्यरुंधतीं २३ अथर्वणेऽददाच्छांतिं यया यज्ञो वितन्यते
विप्रर्षभान्कृतोद्वाहान्सदारान्समलालयत् २४ ततस्त ऋषयः क्षत्तः कृतदारा निमंत्र्य तं प्रातिष्ठन्नंदिमापन्नाः स्वं स्वमाश्रममंडलं
२५ स चावतीर्णं त्रियुगमाज्ञाय विबुधर्षभं विविक्त उपसंगम्य प्रणम्य समभाषत २६ कर्दम उ० अहो पापच्यमानानां निरये स्वैरमं
गलैः कालेन भूयसा नूनं प्रसीदंतीह देवताः २७

ययायज्ञः क्रतुर्वितन्यते विस्तार्यते वर्द्धते इत्यर्थः दंपत्योः सहाधिकारात्स्त्री
सहितान्मरीच्यादीन्समलालयत् वैवाहिकवस्त्राभरणादिप्रदानेन संतोषितवानित्यर्थः २४ हे क्षत्तः विदुर ततः कृतदारास्ते मरीच्या
दय ऋषयस्तं कर्दमं निमंत्र्यानुज्ञाप्य नंदिं हर्षमापन्नाः प्राप्ताः संतः स्वं स्वमाश्रमस्थानं प्रातिष्ठन् आविशन् २५ हे भरतर्षभ स च कर्दमः
त्रीणि युगानि ज्ञानवैराग्यादिगुणयुग्मानि यस्य तं भगवंतं कपिलरूपेणावतीर्णमाज्ञाय विदित्वा विविक्ते एकांते उपसंगम्य समीपमे
त्य प्रणम्य मधुराक्षरं यथा स्यात्तथा भाषत २६ भाषणमेवाह अहो इति स्तुतिभिः तावत्सामान्येन देवताप्रसादो दुर्लभ इत्याह स्वैरमंगलैः दु
ष्कृतैः निरये संसारे पापच्यमानानां भृशं दह्यमानानां भूयसा कालेन देवताः प्रसीदंति प्रसन्ना भवंति नूनं निश्चयः अहो इत्याश्चर्ये

स्यात्तथा २

संसम्यकू २

तत्र तथेति पंचभिः कर्दमं प्रत्याह हे तात पुत्र त्वयाऽपचितिः पूजा निर्व्यलीकेन प्रेमातिशयेन मे मह्यं कल्पिता विहिता का अपचितिर्निर्व्यलीक ल्पितेत्याह हे मानद भवान्वाक्यं मद्वचः मानयन् जगृहे गृहीतवानिति यत्तदेव महापचितिः १२ तद्वाक्यकरणमात्रेण मयापचितिः कल्पितेत्य त्राह पितरि पुत्रैः कार्या शुश्रूषा अपचितिरेतावत्येव यद्गुरोः पितुर्वचः वाक्यं गौरवेण बाढमनुमन्येतांगीकुर्वीत इति प्रजाः सृजेति मयाभि हितं त्वं तथैवाकार्षीस्ततो मदपचितिः कल्पितेति भावः १३ हे वत्स सुमध्यमाः शोभनांगाः इमाः सत्यः साधुशीलाः ते दुहि तरः स्वैः प्रभावैः वंशैः सर्गमनेकधा तत्र तदपत्यपरंपराभिर्बृंहयिष्यंति वर्द्धयिष्यंति १४ अतस्त्वमृषिमुख्येभ्यो मरीच्यादिभ्यः आ त्मजा दुहितरः तत्र दुहितॄः यथाशीलानतिक्रमेण परिदेहि प्रयच्छ अद्याधुनानुवृत्य यशः विस्तृणीहि वितनु १५ तव पुत्रस्तु साक्षादीश्वर इत्याह हे मुने स्वमायया आत्मोपसंकल्पेनावतीर्णः किमर्थं भूतानां शेवधिं निधिं देहं बिभ्राणं नानाधीरैरवाभीष्टप्र

ब्रह्मोवाच त्वया मेऽपचितिस्तात कल्पिता निर्व्यलीकतः यन्मे संजगृहे वाक्यं भवान्मानद मानयन् १२ एतावत्येव शुश्रूषा कार्या पितरि पुत्रकैः बाढमित्यनुमन्येत गौरवेण गुरोर्वचः १३ इमा दुहितरः सत्यस्तव वत्स सुमध्यमाः सर्गमेतं प्रभावैः स्वैर्बृंहयिष्यंत्यनेकधा १४ अतस्त्वमृषिमुख्येभ्यो यथाशीलं यथारुचि आत्मजाः परिदेह्यद्य विस्तृणीहि यशो भुवि १५ वेदाहमाद्यं पुरुषमवतीर्णं स्वमायया भूतानां शेवधिं देहं बिभ्राणं कपिलं मुने १६ ज्ञानविज्ञानयोगेन कर्मणामुद्धरन् जटाः हिरण्यकेशः पद्माक्षः पद्ममुद्रापदांबुजः १७ एष मानवि ते गर्भं प्रविष्टः कैटभार्दनः अविद्यासंशयग्रंथिं छित्त्वा गां विचरिष्यति १८ अयं सिद्धगणाधीशः सांख्याचार्यैः सुसंमतः लोके कपिल इत्याख्यां गंता ते कीर्तिवर्द्धनः १९ ॥

दानाय देहं बिभ्राणं कपिलमाद्यं जगत्कारणं परमपुरुषमेवाहं वेद जानामि १६ देवहूतिं प्रत्याह हे मानवि मनुपुत्रि कैटभार्दनः कैटभारिर्भगवान् ज्ञानविज्ञानयोगेन जीवपरयोरात्मज्ञानयोगोपदेशेन कर्मणां शुश्रूषतां पुंसामनादिप्रवृत्तानां कर्म णां जटा मूलानि उद्धरन्नुत्पाटयितुमित्यर्थः तेन तव गर्भं प्रविष्टो जातः कथंभूतः हिरण्यकेशः हिरण्यवत्प्रशस्ताः केशा यस्य सः पद्माक्षः पुंडरीकाक्षः पद्ममुद्राभिरंकितं यस्मिंस्तत्पदांबुजं यस्य सः एषः अविद्या देहात्माभिमानः संशयः अत्र छलात्मकस्तत त्रात्माभिमानजन्यो आत्मकोपस्तत्र ग्रंथिर्हृदयमज्ञानं तं छित्त्वा निरस्य गां भूमिं विचरिष्यति १८ अयं तव पुत्रः सिद्धगणानां पाति

परंप्रकृतिपुरुषविलक्षणंप्रधानंप्रकृतिशरीरंपुरुषंजीवशरीरकंकालंशरीरकं अनेनकारणावस्थाप्रकृतिपुरुषकालश
रीरकत्वमुक्तं अथकार्यावस्थातच्छरीरकत्वमुच्यते महांतंमहच्छरीरकंत्रिवृतंत्रयाणांसत्वरजस्तमसांहदृत्तंनपुंसिन्कार्यावस्था
जीवलच्छरीरकंइत्यर्थः शरीरवाचकशब्दः शरीरिपर्यंतमभिधत्ते इत्यत्रोपपत्तिः पूर्वमेवासकृदुक्ता अनेनकार्यावस्थकारणावस्थं
चिदचिदंतसमस्तवकपनेनकारणत्वमुक्तं तदुपयुक्तसर्वज्ञत्वादिगुणयोगमाह कविंसर्वज्ञं स्वच्छंदशक्तिंस्वायत्तसर्वशक्तित्वादियुक्तं
पालकत्वमाह लोकपालंलोकांश्चिदचिदात्मकंप्रपंचंपालयतीतितं संहर्तृत्वमुच्यते आत्मनुभूत्यानुगतप्रपंचं इति आत्मनःस्वस्यानु
भूत्यासहराघुपयुक्तज्ञानशब्देनानुगतःस्वस्मिन्लीनःप्रपंचोयस्यतं आत्मानुभूत्येनपूर्ववत्प्राप्यत्वेतिकाकाक्षिण्यायात् ततश्चजगत्पाल

परंप्रधानंपुरुषंमहांतंकालंकविंत्रिवृतंलोकपालं आत्मानुभूत्यानुगतप्रपंचंस्वच्छंदशक्तिं
कपिलंप्रपद्ये ३३ अस्माभिपृच्छेद्यपतिंप्रजानांत्वयावतीर्णर्णउताप्तकामः परिव्रजत्पद
वीमास्थितोहंचरिष्येत्वांहृदियुंजन्विशोकः ३४॥ ॥ ॥ ॥ ॥ ॥

नोपयुक्तस्वकीयज्ञानशक्त्यालोकपालमित्यर्थः एवंविधंकपिलंत्वांप्रपद्ये ३३ एवंभगवंतंप्रपद्यस्याभिप्रेतंमावेदयति अस्माइति प्र
जानामधिपतिंत्वामहमाभिपृच्छेसमईषदभिपृच्छामिस्मेत्यर्थः किंतदित्यत्राह त्वयाप्रजारूपेणत्वयावतीर्णः अवतारितंऋणं
ग्रथंयेन आप्तः अनुभूतःकामःसांसारिकोभोगोयेनसोहंइदानींत्वामेवहृदियुंजन्ध्यायन्नतएवविगतःशोकःतापत्रयजनितं
दुःखंयस्यसः वीतशोकमितिपाठांतरं तदात्वामित्यस्यविशेषणं तच्चापहृतपाप्मत्वादिगुणाष्टकोपलक्षणं ऋतीयनेनतदह
रविधाप्रत्यभिज्ञानात् परिव्रजतांतुयाश्रमिणांपदवींमार्गंसंन्यासधर्ममाश्रितः चरिष्येसंचरिष्यामि ३४ कर्दमेनैवं
वमुक्तोभगवान्कपिलःस्वचिकीर्षितंसांख्यतंत्रस्यप्रामाण्यंतावन्निदर्शनेनप्रदर्शयन्नवतारप्रयोजनंचकथयन्नभि
प्रेतार्थंपितरमादिशतीति षड्भिःश्लोकैः॥

वाङ्मनसागोचरस्वरूपस्वभावस्त्वं भक्तेषु स्वसौलभ्यं प्रदर्शयन्स्वस्मागमवशान्नयनविषयतां गतोसीत्याह बहुभिरित्यादिना त्रये
ण बहुभिर्जन्मभिर्विपक्वेन परिपाकदशां प्राप्तेन बहुजन्मानुष्ठितज्ञानकर्मयोगाभ्यां मतु गृहीतेनेत्यर्थः सम्यग्योगसमा
धिना सम्यग्योगो भगवद्भक्तियोगो यस्मिंस्तेन समाधिना विविक्ते कामेण यस्य तव पदं स्वरूपं शून्यागारेषु रागादिरहितेषु हृ
दयस्थानेषु बुद्धः स साक्षात्कर्तुं यतते अनेन प्राकृतमनआद्यगोचरत्वमुक्तं २८ स एष भगवान् भवान् हेलनं कर्तुमर्हसि नः स
मान्यधिकोऽस्मदीयानाम् गृहेषु निरयप्रायेषु जोपयेत्तव नाम नवगण्यग्राम्याणां नोस्माकं गृहेषु जातोऽवतीर्णः भक्तं सत्वं ४५
त्वत्स्वभावतस्त्वदमुचितमेवेत्याह यत्त्वं स्वानां भक्तानां पक्षं पोषयतीति तथा तेनेन भक्तसौलभ्यमुक्तं २९ स्वीयं वाक्यं स
त्याहं त्वांशकलयेत्यादेवाकोकृतं सत्यं कर्तुं मम गृहे वतीर्णोसि इदं संकल्पितकरणमस्मदागमनमेवेति भावः अवतारप्रयोजन

बहुजन्मविपाकेन सम्यग्योगसमाधिना द्रष्टुं यतन्ते यतयः शून्यागारेषु यत्पदं २८ स एष भगवानद्य हेलनं नग
णयान्नः गृहेषु जातो ग्राम्याणां यः स्वानां पक्षपोषणः २९ स्वीयं वाक्यमृतं कर्तुमवतीर्णोसि मे गृहे। चिकीर्षुर्भ
गवान् ज्ञानं भक्तानां मानवर्धनः ३० तान्येव तेभिरूपाणि रूपाणि भगवंस्तव यानि यानीह रोचन्ते स्वजनाना
मरूपिणः ३१ त्वां सूरयस्तत्त्वबुभुत्सयाद्धा सदाभिवादार्हणपादपीठं ऐश्वर्यवैराग्ययशोवबोधवीर्यश्रिया पूर्तमहं
प्रपद्ये ३२

माह आयत इति ज्ञानं ज्ञानसाधनं सांख्यं तंत्रं तं चिकीर्षुः कर्तुमिच्छुः भक्तानां मानं वर्धयतीति तथा सन् अवतीर्णोसि साधुन्प
ह्रियातुं लोके जीविषया सांख्यतंत्रं च कर्तुमवतीर्णोसीत्यर्थः ३० पुनः भक्तानुग्रहकमेवाह तान्येवेति अरूपिणः कर्मायत्तदेहम वं
नुष्यादिरूपरहितस्य तव यानि चतुर्भुजादिरूपाणि स्वजनानां स्वभक्तानां रोचन्ते तान्येव रूपाणि ते तव योग्यानि रूपाणि भवन्ति
वाणि स्वजनाननुगृहीतुमेव तद्[illegible] अनुसारेणाविर्भावितानि रूपाणि विभवीत्यर्थः ३१ एवं सौलभ्यादिगुणविशिष्टत्वेन पुनः शरणं व्र
जोपयुक्तकल्याणगुणान्तरविशिष्टत्वेन प्रस्तुवन् शरणं व्रजति त्वामिति सूरिभिः [illegible] सुधीभिः तत्त्वबुभुत्सया वा जगताधिक
प्रकृतिपुरुषप्रवर्तकात्मा त्वां बोद्धुमिच्छया सदाभिवादनयोग्यं पादपीठं यस्य तं ऐश्वर्यादिभिः पूर्णं तिस्राचवोधः ज्ञानं प्रोक्तं जः एवं
भूतं त्वां प्रपद्ये शरणं व्रजे ३२

एवमवतारप्रयोजनमभिधाय तमादिशति गच्छेति मयाऽऽपृष्टः आदिष्टः कामं यथेच्छं गच्छ यतो हि मयि संन्यस्तेन समर्पितेन कर्मणा नभि-
संहितफलेन मदाराधनतैकवेषेणानुष्ठितेन कर्मणा सुदुर्जयं उपायांतरैर्जेतुमशक्यं मृत्युं संसारं ज्ञानोत्पत्तिविरोधिपुण्यपापरूपं प्राचीनक-
र्म जित्वाऽपोह्यामृतत्वाय मत्प्राप्तिरूपामृतत्वविरोधिप्राचीनकर्मनिरसनायेति मां भज अवेदं वेदितव्यं अनादिपुण्यपापरूपं प्राची-
नं कर्म किंचिन्मोक्षोपायभूतभगवदुपासनोत्पत्तिविरोधि किंचित्तु कर्मापि भगवत्प्राप्तिविरोधि तत्रोपायविरोधिनः कर्मणो-
२५ नभिसंहितफलकर्मणा निर्भिः धर्मेण पापमपनुदति अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते कषायेकर्मभिः पक्के ततो ज्ञानं प्रवर्त-
ते इत्यादिश्रुतिभिरुक्तः अत्राविद्ययाऽनाभिसंहितफलकर्मणा मृत्युं सुपायोत्पत्तिप्रतिबंधकं कर्म तीर्त्वा अपोह्य विद्यया ज्ञानेनामृत-
त्वमश्नुते प्राप्नोतीति श्रुत्यर्थः तथा च स्मृतिः इयाज सोपि सुबहून्यज्ञान् ज्ञानव्यपाश्रयः ब्रह्मविद्यामधिष्ठाय तर्तुं मृत्युमविद्ययेति

२२२

गच्छ कामं मयापृष्टो मयि संन्यस्तकर्मणा जित्वा सुदुर्जयं मृत्युममृतत्वाय मां भज ३८ मामात्मानं स्वयंज्योतिः सर्वभूतगुहाशयं
आत्मन्येवात्मनान्वीक्षन् विशोकोऽभयमृच्छसि ३९ मात्रे आध्यात्मिकीं विद्यां शमनीं सर्वकर्मणां वितरिष्ये यया चासौ भयं चाति-
तरिष्यति ४०

उपेयविरोधिनस्तु कर्मणः भगवदुपासनांशभक्त्याद्यपरपर्यायज्ञानेनैव निवृत्तिः तमेव विदित्वातिमृत्युमेति नान्यः पंथाः एवमेवंवि-
दि पापं कर्म न श्लिष्यते क्षीयंते चास्य कर्माणि तस्मिन् दृष्टे परावरे निचाय्य तं मृत्युमुखात्प्रमुच्यते ज्ञात्वा देवं मुच्यते सर्वपाशैः ॥
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथेति श्रुतिस्मृतिशतसिद्धं तदेतदत्रापि मयि संन्यस्तकर्मणेत्यादिनोच्यते इति तेन
मद्भजनेन मामात्मन्येव स्वात्मन्येवात्मना मनसान्वीक्ष्य साक्षात्कुर्वन् विशोकः विगतशोकः शोकहेतुमत्प्राप्तिविरोधिप्राचीनकर्म-
यस्यासः अभयं न विद्यते भयं यस्मात्तं मामृच्छसि प्राप्स्यसि कथंभूतं मामात्मानं जीवांतरात्मानं स्वयंप्रकाशं सर्वभूतानां गुहायां हृ-
दये गुहरे शयानं ३९ मयि गते सति किं भवान् करिष्यतीत्यत आह मात्र इति असौ मम माता यया विद्यया मदुपदिष्टब्रह्मविद्यया भ-
यं मृत्युमतितरिष्यति तामाध्यात्मिकीं सर्वकर्मशमनीं सर्वोत्तराघविनाशिनीं विद्यां मात्रे वितरिष्ये उपदेक्ष्यामीत्यर्थः ४० ॥ ॥

सत्यलौकिके सत्यं पुण्यं कृतपर्यायत्वाद्धत्ते च पुण्यमेव अपुण्यस्य कर्मण एवमन्यतादात्मानं जुगुप्सेदित्युक्तं कृतं पिवंतौ सुकृतस्य लोक इति चो
क्तेः तच्च पुण्यं कर्मोपासनं चेति द्विविधमत्र विवक्षितं कर्मयं कर्मवाच्चि पुण्यशब्देनोपासनमभिधीयत इति न शंक्यं उपासनस्यापि मनोव्या
पाररूपत्वेन तेनाभिधानसंभवात् अतःवाच्चिकैः पक्षिमृगतां मानसैरंत्यजातितां शारीरजैः कर्मदोषैर्याति स्थावरतां नर इति मानसवा
परस्यापि कर्मदोषैरित्यनेन नाक्रिपारूपत्वमवगतं भगवदनुग्रहैर्विशेषस्यैव पुण्यरूपत्वेनोपासनस्यापि नदनुग्रहहेतुत्वेन तदभिधा
नस्य ———— न्याय्यत्वाच्च लोक्यत इति लोकः फलं तत्साधनं लौकिकं तच्चापि स्वर्गापवर्गसाध्यभेदैनक र्मोपासनं चेति द्विविधं तस्मिन्वि
षये यन्मया प्रोक्तं सांख्यं तत्प्रमाणमित्यर्थः वक्ष्यमाणो हि सांख्यभगवद्भक्तियोगतिष्ठानामर्चिरादिगत्या भगवत्प्राप्तिर्नित्वन्निर्धर्मरताद
त्यारभ्यसूर्यद्वारेण ते यांतीत्यनेन अथयोगहमेधीयान्धर्मानित्यारभ्य गत्वा चांद्रमसं लोकं सोमपाः पुनरेष्यतीति स्वर्गासक्तमनसां त
त्साधनानुष्ठानेन पितृयाणगत्या तद्भोगानुभवश्च वक्ष्यते यद्वा सत्यं ब्रह्म सत्सेज्ञानमनंतमिति श्रुतेः लोक्यते साक्षात्क्रियत इति लोकः फ
लं तत्साधनं लौकिकं सत्यं च लौकिकं चेति समाहार द्वंद्वः तस्मिन् ब्रह्मस्वरूपं तदनुभवरूपफलं तत्साधनादि विषय इत्यर्थः तत्र यन्मया प्रोक्तं

श्रीभगवानुवाच। मया प्रोक्तं हि लोकस्य प्रमाणं सत्यलौकिके अथाजनि मया तुभ्यं यदवोचमतं मुने ३५ एतन्मे जन्म लोकेस्मिन्मुमुक्षू
णां दुराशयात् प्रसंख्यानाय तत्त्वानां संमतायात्मदर्शने ३६ एष आत्मपथो व्यक्तो नष्टः कालेन भूयसा तं प्रवर्तयितुं देहमिमं विद्धि म

सांख्यं तत्प्रमाणमेव हीत्यर्थः एतन्निदर्शयति हे मुने अथात एवतुभ्यमहं यदहं सर्वं शाकल्यात्तद्वीर्यं एतस्य वोचं तत्तदत्तं सत्यं क पाधृतं ३७
र्तुं भिन्नविशेषः अत्राभित पद्यवाची अप्तशब्दः औचित्यात्कृतं यथा तथा मया जनि अवतीर्णं दीक्षिया विशेषणं वा ३५ अवतार प्रयोजनमाह ति२
एतदिति दुराशयात् दुष्ट आशयोंऽतःकरणं यस्मिन् तस्माद् देहात्मत्वेनानुसंहितादेहान्मुमुक्षूणां मोक्षमिच्छतां सत्वतिमनिच्छतामित्यर्थः त
तिथ षामात्मदर्शने प्रकृतिविविक्तजीवात्म परमात्मविज्ञाने संमताय अभिमताय उपयुक्तायेति यावत् तत्त्वानां प्रकृतिपुरुषेश्वररूपाणां त्य
रूपतत्त्वानां प्रसंख्यानाय प्रकथनाय विवेचनाय अस्मिन् लोके एतन्मम जन्म मज्जन्माभूदित्यर्थः ३६ ननु पूर्वमेवाविच्छिन्नं तत्र कुतस्तव
रूपं परात्मस्तव यो क्तं आत्मपथो विकल्पए, यावतिष्ठते किमिदानीं त्वदवतारसाध्यमित्यत्राह एष इति एष आत्मपथः आत्ममार्गः
आत्मतत्त्वं इति यावत् सम्यग्युक्तः सूक्ष्मः परमदुर्ज्ञेयो अत एव मया पूर्वमुपदिष्टो पि भूयसा कालेन विलंबेन नष्टः परिभ्रष्टः तमेवात्मपथं प्रकाश
यितुं मयेमं देहं धृतमिति विद्धि जानीहि ३७ ॥ ॥ ॥ ॥ ॥ न२ ॥ ॥ ॥ ॥ ॥ ॥

इच्छाद्वेषादिप्राकृतगुणरहितेन सर्वत्र भूतेषु समचेतसा तत्कर्मापि त्रदेवमनुष्यत्वादिवैचित्र्यंनादरेण प्रकृतिपरिणामरूपानन्तरान्यति
शरीरं जीवानां भेदेपि सर्वत्र ज्ञानैकाकारतया एकरूपान् जीवान् तत्रत्कर्मानुसारेण नियंतत्वभेदे यंतर्यामित्वं निरस्तसमस्तदोषत्वात्
तकल्याणगुणाकरत्वेन चैकरूपमीश्वरं च पश्यन्नित्यच्छिन्नं तत्समचेतस्तेन भगवद्भक्तियोगेन च भागवतीं गतिं मुक्तिं प्राप्तात्मध्या
पादांतरे स एवतां भागवतीं गतिं प्राप्तः ४७ इति तृतीये चतुर्विंशः २४ एवमाकर्ण्येति मनुतद्वंशचरित्रः शौनकः कापिलोक्तसांख्यमू
क्त्यनुवादपूर्वकं पृच्छति त्रिभिः कापिल इति ननु शारीरकमीमांसायां ईक्षतेर्नाशब्दं रचनानुपपत्तेश्च नानुमानं विप्रतिषेधाच्चासमं
जसमित्यादिभिः ब्रह्मात्मकप्रधानोपादानकारणत्वस्य ह्यनुपपत्तिपरस्परविरुद्धार्थत्वादिभिर्दूषितं सांख्यं केवल ब्रह्मस्वरूपगुण
विभूतितदुपासनतद्विरोधितत्प्राप्त्यादिकं वेदांतार्थोपबृंहणपरेस्मिन् स्वकर्तृके पुराणे कथं भगवतावतारेणाभिवेशितमुच्यते दू
षितांशपरिहारेण तदुक्तं चैक परिगृहीतं त्वोयंवादादिपरिग्रहेण च कपिलमतमपि शिरस्यैवं तदेवमपि समीचीनं न्यायोपप

इच्छाद्वेषविहीनेन सर्वत्र समचेतसा भगवद्भक्तियुक्तेन प्राप्ता भागवती गतिः ४७ इति श्रीमद्भागवते महापुराणे तृतीय
स्कंधे कर्दमप्रयाणं नाम चतुर्विंशोऽध्यायः २४ शौनक उ॰ कपिलस्तत्त्वसंख्याता भगवानात्ममायया जातः स्वयमजः सा
क्षादात्मप्रज्ञप्तये नृणां १ न ह्यस्य वर्ष्मणः पुंसां वरिम्णः सर्वयोगिनां विश्रुतौ श्रुतदेवस्य भूरि तृप्यंति मे सवः २ ॥

त्वं कथं चित्तदुक्तज्ञानयोगस्य भगवद्भक्तियोगांगत्वकथनाद्यात्रानिवेशितमत एव शारीरकविरुद्धाः कपिलोक्ता त्वंशा अत्र नानिवेशिताः क
थं पुनर्भगवदवतारेण कपिलेन वैदिकापरिगृहीता ब्रह्मात्मकप्रधानकारणत्वादिवादाः परिगृहीता इति चेन्न स्यात् विष्णुभगवत्त्वेपि स्वस्य से
श्वरत्वे न स्वाज्ञानमूलत्वाद्वेदविरुद्धार्थपरिग्रहस्य यथा हिरण्यगर्भस्य भगवदावेशावतारत्वेपि सेश्वरत्वं स्वाज्ञानमूला योगस्मृतिस्तेन रचि
तात्यैवेदमपीति ज्ञेयं अजः कर्माधीनजन्मरहितः भगवानात्ममायया स्वसंकल्पेन नृणामात्मप्रज्ञप्तये आत्मपरमात्मयाथात्म्यविश
दीकरणाय तत्त्वसंख्याता तत्त्वत्रयनिरूपकः कपिलः जातः अवतीर्णः १ पुंसां वर्ष्मणः श्रेष्ठस्य सर्वयोगिनां वरिम्णः वरिष्ठस्यास्य कपिल
स्य विश्रुतौ कीर्तिश्रवणे इत्यर्थः श्रुतो देवः कापिलो येन तस्य मम मा सवः इंद्रियाणि भूरिभृशं न तृप्यंति २ ॥ ॥ ॥ ॥

त्वेन४

एवं कपिलेनोक्तः कर्दमस्तद्वचनमेवाकरोदित्याह मैत्रेयः एवमिति तेन कपिलेन समुदितः प्रजापतिः कर्दमस्तं कपिलं प्रदक्षिणीकृ
त्य प्रक्रम्य प्रीतः स्फुटो वनं प्रत्येव जगाम अहो नेन सर्वसंपत्समृद्धस्वगृहत्यागो विहितो यत्ते ४१ स कर्दमः मौनव्रतमास्थितः आश्रितः आ
त्मा परमात्मैकं शरणमुपायो रक्षको यस्य सः मुनिः शुभाशुभसंशीलनपरः निःसंगः इन्द्रियार्थेष्वासक्तिरहितः संसारिजनसंगरहितो
वा अनग्निः परित्यक्तगार्हपत्यमत्वाहवनीयाग्निरहितः अनिकेतनः नियतावसथरहितः क्षोणीं भूमिं व्यचरत् ४२ यत्तत्सदसतः चि
दचिद्भ्यां परं विलक्षणं तस्मिन् ब्रह्मणि गुणावभासे गुणैराभासः यस्येति बहुव्रीहिः मंगलगुणावभासिते हेयगुणरहिते मनो युंजानः
एकाग्रीकुर्वन् ४३ निरहंकृतिर्देहात्माभिमानरहितः निर्ममः देहापत्यकलत्रादिषु स्वीयत्वबुद्धिरहितः निर्द्वंद्वः शीतोष्णादिदेहधर्मैर्ना

मैत्रेय उ॰ एवं समुदितस्तेन कपिलेन प्रजापतिः दक्षिणीकृत्य तं प्रीतो वनमेव जगाम ह ४१ व्रतं स आस्थितो मौनमात्मैकश
रणो मुनिः निःसंगो व्यचरत् क्षोणीमनग्निरनिकेतनः ४२ मनो ब्रह्मणि युंजानो यत्तत्सदसतः परं गुणावभासे विगुण एक
भक्त्यानुभाविते ४३ निरहंकृतिर्निर्ममश्च निर्द्वंद्वः समदृक् स्वदृक् प्रत्यक्प्रशांतधीर्धीरः प्रशांतोर्मिरिवोदधिः ४४ वासुदे
वे भगवति सर्वज्ञे प्रत्यगात्मनि परेण भक्तिभावेन लब्धात्मा मुक्तबंधनः ४५ आत्मानं सर्वभूतेषु भगवंतमवस्थितं अ
पश्यत् सर्वभूतानि भगवत्यपि चात्मनि ४६ ॥ ध्र२ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

कुलः समदृक् विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि शुनि चैव श्वपाके च समदृक् पंडिता मत इत्याद्युक्तरीत्या समदर्शनः स्वदृक्
धर क्र२ प्रकृतिविलक्षणब्रह्मावलोकस्वात्मदर्शी प्रत्यक् शांतधीः प्रत्यगात्मनि ब्रह्मात्मके जीवात्मनि प्रशांता धीर्यस्य सः ब्रह्मात्मकस्वात्मानुभवपरः
निस्तरंगितो दधिरिव स्वयमप्यशनायापिपासाशोकमोहजरामृत्याख्यैरूर्मिषट्करहितः ४४ सर्वज्ञे प्रतीचः जीवस्यात्मन्यंतः प्रविश्य
नियंतरि शाड्गुण्यपूर्णे सर्वभूतधारके परमपुरुषे परेण ध्रुवानुस्मृतित्वप्रत्यक्षतापन्ननिरतिशयप्रीतिरूपत्वादिदशापन्नेन
भक्तियोगेन लब्धमतिः ४५ धार्येषु सर्वभूतेषु अवस्थितं भगवंतं आत्मानं धारकं परमात्मनि भगवति भूतानि धार्याण्यपश्य
त् एवं तेन राज्ञा भगवतो व्याप्तिधारकत्वं चोच्यते ४६ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

भा॰त॰टी॰ ११५

तमुक्तविधं स्वभक्तानां संसार एव तरुस्तस्य कुठारं छेत्तारं मुमुक्षुसाधकं तत्त्वं विवक्षितं सद्धर्मविदां निवृत्तिधर्मविदां वरिष्ठं श्रेष्ठं शरण्यं शरणं गत्वा
महं प्रकृतेः पुरुषस्य जीवस्येदं परमात्मनो ऽप्युपलक्षणं जिज्ञासया ज्ञातुमिच्छया शरणं गतास्मीति नमामि ११ एवं मुक्तः कपिलस्तां वभा
षे इत्याह मैत्रेयः पुंसामपवर्गवर्द्धनं मोक्षरुचिकरं निरवद्यं निर्दुष्टं स्वमातुरेवं हृद्यम् ईप्सितं माभिप्रेतमेवं निशाम्य श्रुत्वा धिया मनसाभि
नंद्यात्मवतां निगृहीतमनसां सतां गतिः मुमुक्षुपायः कपिलः ईषत्स्मितेन मंदहासेन शोभितमाननं मुखं यस्य स तां मातरं बभाषे १२
तत्र ज्ञानकर्मयोगादिभिरनुगृहीतभगवद्भक्तियोगस्यैव सान्तुसन्तुपापत्वमुत्तराध्यायेषु विस्तरेण प्रतिपादयिष्यमाणमत्र संग्रहेणाह
ति पादद्वयं तावज्ज्ञानयोगमवतारयति योग इति द्वाभ्यां आध्यात्मिकः प्रकृतिविविक्तात्मयाथात्म्यज्ञानरूपो योगः पुंसां मुमुक्षूणां निःश्रेय

ता॰५ म॰

तं त्वा गताहं शरणं शरण्यं स्वभृत्यसंसारतरोः कुठारं जिज्ञासयाहं प्रकृतेः परस्य नमामि सद्धर्मविदां वरिष्ठं मैत्रेय उ॰ इति स्वमा
तुर्निरवद्यमीप्सितं निशम्य पुंसामपवर्गवर्द्धनं धियाभिनंद्यात्मवतां सतां गतिर्वभाष ईषत्स्मितशोभिताननः १२ श्रीभगवानु
वाच योग आध्यात्मिकः पुंसां मतो निःश्रेयसाय मे अत्यंतोपरतिर्यत्र दुःखस्य च सुखस्य च १३ तमिमं ते प्रवक्ष्यामि यमवोचं पुरान
घे ऋषीणां श्रोतुकामानां योगं सर्वांगनैपुणं १४ चेतः खल्वस्य बंधाय मुक्तये चात्मनो मतं गुणेषु सक्तं बंधाय रतं वा पुंसि मुक्तये १५

व॰२ 223

सायमोक्षाय मे मया मतः ज्ञानयोगो मुमुक्षूणां मोक्षसाधनमिति मन्यते इत्यर्थः आत्मज्ञानयोगं प्रशंसन्नाह अत्यंतेति यत्र यस्मिन्ना
ध्यात्मिके योगे निष्पन्ने सति दुःखस्य सुखस्य च वैषयिकस्य सुखदुःखयोरत्यंतमुपरतिर्विनाशः भवति १३ यमात्मयोगं श्रोतुकामानां
ऋषीणां पूर्वकाले हमवोचमुक्तवानस्मि तमिममात्मयोगं उरुभिर्बहुभिरंगैः शमदमादिभिर्नैपुण्यं यथा भवति तथा तेऽहं प्रवक्ष्या
मि १४ एवमाध्यात्मयोगमवतार्य प्रकृतिविविक्तात्मस्वरूपग्रहणयोग्यमनसः स्वरूपं कथयिष्यन् तावन्मनसः एव बंधमोक्षका
रणत्वमाह चेत इति अस्यात्मनो जीवस्य बंधाय मोक्षाय च चेत एव मतं खलु कारणमिति शेषः कीदृशं बंधाय मुक्तये च कीदृशमि
त्यत्राह गुणेषु गुणकार्येषु शब्दादिविषयेषु सक्तमासक्तं चेतः बंधाय भवति पुंसीश्वरे रतं वा आसक्तं च मुक्तये भवतीति विवेकः १५

न॰३ राम॰ ११४

स्वच्छंदात्मा स्वेच्छोपात्तशरीरो भगवान्कपिलः आत्ममायया स्वसंकल्पेन यच्चकार यद्विधत्ते करोति तत्सर्वं तानि कीर्तनीयानि चरिता
नि श्रद्दधानस्य शुश्रूषतस्तानि तस्य मे मह्यं कीर्तय ३ एवमापृष्टः सूतो विदुरेणैवमेव पृष्टो मैत्रेय उक्तवानित्याह द्वैपायनस
खः द्वैपायनस्य सखा भगवान्मैत्रेय एवमान्वीक्षिक्यां तत्त्वनिरूपणे प्रचोदितः प्रवर्तितः विदुरं प्राह उवाच ४ उक्तमेवाह पितरि
सादिना पितरि कर्दमे अरण्यं प्रति प्रस्थिते सति भगवान्कपिलः मातुर्देवहूत्याः प्रियं कर्तुमिच्छया तस्मिन्नेव बिंदुसरस्तीर्थे वासीदुषि
तवान् ५ आसीनमुपविष्टं तत्त्वमार्गस्याग्रं पारं पश्यतीति तं स्वसुतं कपिलं देवहूतिः धातुर्वचः स्मरमाना विंगमं प्रविष्टः कैरभाईतः अ
विद्यासंशयग्रंथिछेत्तारं त्वां विचरिष्यतीति ब्रह्मवाक्यं छित्वा तेऽरुद्द पञ्च्यथि मोदयोर्विभुभावन इति कर्दमवाक्यं वा संस्मरन्त्याह ६ हे भूमन् असता
प्रकृतिपरिणामरूपाणामिंद्रियाणां तर्पणान्नितरां भृशं निर्विण्णास्मि नाइंद्रियतर्पणान्नोदेनैव भवितव्यकं पंनिर्वेद इति द्रष्टव्यं हे प्रभो
यच्चक्रे धत्ते भगवान्स्वच्छंदात्मात्ममायया तानि मे श्रद्दधानस्य कीर्तन्यान्यनुकीर्तय ३ सूत उ० द्वैपायनसखस्त्वेवं मैत्रेयो भगवांस्त
था प्राहेदं विदुरं प्रीत आन्वीक्षिक्यां प्रचोदितः ४ मैत्रेय उ० पितरि प्रस्थितेऽरण्यं मातुः प्रियचिकीर्षया तस्मिन्बिंदुसरेऽवात्सीद्भग
वान्कपिलः किल ५ तमासीनमकर्माणं तत्त्वमार्गाग्रदर्शनं स्वसुतं देवहूत्याह धातुः संस्मरती वचः ६ देवहूतिरु० निर्विण्णा नितरां भूम
न्नसदिंद्रियतर्षणात् येन संभाव्यमानेन प्रपन्नांधं तमः प्रभो ७ तस्य त्वं तमसोंधस्य दुष्पारस्याद्य पारगं सच्चक्षुर्जन्मनामंते ल
ब्धं मे त्वदनुग्रहात् ८ य आद्यो भगवान्पुंसामीश्वरो वै भवान्किल लोकस्य तमसांधस्य चक्षुः सूर्य इवोदितः ९ अथ मे देव संमोहम
पाकृष्टुं त्वमर्हसि योऽवग्रहोऽहं ममेतीत्येतस्मिन्योजितस्त्वया १० संभाव्यमानेन संपाद्यमानेन येनेंद्रियतर्पणेनांधं तमः धयतीलंधंतमः प्र
पन्नेऽप्रविष्टास्मि ७ दुःपारस्यापारस्यांधस्य तमसः पारं गमयतीति पारगः त्वमेव श्रेष्ठं चक्षुः मे मया जन्मनामंते त्वत्प्रसादाल्लब्धं ८ तदेव
प्रपंचयति य इति पुंसां जीवानामीश्वरो नियंता आद्यो जगत्कारणभूतो यो भगवान्स भगवानेव तमसांधस्य लोकस्य चक्षुः चक्षुरधिष्ठाता सू
र्य इवोदितः यथा सूर्य इवेत्येतस्य ज्ञानं तदा चक्षुरूपत्वं उदितः ९ उदितः सूर्य इव मे मम संमोहमपाकृष्टुमपनेतुं हे देव त्वमर्हसि कोसौ
संमोहः योऽपाकृष्टव्य इत्यत्राह अस्मिन्नु देहे अहं ममेत्येवंरूपोऽवग्रहोऽभिमानः त्वयैव योजितः स एवेत्यर्थः त्वत्संकल्पादेव ज्ञानमोहस्त्वयैव निव
र्तितव्य इत्यर्थः यो बंधकः स एव मोचक इत्यभिप्रायादिति भावः १० ॥ ॥ ॥ ॥ ॥ ॥ ॥

ते

ते२

भाविकं स्वरूपं तत्र विशेषभूतब्रह्मणो ऽननुसंधाने विशेषणभूतप्रत्यगात्मानुसंधानासंभव एव न हि अक्षिगुणादीन् विना जातिगु
णादयः पृथगुपलभ्यंते तस्मात्प्रकृतिविलक्षणप्रत्यगात्मचिंतनमपि ब्रह्मशरीरतयैव कार्यं एवं विमुंचानं चिंतनमेव पश्चाद्विशेषणभू
तभगवद्भक्तिरूपापन्नं मुक्तिसाधनं न केवलं इत्याह नेति अखिलात्मन्यखिलानां जीवानामात्मभूते भगवति युज्यमानया भक्त्या सदृ
शः स्वान्यः ब्रह्मसिद्धये भावप्रधानो ब्रह्मशब्दः ब्रह्मैकयोगित्यादिवत् ब्रह्मत्वसिद्धयेत्यर्थः ब्रह्मत्वं ब्रह्मप्रकारः ब्रह्मप्रकारसिद्धये ब्रह्मवद
पहतपाप्मत्वादिगुणाष्टकाविर्भावसिद्धये इति यावत् योगिनां शिवः अन्यानपेक्षः पंथाः उपायः अन्यो नास्ति ब्रह्मात्मकप्रत्यगात्मा
नुसंधानपूर्वकप्रत्यगात्मशरीरकभगवद्भक्तिसदृशो मुमुक्षुपायः कश्चिदन्यो नास्तीत्यर्थः १८ एवमनभिसंहितफलस्वधर्मनिरस्तक
मादिदोषविशुद्धांतःकरणानुसंहितब्रह्मात्मकप्रत्यगात्मयाथात्म्यज्ञानयोगपूर्वकभगवद्भक्तिर्मोक्षसाधनमित्युक्तं अथ प्रसंगस्य

न युज्यमानया भक्त्या भगवत्यखिलात्मनि सदृशोऽस्ति शिवः पंथा योगिनां ब्रह्मसिद्धये १८ ॥
प्रसंगमजरं पाशमात्मनः कवयो विदुः स एव साधुषु कृतो मोक्षद्वारमपावृतं २० तितिक्षवः
कारुणिकाः सुहृदः सर्वदेहिनां अजातशत्रवः शांताः साधवः साधुभूषणाः २१ ॥ ॥ ॥

निवृत्तिधर्मस्य रुचिजनने सत्संगतिः स्वप्रथमं कारणं असत्संगतिः संसृतिहेतुरिति विवदन्सतां रूपं चाह प्रसंगमिति पंचभिः प्रसंगमः
सक्तिविशेषः असत्सु दृष्टियार्थेषु तत्परायणेषु प्रसंगं प्रकृष्टासक्तिमात्मनो जीवस्याजरमशिथिलं पाशं बंधकं कवयः सुधियो विदुः स ए
व प्रसंग एव सत्स्वनेनासत्प्रवृत्तिविषयपरिहरेण प्रसंगमात्रस्य परामर्शः साधुषु कृतः अपावृतमविघ्नोपहतं मोक्षद्वारं मोक्षोपायः
२० के ते साधव इत्यत्राह तितिक्षवः मूर्खैर्क्षिप्ता अपि सहिष्णवः सहनशीलाः कारुणिकाः स्वार्थनिरपेक्षपरदुःखनिराचिकीर्षवः अत एव स
र्वदेहिनां सुहृदः मित्राणि अत एवाजाताः अविद्यमानाः शत्रवो येषां ते शांताः इंद्रियमारीनोपलक्षणं शमदमादिसंपन्नाः साध
वः परकार्यसाधकाः साधुशीलं तदेव भूषणं येषां ते साधव इति शेषः पद्यासाधव इति विधेयविशेषः एते साधव इत्यर्थः २१ ॥

प्रकृतिविविक्तात्मस्वरूपग्रहणयोग्यमनःस्वरूपमाह अहमिति त्रिभिः अहंममाभिमानाभ्याम् अनात्मनि देहे आत्माभिमानः अह
ममाभिमानः अस्वीये [illegible] स्वीयाभिमानः तथा च सर्पते अनात्मन्यात्मबुद्धिर्या अस्वे स्वमिति या मतिः अविद्यातरुसंभूतं बीजमेतद्
द्वि
धा स्थितं इति आभ्याम् अहंममाभिमानाभ्याम् उत्पन्नैः कामलोभादिभिर्मलैः कामादि हेतुकैः पुण्यापुण्यरूपैर्मलैर्यदा वीतं रहितं अनभिसंहि
न४ तफलेश्वराराधनेन तद्वर्णाश्रमोचितैर्धर्मैः कामादिरहितमत एव शुद्धमत एवादुःखमसुखं मैन्द्रियकसुखदुःखैरनभिभूतमत एव सम
सदैकरूपं यदा भवति तदा पुरुषः एवंविधमनस्कः पुमान् ज्ञानवैराग्ययुक्तेन ज्ञानमत्र शास्त्रजन्यमात्मस्वरूपयाथात्म्यावगाहि ज्ञा
नं वैराग्यं विषयेष्वनासक्तिः ताभ्यां युक्तेन विशेषाभक्तिभगवद्भक्तियुक्तेन चात्मना मनसा साक्षात्कृततत्त्वः प्रकृतिकार्यशरीरेन्द्रियमन आ
णादिभ्यः परं स्वरूपतः स्वभावतश्चात्यन्तविलक्षणमत एव केवलं सत्त्वादिगुणरहितं प्रकृतिपरिणामगवदेवमनुष्यत्वादिरहितम
म८ त एव निरन्तरं प्रतिशरीरमभिन्नमपि सर्वत्र ज्ञानैकाकारतया वैषम्यरहितं निर्दोषं हि समं ब्रह्मेति ह्युच्यते अणिमानमणुतरं स्वरूपेकथ

अहंममाभिमानोत्थैः कामलोभादिभिर्मलैः वीतं यदा मनः शुद्धमदुःखमसुखं समम् १६ तदा पुरुष आत्मानं केवलं प्रकृतेः परं
निरन्तरं स्वयंज्योतिरणिमानमखण्डितम् १७ ज्ञानवैराग्ययुक्तेन भक्तियुक्तेन चात्मना परिपश्यत्युदासीनं प्रकृतिं च हतौजसम् १८ ॥

नभिदं ज्ञानस्वरूपत्वस्यापुपलक्षणमिदं अणिमत्वादेवाखण्डितं खण्डनानर्हं मदाद्यत्वाच्छेद्यत्वादीनामपुपलक्षणं खण्डनरहं नत्वेकदर
न साधनभूता हि परस्पाग्निजलादयः छेद्यदाह्यक्लेद्यशोष्यत्वादीनि विवर्जयति आत्मनस्त्वनिरतिशयाणुत्वेन सर्वान्तःप्रवेशयोग्य
दि तया व्यापकत्वात् व्याप्यपरस्वधादिसाधकैर्दत्तैर्भिन्नैर्विनाश्यत इत्यर्थः स्वयंज्योतिः स्वयंप्रकाशं दीपादिवदिति दृष्टान्तोऽभिप्रेतः तत्र
ते यथा दीपादिस्तेजःस्वरूपो धर्मरूपस्वप्रकाशकस्तद्वदयमात्मापि ज्ञानस्वरूपो ज्ञानगुणकः स्वप्रकाशश्चेति भावः एवंविधमुदासीनं
निर्व्यापारमात्मानं प्रत्यगात्मानं हतौजसं संसारयितृत्वरूपबलहीनां प्रकृतिं च पश्यति १७ एवमात्मस्वरूपग्रहणयोग्यमनःस्वरूपाभि
धायात्मयाथात्म्याभिसाक्षात्कृतावत्र भगवद्भक्तियुक्तात्मना पश्यतीत्यनेन केवलप्रकृतिविलक्षणतयात्मस्वरूपचिन्तनामात्रेण प्रत्यगा
त्मसाक्षात्कारः किंतु ब्रह्मात्मकप्रत्यगात्मानुसंधानेनैव प्रत्यगात्मसाक्षात्कारोऽपि भवतीति सूच्यते ब्रह्मात्मकत्वमेव तस्य प्रत्यगात्मनः स्वा न२

मत्

कथं सतां प्रसंगान्निवृत्तिधर्माभिरुचिरुत्पद्यत इत्यत आह सतामिति सतां साधूनां प्रसंगात् मे वीर्यसंविदः वीर्याणि संवेदयंतीति वीर्य
संविदः निजपराक्रमाभिव्यंजिकाः यद्वा मावेर्विष्णोः वीर्याणां संवित् संवेदनं यासु ताः कथाः एवं वीर्येणानन्तसंकुचितज्ञानगुणेन सर्वेषां
सर्वस्वरूपतः स्वभावतश्च सा आत्मरतेनीतिनियामस्वरूपस्य मतेत्यर्थः कथा हृत्कर्णयोः रसायना अमृततुल्याश्चिकरा भवंति प्रवर्त्यं
ते तज्जोषणात् आसां कथानां जोषणात् सेवनात् आशु अपवर्गवर्त्मनि अपवर्गस्य मोक्षस्य वर्त्मनि द्वारभूते गुरूपसदने श्रद्धात्वरा भव
त्युत्पद्यते स संनिधो भगवत्कथाश्रवणे सति तद्यथेह कर्मजितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयेनेनास्य कृतः
कृतेन न तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते इति स्वर्गा

२२५

सतां प्रसंगान्मम वीर्यसंविदो भवंति हृत्कर्णरसायनाः कथाः तज्जोषणा
दाश्वपवर्गवर्त्मनि श्रद्धा रतिर्भक्तिरनुक्रमिष्यति २५ भक्त्या पुमाञ्जा
तविराग ऐंद्रियाद्दृष्टश्रुतान्मद्रचनानुचिंतया चित्तस्य यत्तो ग्रहणे यो
गयुक्तो यतिष्यते ऋजुभिर्योगमार्गैः २६ ॥ ॥ ॥ ॥ ॥

दीनां स्वर्गादीनां सातिशयित्वक्षयिष्णुत्वं ब्रह्मोपासनस्यानंतस्थिर फलत्वं केवल कर्मणामनंतत्वादुष्करत्वासपरिमित फलत्वाद्भुत
कत्वं निवृत्तिधर्माणां तद्विपरीतत्वं चश्रुत्वतः जातविरागस्य पुंसः तत्र निवृत्तिधर्मो जायत इत्यर्थः प्रत्येकाभिप्रायेणानुक्रमिष्य
तीत्येकवचननिर्देशः २५ सत्संगादिप्रभृतिश्रवणश्रद्धाभगवत्प्रीतिरूपापन्नभक्त्या तु तन्नाम्नायां तत्रैव चित्तसावधानेन यमयोते त्याह भक्त्ये
ति मम रचनानां सृष्ट्यादिव्यापाराणां चिंतायस्यां तया भक्त्या अनेन ब्रह्मस्वरूपवत्तद्गुणानामप्युपास्यत्वमुक्तं दृष्टश्रुतादैहिकामु
ष्मिकात् [illegible] पशुपुत्र स्वर्गादिरूपात्स [illegible] त्यर्थः जातउत्पन्नो विरागो यस्य सपुमान्योगयुक्तः अनभिसंहितफलकर्मयो
गज्ञानयोगाभ्यां युक्तः सन्नृजुभिः चित्तैकरूप्य संपादकैः योगस्य भक्तियोगस्य मार्गैः साधनैर्विवेकविमोकाभ्यासादिभिः चित्तस्य ग्रहणे
नियमने यत्तः प्रमादरहितः यतिष्यते यत्नं कुर्यात् २६

भा. त.
११६

ने

किंच मयीश्वरे कपिलस्यावेशावतारत्वेपि जीवशक्तेरभिभूतत्वाद्भगवच्छक्तेरेवोद्भूतत्वाच्च मयीति व्यपदेशः अनन्येनाव्यभिचारे
ण भावेनांतःकरणेनाभिप्रायविशेषेण वा ये दृढामविचाल्यां भक्तिं कुर्वंति ते साधव इत्युत्तरत्रान्वयः तानेव विशिनष्टि मत्कृतेत्य
दृष्टस्यानिककर्माणि यैस्ते परित्यक्त मदाराधनविरोधिप्रवृत्तिधर्मा तथा त्यक्ता मद्भजनविरोधिस्वजनबांधवाः २१ अह
मेवाश्रयो विषयो यासां ताभिः कथाभिः मृष्टाः कथा मृष्टत्वमेव प्रपंचयति शृएवंति कथयंति [illegible] गायंति ते तिमदाश्र
य कथाश्रवणात् क्षिप्रि हृष्टा इत्यर्थः यद्वा कथाश्रवणेन हृष्टाः पुनस्त एवम् एवंति कथयंति च यद्वा मृष्टा इति व्यस्तं पदं मृष्टाः सं

मय्यनन्येन भावेन भक्तिं कुर्वंति ये दृढां मत्कृते त्यक्तकर्माणस्त्यक्तस्व
जनबांधवाः २२ मदाश्रयकथा मृष्टाः शृएवंति कथयंति च तपंति विवि
धास्तापा नैतान्मद्गतचेतसः २३ त एते साधवः साध्वि सर्वसंगविवर्जि
ताः संगस्तेष्वथ ते प्रार्थ्यः संगदोषहरा हि ते २४॥ ॥ ॥ ॥

तुष्टाः संतो मदाश्रयकथा शृएवंति कथयंति चेत्यर्थः मय्येव गतं न्यस्तं चेतो यैस्ते अतएव तान् विविधा नानाविधास्तापाः आ
ध्यात्मिकादयः न तपंति न क्लेशयंति एकात्मगतचेतस इति पाठांतरं एकस्य भगवत एवात्मत्वं अन्येषां चेतनाचेतनानां
तच्छरीरत्वात् एक एव परमपुरुषः आत्मेति तस्मिन् गतं चेतः येषां तानित्यर्थः २३ हे साध्वि त एते सर्वैः संगैर्विषयासंगैर्विवर्जि
ता विरहिताः साधवः तेषु साधुषु अथेति प्राप्य मे प्रथमं ते तव सा संगः प्रार्थ्यः प्रार्थनीयः हि यस्मात्ते साधवः संगदोषहराः इ
न्द्रियार्थप्रसंगहेतुकानादिपुण्यपापरूपदोषहरा इत्यर्थः २४॥ ॥ ॥ ॥ ॥ ॥ ॥

भा॰त॰टी॰
२७

एवं विवेकादिभिर्ज्ञानयोगेन चानुगृहीत भगवद्भक्तियोगस्यैवमुमुक्षुपायत्वं संग्रहेणाश्रुत्य पुनः तद्विस्तरं बुभुत्सया पृच्छति त्रिभिः उचितामु
क्तिसाधयितुं योग्यात्वयि भक्तिः कात्वेति भक्तिस्वरूपप्रश्नः कावित्काश्चिदित्यपि पाठः तर्हि तदापयमेवार्थः कीदृशी तिममतेगोचरा
योग्यानेन भक्त्याधिकारानुसारेणास्माविति ता वा नरभेदप्रश्नः यया भक्त्याहं ते पदं यानुरातेतव निर्वाणं निरतिशय सुखं पदमंजसा
सुखेनान्वश्नवै अनुप्राप्नुवानिति अत्राह मितुपासकप्रश्नः तेपदं स्वसंदूत्पनेनप्राप्यप्रश्नः निर्वाणमिति प्राप्तिफलप्रश्नः अंजसे
ति विघ्नानुपहतत्वप्रश्नः २८ त्वया हितः उक्तः सकीदृशः किं प्रकारः [illegible] तस्याङ्गानि कति कति संख्याका
नि यलीयभ्यां योगः तत्वस्यात्मतत्वस्याववोधनं अवबुध्यते नेनेत्यववोधनं साक्षात्कारसाधनमुपासनं निवर्तत इत्यर्थः कीदृश
इति प्रकारप्रश्नः कति चांगानीत्यंगगणनाप्रश्नः एवमर्थपंचकं पृष्टं भवति २८ तदेतद्रूपायोपेयविरोधिफलस्वरूपं दुर्ज्ञेयं हे हरे

यषा॰८
यो षा ऽ त एव मंदधीरहं भवदनुग्रहात् सुखं बुध्येयं जानीयां तथा मे मह्यं जानीहि ज्ञापय ३० एवमापृष्टः कपिलो भगवद्भक्तियोगम

देवहूतिरु॰ का चास्य त्वय्युचिता भक्तिः कीदृशी मम गोचरा यया पदं ते निर्वाणमंजसान्वश्नवा अहं २८ यो योगो भगवद्बा

१७६

णो निर्वाणात्मंस्त्वयोदितः कीदृशः कति चांगानि यतस्तत्त्वावबोधनं २९ तदेतन्मे विजानीहि यथाहं मंदधीर्हरे सुखं बु

२२६

ध्येय दुर्बोधं योषा भवदनुग्रहात् ३० मैत्रेय उ॰ विदित्वार्थं कपिलो मातुरित्थं जातस्नेहो यत्र तन्वाभिजातः तत्त्वाम्नायं

यत्प्रवदंति सांख्यं प्रोवाच वै भक्तिवितानयोगं ३१ कपिल उ॰ देवानां गुणलिंगानामानुश्रविककर्मणां सत्त्व एवैकम

नसो वृत्तिः स्वाभाविकी तु या ३२ वक्तव्यमाभासे ताहं मैत्रेयः विदित्वेति कपिलं मातुर्देवहूत्याः अर्थं भक्तियोगादि

त॰२
वार्थसंबंधिजिज्ञासितं स्वरूपं विदित्वा जातस्नेहः तत्र हेतुः यत्र यस्यां तन्वा देहेन जातः तत्त्वाम्नायं तत्त्वशास्त्रं सांख्यं तत्त्वसंख्यानेना
त्मस्वरूपप्रकाशकं यत्प्रवदंतीति भक्तिवितानयोगं भक्तिविस्तररूपं योगं उवाच ३१ स विस्तरं भक्तियोगं संक्षिप्य ध्यायेन वो
धयिष्यन् जीवस्य परस्य ब्रह्मणो माहात्म्यसूचनाय जगत्सृष्ट्यादिलीलाः बहुशेन कथयिष्यंस्तावद्भक्तियोगसंग्रहेण तत्स्वरू
पकथनपूर्वकं प्रशंसति देवानामिति गुणलिंगानां गुणाः शब्दादि विषयाः तेषां लिंगानां ज्ञापकानां देवताधिष्ठितानां तत्स्व
देवताधिष्ठितानां ज्ञानेंद्रियाणामित्यर्थः तथा आनुश्रविककर्मणां मनुसत्त्वादिविच्छिन्नपाठपरंपरया श्रूयते इत्यनुश्रवो वेदः त
द्विहितमानुश्रविकं कर्म यैस्तेषां स्वप्रसिद्धव्यापारानुष्ठानपराणां कर्मेंद्रियाणामित्यर्थः तेषामुभयेंद्रियाणामेकरूपमनेन

योगमार्गेनैवादर्शयन्नानयैव भक्त्या पुमान्मां प्राप्नोतीत्याह प्रकृतेर्गुणानां सत्त्वादिगुणपरिणामरूपाणामविहिताप्रवृत्तिविषयनिषि
निषिद्धानां कलंजगंजनचंडालपतितादिसंबंधिकं भक्ष्यादिविषयपदार्थरूपजातानामयनिमित्तं दुष्टानामसेव्यानामसेवया अनेन वि
वेक उक्तः वैराग्य विजृंभितपदज्ञानं तेन वैराग्यं कामनाभिष्वंगः शमदमादिरिति यावत् ज्ञानशब्देन प्रकृतिविलक्षणात्मयाथात्म्य
ज्ञानयोगः शुभाश्रयसंशीलनरूपध्यानं च विवक्षितं अनेनाभ्यास उक्तः योगेनानभिसंहितफलकर्मयोगेनानेन क्रिया उक्ता चका
रेण कल्याणानवसादानुद्धर्षा विवक्षिताः तत्र सत्यार्जवदयादानाहिंसानभिध्याः कल्याणानि अनभिध्या परकृतदोषाचिंतनं पुत्रविप
सादिस्मरणजनितखेदाभावोनवसादः अनुद्धर्षः पुत्रजन्मादिनिमित्तातिसंतोषः एतैः प्रकृतिगुणासेवादिभिर्मांपादितेनाऐश्व
र्यकैवल्यादिप्रयोजनविधुरया इत्यर्थः भक्त्या इहैतद्देहावसाने प्रतीचो जीवस्यात्मानमंतरात्मानं मामवरुंधे आप्नोति यद्वा प्रत्यगा
त्मशरीरिणं मामित्यर्थः पुरुषः प्रत्यग्जीवः आत्मानं मामवरुंध इत्यर्थः अत्र गुणासेवादिभिर्भक्तेर्निसहोपायसमुच्चयः किं त्व
सेवादिभिरनुगृहीतया भक्त्येति भक्तेरेव साक्षात्साधनत्वं इतरेषां तदनुग्राहकत्वेनैव परंपरया साधनत्वं इत्यभिप्रायेण गुणासे

असेवयायं प्रकृतेर्गुणानां ज्ञानेन वैराग्यविजृंभितेन योगेन मय्यर्पितया च भक्त्या मां प्रत्यगात्मानमिहावरुंधे २७

वादिभिर्भक्त्योक्तं इहावरुंधे इत्यनेन इह जीवदशायामेव मुक्तिं लभत इति जीवन्मुक्तिरियमुच्यत इति व्याख्यानं कर्तव्यं जी
वन्मुक्तेरप्रामाणिकत्वात् तथा ह्यापस्तंबेन सा मुक्तिर्निरस्ता वेदानिमं लोकममुं च परित्यज्यात्मानमन्विच्छेत् बुद्धे क्षेमप्रापणं तच्छा
स्त्रैर्विप्रतिषिद्धं बुद्धे चेत् क्षेमप्रापणमिहैव न दुःखमुपलभेत एतेन परं व्याख्यातमिति कश्चिज्जीवन्मुक्तिः सशरीरस्यैव मोक्ष
इति चेन्माता मे वंध्येतिवदसंगतार्थमिदं यतः सशरीरत्वं बंधः अशरीरत्वमेव मोक्ष इति न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहति
रस्ति अशरीरं वाव संतं न प्रियाप्रिये स्पृशत इत्यादिश्रुतिभिस्तेनैवोपपादितत्वादिति दिक् विस्तरस्तु भाष्यादिष्वनुसंधेयः अथम
र्त्योमृतो भवत्यत्र ब्रह्म समश्नुत इति श्रुतिर्जीवन्मुक्तिमभिदधातीति चेन्न अत्रोपासनदशायामपि ब्रह्मानुभवतीति श्रुत्य
र्थवर्णनात् अन्यथा देहपातावधिविलंबपरया तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्य इति श्रुतेर्विरोधापत्तेः तस्माद्यथो
क्त एवार्थः २७

भा॰तृ॰टी॰
११८

अथो (ऽ)र्चिरादिगत्यागमनानंतरं मम मायाविनस्तां विभूतिं मात्रल्लोकपर्यंतभूतिं तथाऽनुप्रवृत्तं स्वभक्तिमनुसृत्य प्रवृत्तमष्टांगमणिमाद्यष्टप्रकारमैश्वर्यं भागवतीं श्रियं मुक्तिं न स्पृहयंति भागवतीं श्रियं न स्पृहयंतीत्यत्र मायाविभूत्यादीनि द्वितीयार्थः केचित्पुनर्व्याख्यातवतः अथो वा भागवतीं श्रियमेव न स्पृहयंति किं मायाविभूत्यादीन् स्पृहयंतीति वक्तव्यमिति अथवात्र जनलोकांतर्भूतभगवल्लोकस्य श्रियमपि नेच्छंति किंतु ते परस्य प्रकृतिपुरुषविलक्षणस्य मम लोके नित्यविभूतावश्नुवते प्राप्नुवंति स्वधियं सुखातिशयस्वरूपां नन्वलोकान्प्राप्नुवंति किंतु नित्यनिरतिशयसुखरूपं मल्लोके प्राप्नुवंतीत्यर्थः ३७ ननु लोकत्वाविशेषात्स्वर्गादिवल्लोकभोग्यभोगोपकरणानां नाशः स्यात् अत आह नेति हे शांतरूपे यन्मच्छांतरूपे शुद्धसत्त्वमयात्मके मल्लोके मत्पराः मदनुभवपराः कर्हिचित्कदाचिदपि न नंक्ष्यंति न मदनुभवरहिता भवंति मे मदीयः अनिमिषो हेतिः कालचक्रं न लेढि न ग्रसति तत्र हेतुः येषामिति येषां निरतिशयप्रीतिविषय आत्माहं सुतश्च सखेत्यादि विषयः सखेव विश्वासास्पदं गुरुरिव हितोपदेष्टा सुहृदिव हितकारी इष्टं दैवमिव पूज्यः एवं सर्वभावेन

अथो विभूतिं मम मायाविनस्तामैश्वर्यमष्टांगमनुप्रवृत्तं । श्रियं भागवतीं वास्पृहयंति भद्रां परस्य मे तेऽश्नुवते तु लोके ३७

.२२७ नकर्हिचिन्मत्पराः शांतरूपे नंक्ष्यंति नो मेऽनिमिषो लेढि हेतिः । येषामहं प्रिय आत्मा सुतश्च सखा गुरुः सुहृदो दैवमिष्टं ३८

पासीनानहरहरनुष्ठीयमानवर्णाश्रमधर्मानुगृहीतमदुपासनरूपमत्समाराधनप्रीतोहं मया यथात्मानुभवरूपां नैश्वर्यं पुनर्नावर्तयामीति भगवतोभिप्रायः तथा च भगवतास्वयमेवोक्तं मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतं नाप्नुवंति महात्मानः संसिद्धिं परमां गताः आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन मामुपेत्य तु कौंतेय पुनर्जन्म न विद्यते इति च श्रुतिरपि स खल्वेवं वर्तयन्यावदायुषं ब्रह्मलोकमभिसंपद्यते न च पुनरावर्तते इत्यादिका एतेन परिपरमपुरुषापत्तेर्मुक्तैश्वर्यं पतति सस्वतंत्रत्वेन तत्संकल्पान्मुक्तस्य पुनरावृत्तिसंभावनाशंका परास्ता न हि परमपुरुषः सत्यसंकल्पः अत्यर्थप्रियं ज्ञानिनं लब्ध्वा कदाचिदप्यावर्तयिष्यति यदेवमाह प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतं आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिं बहूनां जन्मनामंते ज्ञानवान्मां प्रपद्यते वासुदेवः सर्वमिति स महात्मा सुदुर्लभः इति ३८ नन्वपहतपाप्मत्वादेः सत्यसंकल्पत्वपर्यंतस्य गुणास्य प्रत्यगात्मनः स्वाभाविकस्यैवाविर्भावः अतो न मुक्तैश्वर्यं परम ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

८१
रम
११८

ति२

सानिमित्ता भागवती भगवत्संबंधिनी भक्तिरित्यर्थः उभयविधैरिंद्रियाणां मनसश्च सत्त्वे वृत्तिर्निमित्तश्रवणकीर्तनस्मरणादिः अथ भक्तिं स्तौ
ति सिद्धेः ऐश्वर्यपक्षिवत्यादिसिद्धेः गरीयसी श्रेष्ठा निरतिशयानंदरूपभगवदनुभवफलसाधनभावादिभावः सिद्धेर्गरीयस्त्वमेवाह या भा
गवती भक्तिः कोशमनादिपुण्यपापरूपं कर्मवासनाकोशं जरयति जीर्णं करोति नाशयतीति यावत् तत्र दृष्टांतः निगीर्णं भुक्तमन्नं यथाना
दिरनलो जाठराग्निर्यथेति ३३ पुनर्भक्तिमेव प्रस्तौति निरतिशयानंदरूपभगवदनुभवरूपभक्तियोगनिष्ठास्तत्साधर्म्यरूपमुक्तिमपि नेच्छं
तीत्याह केचिन्मत्पादयोः सेवायामभिरताः आसक्ताः मदर्थं ईहा सर्वेंद्रियचेष्टा येषां ते भागवताः अन्योन्यतः परस्परं मम पौरुषाणि कल्या
णगुणप्रकाशकानि चेष्टितानि प्रसज्य प्रसक्त्या सभाजयंतः सम्यगनुमोदयंतः पौरुषप्रसंगजनितानंदसंप्लुताः संतो मम एकात्मतां सा
रूप्यभावना मम समानगुणकृतां मम साधर्म्यभागतामिति युज्यते न स्पृहयंति नेच्छंति किंतु हे अंब संतः ये मम रुचिराणि रुदयाणिद्र?

१ अनिमित्ता भागवती भक्तिः सिद्धेर्गरीयसी जरयत्याशु या कोशं निगीर्णमनलो यथा ३३ नैकात्मतां मे स्पृहयंति केचि
न्मत्पादसेवाभिरता मदीहाः येन्योन्यतो भागवताः प्रसज्य सभाजयंते मम पौरुषाणि ३४ पश्यंति ते मे रुचिराणि अंब संतः प्रस
न्नवक्त्रारुणलोचनानि रूपाणि दिव्यानि वरप्रदानि साकं वाचं स्पृहणीयां वदंति ३५ तैर्दर्शनीयावयवैरुदारविलास
हासेक्षितवामसूक्तैः हृतात्मनो हृतप्राणांश्च भक्तिरनिच्छतो गतिमण्वीं प्रयुंक्ते ३६ ॥ ॥ ॥ ॥ ॥

तः२

सन्नानि वक्त्राणि अरुणलोचनानि येषु तानि दिव्यान्यमानुषाणि वरप्रदानि अभिमतार्थप्रदानि वराकेभय इति शेषः रूपाणि दिव्यमंगल
शरीराणि पश्यंति ध्यायंति रूपैः साकं सह वाचं स्पृहणीयां वाचं मदुक्तिं वदंति परस्परं कथयंति ३५ यद्यपि मुक्तिस्तैर्न प्रार्थ्यते तथापि
तेषामयत्नप्राप्तं मत्कृपया मुक्तिर्भवतीत्याह तैरिति द्वाभ्यां दर्शनीया अवयवा येषु तैः विलासो लीला मंदहासपूर्वकमीक्षणमवलोकनं वा
मसूक्तं मधुरभाषणं उदाराणि विलासादीनि येषु तैर्मद्रूपैः हृतमात्मा मनो येषां तान् हृताः प्राणाः ज्ञानकर्मेंद्रियाणि येषां तान् अनि
च्छतः मुक्तिमप्रार्थ्यमानानपि भक्तिः एवं च मद्भक्तिरण्वीं सूक्ष्मां एकपदामित्यर्थः गतिमर्चिरादिगतिं प्रति अर्चिरादिगतेर्बहुभिः
रक्षस्त्वादण्वीमित्युक्तं प्रयुंक्ते प्रारब्धावसाने प्रवर्त्तयति गमयतीति यावत् ३६ ॥ ॥ ॥ ॥ ॥ ॥

रूदयाणि?

भा॰ तृ॰ टी॰
११९

मद्भजनादेव मोक्षस्तत्र सदाचारं प्रमाणयति ज्ञानेति तस्माद्योगिनो मदुपासका ज्ञानवैराग्याभ्यां ज्ञानयोगविवेकादिसा
धनैः ... भ्यां युक्तेन मद्भक्तियोगेन क्षेमाय नित्यनिवृत्तिश्रेयानंदस्वरूपमदनुभवात्मकक्षेमाय अकुतोभयं कुतश्चिदपि रहि
तं ... मत्पादमूलमेव प्रविशंति भजंते प्राप्नुवंतीति वा ४३ आत्मोऽसर्वशास्त्र... न्यायेनोक्तं वक्ष्यमाणं च कृत्स्नशास्त्रार्थं
स्फुटं ... हणाय संगृह्य निर्दिशति एतावानिति तीव्रेणांतरायानुपहतेन भक्तियोगेन मनः स्थिरं मय्यर्पितं सत् तत्रैव स्थितं नैश्चलं भ
वति इत्येतावानेवा... ऽस्मिन् प्रकृतिमंडले पुंसां बद्धजीवानां निःश्रेयसोदयः परमपुरुषार्थोत्कर्षः ४४ इति तृतीये पंचविंशः २५ एवमुक्त
चापभूतं भगवद्भक्तियोगप्रस्तुतस्य जगत्कारणविषयत्वस्य कारणत्वं तु ज्ञेयमिति ... भगवतः सत्यादि आधार
नविवक्षस्य सापणाभूतस्य सत्यादिकारणत्वं प्रकृति पुरुषकाल शरीरकस्य प्रकृतिपुरुषादि शरीरशोधनमंतरेण न शरीरकस्य
तस्य सत्यादिकारणत्वकथनायोगात् प्रथमं प्रकृत्यादिस्वरूपशोधनं तद्विवेकस्य मोक्षोपायत्वकथनपूर्वकं प्रतिजानीते अथेति त॰

चविवक्षु

ज्ञानवैराग्ययुक्तेन भक्तियोगेन योगिनः क्षेमाय पादमूलं मे प्रविशंत्यकुतोभयं ४३ एतावानेव लोकेऽस्मिन्पुंसां निःश्रेयसोदयः तीव्रेण भक्तियोगेन मनो मय्यर्पितं स्थिरं ४४ इति श्रीभा॰ तृतीयस्कंधे पंचविंशोऽध्यायः २५ श्रीभगवानुः अथ ते संप्रवक्ष्यामि तत्त्वानां लक्षणं पृथक् यद्विदित्वा विमुच्येत पुरुषः प्राकृतैर्गुणैः १ ज्ञानं निःश्रेयसार्थाय पुरुषस्यात्मदर्शनं यदाहुर्वर्णये तत्ते हृदय
ग्रंथिभेदनं २॥

228

त्वानां प्रकृतिपुरुषकालादीनां लक्षणं स्वरूपकनिरूपकनिरूपितस्वरूपप्रतिपन्नधर्मजातं पृथगसंकरेण ते तुभ्यं वक्ष्यामि अप्र
स्तुतप्रसंगाशंकां वारयति यदिति यत्प्रकृत्यादितत्त्वानां लक्षणं विदित्वा पुरुषः मुमुक्षुः प्रकृतेर्गुणैः सत्वादिभिः सत्वादिगुणकार्यैर्ना
द्विबंधकपुण्यपापरूपैः दुरितैरित्यर्थः विमुच्येत प्रकृत्यादिविवेकहेतुकहेयोपादेयविवेकेन भगवदुपासनद्वारा विमुच्येत इति भावः
१ यत्सासात्मुमुक्षुपापभूतं ज्ञानं तदपि वक्ष्यामीत्याह ज्ञानमिति आत्मदर्शनमात्मा परमपुरुषः दृश्यते साक्षात्क्रियते नेनेत्या
त्मदर्शनं यज्ज्ञानं पुरुषस्य मुमुक्षोर्निःश्रेयसाय मोक्षायाहुः वेदांतास्तद्वाक्ष्यत ज्ञानं हृदयग्रंथिभेदनं अज्ञाननिवर्तकं ते तुभ्यं प
ह्यतेन वक्ष्ये हृदयग्रंथिभेदनं वर्णये २ तावत्प्रकृतिविलक्षणात्मस्वरूपं तावद्बोधयति अनादिरित्यादिभ्यां ॥ ॥ ॥

राम॰
११९

नु

से

पुरुषायत्तमितिचेद् अतः तस्य तथाविधत्वमेव परमपुरुषायत्तं तस्य नित्यस्थितिश्च तदायत्ता परमपुरुषस्येतरनिरपेक्षा पानिष्ठत्वान्नित्यत
यावत्तत्स्थितिनकश्चिद्विरोधः एवमेव परमपुरुषभोगोपकरणस्य लीलोपकरणस्य चानित्यत्वं तत्पारार्थ्यस्यायत्तस्य परमपुरुषस्य नित्येच्छ
यावदेव तथावस्थानमस्तीति श्रुणुयादवगम्यते एतत्सर्वमभिप्रेत्याह द्वाभ्यां इमं लोकममुं लोकं परलोकं च विसृज्य भावयित्वा लोकौ हेयौ
विदित्वा निश्चित्येत्यर्थः उभौ लोकौ पालनेन सुभयायीत माता तं उभयं लौकिकं धर्मसाधनं देहमित्यर्थः विसृज्य तस्मिन् देहे आत्माभि
मानं परित्यज्येत्यर्थः तथात्मानं देहमयेनुबन्धिनः पुत्रकलत्रादयः ये च रायः धनानि पशवो गृहाश्च तानि तान्यप्यवहाय हार्दे विसृज्यते
षु ममता मपोह्येत्यर्थः विमुक्तो मुखं सर्वज्ञं मोरणं कृत्वा सविगुरुत्वमहिमावेनानन्यया भक्त्या वापि तान् विमुच्य भक्ताभक्ताभजं त्वा गधये
त्तितान्मृत्योः संसारादिति पारयेसंत्तपारं न यामि पुनर्न संसारयामि एतन्म मनिसेषमिति भावः ४० अनन्ययेत्यनेन सर्वत्र देवतान्तरभ
क्तेरमुक्तिसाधनत्वं वक्तुं देवतान्तराणां क्षेत्रज्ञत्वात् कर्मवश्यत्वान्मान्नित्वे श्रुत्यनुवर्त्तित्वात् तद्भजनान्मुक्तिरित्याह नान्यत्रेति सर्वभूतानां

इमं लोकं तथैवामुमात्मानमुभयायिनं आत्मानमनु ये चेह ये रायः पशवो गृहाः ३९ विसृज्य सर्वाननन्यश्च मामेव विशिष्यतो मुखं
भजेत्यनन्यया भक्त्या तान् मृत्यो तारयितास्मि ४० नान्यत्र मद्भगवतः प्रधानपुरुषेश्वरात् आत्मनः सर्वभूतानां भयं तीव्रं निवर्त्तते ४१
मद्भयाद्वाति वातोयं सूर्यस्तपति मद्भयात् वर्षतींद्रो दहत्यग्निर्मृत्युश्चरति मद्भयात् ४२ ॥ ॥ ॥ ॥ ॥ ॥ ॥

जीवानामात्मनः धारकात् सर्वभूतानां धार्यत्वेन शरीरत्वमुक्तं प्रधानपुरुषयोः सर्वावस्थावस्थितचेतनाचेतनयोरीश्वरादन्तः
प्रविश्य नियन्तुरनेनकर्मायत्तस्य सर्वावस्थावस्थितप्रधानपुंयोर्नियामकत्वमुक्तं मद्भगवत अहं चासौ भगवांश्च तस्मात् सर्ववा
ह्यरूपान्मत्त इत्यर्थः अनेनस्वस्यैव मुक्तिप्रदत्वमितरेषां तु भोगत्वेनानुतारकत्वं च सूचितं अन्यत्रान्यस्मिन्सेव्यमाने इतिशेषः
तीव्रं दुःसहं भयं गर्भजन्मजरामरणादिसांसारिकभयं न निवर्त्तते ४१ प्रधानपुरुषेश्वरादित्यनेन सूचितमितरेषां माब्रह्मपर्य
न्तक्षेत्रज्ञानां स्वनियाम्यत्वमाह मद्भयादिति वायुसूर्यादयः मद्भयात् स्वस्वव्यापारं कुर्वन्ति मत्तः महाभयनिमित्ताद्
इनमुद्भवयंतः स्वव्यापारेषु जागरूकास्तिष्ठन्तीत्यर्थ अत्र भीषास्माद्वातः पवत इत्यादिश्रुत्यर्थ अनुसन्धेयः ४२ ॥ ॥ ॥ ॥

रुष२

भा॰ त॰ टी॰
१२०

एवंप्रकृतिविलक्षणमात्मस्वरूपं विशोध्यैवंविधस्य तस्य कथं कर्तृत्वभोक्तृत्वादिकमित्याशंकायां प्रकृतिसंसर्गकृतं कर्तृत्वादि वैशिष्ट्यमित्युक्तं प्रकृतिसंसर्गप्रकारमाह स इति स एष प्रकृतलक्षणः विभुर्महिमातिशयस्तस्मात्तेन सर्वान्तर्व्यापिन समर्थः प्रख्यगात्मा सूक्ष्मां नामरूपविभागानर्हनिरतिशयसूक्ष्मदशामापन्नामित्यर्थः अनेन जगदादावितिसामर्थ्याध्याहृतं तदेव प्रकृतेः सूक्ष्मदशापन्नत्वात् दैवीं देवस्य विष्णोर्लीलायामत्त एव लीलपा देवसंबंधिपरमार्थालीलयाहेतुभूतया परमिध्यानेनेतिवस्य माणत्वाद्दैवीमित्युक्तत्वात्परहृच्छयैवोपगतां प्राप्तां जीवस्य प्रकृतिसंबंधस्य सहजत्वाभावात्कदाचित्कामित्यर्थः गुणमयीं सत्वादिगुणप्रचुरां मायामभ्यपद्यत अ प्रकेचिदावरणविक्षेपशक्तिभेदेन प्रकृतिं द्वेधा विभज्य पुरुषमपि जीवेश्वररूपेण द्वेधा विभज्य एकस्य प्रकृत्याविवेकेन संसारः इतरस्य प्रकृतिं स्ववशीकुर्वतः सृष्ट्यादिव्यापारस्तत्र प्रकृत्याविवेकेन यः संसारस्यावरणशक्त्याहितो हितस्तस्य संसारप्रकारमनेनश्लोकेनोच्यते इति व्याचक्षते तेनदयुक्तं नित्यमविद्याप्रत्यनीकस्वप्रकाशरूपस्य प्रकृत्याविवेकानुपपत्तेः स्वलीलारूपसृष्ट्यादिव्यापारनिर्वृत्तये आवरणशक्त्यामुह्यतीति चेत् विवेकत्यासहत्वात् किं भ्रांतिहेतुर्लीलाउत भ्रांतिकार्य्यं तत्र भ्रांतिरेव नाद्यः लीलपास्य तस्य भ्रमसंपादनानुपपत्तेः बद्धस्यामि

सएषप्रकृतिंसूक्ष्मांदैवींगुणमयींविभुः यदृच्छयैवोपगतामभ्यपद्यतलीलया ४ ॥ ॥

तिसंकल्पेन हीश्वरो लीलारूपसृष्ट्यादि करोतीति तदयुक्तं नहि कश्चित्भ्रांतः स्यामिति संकल्प्य भ्रम्यति किंचेश्वरः सर्वज्ञस्य स्वानर्थरूपसंसारं न प्रवर्त्तयेत् ज्ञस्य सर्वज्ञत्वस्य क्षतिर्विरोधः विवेकनिषादनेन स्वानर्थपरिहाराय सजतीति चेत् तथापि लीलात्वमनुपपन्नं नहि हृद्युपहतस्यौषधादिनयनप्रवृत्तिर्लीला भवति नद्वितीयः प्रथमसंकल्पस्य लीलात्वानुपपत्तेः न हृद्देवोत्तरत्रापि लीलामंतरेण भ्रमोपपत्तेश्च नापि तृतीयः द्विवर्ज्ञानस्य लीलात्वाप्रसिद्धेः स्वयमभ्रान्तनीश्वरो लीलया परान्मोहयतीति चेत् तत्वन्मते भ्रांत्यादिना परदर्शनायोगात्तद्दर्शनेन संभवति तेषां स्वानन्यत्वज्ञानाच्च निर्विशेषसन्मात्रस्य ब्रह्मणो निर्विशेषत्वादेव न लीलासंभवः ईश्वरस्य तु सर्वज्ञत्वेन संसाररहितत्वेन जीवानां स्वानन्यत्वेन च जानतो जन्ममरणादिनिवर्त्तनेन नरकपातनादिव्यापारेण लीला भवितुमर्हति तस्मान्निखिलहेयप्रत्यनीकानन्तकल्याणगुणगणमहोदधेरीश्वरस्य लीलोपकरणभूतयानन्तयाम्यामायया अचित्यामयस्य शरीरभूतस्यानादिलाघुस्तधर्मस्य तस्याच्छिलक्षणस्य प्रत्यगात्मनः परमार्थभूतेश्वरलीलारूपजगत्सृष्ट्यादिव्यापारनिवृत्तये [illegible] तेन कृतानकेन प्रतिपाद्यत इत्यभ्युपगंतव्यं अत्र लीलापार्द्यच्छया उपगतामभ्यपद्यतेत्यनेन तु शब्दात्तदा लीलयेति श्रध्यायनेनेन वसतीति चल्कान्त

ईर्

हीलाहि विनानुमोदयभवतिन हानुन्मतकश्चिद्भ्रात्वा स्वसिद्धि भावति भावादयति न्वभ्रांति किंचित्सुखमापाद्
[illegible] तस्य तद्दुःखप्रापणाय तन्वे सुरासंसृष्टे प्रपत्तेः [illegible] वनीति

[illegible]

पुरुषो जीवं तस्य स्वरूप निरूपकधर्मद्वयमाह स्वयंज्योतिः स्वयंप्रकाशः यः स्वात्मानमन्यांश्च प्रकाशयति तत्स्वयंज्यो
८२ तिः नु अतेयवादीपादिस्तद्वयमपि स्वयंज्योतिः तर्हि तद्देवत्किं जडस्वरूप इत्यत्र आह प्रत्यग्धामा स्वस्मै भासमानत्वं प्र
त्यक्त्वं परस्मै भासमानत्वं पराक्त्वं एतदेव जडत्वं प्रत्यक्त्वं स्वस्मै प्रकाशमानं धामस्वरूपं यस्य सः अनेन पराग्धामदीपादिभ्यो
जडेभ्यो वैलक्षण्यं सिद्धं ज्ञानस्वरूपत्वं सिद्धं स्वयंज्योतिरित्यनेन ज्ञानगुणकत्वं सिद्धं तेन स्वपरप्रकाशकत्वमुच्यते तत्र य
थादीपादिश्च तु रंगुलपरिमितस्तेजोरूप एकदेशस्थः स्वापृथक्सिद्धधर्मभूतया प्रकाशयति स्वधर्मभूतप्रभामनपेक्ष्यैव प्रभयान्यं
स्वयमपि प्रकाशते तद्वदात्मापि स्वधर्मभूतज्ञानेनान्यान्प्रकाशयति स्वधर्मभूतज्ञाननिरपेक्षमेव स्वयमपि प्रकाशत इति
ह्युच्यते एतावांस्तु विशेषः पराग्धामा दीपादिः स्वमात्मानमन्यांश्च परस्मै प्रकाशयति आत्मा तु प्रत्यक्त्वेन स्वात्मानमन्यां शि०
श्च स्वस्मा एव प्रकाशयति प्रकाशो नाम व्यवहारानुगुण्यापादनं एवं च स्वयंप्रकाशत्वं दीपादिष्वात्मनि चाविशिष्टं प्रत्यग्धा
मत्वं त्वात्मन्येवासाधारणमिति ज्ञानगुणकज्ञानस्वरूपं चेति जडाद्विलक्षणमात्मस्वरूपमिति फलितं तदेवाह प्रकृतेः प्र

अनादिरात्मा पुरुषो निर्गुणः प्रकृतेः परः प्रत्यग्धामा स्वयंज्योतिर्विश्वं येन समन्वितं ३ न जायते न म्रियते देहीहेहा
द्युपाधिभिः निमित्तैर्देह स्वप्नद्रष्टा न नश्यति ४ इति परिणामरूपात्स्थूलशरीरेन्द्रियमनःप्राणादेः परः स्वरूप

तः स्वभावतश्च तत्त्वं तद्विलक्षणः अत एव निर्गुणः प्राकृतसत्त्वादिगुणरहितः तथाप्यात्मा शरीरान्तः प्रवेशेन तद्वारकं ये
नात्मस्वरूपेणाविश्वमात्रमस्त्वं व पर्यन्तस्थूलसूक्ष्मशरीरात्मकं विश्वं व्याप्तं येनेत्येकवचननिर्देशः एकोऽपि हि स्वसम्पन्नः स
पुष्टं कुरुते प्रजा इति वक्ष्यमाणव्यापकत्वतः अनेन देवादिशरीराणां व्याप्यत्वमात्मनो व्यापकत्वं निरतिशयसूक्ष्मत्वं चोक्तं
३ अत एव व्यापकत्वान्निरतिशयसूक्ष्मत्वादनादित्वाद्देहादिविलक्षणत्वाच्च देहादीनामुपाधिभिरुत्पत्तिविनाशादिभि
र्देहादिरूपैरुपाधिभिर्वा सह न जायते न म्रियते न नश्यति ननु देवोऽहं मनुष्योऽहं स्थूलोऽहमिति स्वरूप
ऐक्याद्देहात्मनोरभेदेन प्रतीतेः कथं देहादिभिः सह जननादिरात्मन इत्यत्राह निमित्तैः पुण्यपापरूपैः देवोऽहं स्थूलोऽहं
इत्याद्यारोपितदेहधर्मोऽतो न देहादिभिः सह जननादिरित्यर्थः एतदेव दृष्टान्तेन स्पष्टयति यथेति यथा स्वप्नदृष्टानां स्वप्नदा ४२
र्शनाशेऽपि न नश्यति सर्वं जागराद्यवस्था देहादिनाशेऽपि न नश्यतीत्यर्थः ४

न

संकोच ४

भ्रमविरोधिनो धर्मस्वरूपा संकोचविकाशरूपभावास्ते क्रमरूपा विषयावच्छिन्नसंभवेन तिरोधासंभवात् ॥ ४ ॥ १२

भा॰ स॰ टी॰ सत्त्वे नाभिमतधर्मभूतज्ञानस्यापि विनाशप्रसंग इति चेदुच्यते आत्मधर्मभूतस्य चैतन्यस्य स्वाभाविकस्यापि कर्मणा पारमार्थिकसंकोचविका-

१२१ संकोचावुपगच्छामः तत्र देवादिभ्रमस्याधिष्ठानस्फुरणसापेक्षत्वाद् धर्मिस्वरूपस्य स्वयंप्रकाशरूपमधिष्ठानतया स्फुरतीति नात्र ज्ञानान्तरापे-

क्षा जडत्वात् [illegible] जडत्वाद् भ्रमस्याधिष्ठानान्तरापेक्षा एवं धर्मिस्वरूपेण भ्रमविरोधि [illegible]

२।४ इति तिरोधाना [illegible] नुपपद्यते तिरोधानं च प्रकाशप्रच्छादनं ज्ञानस्वरूपमपि तु प्रसरणरूपो धर्मभूतज्ञानस्य [illegible] धर्मः [illegible] प्रकाशरूपप्रस-

राभावः संकोचः [illegible] संकोचः भावः [illegible] संकोचाभावः प्रसरः स एव तिरोधाननिवृत्तिः [illegible] एवं च

सति ज्ञानं धर्मिस्वरूपं च नित्यं ज्ञानधर्मभूतस्येन प्रकाशत्वात् स्वभावस्य संकोचत्वात् प्रसरारूप प्रकाशानिवृत्तिरूपतिरोधानमुपपद्यते नि-

र्विशेषप्रकाशस्वरूपात्मवादे तु [illegible]

[illegible] तत्र धर्मान्तरानभ्युपगमात् तिरोधानं स्वरूपनाश एव इति परिहारः ननु ज्ञानस्याज्ञानतत्प्रयत्नवदृष्टमिति चेत् [illegible] व्याप्तिर्गतम-

स्मानं [illegible] नस्याक्विद्धर्मत्वेनैव दृष्टत्वात्तस्य स्वतन्त्रवस्तुत्वमनुपपन्नमतो ज्ञानरूप आत्मकस्यापि धर्मः स्यात् [illegible] ज्ञानस्य ज्ञाना-

श्रयत्वमपि प्रतिपाद्यते तथा च प्रकृतिः कर्त्री गोहविज्ञानानामिति नन्वत्र प्रकृतेः पुमान् कर्मस्य क्रियमाणेषु गुणेषु आत्मा इति मन्यत इत्यनेनस्व

ना॰ यमकर्तैवमनुप्रसंगात्मा चेतनागुणानां कर्तृत्वमात्मन्यध्यवस्यतीत्यवगम्यते पुरुषचैतन्यमनोघ्नकर्तृत्वं गुणानामेव कर्तृत्वमध्यात्मशास्त्रे

षु श्रूयते तथा हि कवल्लीषु न जायते म्रियते इत्यादिना जन्ममरणमर्ण हि कं सर्वप्रकृतिधर्मप्रतिषिध्य हननादिषु क्रियासु कर्तृत्वमपि प्रतिषिध्

१२० ध्यते हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतं उभौ तौ न विजानीतो नायं हन्ति न हन्यते इति हन्तारमात्मानं जानन्ज्ञानानात्मानमित्यर्थः तथा च भगव

ता स्वयमेव जीवस्याकर्तृस्वरूपं कर्तृत्वमभिमानकृतं व्यामोहहेतुरुच्यते प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः अहंकारविमूढात्मा कर्ता

हमिति मन्यते नान्यं गुणेभ्यः कर्तारं यदा द्रष्टानुपश्यति कार्यकरणकर्तृत्वे हेतुः प्रकृतिरुच्यते पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते इति च

अतः पुरुषस्य भोक्तृत्वमेव प्रकृतेरेव कर्तृत्वं एवं कर्तृशास्त्रार्थवत्त्वादित्यधिकरणविरोधः तत्र ह्यात्मैव कर्ता न गुणा इत्युच्यते तथा हि यज-

त स्वर्गकामः मुमुक्षुर्ब्रह्मोपासीत इत्येवमादीनि शास्त्राणि स्वर्गमोक्षादिफलस्य भोक्तारमेव कर्तृत्वे नियुञ्जते न ह्यचेतनस्य कर्तृत्वे [illegible]

यमपि शासनाच्च शास्त्रं शासनं च प्रवर्तनं शास्त्रस्य प्रवर्तकत्वं बोधजननद्वारेण अचेतनं च प्रधानं न बोधयितुं शक्यं अतः शास्त्रफलभो- रा॰भा॰

क्तृत्वभोक्तृत्वचेतनस्यैव कर्तृत्वं भवेत् तदुक्तं शास्त्रफलप्रयोक्तरि तत्कथमयं विरोधः परिहरणीय इति चेदत्रोच्यते कर्त्रधिकरणेहि शरीराधि- १२१

ष्ठातृत्वरूपकर्तृत्वमात्मनो बोध्यते हन्ता चेदित्यात्मनो नित्यत्वाद्धननाद्यभावरूपः प्रकृतेः क्रियमाणानीति गीतावाक्यं च संसारि ॥ १

अस्तु यत्कृत्स्नाभिपन्नेकर्तृत्वादेः किमायातमित्याशंक्याममिपन्नहेतुकस्वस्वरूपतिरोधानकृतमोहनिमित्तं कर्तृत्वादिकमिति वक्तुं प्रकृतेः
सूक्ष्मामित्युक्तसूक्ष्मावस्थाप्रतिसंबंधिस्थूलावस्थां वदन् तथा प्रकृत्या प्रत्यगात्मनः स्वस्वरूपतिरोधानेन मोहमाह गुणैरिति विचित्रा देव
मनुष्यादिरूपेणानेकविधाः सरूपाः सर्वासां प्रकृतिपरिणामरूपत्वेन एकरूपाः प्रजा गुणैः सत्वादिभिः सृजन्तीं कार्यदशापन्नां स विलोकयतया
ज्ञान४ गूहया ज्ञानतिरोधायिन्या स घः मुमुहे तस्यां स्वात्मन्यात्मबुद्धिमकरोदित्यर्थः ५ एवं परामिधानेन प्रकृत्या तिरोहितस्वस्वरूपविस्मरणात्पूर्व
के प्रकृतिचिंतनेन पुमान् जीवः प्रकृतैर्गुणैः कर्म्मरूपं क्रियमाणेषु संसृतानि कर्माणि आत्मनि मन्यते तानि स्वकर्तृकाणीति मन्यत इत्यर्थः
संसारिकप्रवृत्तिरूपस्य कर्तृतासत्वरजस्तमोगुणसंसर्गकृतान स्वरूपप्रयुक्तमिति भावः ६ तत्रस्मात् सत्वरजस्तमोगुणसंसर्गेण तत्कर्तृत्वात्
स्पजीवस्य संसारनिर्बंधः संसाररूपो बंधः तत्कृतं कर्तृत्वप्रयुक्तमेव पारतंत्र्यं कर्मवशपत्वं च भवति न तु स्वरूपप्रयुक्तमिति भावः स्वरूपप्रयुक्त
त्वाभावमेव विशदयति तत्तस्य मुक्तावस्था वस्थितं प्रकृतिवियुक्तं स्वरूपं विशिनष्टि अकर्त्रिति नत्वत्रपतं त्रपत्वनिषेध्यते किंतु रामना
दिसांसारिकप्रवृत्तिरहितस्येत्यर्थः तत्र हेतुरीशस्याकर्मवशपस्य साक्षिणः ज्ञानाश्रयस्य ज्ञानगुणकस्येत्यर्थः साक्षाद्द्रष्टृत्वमेव हि साक्षित्वं सा
गुणैर्विचित्राः सृजतीं सरूपाः प्रकृतिं प्रजाः विलोक्य मुमुहे स घः सद्यः ज्ञानगूहया ५ एवं परामिधानेन कर्तृत्वं प्रकृतेः पुमान् कर्मसु
क्रियमाणेषु गुणैरात्मनि मन्यते ६ तदस्य संसृतिर्बंधः पारतंत्र्यं च तत्कृतं भवत्यकर्तुरीशस्य साक्षिणो निर्वृतात्मनः ७ साक्षाद्द्रष्टृत्वं साक्षाद्या
रूपत्व१ मितिशासनानुशासनात् अनेन ज्ञानगुणकत्वमुक्तं ज्ञानत्वं माह निर्वृतात्मन इति निर्वृतिर्निर्वृतिः भावे क्तः आनंदस्वरूपस्येत्यर्थः तथा च
श्रुतिः निर्वाणमय एवायमिति अनुकूलज्ञानमेवानंदः ६ इदानीं दशायामनेनाकर्मवशपत्वोक्त्या अनादिपुण्यपापकर्मसंसर्गरहितापहतपाप्मत्वादिस्वाभा पुराण२
विकगुणाष्टकस्य मुक्तिदशायां तिरोधाननिवृत्त्याविर्भावः सूच्यते अनेन ज्ञानगुणकत्वज्ञानस्वरूपं हतपाप्मत्वादिगुणाष्टकविशिष्टंप्र
कृतिवियुक्तं प्रत्यगात्मस्वरूपमित्युक्तं [illegible] जीवात्मनः स्वयमसंकुचितापरिच्छिन्ननिर्मलज्ञानस्वरूपाः सन्तः कर्मरूपा
विद्यावेष्टिताः तत्तत्कर्मानुरूपज्ञानसंकोचमापन्नाब्रह्मादिस्तंबपर्यंतविविधदेहेषु प्रविष्टास्तत्तद्देहोचितज्ञानप्रसरास्तत्तद्देहात्माभिमा
नस्तदुचितकर्माणि कुर्वाणास्तदनुगुणसुखदुःखोपभोगरूपसंसारप्रवाहं प्रतिपद्यन्ते ननु ज्ञानस्वरूपात्मनः स्वप्रकाशत्वे न स्याद्देहा
दिष्वात्माभिमाने स्वरूपप्रकाशतिरोधानमेव प्रापणीयं स्वरूपप्रकाशसत्त्वात्मन्यानारोपितस्याध्यासायोगात् तत्र स्वरूपप्रकाशति
रोधाने स्वरूपनाशप्रसंगः [illegible] न स्वरूपभूतज्ञानस्य तिरोधानमुच्यते अपि तु धर्मभूतज्ञानस्यैव ननु धर्मभूतज्ञानस्य [illegible] तिरोधानम
प्राप्य एवोद्यति तिरोधानं च कर्मरूपाविद्याः प्रकाशो न्यान्नि प्रतिबंधो वा विद्यमानप्रकाशनिवृत्तिर्वेति को विद्रुपमेव हि संभावितं उभयथापि नि

ज्ञानत्वाविशेषात् २ तस्यापि २

वस्थाः शुश्रुषती प्रकृतिर्देवहूतिः हे पुरुषोत्तम प्रकृतेः कार्यावस्थप्रधानस्य तथा पुरुषस्यापि कार्यावस्थस्य ब्रह्मात्मकस्य कूटभूतयो
रस्य जगतः कारणयोः कार्यावस्थायाः पूर्वोक्तस्य जगत्कारणत्वेन नामरूपविभागानर्हस्य सदशापत्या भगवच्छरीरत्वेनावस्थि
तयोः लक्षणं स्वरूपं ब्रूहि ब्रह्मात्मकयोः प्रकृतिपुरुषयोः कार्ययोः कार्यभेदान्कथयेत्यर्थः सदसच्च यदात्मकं कारणभूताः पित्रादयः का
र्यभूताः पुत्रादयः अवयवे प्रकृतिपुरुषात्मकं तयोर्लक्षणं ब्रूहीत्यर्थः न हि केवलप्रकृतेः केवलात्मस्वरूपस्य वा पितृपुत्रत्वादि अतत्व
मयात्मकं तु सदसच्छब्दाभ्यां निर्दिष्टमुपयरूपावस्थं विवक्षितं ९ एवं पृष्टो ब्रह्मात्मप्रकृतिपुरुषकार्यावस्थाः सप्रपञ्चमुपपादयिष्य
न्तावत्प्रकृतेः कारणावस्थां च संग्रहेणाह यदिति प्रधानं तदेव प्रकृतिमाहुरित्यन्वयः किं तत्प्रधानमविशेषं [illegible]
कारणावस्थायां पृथिव्यादिविशेषरहितमत एवाव्यक्तं नामरूपविभागानर्हं त्रिगुणं सत्त्वादिगुणात्मकं नित्यं त्रिगुणा
त्मकं इत्यनेन जीवपरमात्मवैलक्षण्यमुक्तं नित्यमित्यनेन महदाद्यवस्थानामनित्यत्वेप्यवस्थावतोऽस्य नित्यत्वमुक्तं एवं प्रकृतेः

देवहूतिरुवाच प्रकृतेः पुरुषस्यापि लक्षणं पुरुषोत्तम ब्रूहि कारणयोरस्य सदसच्च यदात्मकं ९ कपिल उवाच यत्तत्त्रिगुणम
व्यक्तं नित्यं सदसदात्मकं प्रधानं प्रकृतिं प्राहुरविशेषं विशेषवत् १० पंचभिः पंचभिर्ब्रह्म चतुर्भिर्दशभिस्तथा एतच्चतुर्विंशति
कं गणं प्राधानिकं विदुः ११ महाभूतानि पंचैव भूरापोग्निर्मरुन्नभः तन्मात्राणि च तावंति गंधादीनि मतानि मे १२ ॥ ॥ ॥

कारणावस्थोक्ता कार्यावस्थामाह विशेषावस्थायां पृथिव्यादिविशेषवत्सदसदात्मकं महदादिपृथिव्यंतं कारणरूपेण ब्रह्मादिस्थाव
रान्तशरीररूपेण च कार्यकारणमित्यर्थः १० एवमवस्थाद्वयमभिधाय तस्यैव प्रधानस्य कार्याणि महदादीनां सविशेषमनुक्रमिष्यन्
तावत्कार्याणि गणयन्संग्रहेण संगृह्णाति पंचभिः पंचभिर्भूतैः तन्मात्रैः चतुर्भिर्मनोहंकारमहदव्यक्तैः दशभिर्ज्ञानकर्मेन्द्रियैः
येरित्येवं संख्याभेदेन चतुर्विंशति एतानि चतुर्विंशति यस्मिन्तत्प्राधानिकं प्रधानकार्यात्मकं गणं समूहं विदुः ११ एतद्विवृणोति त्रि
भिः महाभूतान्याकाशादीनि पंचैव एवकारोधिकसंख्याव्यवच्छेदार्थः तान्गणयति भूरित्यादिनास्पष्टोर्थः गंधादीनि गंधश्चादयो येषां ता
नि तन्मात्राणि इत्यर्थः गंधादयो हि पृथिव्यादीनामवस्थाविशेषाः तावंति पञ्चैव मे मया मतानि ज्ञातानि इदं मम भगवतो मतमित्यर्थः एवं चतेजोवन्नात्मकं भूतत्रयमेवेति मतान्तरव्यावृत्तिः १२ ॥ ॥ ॥ ॥ ॥ ॥ ॥

कप्रवृत्तिषु जीवस्य कर्तृत्वान्वयव्यतिरेकाभ्यां सत्त्वरजस्तमोगुणसंसर्गकृतान्न स्वरूपप्रयुक्तमिति गुणानामेव कर्तृत्वमित्युच्यते तेन हि सांसा
रिकप्रवृत्तिषु कर्तृत्वं गुणसंसर्गकृतमित्येतावन्मात्रकथनेन स्वतः कृत्स्नाश्रयत्वरूपकर्तृत्वं प्रतिषिध्यते तथा च तत्रैव कथ्यते गुणसंगो
स्य सदसद्योनिजन्मस्विति सांसारिकप्रवृत्तिषु कर्तृत्वं गुणसंसर्गकृतमित्यभिहितं तत्रैव चात्मनः कर्तृत्वमभ्युपेत्योच्यते शरीरवाङ्म
नोभिर्यत्कर्म प्रारभते नरः न्याय्यं वा विपरीतं वा पञ्चैते तस्य हेतवः तत्रैवं सति कर्तारमात्मानं केवलं तु यः पश्यत्यकृतबुद्धित्वान्न स पश्य
ति दुर्मतिरिति अधिष्ठानं तथा कर्ता करणं च पृथग्विधं विविधाश्च पृथक् चेष्टा दैवं चैवात्र पञ्चममिति दैवमीश्वरः अधिष्ठानादिदैवप
नर्द र्यन्तसापेक्षत्वे सत्यात्मनः कर्तृत्वे य आत्मानमेव केवलं कर्तारं मन्यते स न पश्यतीत्यर्थः अतः कर्त्रधिकरणेषु पुरुषस्याधिष्ठानभूत
स्वशरीराधिष्ठातृत्वरूपकर्तृत्वमुच्यते प्रकृतेः क्रियमाणानीत्यादौ तु सांसारिकव्यापाराश्रयत्वरूप [illegible] कर्तृत्वं प्रकृतिसंसर्गकृत
न स्वरूपप्रयुक्तमित्युच्यते इत्यतो न तदधिकरणविरोध इति अलमतिविस्तरेण ७ एतदेव सांसारिकप्रवृत्तिषु कर्तृत्वं प्रकृतिसंसर्ग

कार्यकारणकर्तृत्वे कारणं प्रकृतिं विदुः भोक्तृत्वे सुखदुःखानां पुरुषं प्रकृतेः परं ८ ॥ ॥

कृतं न स्वरूपकृतमिति विशदयन् सांसारिकप्रवृत्तिष्वपि स्वशरीराधिष्ठातृत्वरूपकर्तृत्वाश्रयत्वात् प्रकृतिफलसुखदुःखाश्र
यत्वमात्मन एवेत्याह कार्येति कार्यं शरीरं कारणानि समनस्कानीन्द्रियाणि तेषां कर्तृत्वे बहिर्गमनागमनादिक्रियाकारित्वे प्रकृतिं
पुरुषाधिष्ठितां शरीराकारेण परिणतां प्रकृतिं कारणं हेतुं विदुः पुरुषाधिष्ठितशरीराकारपरिणतप्रकृत्याश्रया भोगसाधनभूताः
क्रिया इत्यर्थः पुरुषस्य स्वाधिष्ठातृत्वमेव तदपेक्षया अधिकं कर्तृ शास्त्रार्थवत्त्वात् हिंसादिषु कर्म शरीराधिष्ठानरूपं प्रयत्नहेतुत्व
मेव हि पुरुषस्य कर्तृत्वं अतः एव सुखदुःखानां पुरुषाधिष्ठितशरीराकारपरिणतप्रकृतिहेतुकव्यापारजन्य [illegible] सुखदुःखानां
भोक्तृत्वे प्रकृतेः शरीरस्य तदधिष्ठातारं पुरुषमात्मानं कारणं विदुः स्वशरीराधिष्ठानप्रयत्नापन्नेनैव तदधिष्ठेयहेतुकक्रियाफ
लसुखदुःखाश्रय इत्यर्थः ८ एवं प्रकृतिविलक्षणेन तत्संसृष्टे आत्मस्वरूपे कार्यकारणभावेनावस्थिते प्रकृतिस्वरूपे चाभिहिते
[illegible] तयोरेव संसृष्टयोः प्रकृतिपुरुषयोः कार्या ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

तत्र कालेनानन्तत्वात्तरमितिमिताऽऽतरमुपन्यस्यति प्रभावमिति पौरुषं परमपुरुषसंबन्धिनं प्रभावमेव कालमेके आहुः कोऽसौ पौरुषः प्रभा
वस्तत्राऽऽह यतः पौरुषात्प्रभावाद्भयं जगतः सर्गसंहारादिरूपं संसारभयं भवति परमपुरुषस्य सर्गसंहारादिषु जगन्नियमनं सामर्थ्यं कालः
ननु तत्त्वान्तरमित्यर्थः एक इत्युक्तमितान्तरत्वं गम्यते स्वमतमाह अहंकारेति अनात्मन्यात्माभिमानोऽहंकारस्तेन मूढस्य तिरोहितस्व
स्वरूपस्य प्रकृतिमसरत्तमःसिलीपत इति तमःशब्दवाच्यानिरतिशयसूक्ष्मदशापन्नं प्रधानं प्रकृतिं कारणं परमात्मानं वा ईयुषः संसा
रदशायां प्राप्तस्य कर्तुर्जीवस्य १६ तथाहे मानवि प्रकृतेः प्रधानस्य यद्गुणसाम्यं तस्यानिर्विशेषस्य नामरूपादिविशेषशून्यस्य नामरू
पादिपरिहारेण संहारदशायां साम्यावस्थापन्नगुणत्रयस्य प्रधानस्य चेत्यर्थः यतश्चेष्टा व्यापारो भवति स भगवान् भगवदात्मकः
काल इत्युपलक्षितः संहारदशायां नामरूपविभागानर्हनिरतिशयसूक्ष्मावस्थामापन्नयोः प्रकृतिपुरुषयोः परमात्मात्मकयोरस्तास्मि

प्रभावं पौरुषं प्राहुः कालमेके यतो भयं अहंकारविमूढस्य कर्तुः प्रकृतिमीयुषः १६
प्रकृतेर्गुणसाम्यस्य निर्विशेषस्य मानवि चेष्टा यतः स भगवान्काल इत्युपलक्षितः १७
अंतः पुरुषरूपेण कालरूपेण यो बहिः समन्वेत्येष सत्त्वानां भगवानात्ममायया १८

१२२

न्नेव लीनयोः सृष्टिदशायां जगदाकारेण परिणामरूपो व्यापारस्तद्धेतुभूतः स कालः स च भगवदात्मक इत्यर्थः १७ एवं प्रकृतिपुरु
षकालस्वरूपं शोधितं तेत्रयोऽपि भगवद्रूपाणि प्रधानपुरुषव्यक्तकालास्तु प्रविभागशः रूपाणीत्युक्तेः तेषु पृथिव्यादिस्थूल
रूपेणात्मत्वात्स्थायेन प्रकृतिः स्फुटस्वरूपा पुरुषकालयोस्तु तादृशस्थूलपरिणामाभावात्तयोः प्रतीयमानत्वं युक्त्या दर्शयन्नु तयोः
शास्त्रैकसमधिगम्यं भगवदात्मकत्वमे ... तिश्लोकेनाह य आत्ममायया स्वसंकल्पेन सत्त्वानां पृथिव्यादिसंघातदेहानामं
तः पुरुषरूपेण द्वौ मिथोऽस्य सखायौ इति इच्छाद्वेषसुखदुःखाद्याश्रयजीवात्मरूपेणान्तः प्रविश्य तदाभ ... वत्सभञ्जविषयतीं
ति तेषामेव सत्त्वानां विशेषणत्वेन बहिः कालाख्यरूपेण च समन्वेति अवभासते १८ ॥ ॥ ॥ ॥ ॥

अहंकारः अहंकारस्यातीत्तरादुपस्याभिमानरूपवृत्तिजनन
हंकारोनुग्राहको विवक्षितः ५

इंद्रियाणि गणयति इंद्रियाणीति श्रोत्रादीनि ज्ञानेंद्रियाणि वागादीनि कर्मेंद्रियाणि तत्र पायुर्गुदं १३ अंतःकरणं विभजति मन इति अन्तरात्मकमंतःकरणं वृत्त्या स्वगुणवृत्त्या संकल्पाध्यवसायाभिमानचिंतारूपलक्षणया चिन्हभूतया मनो बुद्धिरहंकारश्चित्तमिति चतुर्धा लक्ष्यते इत्यन्वयः अत्रायं भावः एकमेवांतरिंद्रियं संकल्पादिवृत्तिभेदेन चतुर्विधं तत्र चित्तबुद्ध्यहंकाराणां क्रमेण मूलप्रकृतिमहदहंकारा अनुग्राहकाः मूलप्रकृत्यादीनामनुग्राहकत्वानिबंधनश्चित्तादिभेदव्यपदेशः अनुग्राह्यानुग्राहकयोरभेदविवक्षया क्वचिदभेदनिर्देशो महान्वै बुद्धिलक्षण इत्यादिः एषां चाव्यक्तमहदहंकाराणामधिष्ठातारो वासुदेवादयो वक्ष्यंते एवं च बुद्धिशब्देनांतरिंद्रियस्य स्ववृत्तिरूपाध्यवसायजननेनुग्राहकं महत्तत्वं च विवक्षितं चित्तशब्देन चिंताजनकस्यांतरिंद्रियस्यानुग्राहकत्वाच्चिंतनीयत्वा

इंद्रियाणि दश श्रोत्रं त्वक् दृक् रसना नासिका वाक् करौ चरणौ मेढ्रं पायुर्दश मुच्यते १३ मनो बुद्धिरहंकारश्चित्तमित्यंतरात्मकं चतुर्धा लक्ष्यते भेदो वृत्त्या लक्षणरूपया १४ एतावानेव संख्यातो ब्रह्मणः सगुणस्य ह सन्निवेशो मया प्रोक्तो यः कालः पंचविंशकः १५ ॥ ॥ ॥ ॥

च्चाव्यक्ताख्या मूलप्रकृतिर्विवक्षिता तत्रानुग्राह्यानुग्राहकयोरभेदविवक्षया चतुर्विंशतिकं गणं विदुरित्युक्तं भेदविवक्षायां तु सप्तविंशतिको गणो बोद्धव्य इति १४ एवं तत्वानि संकलय्य संगृह्णन् कालस्वरूपं लक्षयति एतावानिति सगुणस्य सत्वादिगुणकस्य ब्रह्मणः प्रधानस्य तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायत इति हेव ब्रह्मणीवेदितव्यो इत्यादिश्रुतौ मम योनि
र्महद्ब्रह्मेत्यादिस्मृतौ च प्रकृतावपि ब्रह्मशब्दप्रयोगात् उपक्रमानुगुण्याच्च य
द्वा उक्तानां तत्वानां यः पृथिव्यां तिष्ठन्नित्यत्र उक्तप्रविष्टत्वान्नियंतृत्वम् ब्रह्मणोनंतस्य श्रवणात् सत्वादिगुणात्मकप्रकृतिकार्यभूतपृथिव्यादिशरीरकस्य परब्रह्मणः परमात्मन इत्यर्थः सन्निवेशः अवस्थाविशेषः मया प्रोक्तः एतावानेव चतुर्विंशतिसंख्याकः एवं संख्यातः गणितस्तत्वज्ञैरिति शेषः अथ कालस्वरूपं निरूपयितुं तस्य तावत्तत्वांतरत्वमाह यः कालः स पंचविंशतिकः एवं परिगणितः चतुर्विंशतिभिः सहास्य परिगणने पंचविंशतिको भवतीत्यर्थः १५ ॥

क

बुद्धेर्वासुदेवाधिष्ठितत्वानुपपत्तेः बुद्धेर्गिरां पतिरिति वक्ष्यमाणत्वात्तस्मादत्राभिभूततमस्कमुद्भूतसत्त्वगुणकमहत्त्व-
मेव वासुदेवाधिष्ठितं महदात्मना परिणतमित्यवधारणीयं तत्रय चित्तस्याधिष्ठाता वासुदेवः स एव महतोप्यधिष्ठाताधिष्ठा-
न्तेत शास्त्रेः २१ कदा तत्करणमव्यक्तानुगृहीतं साचत्रमिति लक्ष्यत इत्यत्राह स्वच्छत्वमिति स्वच्छत्वं भगवद्बिम्बग्राहकत्वम विकारित्वं वि-
क्षेपादिराहित्यं मत एव शान्तत्वं रजस्तमोभ्यामनभिभूतत्वं इत्येवंरूपैः स्वच्छत्वादिभिश्चेतसो वृत्तिभिर्लक्षणं प्रोक्तं यदा स्वच्छत्वादिगुणकं
मनस्तदा सत्त्वोत्तरवासुदेवानुगृहीतमिति चेतो वृत्तिभिर्लक्ष्यत इत्यर्थः स्वच्छत्वादौ दृष्टान्तमाह अपामम्भसां परा प्रकृतिरनाशेषितस्वस्वभावः य-
था पां स्वभावरूपं स्वच्छत्वं फेनतरंगादिराहित्यं एवं स्वच्छत्वादिकं यदा भवति तदा वासुदेवानुगृहीतं मन इत्यर्थः २२ एवमध्यवसायादिवृत्ति-

स्वच्छत्वमविकारित्वं शान्तत्वमिति चेतसः वृत्तिभिर्लक्षणं प्रोक्तं यथापां प्रकृतिः परा २२
महत्तत्त्वाद्विकुर्वाणाद्भगवद्वीर्यचोदितात् क्रियाशक्तिरहंकारस्त्रिविधः समपद्यत २३
वैकारिकस्तैजसश्च तामसश्च यतो भवः मनसश्चेन्द्रियाणां च भूतानां महतामपि २४
सहस्रशिरसं साक्षाद्यमनन्तं प्रचक्षते संकर्षणाख्यं पुरुषं भूतेन्द्रियमनोमयं २५॥ ॥

२२३

भिर्बुद्धेर्महत्तत्त्वानुगृहीतत्वं वेदितव्यं अथाहंकारोत्पत्तिप्रकारं वदन् तत्स्वरूपं [illegible] तदधिष्ठातारं चाह त्रिभिः महत्तत्त्वादिति भगवतो वीर्ये-
ण संकल्परूपज्ञानेन चोदितात् प्रेरितात् अत एव विकुर्वाणान्महत्तत्त्वाद्वैकारिकतैजसतामसभेदेन त्रिविधः क्रियाशक्तिः क्रियाप्राधान्येन
प्रवर्त्तकरजोगुणो उच्यते रजोगुणोद्रिक्त इत्यर्थः अहंकारः समपद्यत उदभूदित्यर्थः २३ कोसावहंकार इत्यत्राह वैकारिक इति यतः त्रि-
विधाहंकारान्मनसः इन्द्रियाणां ज्ञानकर्मोभयेन्द्रियाणां महतां भूतानामाकाशादीनां अपि शब्दादितन्मात्राणां च भवः उत्पत्तिः मनआ-
दीनां कारणमित्यर्थः २४ तस्याहंकारस्य संकर्षणाधिष्ठितत्वमाह सहस्रशिरसं सहस्रफणामनन्तं अनन्तशब्दवाच्यं साक्षात्संकर्षणा-
ख्यं भगवद्व्यूहपुरुषं भूतेन्द्रियमनोमयं भूतादीनां कारणं अहंकारं प्रचक्षते संकर्षणाधिष्ठितमहंकारं प्रचक्षते इत्यर्थः २५॥ ॥

स भगवान् परमपुरुषः स्वस्यां स्वीयायां योनौ जगद्योनौ प्रकृतौ दैवात् भगवत्संकल्पात् क्षुभितधर्मिण्यां रजस्तमश्चाभिभूय सत्त्वं
भवति भारत रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथेत्युक्तरीत्या क्षुभितः सत्त्वादिगुणो यो वीर्यं महदादि तु प्रपञ्च[illegible]सामर्थ्यं जनसम
र्थं वा आधत्त पुंस्त्वं ततः सा योनिः हिरण्मयं प्रकाशबहुलं महत्तत्त्वमसूत[illegible] असूत वती क्षुभितधर्मिण्यामित्युक्तं सत्त्वादिगुणक्षो
भो नाम गुणानां साम्यावस्थापरिहारेण न्यूनतमगुणाभिभवपूर्वकमन्यतमगुणाविर्भावः १९ तत्र महत्तत्त्वे सात्त्विकस्य गुणस्याभिभ
वादिमत्राह विश्वमिति जगदंकुरः जगदंकुरस्थानीयं यस्य तथा सः जगत्कारणभूतः कूटस्थो [illegible] निर्विकारो भगवानात्मगतं सो
भिध्याय शरीरात् स्वादिति उक्तप्रकारेण स्वशरीरभूतप्रकृतिलीनं विश्वं व्यञ्जयन् व्यञ्जयितुं स्वतेजसा स्वसंकल्परूपज्ञानेनात्म
प्रस्वापनं जीवानां [illegible] संकोचकं तमस्तमोगुणमपिबदभिभूतमकरोदित्यर्थः २० कस्य गुणस्याविर्भावादित्यपेक्षायां तद्दर्शय
न् मूलप्रकृति महतो वासुदेवाख्यव्यूहाधिष्ठितत्वं तयोरन्तःकरणभेदं चित्तं बुद्ध्यनुग्राहकत्वं चाह यत्तदिति भगवतः पदं तत्र सत्त्वं नि

दैवात् क्षुभितधर्मिण्यां स्वस्यां योनौ परः पुमान् । आधत्त वीर्यं सासूत महत्तत्त्वं हिरण्मयं १९ विश्वमात्मगतं व्यञ्जन् कूटस्थो जगदं
कुरः स्वतेजसापिबत्तीव्रमात्मप्रस्वापनं तमः २० यत्तत्सत्त्वगुणं स्वच्छं शान्तं भगवतः पदं यदाहुर्वासुदेवाख्यं चित्तं यन्महदात्मकं २१

र्मलत्वात् प्रकाशकमनामयमित्युक्तरीत्या सत्त्वस्य प्रकाशकत्वात् तद्गुणकस्य चित्तस्य भगवदुपलंभकस्यान्तत्त्वमित्यर्थः शान्तमभि
भूततमस्कमत एव स्वच्छं प्रकाशकसत्त्वगुणकं यच्च वासुदेवाख्यं [illegible] भगवद्व्यूहाधिष्ठितं यच्चित्तमतःकरणभेदं चित्तानु
ग्राहकं मूलप्रकृत्यपरपर्याय[illegible] यमव्यक्तं तदेव महदात्मकं महत्तत्त्वाभिमानी तदस्थितं तदुक्तं पूर्वं अत्र वासुदेवाख्यं चित्तमित्यधिष्ठात्र
धिष्ठेययोरनुग्राह्यानुग्राहकयोश्चाभेदविवक्षया निर्देशः नात्र चित्तस्य वैकारिकाहंकार्यतः करणभेदस्य वासुदेवाधिष्ठित
त्वं महदात्मकत्वं चोच्यते चित्तं चैतस्मात् तो भवदिति चित्तस्य क्षेत्रज्ञाधिष्ठितत्वेन स्वनामत्वात् महत्कार्याहंकारकार्यस्य चित्तस्य मह
दात्मनावस्थानयोगाच्च कारणं हि कार्यात्मनावतिष्ठते न तु कार्यं कारणात्मना न तु संहारदशायामपि संभवति तथाप्यत्र सात्त्वि
प्रकरणोक्त थाव[illegible]स्यानमयुक्तं नापि महदात्मकमिति चित्तस्यान्तःकरणभेदस्य मदनुग्राह्यत्वमुच्यते महतो बुद्ध्यनुग्राहकत्वान्
[illegible]हान्वे बुद्धिलक्षणा इत्युक्तः न चात्र चित्तशब्देन बुद्धिरेवान्तःकरणभेदो विवक्षित इति वक्तव्यं ॥ ॥ ॥ ॥ ॥

वा६५२
वा१२४
स३

भा.त.टी. १२५

तस्मात्तैजसाद्धि क्रियमाणाद्देऽसति इन्द्रियाणामनुग्रहरूपं बुद्धितत्त्वं बुध्यतेऽनेनेति बुद्धिः ज्ञानस्वरूपमात्रजननसामर्थ्यमभूत् कथं बुद्धि
तत्त्वस्येन्द्रियानुग्राहकत्वमवगम्यत इत्याशंक्यास्त्वन्तर्विभिरित्याह द्वे वोति द्रव्यस्फुरणं विज्ञानाद्यो बुद्धितत्त्वस्य वृत्तयः द्रव्यस्फुरणं विज्ञा
नं द्रव्यमात्रावभासरूपं ज्ञानं यावत्कोरज्ञानाभावात् संशयो विकल्पज्ञानं विपर्यासशब्देनान्यथाज्ञानं विपरीतज्ञाने विवक्षिते तदर्थ
मितरप्रतीतिरन्यथाज्ञानं यथा पीतः शंख इति धर्मान्तरस्य धर्मान्तरत्वेन प्रतीतिर्विपरीतज्ञानं यथेदं रजतमिति शुक्तौ शकलेनिश्चयः
प्रमाणरूपं स्मृतिरनुभूतवस्तुविषयं ज्ञानं स्वापो निद्रा संशयादिस्वापान्ताभिः पृथक् संकरेण वृत्तिभिर्बुद्धिः बद्धितत्त्वस्य लक्षणं इन्द्रिया
नुग्राहकत्वरूपलक्षणमुच्यते यदैन्द्रियाणां द्रव्यस्फुरणविज्ञानादि जनकत्वं तदा तानीन्द्रियाणि बुद्धितत्त्वानुगृहीतानीत्युच्य

५१ त इत्यर्थः यद्वा इन्द्रियाणामिति कर्तरि षष्ठी इन्द्रियाणां कार्यम् तद्द्रव्यस्फुरणविज्ञानं द्रव्यस्फुरणमर्थेन्द्रियसंबन्धस्फुरणं तत्कृतं वि
ज्ञानं शब्दवाच्यं बुद्धितत्त्वं तैजसाहंकारारम्भत्वं अनुग्राह्येन्द्रियकार्यत्वादित्यर्थः २८ संशयादयो ज्ञानविशेषा इत्याह संशय इति बुद्धेर्ल

तैजसानुविकुर्वाणाद्बुद्धितत्त्वमभूत्सति द्रव्यस्फुरणं विज्ञानमिन्द्रियाणामनुग्रहः २८ संशयोऽथ विपर्यासो निश्चयः स्मृतिरे
व च स्वाप इत्युच्यते बुद्धेर्लक्षणं वृत्तितः पृथक् ३० तैजसानीन्द्रियाण्येव क्रियाज्ञानविभागशः प्राणस्य हि क्रियाशक्तिर्बुद्धेर्वि
ज्ञानशक्तिता ३१॥

224

५१ लक्षणं बुद्धेः प्रकारः वृत्तितः सदोषनिर्दोषेन्द्रियवृत्तिभिरित्यर्थः ३० उभयेन्द्रियाणामुत्पत्तिलक्षणं चाह तैजसानीति
क्रियाज्ञानविभागशः ज्ञानेन्द्रियकर्मेन्द्रियविभागेनोभयविधानीन्द्रियाणि तैजसान्येव एवकारेणाहंकारान्तरकार्यत्वव्युदासार्थः ननु ए
वमिन्द्रियाणामनुग्रह इति तैजसाहंकारस्येन्द्रियानुग्राहकत्वमुक्तं अत्र त्विन्द्रियाणां तत्कार्यत्वमेवोच्यत इति विरोधः मैवं पूर्वत्र को
सा विन्द्रियेषु तैजसकृतोनुग्रहः स्वरूपे साक्षाद्द्रव्यस्फुरणविज्ञानरूपानुग्रह इत्युक्तं न च तत्रान्तःकरणभेदस्य बुद्धितत्त्वस्योत्प
त्तिरुच्यत इति वक्तुं शक्यं महत्तत्त्वानुगृहीतान्तःकरणाध्यवसायात्मकवृत्तिविशेषस्यैव बुद्धित्वात् वैकारिकाद्विकुर्वाणान्मनस्तत्त्व
मजायतेति मनउत्पत्तिकथनेनैव सिद्धत्वात् पृथग्बुद्ध्युत्पत्तिकथनस्यानपेक्षितत्वादस्य याचिता हकार्यैरपि पृथगुत्पत्तिकथ
नापत्तेश्च ननु तत्र निश्चयः स्मृतिरेव चेति ॥ ॥ ॥ ॥ ॥ ॥ ॥

राम. १२५

अहंकारस्य लक्षणं तस्य सकार्यभूतांतःकरणभेदाहंकारानुग्राहकत्वं तद्वृत्तित्वं चाह कर्तृत्वमिति कर्तृत्वाभिमानः आत्मनि गम
नाद्याश्रयत्वाभिमानो यस्य मनसि सोऽत्र अहंकारानुग्रहो मनस इत्यर्थः एवं करणत्वमिंद्रियत्वं देहत्वं चेति तल्लक्षणमहंकारस्य ल
क्षणं त्रिविधं भूतेंद्रियकारणत्वादहंकारस्येत्यर्थः शांतत्वं प्रकाशकत्वं गूढत्वं विक्षिप्तत्वं मूढत्वं चेति वाहंकृतेर्लक्षणं तत्कारण
गुणत्रयरूपेणाहंकारो लक्ष्यत इत्यर्थः २६ अथ मनस उत्पत्तिपूर्वकं तद्द्वारेण मध्यिष्ठातारं चाह वैकारिकादिति विकुर्वाणाद्वै
कारिकात् सात्विकाद्यान्मनस्तत्वमजायत यन्मनः संकल्पविकल्पाभ्यां वर्तते संकल्पः समित्येकीकारे देहादिभिरात्मनोऽपृथक्त्वेन
चिंतनं विकल्पो विषयचिंतनं यद्वांतःकरणे तैजसाहंकारानुग्रहात्संकल्पविकल्पौ भवतः तदांतदेवांतःकरणं मन इत्यर्थः
तस्य प्रद्युम्नाधिष्ठितत्वमाह कामसंभव इति वैकारिक इति शेषः कामः प्रद्युम्नः तस्य संभवः संभवतीति संभवः तस्याविर्भूतिरि
त्यर्थः अथ माधिष्ठाता प्रद्युम्नो मनःकारणस्य वैकारिकाहंकारस्य ननु मनस्यनिरुद्ध ईजत इति तदधिष्ठातुर्वक्ष्यमाणत्वात् अस्य

कर्तृत्वं करणत्वं च कार्यत्वं चेति लक्षणं शांतत्वं घोरमूढत्वमिति वा स्यादहंकृतेः २६ वैकारिकाद्विकुर्वाणान्मनस्तत्वमजाय
त यत्संकल्पविकल्पाभ्यां वर्तते कामसंभवः २७ यद्विदुर्ह्यनिरुद्धाख्यं हृषीकाणामधीश्वरं शारदेंदीवरश्यामं संराध्यं योगिभिः
शनैः २८

मनसोऽनुग्राहकस्तु तैजसोऽहंकारः लोभः प्रवृत्तिरारंभः कर्मणामशमः स्पृहा रजस्येतानि जायंते इति स्पृहादीनां रजः
कार्यत्वावगमात् तस्य प्रवर्तनात्मकक्रियाशक्तियुक्तत्वाच्च एवं तामसाहंकारकार्यस्याकाशादेरपि तत्स्वकार्यजनने तैजसोऽहं
कारो [illegible]नुग्राहको वेदितव्यः एवं सामान्येनोक्तमहंकाराधिष्ठातृत्वं संकर्षणस्य तु तामसाहंकाराधिष्ठातृत्वमेवेति वि
शेषपर्यवसन्नं बोध्यं २७ अस्य तैजसाहंकारस्याधिष्ठातारं वदन् कोसाविंद्रियेषु तत्कृतोऽनुग्रह इति विवक्षायां ज्ञानस्वरूपमा
त्रजननसामर्थ्यादिरेव सर्वेंद्रियेष्वनुग्राह्यत्वं तन्निमित्तं स्यादित्याह यमिति त्रिभिः हृषीकाणामिंद्रियाणामधीश्वरमनिरुद्ध
धिष्ठेयत्तैजसाहंकारानुग्राह्यत्वादिंद्रियाणामप्यनिरुद्धाधिष्ठितत्वमुक्तं शरत्कालीनेंदीवरवच्छ्यामं ऋषिभिः शनैः सम्यगा
राधनीयमनिरुद्धाख्यव्यूहं यं तैजसाहंकारं विदुः अनिरुद्धाधिष्ठितं तैजसाहंकारं विदुरित्यर्थः २८ ॥ ॥ ॥ ॥

वा

छ्रू१ च१

भा॰त॰टी॰
१२६

किंत दृतन्मात्रकीदृशं नभ इत्यपेक्षायां तयोः कार्यमुखेन स्वरूपं शोधयति द्वाभ्यां अर्थाश्रयत्वं अर्थवाचकत्वं इषुलिंगत्वं गुरुः
सर्वज्ञस्य परमात्मनः लिंगत्वं प्रमाणभूतत्वं भगवतः शास्त्रयोनित्वात् इषुः घटपटाद्यर्थ इषुः लिंगते प्रतीयते इति इषुलिंगत्वं
स्वभावस्तत्वमिति वा घटपटादि इषु हि तद्वाचकः शब्दः प्रतीयते यद्वा विशब्दस्य वर्णस्य पूर्वः प्रतीयते तेनापि तद्विशब्दस्य लक्षण
मेव तदेव हि अर्थाश्रयत्वमित्युक्तं अर्थाश्रयत्वं श्रोत्ररूपप्रत्यापकत्वमेव वस्तुई इवृत्तेनानुमापकत्वं वा अर्थ इष्यते हि वक्ताभिव
वंप् दति कुतस्तु तरितस्यापि वस्तु ज्ञापकत्वं वा नभसस्तन्मात्रं आकाशस्यासाधारणगुणत्वं सूक्ष्मत्वं वा शब्दस्य लक्षणं कार्यं कवयो वि
दुः ३३ नभसो लक्षणमाह भूतानामिति बहिः पदं क्षमपर्यन्तभूतानां छिद्रदातृत्वमवकाशदातृत्वं बहिरन्तर्व्यवहारास्पदत्वं प्रा
णानां इन्द्रियाणां आत्मनश्च अधिष्ठानत्वं स्थानत्वं नाड्यादिछिद्ररूपेण नभसः आकाशस्य वृत्तिलक्षणं वृत्तिः छिद्रदातृत्वादिकार्यमि

अर्थाश्रयत्वं शब्दस्य इषुलिंगत्वमेव च तन्मात्रत्वं च नभसो लक्षणं कवयो विदुः ३३ भूतानां छिद्रदातृत्वं बहिरन्तरमेव च प्राणे
७२५ न्द्रियात्माधिष्ठानत्वं नभसो वृत्तिलक्षणं ३४ नभसः शब्दतन्मात्रात्कालगत्या विकुर्वतः स्पर्शोऽभवत्ततो वायुस्तत्र कस्पर्शसाच्च संग
हः ३५ मृदुत्वं कठिनत्वं कैं च शैत्यमुष्णत्वमेव च एतत्स्पर्शस्य स्पर्शत्वं तन्मात्रत्वं नभस्वतः ३६ चालनं व्यूहनं प्राप्तिर्नेतृत्वं द्र
व्यशब्दयोः सर्वेन्द्रियाणामात्मत्वं वायोः कर्माभिलक्षणं ३७

त॰८ वृत्तलक्षणं एवमुत्तराध्येकेन श्लोकेन तन्मात्रमहाभूतयोरुत्पत्तिरिद्वितीयेन तन्मात्रलक्षणं तृतीयेन महाभूतलक्षणमि
गुरो त्यनुसंधेयं ३४ नभस इति शब्दतन्मात्रात् शब्दतन्मात्रमसाधारणोपसंतस्मात् कालगत्या कालशरीरकभगवत्संकल्पेन विकुर्वतो
विक्रियमाणान्नभसः आकाशात् स्पर्शः स्पर्शतन्मात्रमभवत् ततः स्पर्शाद्वायुरभवत् कोऽसौ स्पर्शस्य ग्राहकस्तत्राह तत्कृत्वगिन्द्रियं स्पर्श
स्य संग्रहः समग्रग्राहकः संगृह्यते यया सा त्वगिति वायुस्त्वतुनिपातलिंगत्वात् ३५ मृदुत्वादयः तन्मात्रत्वमसाधारणगुणत्वं च स्पर्शस्य
स्पर्शत्वं लक्षणमित्यर्थः ३६ चालनं वृक्षस्कन्धादेः व्यूहनं विभागकरणं प्राप्तिः स्खलितयोः संयोजकत्वं द्रव्यशब्दयोर्नेतृत्वं
तत्र द्रव्यनेतृत्वं द्रव्यस्य गन्धवतो घ्राणप्रति शब्दस्य नेतृत्वं दूरस्य शब्दस्य श्रोत्रग्राह्यत्वकरणं सर्वेन्द्रियाणामात्मत्वं धारकत्वं वायोः क
र्मैवाभिलक्षणं ३७ ॥

वि२
१२६

बुद्धेर्वृत्तिविशेषस्य निश्चयस्य कथनादध्यवसायात्मिका बुद्धिरेव बुद्धितत्त्वमभिमतं सतीत्युच्यत इति चेन्न अध्यवसायवृत्तिविशेषाया बु-
द्धेः पुनर्वृत्त्यन्तरस्यादित्यनवस्थाप्रसङ्गः तस्माद्बुद्धितत्त्वरूपेणानेन्द्रियेषु तैजसकृतोऽनुग्रह इति दर्शितं अन्ततु सर्वेन्द्रियाणामिन्द्रि-
यकारणस्य वैकारिकस्य तैजसानुग्राह्यत्वमेव न त्वहङ्कारानुग्राह्यत्वमित्युच्यते अत एवोक्तमि[illegible]वाच्यं शङ्कोनन्द्रायुक्तः प्रकृते
चैतन्न नहि तैजसस्य प्रवर्तनात्मकक्रियाशक्तियुक्तस्यानुग्राहकत्वमन्तरेण पृथक्कार्यजननसामर्थ्यमस्ति न चैवं बुद्धितत्त्वस्यापि तैज-
सादुत्पत्तिरनुपपन्ना कथमुक्तेति वाच्यं तस्य तैजसकृतानुग्राहकप्रकारप्रदर्शनमात्रपरत्वात् तस्मात्तैजसानीन्द्रियाणीत्येवं तस्यायम-
र्थः तैजसाहङ्कारानुगृहीतवैकारिकाहङ्कारकार्याण्युभयविधानीन्द्रियाणीति इन्द्रियाणां तैजसानुगृहीतवैकारिकादेवोत्पत्तिर्हि
द्वितीयस्कन्धेऽभिहिता एतदेव सहेतुकमुपपादयति हि यस्मात्प्राणस्य कर्मेन्द्रियगणस्य प्राणमनूत्क्रमन्तं सर्वे प्राणा अनूत्क्रमन्ति इ-
ति सर्वेन्द्रियाणां प्राणशब्दवाच्यत्वेऽपि बुद्धेरिति ज्ञानेन्द्रियगणस्य पृथगुपादानं गोबलीवर्दन्यायेनात्र कर्मेन्द्रियवर्गपरः प्राणशब्द इत्त-
स्य कर्मेन्द्रियगणस्य क्रियागमनादानादिक्रियारूपा शक्तिर्दृश्यते प्रतश्च बुद्धेः कुण्ठितेनेनेति बुद्धिः ज्ञानेन्द्रियवर्गस्य विज्ञानमर्थप्रका-

तामसाच्च विकुर्वाणाद्भगवद्वीर्यचोदितात् शब्दमात्रमभूत्तस्मान्नभः श्रोत्रं च शब्दगं ३२

शनरूपा शक्तिर्ता दृश्यते तस्मात्तैजसाहङ्कारानुगृहीतसात्त्विकाहङ्कारकार्याण्युभयेन्द्रियाणीत्यर्थः बुद्धेर्ज्ञानशक्तित्वेनैतेनात्रापि
ज्ञानेन्द्रियगणस्य वैकारिकत्वं स्पष्टमेवोक्तं तत्र सत्त्वं निर्मलत्वात्प्रकाशकाशकमनामयमिति सत्त्वस्यैव प्रकाशकत्वात् ननूभयेन्द्रि-
याणामपि तैजसानुगृहीतवैकारिकत्वेऽभयेषामपीन्द्रियाणां ज्ञानक्रियाशक्तिद्वयवत्त्वमेव स्यान्न तु न द्वयमिति चेन्न सत्त्वरजसोरुद्भ-
वाभिभवयोगे ज्ञानेन्द्रियोत्पादनवेलायां वैकारिके सत्त्वस्योद्भवः रजसोऽभिभवः कर्मेन्द्रियोत्पत्तिवेलायां तु रजस उद्भवः सत्त्वस्याभिभव
इत्यविरोधात् ३१ अथ तन्मात्रोत्पत्तिपूर्वकमाकाशादिमहाभूतोत्पत्तिं तयोः कार्यं [illegible] लक्षणं चाह तामसादिति पञ्चदशभिः
भगवद्वीर्यचोदिताद्भगवत्संकल्पप्रेरितात् तत एव विकुर्वाणात्तामसादहङ्काराच्छब्दमात्रं शब्दतन्मात्रं द्रव्यमभूदुत्पन्नं तस्माच्छ-
ब्दमात्रान्नभ उदभूत् स शब्दः केन गृह्यते इत्यत्राह श्रोत्रमिति श्रोत्रं तु शब्दगं इत्यादिना प्रोक्तातीतं सम्बन्धमात्रमुच्यते श्रोत्रं श्रोत्रे-
न्द्रियं शब्दगं शब्दतन्मात्रज्ञापकमित्यर्थः ३२

भा॰त॰दी॰
१२७

भावनं घ्रतादि निष्यादनं आलम्बनस्थानं ब्रह्मणः शब्दस्य श्रवणेनोपलक्षणोर्थः सर्वेषामाधारत्वमित्यर्थः ब्रह्मण इति पाठे तु ब्रह्मण अ
भिव्यक्तस्य स्थानमिति स एवार्थः सद्विशेषणं सतां कार्याणां विशेषकत्वं ब्रीह्यादिकार्याणां देहभेदेन सारासारवत्त्वदर्शनात् स
र्वसत्वगुणो ऽयं तन्नहेशस्य प्राणिनामाकारविशेषहेतुत्वं यथाकाशादिसर्वसत्वगुणवत्त्वं चेतियाप्याप्यावृत्तिः कार्यमेवलक्षण
मित्यर्थः ४६ भूतानां शब्दादिमात्रहेतुत्वमुक्तं तेषां चलनस्पर्शनवदेश्वं हपंचांश्च तेमभस आकाशस्य गुणविशेषः शब्दोपला
र्थः विषयः ग्राह्य इति यावत् तच्छ्रोत्रमुच्यते आकाशासाधारणगुणशब्दग्राहकमेव श्रोत्रमित्यर्थः एवमुत्तरत्रापि वेदितव्यं ४७

तिं॰ पद्धं पार्थिवाः सर्वसत्वगुणो ऽयं दृश्यते नहि शब्द एवपरस्येति हि यस्मात्परस्य कारणस्य धर्माः शब्दादिरपरस्मिन्कार्ये वाय्वादौ
समन्वयात्समवायाद्दृश्यन्ते अतस्तस्मादेवानामाकाशादीनां विशेषः शब्दादिः भूमौ पृथिव्यामेवोपलक्ष्यते दृश्यते ४८ एवं मह

126

भावने ब्रह्मणः स्थाने धारणे साद्विशेषणं सर्वसत्वगुणो ऽयं पृथिवीवृत्तिलक्षणं ४६ नभोगुणविशेषोर्थोयस्य तत्श्रोत्र
मुच्यते वायोर्गुणविशेषोर्थोयस्य तत्स्पर्शं विदुः ४७ तेजोगुणविशेषोर्थोयस्य तच्चक्षुरुच्यते अंभोगुणविशेषोर्थोयस्य
तद्रसनं विदुः भूमेर्गुणविशेषोर्थोयस्य स घ्राण उच्यते ४८ परस्य दृश्यते धर्मो ह्यपरस्मिन्समन्वयात् अतो विशेषो भा
वानां भूमावेवोपलक्ष्यते ४९ एतान्यसंहत्य यदा महदादीनि सप्त वै कालकर्मगुणोपेतो जगदादिरुपाविशत् ५० ततस्तेनानु
विद्धेभ्यो युक्तेभ्यो ऽण्डमचेतनं उत्थितं पुरुषो यस्मादुदतिष्ठदसौ विराट् ५१ वादिपृथिव्यंतमभूतसृष्टिमभि धायतेभ्यों ऽडस्योत्पत्तिमभि

धास्यन् ज्ञानादीर्याः पृथग्भूतास्ते संहतिं विना नेशुः सृष्टौ ईश्वराणां प्रवेशमंतरेण कार्यसामर्थ्यं वदंस्तेष्वीश्वराणां प्रवेशमाह एतानि मह
दादि पृथिव्यंतानि सप्ततत्त्वानि तन्मात्राणि भूतेषु इन्द्रियाण्यहंकारे चांतर्भाव्य सप्तेति निर्देशः यदा संहत्य मिलित्वा स्थितानि तदा
कालकर्मगुणोपेतः कर्मादृष्टं गुणाः सत्त्वादिः कालादिभिरुपेतः जगदादिरीश्वरः तानि महदादितत्त्वानि उपाविशत् ५० मेलनं सं
हतत्त्वसमागतत्त्वभेदेन द्विविधं संहतत्त्वं नाम पृथक्स्थितत्वे संयोगमात्रं समागतत्वं पृथक्स्थित्यनर्हसंश्लेषविशेषः एतदुभाभा
वात्सर्व्यं समर्था न्यवस्थितानीश्वरानुप्रवेशादुभयं प्राज्ञेभ्यो दर्शयिमाह ततस्तदीश्वरानुप्रवेशानंतरं तेनेश्वरानुप्रवेशेनेहेतु

वायोरिति स्पर्शः तन्मात्रो साधारणगुणो यस्य तस्मा ईश्वरेरिताद्वायो रूपं रूपतन्मात्रमभूत् ततो रूपं तेजः समुत्थितं रूपमात्रमभूत् किं तद्रूप
स्य ग्राहकमित्यत आह चक्षुरक्षं रूपेन्द्रियं रूपोपलंभनं रूपग्राहकं ३८ द्रव्याकृतित्वं द्रव्यस्य मूर्तता रव्याववर्णकत्वं गुणास्तानि संख्या स्पर्शत्वं व्यक्ति
संस्थाने यद्गतं तदाभावतं कृत्वं तेजसः तेजस्त्वमसाधारणगुणत्वं च हे साध्वि रूपमात्रस्य रूपतन्मात्रस्य वृत्तयः लक्षणानीत्यर्थः ३९ द्यो
तनं प्रकाशनं पचनं तंडुलादेः रन्तःकृशनादि पिपासा तद्वारेण पानं मर्दनं च हिममर्दनं हिमाभिभवः शोषणं च तेजसो वृत्तयः लक्षणानि
कार्याणीतियावत् ४० रूपमात्रादिति दैवेन चोदितात्प्रेरितात् विकुर्वाणाद्रूपतन्मात्राद्रूप तन्मात्रं यस्य तस्मात्तेजसः रसमात्रं रसतन्मात्र
मभूत् तस्माद्रसमात्राद् अंभः अभूत् रसतन्मात्रस्य ग्राहिकाकेत्यत आह जिह्वा रसनेन्द्रियं रसस्य ग्रहः ग्राहिका ४१ कषायादि मुलवणपि

वायोश्च स्पर्शतन्मात्राद्रूपं दैवेरितादभूत् समुत्थितं ततस्तेजश्चक्षू रूपोपलंभनं ३८ द्रव्याकृतित्वं गुणता व्यक्तिसंस्थात्वमेव च
तेजस्त्वं तेजसः साध्वि रूपमात्रस्य वृत्तयः ३९ द्योतनं पचनं पानमदनं हिममर्दनं तेजसो वृत्तयस्त्वेताः शोषणं क्षुत्तृडेव च ४०
रूपमात्राद्विकुर्वाणात्तेजसो दैवचोदितात् रसमात्रमभूत्तस्मादंभो जिह्वा रसग्रहः ४१ कषायो मधुरस्तिक्तः कट्वम्ल इति नैक
धा भौतिकानां विकारेण रस एको विभिद्यते ४२ क्लेदनं पिंडनं तृप्तिः प्राणनाप्यायनोदनं तापापनोदो भूयस्त्वमंभसो वृत्तयस्त्वि
माः ४३ रसमात्राद्विकुर्वाणादंभसो दैवचोदितात् गंधमात्रमभूत्तस्मात्पृथ्वी घ्राणस्तु गंधगः ४४ करंभपूतिसौरभ्यशांतोग्रा
म्लादिभिः पृथक् द्रव्यावयववैषम्याद्गंध एको विभिद्यते ४५ लवणाः भौतिकानां संसर्गिकद्रव्याणां एक एव रसः कषायादिभेदे

नानैकधा भिद्यत इत्यर्थः ४२ क्लेदनं मार्दीकरणं पिंडनं मृदादेः पिंडीकरणं तृप्तिः तृप्तिरस तत्ते प्राणनं जीवनं आपोमयः प्राण इति श्रु
तेः आप्यायनं तट्टीकृत्य निवर्त्तनम् उदनं मृदुकरणं भूयस्त्वं कूपादावुद्धृतस्यापि पुनरुद्गमः पांचभौतिके द्विपिजलमात्रस्य भूयस्त्वं बा
लखाचस्य प्रकारः श्रोतात्मकत्वात् भूयस्त्वं इति इमाः क्लेदनादयः तेजसो वृत्तयः ४३ दैवचोदितात् विकुर्वाणात् रसमात्राद् अंभसः गंधमात्रम
भूत् [illegible] तस्माद्गंधमात्रात् पृथ्वी अभूत् घ्राणः घ्राणेन्द्रियं गंधगः गंधग्राहकः ४४ एकस्य वागंधः द्रव्याणां संसर्गिकद्रव्या
णामवयववैषम्याद्विकारात् पृथक् रंभादिभिर्भेदैर्विभिद्यते तत्र करंभो मिश्रगंधः यथा वंजनादीनां दीनां हिङ्ग्वादिसंस्कारैः पूतिर्गं
धः सौरभ्यं कर्पूरादेः शांतः शतपत्रादेः उग्रो लशुनादेः अम्लः पर्युषितभुक्तान्नादेः ४५ ॥ ॥ ॥

भा॰स्क॰टी॰
१२८

प्राणादनंतरं तदधिष्ठाता वायुश्च प्राणाधीनत्वं सर्वेंद्रियेष्वपि द्रष्टव्यं तथाहि छंदोगवाजसनेयिनां प्राणविद्यायां एताहवैदेवता अहंश्रेयसे व्यूदिरे अहंश्रेयसे विवदमाना इति चोपक्रम्य वागादीनां क्रमेण उत्क्रमणे ऽन्येषां सप्राणानामिंद्रियाणां शरीरस्य च स्थितिं तत्कार्यं चाविकलं प्रतिपाद्य प्राणोत्क्रमणे सर्वेषां विशरणमकार्यकरत्वं चाभिधाय सर्वेषां प्राणाधीनस्थितित्वमभिहितं अक्षिणी चक्षुरिंद्रियाधिष्ठाने निरभिद्येतां ताभ्यां भक्तेभ्यो भवतां एतयोः रूपाणां ग्रहणाय चक्षुरिंद्रियं निरभिद्यत तस्माच्चक्षुषः सूर्यश्च चक्षुरधिष्ठाता अभवत् कर्णौ श्रोत्रेंद्रियाधिष्ठाने निरभिद्येतां ततः श्रोत्रेंद्रियं तदधिदेवता दिशश्च निरभिद्यंत ५५ विराजो ब्रह्मणः रोमाणः श्मश्र्वादयः च त्वगिंद्रियाधिष्ठानमभूताः ततस्त्वगिंद्रियं ततस्तदधिदेवता ओषधयश्चासन् एवं शिश्नमुपस्थेंद्रियाधिष्ठानं ५६ ५७ हस्तौ पाणींद्रियाधिष्ठानौ तत्र स्वराट् इंद्रः स्वराडिंद्रः प्रथमेमासीदिति श्रुतेः पादौ पादेंद्रियाधिष्ठानं गमनाख्यं पादेंद्रियं तदधिदेवता हरिरूपेंद्रः ५८

घ्राणाद्वायुरभिद्येतामक्षिणी चक्षुरेतयोः तस्मात्सूर्यो व्यभिद्येतां कर्णौ श्रोत्रं ततो दिशः ५५ निर्बिभेद विराजस्त्वग्रोमश्मश्र्वादयस्ततः ततओषधयश्चासन् शिश्नं निर्बिभिदे ततः ५६ रेतस्तस्मादाप आसन्निरभिद्यत वै गुदं गुदादपानोपानाच्च मृत्युर्लोकभयंकरः ५७ हस्तौ च निरभिद्येतां बलं ताभ्यां ततः स्वराट् पादौ च निरभिद्येतां गतिस्ताभ्यां ततो हरिः ५८ नाड्योस्य निरभिद्यन्त ताभ्यो लोहितमाभृतं नद्यस्ततः समभवन्नुदरं निरभिद्यत ५९ क्षुत्पिपासे ततः स्यातां समुद्रस्त्वेतयोरभूत् अथास्य हृदयं भिन्नं हृदयान्मन उत्थितं ६० मनसश्चंद्रमा जातो बुद्धिर्बुद्धेर्गिरांपतिः अहंकारस्ततो रुद्रश्चित्तं चैत्यस्ततोऽभवत् ६१

अस्यांडरूपस्य नाड्यधिष्ठानं आभृतं प्राप्तं लोहितमिंद्रियस्थानीयं तदधिदेवता नद्यः उदरमधिष्ठानं ५९ क्षुत्पिपासे इंद्रियस्थानीये समुद्रोऽधिदेवता हृदयपुंडरीकाकारमधिष्ठानं संकल्पाख्यवृत्त्यवच्छिन्नमनोरूपांतरिंद्रियं ६० चंद्रमा अधिदेवता हृदयादेवाधिष्ठानाद्व्यवसायाख्यवृत्त्यवच्छिन्नबुद्धिरूपांतरिंद्रियं तदधिदेवता गिरांपतिर्ब्रह्मा तथा हृदयमेवाधिष्ठानं अभिमानाख्यवृत्त्यवच्छिन्नोऽहंकाराख्यमंतःकरणमिंद्रियं तदधिदेवता रुद्रः तथा हृदयमेवाधिष्ठानं चित्ताख्यवृत्त्यवच्छिन्नं चित्ताख्यमंतःकरणमिंद्रियं तदभिमानी चैत्यः क्षेत्रज्ञः निरभिद्यत इत्यर्थः अत्र चतुर्मुखशरीरे चतुर्मुखस्योभयेंद्रियविभागाः अपि इंद्रियाभिमानिदेवतात्वाकारेण तेन विरोधः ६१ एवं समष्टिभूतचतुर्मुखदेहस्य वागादींद्रियतदधिष्ठानेभ्यः देवादिवर्षं ॥ ॥ ॥ ॥ ॥ ॥ ॥

पुनरंडमेव विशिनष्टि एतदिति एतद्विशेषाख्यमंडं बहिः प्रधानेन प्रकृत्या आवृतैः क्रमवृद्धैः क्रमशः उत्तरोत्तरमधिकैः क्षित्याद्यधिकं
तत्राह दशोत्तरैः दशगुणितोत्तरैः उत्तरोत्तरं दशगुणाधिकैः तोयादिभिः तोयमहत्पृथिव्याः उपलक्षणं पृथिव्यादिभिरित्यर्थः प
रिवृत्तं परिवेष्टितं यत्र यस्मिन्नंडे लोकवितानः देवमनुष्यादिलोकविस्तरः भवति तद्भगवतो रूपं शरीरमित्यर्थः ५२ एवं महदादिच
तुर्मुखांतसृष्टिरुक्ता अथ समष्टिभूतचतुर्मुखशरीरस्यानंतरं त्ववयवानां देवादिव्यष्टिशरीराणां दृष्टिर्यत्तस्यान्तर्दभिमानिदे
५५ वतानां विभागं विवक्षुः सोपि विभागश्चतुर्मुखशरीरकपरमात्मकर्तृक इत्याह हिरण्मयादिति सलिले शयात् हिरण्मयो
त्र काणावहत्वात् अंडकोशात् उत्थाय अंडकोशशयानो नेरुद्धरूपी भगवान् तत्र उत्थाय प्रवृत्तः सन्मुखो भूत्वा तं चतुर्मुखमाविश्य महा

एतदंडं विशेषाख्यं क्रमवृद्धैर्दशोत्तरैः तोयादिभिः परिवृतं प्रधानेनावृतैर्बहिः यत्र लोकवि
तानोयं रूपं भगवतो हरेः ५२ हिरण्मयादंडकोशादुत्थाय सलिले शयात् तमाविश्य म
हादेवो बहुधा निर्बिभेद खं ५३ निरभिद्यतास्य प्रथमं मुखं वाणी ततो भवत् वाण्या वह्नि
रथो नासे प्राणोतो घ्राण एतयोः ५४ ॥ ॥ ॥ ॥ ॥

देवो भगवान् खमिंद्रियगणं बहुधानेकधा निर्बिभेद समष्टिभूतचतुर्मुखशरीरस्थमिंद्रियगणं व्यष्टिरूपेणानेकधा विभ
क्तमकरोदित्यर्थः ५३ विभागमेवाह निरभिद्यतेत्यष्टभिः अस्य ब्रह्मणः प्रथमं मुखं निरभिद्यत नटस्थानं तीतिवस्सांति
पंचम्यर्थे स्पे वशेषत्वविवक्षया षष्ठी वा ध्यासमष्टिभूतब्रह्मशरीरमुखादेवादीनां वागिंद्रियाधिष्ठाने व्यष्टिमुखं विभक्तम
भूदित्यर्थः ततो वाणी वाग्व्यष्टिरभवत् वाण्या वागिंद्रियात् तदधिष्ठाता वह्निरभवद्विभक्तोभूत् अथो अनंतरं नासे घ्राणेंद्रि
याधिष्ठाने नासाबिले निरभिद्येतां अतः नासाभ्यां घ्राणः घ्राणेंद्रियव्यष्टिः एतयोः एतस्य घ्राणेंद्रियस्याधिष्ठानापेक्षया
एतयोरिति द्विवचननिर्देशः एतयोर्नासिकयोः प्राणो धीनः घ्राणं एतयोरभवदित्यनुषंगः ५४ श्रीमते रामानुजाय नमः ॥

भा॰त॰टी॰
१२८

एतद्देवसद्दृष्टांतमाह यथेति प्राणादय ईश्वरसामर्थ्यबलेन प्रसुप्तं पुरुषं येन क्षेत्रज्ञेन विना यदिच्छामंतरेणोत्थापयितुं न
प्रभवंति न समर्था तथात्र प्राणादयोपि स्वाभिरूपैर्यैरिंद्रियैः सह देवादिशरीराणि प्रविष्टान्यपि क्षेत्रज्ञानुप्रवेशमंतरेण उत्थापयितुं ना
शक्ता इत्यर्थः ३१ एवमन्वयव्यतिरेकाभ्यां भोक्तुः क्षेत्रज्ञस्यैव प्राधान्यमुक्तं तस्यैतस्य क्षेत्रज्ञस्यानुचिंतनं भगवद्भक्तियोगात्तेन
कार्यमित्याह तमिति प्रत्यगात्मानं जीवं परिशुद्धस्वरूपं योगेन तद्याथात्म्यविवेचनरूपयोगेन प्रवृत्तया धियो योगेन प्रवृत्तया धिया
भ५ अस्मिन् देहे विविच्य शरीरबुद्धींद्रियप्राणादिभ्यः पृथक्कृत्य ईश्वरभक्त्यादिरक्त्याकामानभिष्वंगेन ज्ञानेन ब्रह्मात्मकत्वज्ञानेन क्षार्द
न चात्मनि मनसि चिंतयेत् यद्वा प्रत्यगात्मानं धिया विविच्यात्मनि तस्मिन्प्रत्यगात्मनि परमात्मनि मिति शेषः अथ हितापत्ति विरुद्ध
विषयवैराग्येण ज्ञानेन कर्मयोगउक्तज्ञानेन प्रत्यगात्मयाथात्म्यज्ञानयोगेन भक्त्या ईश्वरभक्त्या ज्ञानभक्तियोगाभ्यामनुगृहीतया

यथा प्रसुप्तं पुरुषं प्राणेंद्रियमनोधियः प्रभवंति विना येन नोत्थापयितुमोजसा ३१ तमस्मिन्प्रत्यगात्मानं धिया यो
गप्रवृत्तया भक्त्या विरक्त्या ज्ञानेन विविच्यात्मनि चिंतयेत् ३२ इति श्रीभाग॰ तृतीयस्कंधे षड्विंशोध्यायः २६ कापिलउ॰
-228 प्रकृतिस्थोपि पुरुषो नाज्यते प्राकृतैर्गुणैः अविकारादकर्तृत्वान्निर्गुणत्वाज्जलार्कवत् १ ॥ ॥ ॥ ॥

भक्त्येत्यर्थः चिंतयेत् ३२ इति तृतीयषड्विंशः २६ एवं जगत्सृष्ट्यादिव्यापारकथनेन भजनीयस्य भगवत ऐश्वर्यमावेदितत्वा
मुपायभूतभक्तियोगात्प्रत्यगात्मयाथात्म्यज्ञानयोगमुपपादयिषुरुत्तीर्ण्या तस्य स्वरूपं कथं मंतुं शक्यमित्याशंकां वारयितुं तस्य
प्रत्यगात्मनो ज्ञानगराघवस्यास्कविसदत एवभासंकथयिषन्नु तस्यैव स्वात्मनः प्रकृतिसंसर्गकृतं व ज्ञानगराघवस्या स्वरूपसांसा भे२
रिकप्रवृत्तिषु कर्तृत्वं तदा पुत्रसुखदुःखभोक्तृत्वं च न स्वरूपप्रयुक्तमिति पूर्वोक्तमनुवदति प्रकृतिस्थोपि प्रकृतेर्गुणैः इदं मे
वत्सं मनुष्यत्वादिभिः सत्त्वादिहेतुकैः सुखदुःखादिभिश्च नाज्यते स्वतो न स्पृश्यते कुतः अविकारात् स्वतो देवमनुष्यादिरूपेण प राम
णा रिणामाभावात् अकर्तृत्वात् जन्मनादिवाह्यसांसारिकव्यापारकर्तृत्वाभावात् स्वतः सत्त्वादिगुणान्वयाभावात् स्वतो नाज्यत इत्य
त्र दृष्टांतं जलार्कवदिति घटाकाशादेरप्युपलक्षणमिदं ननु घटादिषु सूर्यादियोगः ॥ ॥ ॥ ॥ ॥ ॥ १२८

नोइंद्रियतत्स्थानतदधिदेवतासृष्टिरुक्ता अथ क्षेत्रज्ञभोगायतनत्वाद्देवादिशरीराणां तत्र प्राधान्यं भोक्तुः क्षेत्रज्ञस्येत्यन्वयव्य-
तिरेकाभ्यां प्रतिपिपादयिषुर्वागादीन्द्रियतदधिष्ठातृदेवतानां च व्यष्टीनां देवादिव्यष्टिशरीराधिष्ठानेषु [illegible] प्रविष्टा-
नामपि क्षेत्रज्ञानुप्रवेशमन्तरेण व्यष्टिशरीरभूतजातस्य प्रवृत्ति[illegible]तः संपादनासामर्थ्यमाह एत इति एते देवा इन्द्रियसहितास्तत्र
मानि वागादिदेवा अभ्युत्थितास्ताः समष्टिचतुर्मुखशरीरादुत्पन्नाः अस्य देवादि[illegible]ष्टिशरीरस्वरूपभूतजातस्याप्रविश्येति शेषः उत्था-
पने प्रवृत्तस्तु सुखकरणेनाशकन्नसमर्था बभूवुः एतदेव प्रपंचयति पुनरित्यादिना पुनः शब्दः सामर्थ्याभावनिपादनारम्भद्योतकः देवा-
दिव्यष्टिशरीर[illegible]खानि देवाधिष्ठितानीन्द्रियाणि उत्थापयितुमक्त्सुन्सुखकर्तृत्वक्रमादाविविशुः तदधिष्ठानं प्रविविशुः ६२ कादेव-
ताकेनेन्द्रियेण कुत्र प्रविष्टा उत्थापनाशक्ताभूदित्यत्राह वाक्हित्यादिभिः सप्तभिः [illegible] वह्निरधिदेवता वाचा वागिन्द्रियेण सह

पत्तेऽभ्युत्थिता देवा न चास्योत्थापने शकन् पुनराविविशुः खानि तमुत्थापयितुं क्रमात् ६२ वह्निर्वाचा मुखं भेजे नोदतिष्ठ-
त्तदा विराट् प्राणेन नासिके वायुर्नोदतिष्ठत्तदा ६३ अक्षिणी चक्षुषादित्यो नोद० श्रोत्रेण कर्णौ च दिशो नो० ६४ त्वचं रोम-
भिरोषधयो नो० रेतसा शिश्नमापस्तु नोद० ६५ गुदं मृत्युरपानेन नो० हस्तौ विड्बलेनैव नो० ६६ विष्णुर्गत्यैव चरणौ नो
० नाड्यो नद्यो लोहितेन नो० ६७ क्षुत्तृष्णामुदरं सिंधुर्नो० हृदयं मनसा चंद्रो नो० ६८ बुद्ध्या ब्रह्मापि हृदयं नो० रुद्रोऽभिमत्या
हृदयं नो० ६९ चित्तेन हृदयं चैत्यः क्षेत्रज्ञः प्राविशद्यदा विराट्तदैव पुरुषः सलिलादुदतिष्ठत ७०

मुखं देव्यष्टिमुखं भेजे प्रा-
विशत् तदासौ विराट्कार्यभूतव्यष्टिशरीरजातं नोदतिष्ठत् प्रवेशेऽप्यनुत्थोऽभूत् एवमुत्तरत्रापि द्रष्टव्यं सर्वत्र विराट्शब्देन वि-
राट्कार्यभूतत्वाद्व्यष्टिशरीरजातं लक्ष्यते अन्यथा चतुर्मुखसृष्टानां भूरादीनां चतुर्मुखशरीरे व्यापकत्वाश[illegible]क्तेः ६३ ६४
६५ ६६ ६७ ६८ ६९ एवं स्वतः सेंद्रियाणां देवानां उत्थापनाशक्तिमभिधाय क्षेत्रज्ञाधीनं तेषामुत्थापकत्वमित्याह चित्तेने-
ति चैत्यः चित्ताधिदेवः क्षेत्रज्ञः हृदयमधिष्ठानं चित्तेन सह यदा प्राविशत्तदैव विराट्पुरुषः [illegible] विराट्कार्यभूतो
देवादिरूपः पुरुषः सलिलात् सलिलकार्यभूतब्रह्माण्डात् इह ल्यब्लोपे पंचमी सलिलमाविश्य स्थितः उदतिष्ठत् तं प्रहृतिसमोऽभू-
दित्यर्थः ७०॥

तदा तेनाभयविद्याभिमानेनावशः कर्मपरतंत्रः सन् अत एवानिर्वृतः कर्मायत्तसुखदुःखोपभोगेन नितरां सुखमलभमानः प्रा-
संगिकैः प्रकृतिसंसर्गकृतैः कर्मदोषैः पुण्यापुण्यरूपैर्दोषैः सदसन्मिश्रयोनिषु उत्तमाधममध्यमभूतेषु देवतिर्यगादिषु संसा-
रपदवीमभ्येति प्राप्नोति ३ ननु देहाद्याकाराणामात्मनः स्वाभाविकत्वाभावात् कोऽनर्थ आत्मन इत्यत्राह अर्थे आत्मनो दे-
वमनुष्यत्वाद्याकारे स्वतोऽविद्यमानेऽपि अस्यात्मनः विषयान् शब्दादीन् ध्यायतोऽतो यतः संसृतिर्न निवर्तते संसाररूपोऽनर्थो न
निवर्तते यथा स्वप्ने शरीराणामात्माकारत्वाभावेऽपि स्वविषयचिंतनेन सुखदुःखरूपानर्थहेतुत्वं तद्वज्जागरेऽपि देहाकाराणामात्मा-
कारत्वाभावेऽपि विषयध्यानमेव जननमरणानर्थरूपसंसृतिहेतुत्वमित्यर्थः ४ हि यस्मादेवमत एव मनो नियंतव्यमित्याह अत एवेति अ-
सतां प्रकृतिपरिणामरूपाणां इंद्रियाणां पथि शब्दादिविषये प्रसक्तं नितरामासक्तं चित्तं तीव्रेणांतरायानुपहतेन भगव-

तेन संसारपदवीमवशोऽभ्येत्यनिर्वृतिः प्रासंगिकैः कर्मदोषैः सदसन्मिश्रयोनिषु ३ अर्थे ह्यविद्यमानेऽपि
संसृतिर्न निवर्तते ध्यायतो विषयानस्य स्वप्नेऽनर्थागमो यथा ४ अत एव शनैश्चित्तं प्रसक्तमसतां प-
थि भक्तियोगेन तीव्रेण विरक्त्या च नयेद्वशं ५ यमादिभिर्योगपथैरभ्यसेत् श्रद्धयान्वितः मयि भावेन स-
त्येन मत्कथाश्रवणेन च ६ सर्वभूतसमत्वेन निर्वैरेणाप्रसंगतः ब्रह्मचर्येण मौनेन स्वधर्मेण बलीयसा ७

भक्तियोगेन विरक्त्या कामानभिष्वंगेण च शनैर्वशं नयेत् स्ववशं कुर्यात् विरक्तिसाधनसप्तकोपलक्षणं विरक्त्यनुगृहीतभगव-
त्सेवासमीहितभगवदनुचिंतनपरं कुर्यात् एवं बंधो निवर्तत इति भावः ५ भक्तियोगानुग्राहकान्येव वर्णयन् अभ्यासप्रकार-
माह षड्भिः श्रद्धया मनोनियमनविषयया त्वरया योगपथैः भक्तियोगेतिकर्तव्यतारूपैर्यमादिभिः शमादिभिः मयि ईश्वरे भावेन मातापि-
ताभ्रातृसुहृद्विधभावेन सत्येन सत्सवचनेन ६ सर्वभूतेषु समत्वेन प्रकृतिपुरुषशरीरकेश्वरात्मकत्वानुचिंतनेनात एव निर्वैरेणा-
प्रसंगतः शब्दादिविषयाणामसंगात् ब्रह्मचर्येण स्त्रीसंगादिराहित्येन मौनेन मितवाक्येन बलीयसा भक्तियोगानुग्राहकाणां मध्ये
बलवत्तरेण स्वधर्मेण स्ववर्णाश्रमोचितधर्मेण चाभ्यसेत् भक्तियोगमिति शेषः ७ ॥ ॥ ॥ ॥ ॥

स्वभावविप्रक
र्षनि ४

त्यान्तत्रस्या स्वर्गादौ तेन परमार्थतस्तत्रस्या अतो जलत्वगतवृद्धिह्रासकंपनादिदोषास्पर्शः सूर्यादिषु युक्तः प्रस्मगात्मनस्तु दे
वादिशरीरेष्ववस्थितेः कथं तद्गुणैर्न लिप्यते इत्युच्यते इति चेदुच्यते देशविप्रकर्षः कालविप्रकर्षः स्वभावविप्रकर्षस्सोत्राहर
णमाकाशादिः तत्र देशविप्रकर्षवत् स्वभावविप्रकर्षस्यापि दोषास्पर्शहेतुत्वात् यथा घटकरकादिषु वृद्धिह्रासभाक्स्वएवकुंस
पुंज्यमानमप्याकाशं वृद्धिह्रासादिदोषैर्न स्पृश्यते यथा जलाधारे सुविषयेषु दृश्यमानोपि दृश्यमानदेशविप्रकर्षान्न तद्वृद्धिह्रा
सादिभिर्न स्पृश्यते तथा पुण्यात्मगोप्यात्मापि देवादिचतुर्विधशरीरेष्ववस्थितस्तत्कृतैर्धर्मैः स्वतोनुयुज्यते स्वभावविप्रकर्षादिति
तत्रार्कः स एव दृष्टान्तीकर्तव्यो नार्क इति चेन्न दोषास्पर्शमात्राभिप्रायकत्वात् दृष्टान्तस्य दृश्यते चैवं सर्वात्मनासाधर्म्याभावेपि
विवक्षितांशसाधर्म्याद्दृष्टान्तोपादानं सिंहो माणवक इत्यादौ यद्यप्रकृतिगता देवमनुष्यत्वादयः प्रकृतेरेव धर्माः नात्मनः तस्य
देवमनुष्याद्याकारस्य स्वतोभावात् यदि देवोयं मनुष्योयमिति प्रतीत्या ह्यात्मा एव प्रकृतः कर इति चेत् सा प्रतीतिर्भ्रान्ति

स एष यदि प्रकृतेर्गुणेष्वभिषज्जते अहंकृत्याविमूढात्मा कर्तास्मीत्यभिमन्यते २

रूपेति सदृष्टान्तमाह प्रकृतिस्थ इति देहस्थोपि पुरुषो जीवः अकर्तृत्वादिभ्यो हेतुभ्यः प्राकृतैर्गुणैर्देवत्वादिधर्मैर्न न्यते अत्रां
जिगसिर्षः स्वतो देवत्वादिविशिष्टो न गम्यते तथा नानुसंधीयते इति यावत् तत्र दृष्टान्तैः जलार्कवदिति यथा जले प्रतिबिंबितः
सूर्यः जलगतैर्धर्मैर्विशिष्टत्वेन परमार्थतो न प्रतीयते तेषां जलगतत्वात् एवं प्रकृतिधर्मैरात्मापि परमार्थतोपि प्रतीयते ते
षां प्रकृत्याकारत्वेनात्माकारत्वाभावात्तेषामात्मगतत्वेन प्रतीतिर्भ्रान्तिरूपेत्यर्थः १ एवंविधस्यात्मनः कथं देवमनुष्यत्वादियोगः
कथं वा सांसारिकप्रवृत्तिषु कर्तृत्वं सुखदुःखानुभवश्चेत्याशंकायां सर्वमिदं देहात्माभिमानकृतमित्याह स इति स एष प्रकृतिविल
क्षणोप्यात्मा अहंकृत्याविमूढात्मा हंकृत्या नात्मनि देहे आत्माभिमानः तेन मूढः तिरोहितमात्मस्वरूपस्य सः यदा प्रकृतेर्गु
णेषु शब्दादिषु विषज्जते शब्दादिविषयप्रवणः स्यात् तदा कर्तास्मीति स्वतन्त्र इत्यभिमन्यते अनेन स्वतन्त्रत्वाभिमानो विबं
धहेतुरित्युक्तं २ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

दृष्टान्ते। शिक्षितमर्थं दर्शयन्तिके दर्शयन्ति एवमिति एवंभूतेन्द्रियमनआत्मकैः त्रिभिः स्वकार्यैः अहंकारो हं कारस्त्वा प्रकृतिपरिणामविशेषः
स्वाभासैः स्वधर्मभूतज्ञानैः आत्मव्यतिरिक्तोपाधिमात्मतयाग्रहते साहीन्द्रियमनोहंकाररूपंचभूतरूपदेहात्म विषयात्मबुद्धिरिति तथा
तेनैव स्वाभासेनैव सदाभासेन स्वाभाविकस्वप्रभाभूतज्ञानेने सत्सदृक् निर्विकारज्ञानस्वरूप आत्मा गृह्यते इत्यर्थः स्वाभासैरिति बहुव
चनं देवो हं मनुष्योहं कृशोहं स्थूलो हमित्यादि नानाकारविषयत्वाभिप्रायं अयमर्थः नघ्घकारे प्रतिबिंबज्ञाने अतो नादित्ये आदित्यप्रभातिः स्वा
श्रयादित्ये आदित्यबुद्धिः आदित्यस्वधर्मभूता लोके नैव एवमनात्मनि देहे आत्मभ्रांतिः साक्षादात्मन्यात्मप्रतिपत्तिश्चात्मधर्मभूत
ज्ञानेनैव भवति २३ अथेन्द्रियाद्यनवधानदशायामात्मावभासमाह भूतेति बुद्धिर्महान् आदिशब्दादहंकारः स्वयंभूतसूक्ष्मादिषु
निद्रयालीनेषु अनवभासमानेषु अकर्ष्यार्करणोक्तिसमर्थः तदा सन्निरहंकृतः जीवात्मा निद्रः निरहंक्रियः देहात्माभिमानरहितः तमात्मानं
प्रतिपद्यत इति तत्तीयेनान्वयः २४ ननु यदि तदा विनिद्रोसाव स्थितर्हि जाग्रत्स्वप्नयोरिवेस्फुटं किं नावभासते तत्राह मन्यमान इति एवंस

एवंत्रिवृदहंकारो भूतेन्द्रियमनोमयैः स्वाभासैर्लक्षितो नेन सदाभासेन सत्सदृक् २३ भूतसूक्ष्मेन्द्रियमनोबुद्ध्यादिष्विह निद्रया। ली
नेष्वसतिपस्तत्र विनिद्रो निरहं क्रियः २४ मन्यमानस्तदात्मानमनष्टो नष्टवन्मृषा नष्टेहंकरणे द्रष्टा नष्टवित्त इवातुरः २५
दृष्टा देहादेर्द्रष्टृत्वेन सविकल्पतया स्फुटं प्रतीतस्तदा सुषुप्तौ देहादेरनात्मन्यात्माभिमानरूपाहंकारविषयस्य लीनत्वात्तद्विषये हंकर
णे सतिस्वयमनष्टोपि मृषैवात्मानं नष्टं इव मन्यमानो यः आत्मस्वनाशेनाप्यसौ नष्टतुल्यत्वेन दृष्टतः नष्टवित्तो यथातुरो विवशः नष्टवद्व
र्ततितथेत्यर्थः ननु सुषुप्तौ न किञ्चिदनुभूयते तथा चस्मृतिः नाहं खल्वयमेवं संप्रत्यात्मानं जानात्ययमहमस्मीति करणेनात्मनः स्फुरणं सु
षुप्ताव विनाहमर्थस्यात्मनो विगमः अत एव सुषुप्तोत्थितस्यैवं परामर्शः सुखमहमस्वाप्सं न किञ्चिद वेदिषमामप्यहं न ज्ञातवानिति।
अनेन प्रत्यवमर्शेन तदानीमप्यहमर्थस्यैवात्मनः सुखत्वं ज्ञातृत्वं च ज्ञायते सुखमहमस्वाप्समिति परामर्शो हि सुखमित्यनेन तत

दानीमनुकूलं तयाभासमानस्वरूपमंसूचितं भवति अहमित्यनेन स्वस्यैवभासमानत्वं चानुसंहितं भवति यथा मधुरमगा
यमिति परामर्शो ... गमेन सं तदानीतनं तन्माधुर्यं चानु॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

नेः१ हः१

यदृच्छयोपस्थितेन दैवादुपनतेनान्नादिना संतुष्टः दैवादुपनतमपि मितमेव भुंजानः मुनिर्भोजनादिदशास्वपि प्रभाग्रसंशीलनपरः वि-
विक्तशरणः एकांतवसतिः शांतः भयादिरहितः मैत्रः भयजनकैरपि भूतैर्मैत्रीमेव कामयमानः करुणः तेष्वपि कारुणिकः आत्मवान् तेन न
प्रकृतेः प्रशस्तमनस्कः ८ सानुबंधे पुत्रकलत्राद्यनुबंधसहितेऽस्मिन् देहे सदाग्रहं ममाभिमतिमकुर्वन् दृष्टतत्त्वं याथात्म्यं यस्मिन् तेन ज्ञानेन प्र-
कृतेः [illegible] पुरुषस्य च ज्ञानेन प्रकृतिपुरुषयोर्विवेकज्ञानेनेत्यर्थः ९ निवृत्ता निवृत्तबुद्धेर्मनसोऽवस्था नानासंकल्पविकल्पादिनियमासः
अत एव दूरीभूतमन्यत् भगवद्व्यतिरिक्तस्य दर्शनं यस्य सः आत्मदृक् प्रकृतिविविक्तात्मदर्शी १० असति देहे चक्षुषा आदित्याधिष्ठि-
तं चक्षुरिंद्रियेण अर्कमभिव्यक्तारमादित्यमिवात्मना यस्मात्मनाधिष्ठितेन प्रत्यगात्मना आत्मानं परमात्मानमुपलभ्य साक्षात्कृत्य-
पश्चान्मुक्तलिंगः प्रारब्धावसाने मुक्तदेहादिशरीरकः द्वितीयांतपाठे मुक्तकर्मोपात्तदेहादिशरीरं सदाभासं नित्यासंकुचितज्ञानस्व

यदृच्छयोपलब्धेन संतुष्टो मितभुङ्मुनिः विविक्तशरणः शांतो मैत्रः करुण आत्मवान् ८ सानुबंधे च देहेऽस्मिन्नकुर्वन्नसदाग्र-
हं ज्ञानेन दृष्टतत्त्वेन प्रकृतेः पुरुषस्य च ९ निवृत्तबुद्ध्यवस्थानो दूरीभूतान्यदर्शनः उपलभ्यात्मनात्मानं चक्षुषेवार्कमात्म-
दृक् १० मुक्तलिंगं सदाभासमसति प्रतिपद्यते सतो बंधुमसच्चक्षुः सर्वानुस्यूतमद्वयं ११ यथा जलस्थ आभासः स्थलस्थेनाव-
दृश्यते स्वाभासेन तथा सूर्यो जलस्थेन दिविस्थितः १२

स्वस्वरूपं सतः प्रत्यगात्मनः बंधुं पितामहं स्वरसकः शेषीभर्तेत्याद्युक्तस-
र्वविधबंधुरसतो देहादेरव्यवस्थितप्रकाशकं तस्याभासा सर्वमिदं विभातीति स्मृतेः सर्वानुस्यूतं सर्वांतर्यामिणमद्वयं स्वसमाधिकर-
पद्यते २ हितं परमपुरुषं प्रतिपद्यते प्राप्नोति ११ आत्मदृगात्मनात्मानमनुपलभ्येत्यनेन प्रकृतिविविक्तात्मस्वरूपं यदुपन्यस्तं तदंतर्यामिणा परमात्मा-
नमुपलभते प्रतिपद्यत इत्युक्तं तत्र कथमतींद्रियं निरतिशयसूक्ष्ममात्मस्वरूपं दर्शनयोग्यमित्याशंकायां देहेंद्रियादिभिः विलक्ष-
णात्मस्वरूपप्रत्यवमर्शनप्रकारमात्मोपलंभस्य जाग्रदाद्यवस्थास्वपि विशेषतरत्वकथनमुखेन सदृष्टांतमाह यथेति प्रथमं दृश्यते
प्रासादादिषु प्रदेशेषु केन स्थलस्थेनाभासेन तत्पूर्वं तोयादिप्रकाशनेनादित्यादिकेनैवेत्यर्थः जलस्थ आभासः आदित्यप्रतिबिंबः दृश्य-
ते आदित्य आदित्यबुद्धिर्हि सा ततः स्वाभासेन स्वालोकेन जलस्थेन जलेऽपि प्रतिबिंबप्रकाशयितानेनैव दिविस्थितः साक्षादादित्यो
दृश्यते [illegible] हितयोरादित्यालोकेनैव प्रतीतिरित्यर्थः १२ ॥ ॥ ८३ ॥ ॥ ॥ ॥ ॥ ॥

प्रतिबिंबा २

भा॰टी॰ १३२

यथाभूमेः पृथ्व्याः गंधस्तदपृथक्सिद्धस्य गंधगुणस्य च व्यतिरेकतः पृथग्भाव अवस्थानेन संभवति यथा चापां रसस्य तदपृथक्सिद्धरसगुणस्य पृथग्भावो नास्ति तथा बुद्धेः प्रकृतेः ततः परस्यात्मनश्च पृथग्भावो नास्ति यथा बुद्धेः पुरस्य तोद्गुणात्मनः प्रकृतेश्चैतयोर्व्यतिरेकेण योजना १८ किं चाकर्त्तुः स्वतः सांसारिकगमनादिप्रवृत्तस्य नाश्रयस्य पुरुषस्यात्मनः अयं कर्मबंधः यदाश्रयः यत्संबंधाधीनः यच्छंदः प्रकृतिपरः तस्याः प्रकृतेर्गुणेषु सम्बन्धितान्वयः यच्छंदः सत्वादिगुणपरो वा तेष्वित्यस्य रसात्तेषु प्रकृतेर्गुणेषु सत्वादिषु सत्त्वतः गुणेभ्यः प्रकृतेर्वा कैवल्यं विमुक्तत्वं कथं भवेत् १९ तत्वज्ञानेनात्मानं विमुंचेन्नत्राह क्वचिदिति अत्वरा संसाररूपभयं क्वचिन्नत्वावमर्शेन दृष्टेर्क्ष्मावमर्शनेन निवृत्तप्रायमपि अनिवृत्तनिमित्तत्वादनिवृत्तप्रकृतिसंबंधत्वात्पुनः प्रसवति वर्तते उपस्थितंभव

यथा गंधस्य भूमेश्च न भावो व्यतिरेकतः अपां रसस्य च यथा बुद्धेः परस्य च १८ अकर्तुः कर्मबंधोयं पुरुषस्य यदाश्रयः गुणेषु सत्सु प्रकृतेः कैवल्यं तेष्वतः कथं १९ क्वचित्तत्वावमर्शेन निवृत्तं भयमुल्वणं अनिवृत्तनिमित्तत्वात्पुनः प्रत्यवतिष्ठते २० श्रीभगवानुवाच अनिमित्तनिमित्तेन स्वधर्मेणामलात्मना तीव्रया मयि भक्त्या च श्रुतसंभृतया चिरं २१ ज्ञानेन दृष्टतत्वेन वैराग्येण बलीयसा तपोयुक्तेन योगेन तीव्रेणात्मसमाधिना २२ ॥ ॥ ॥ ॥

ति २० सत्यमेवं तथापि वक्ष्यमाणोपकृतभक्तियोगाराधितपरमपुरुषप्रसादात्मानं विमुंचति प्रकृतिः क्वचिदुक्तवस्तुसाधनवैकल्यादित्याह कपिलः अनिमित्तेति निमित्तं फलं तदनिमित्तं मप्रवर्त्तकं यस्मिन् फलाभिसंधिरहितेन स्वधर्मेण स्ववर्णाश्रमोचितधर्मेणामलात्मना विशुद्धान्तःकरणेन धर्मेण पापनुदतीं श्रुतेः श्रुतसंभृतया मत्कथाश्रवणेन संभृतया वर्द्धितया तीव्रया दिव्यानुपहतया मयि भक्त्या अनभिसंहितफलकर्मयोगपरिशुद्धान्तःकरणनिष्ठाया मत्कथाश्रवणादिभिरुपकृतया मद्भक्त्या प्रकृतिस्तिरोभवति चिरं कालं तत्र तथा २१ अन्यान्यपि भक्तियोगांगान्याह ज्ञानेनेति दृष्टतत्वं प्रकृतिपुरुषयोर्याथात्म्यं हेयोपादेयत्वरूपं यस्मिंस्तेन ज्ञानेन बलीयसा वैराग्येण कामानभिष्वंगेन तपोयुक्तेन देहालालनादितपोयुक्तेन योगेन प्रकृतिविविक्तात्मचिंतनेन तीव्रेणात्मसमाधिना चित्तैकाग्र्येण चोपकृतया मद्भक्त्या २२ ॥

रा॰ १३२

विज्ञाप्यते

संहितं भवतीति तदुक्तं नन्वेतावंतं कालं किंचिदहमज्ञासिषमिति परामृशतीति चेत् ततः किं न किंचिदिति कृत्स्नप्रतिषेधः इति चेन्मामप्यहं न ज्ञातवानिति परामर्शेऽपि अहमर्थस्य ज्ञातुरनुवृत्तेर्न स्वरूपं निषिध्यते किंतु प्रबोधसमयेऽनुसंधीयमानस्याहमर्थस्यावस्थांतरकाले तत्तात्कालिकासाधारणधर्मविशिष्टत्वेन बुद्धिस्थत्वाद् घटेतरधर्मविशिष्टत्वेन च प्रतिभासाभावोऽहं मां न ज्ञातवानित्युक्ते विषयो विवेचनीयः जागरितावस्थानुसंहितज्ञात्रादिविशिष्टोऽस्मदर्थो मामिति परामर्शस्य विषयः स्वापाख्यावस्थाप्रसिद्धविशदस्वानुभवैकतानस्त्वहमर्थोऽहमिति परामर्शस्य विषयः अत्र सुखसोऽहमीदृशोऽहमिति च मामपि न ज्ञातवानहमित्येव खल्वनुभवप्रकारः नाहं खल्वयमेवं संप्रतीत्युदाहृतश्रुतावप्ययमित्यनेनाहमयमीदृशज्ञात्रादिविशिष्ट इति न जानातीत्युच्यते तस्मादहमर्थस्यात्मनः सुषुप्तावपि स्फुरणमस्त्येव १५ एतदेवाभिप्रेत्याह एवमिति एवं सुषुप्तावप्यहमर्थस्यात्मनोऽनुवृत्तिं प्रत्यवमृश्य परामृश्यासौ प्रकृतिविविक्तात्मस्वरूपजिज्ञासुरात्मानं प्रकृतिविविक्तं प्रत्यगात्मानं प्रति

एवं प्रत्यवमृश्यासावात्मानं प्रतिपद्यते साहंकारस्य द्रव्यस्य योऽवस्थानमनुग्रहः १६ देवहूतिरुवाच
पुरुषं प्रकृतिर्ब्रह्मन्न विमुंचति कर्हिचित् अन्योन्यापाश्रयत्वा[.]नयोः प्रभोः १७ ॥ ॥ ॥

अनित्यत्वाद्दोषः

पद्यते यथावज्जानीयात् पुनरात्मानमेव विशिनष्टि साहंकारस्य पंचभूत[.]समुदायस्य यः अवस्थानं भवति सुत्यनेनेत्यवस्थानं अवस्थापक इत्यर्थः आत्मविश्लेषे देहस्य विशरणस्वभावत्वादनुग्रहः देहस्य प्रवृत्तिहेतुरित्यर्थः नहि निरात्मको देहः प्रवर्तते १६ एवमिद्धे पाधनवधानदर्शया चात्मनो नाशादत एवमासउपपादितः अशेषविविधप्रत्यगात्मस्वरूपानुचिंतनभगवद्भक्तियोगानुग्रहरूपमोक्षसाधनमिति पुत्रस्य विवक्षामालोच्यांतरा प्रकृतिपुरुषयोरनादित्वान्नयोर्मिथः संबंधस्याप्यनादित्वात्कथमुभयोर्विश्लेष इति मुक्त्यसंभावनामुद्भावयंती पृच्छति देवहूतिः पुरुषमिति चतुर्भिः हे ब्रह्मन् पुरुषं जीवं प्रकृतिः कदाचि[..]दपि न विमुंचति न त्यजति कुतः अनयोः प्रकृतिपुरुषयोरन्योन्यापाश्रयत्वात्परस्परं दृढतरं संबंधत्वात् न चान्यतरविनाशेनापि विश्लेषः संभाव्येत यतस्तयोर्नित्यत्वाच्च हेतौ यत्न इत्यर्थः हे प्रभो पृथगवस्थानं न संभवतीति प्रश्नाभिप्रायः १७ इदमेव पृथगवस्थानं दृष्टांतेन दृढीकरोति यथेति ॥

इहप्राप्नोतिउपासनदृशायोसाक्षात्करोतिततःस्वदृशाभगवदात्मसाक्षात्कारेणछिन्नसंशयःविगतदेहात्माभिमानःयोगीमद्
क्तियोगानिष्ठःलिंगाद्विनिर्गमेप्रारब्धावसानेयत्स्थानंगत्वाप्राप्यननिवर्त्ततेपुनरावर्त्ततेतत्परमंस्थानंप्राप्नोति २९ एवंश्लोको
क्तसाक्षात्कारवतोऽवांतरसिद्धिवितृष्णस्यभगवत्प्राप्तिमाह यदेति अंगहेमातःसिद्धस्यपरिनिष्ठ[illegible]भक्तियोगस्यपुंसश्चेतः
योगोपचितासुयोगसाध्यासुअनन्यहेतुषुयोगादन्योहेतुर्नास्तियासु[illegible]मृत्योःसंसारस्यहासोनाशोनभवतितासुमा
तौ यासुआश्चर्यरूपास्वणिमादिसिद्धिषुयदानविषज्जतेनासंभवतिअथतदाआत्यंतिकीनिरतिशयामेगतिःमत्प्राप्तिःस्यात्
३० इतिटीकायांसप्तविंशः २७ एवंपुरुषप्रकृतिविवेकनिर्लिप्तिपक्षेस्यावकृष्णोपकृतभक्तियोगाराधितभगवत्प्रसादेनप्रत्यात्मक
स्वात्मसाक्षात्कारपूर्वकपरमात्मप्राप्तिप्रकृतिविमुच्यतोत्तरमुक्तंभक्तियोगमपि[illegible]प्रत्यात्मकप्रत्यगात्मानुचिंतनरूपज्ञा

२३२

प्राप्नोतीहांजसाधीरःस्वदृशाछिन्नसंशयः यद्गत्वाननिवर्त्ततेयोगीलिंगाद्विनिर्गमे २९ यदानयोगोपचितासुचेतोमा
नर यासुसिद्धस्यविषज्जतेंग अनन्यहेतुष्वथमेगतिःस्यादात्यंतिकीयत्रनमृत्युहासः ३० इतिश्रीमद्भागवतेमहापुरा
णेतृतीयस्कंधेसप्तविंशोध्यायः २७ श्रीकपिलउवाच योगस्यलक्षणंवक्ष्येसबीजस्यनृपात्मजे मनोयेनैवविधि
नाप्रसन्नंयातिसत्पथं १ स्वधर्माचरणंशक्त्याविधर्माच्चनिवर्त्तनं दैवाल्लब्धेनसंतोषआत्मविच्चरणार्चनं २ ॥

नयोगश्चोक्तः अथसविस्तरंभक्तियोगंतदंगजातंचविवक्षुःप्रतिजानीतेकपिलःयोगस्येति हेनृपात्मजेमनुपुत्रिसबीजस्या
लक्षणं२ सकारणस्यससाधनकस्येत्यर्थः योगस्यभगवद्भक्तियोगस्यगतिस्वरूपंप्रकारंचवक्ष्येकथयामि कोसौयोगइत्यत्राह येनवि
धिनाविधीयतेइतिविधिःकर्मण्युपसर्गेघोकि विहितेनयेनैवयोगेनमनःप्रसन्नंरागाद्यकलुषितंसत्सत्पथंशुभाश्रयपा
नितत्रैवस्थिरंभवतीत्यर्थः १ तत्रप्रथमंयमासनप्राणायामप्रत्याहारधारणाध्याननिदिध्यासनरूपाष्टांगानिविवक्षु
र्यमनियमांतर्भूतविवेकादिसाधनसप्तकमाह स्वधर्मेति शक्त्यास्वशक्त्यनुसारेणस्वधर्माचरणमनभिसंहितफलस्व
वर्णाश्रमोचितधर्मानुष्ठानंविधर्माच्चनिवर्त्तनमविहितात्प्रतिषिद्धनिषिद्धात्पापान्निवर्त्तनंदैवाल्लब्धेनान्नादिनासं
तोषःआत्मविच्चरणार्चनंभागवतसमाराधनं २

नर

रा.म.
१३३

अहर्निशं दह्यमाना पच्यमाना पुरुषस्य प्रकृतिरात्मबंधकरी प्रकृतिः शनकैस्तिरोभवित्री अबंधकरी भविष्यतीति निःशेषं नि
वर्त्तिष्यतीत्यर्थः तत्र दृष्टांतः अग्नेरिति अग्न्याविर्भावहेतुररणिर्यथाग्निना दह्यते तथा तत्वज्ञानसंपत्तिहेतुरपि प्रकृ
तिस्तेन दह्यत इत्यर्थः यद्वाग्नितिरोधायिका अरणिरिवात्मतिरोधायिका प्रकृतिर्दह्यत इत्यर्थः २३ एवं सति न पुनः संसारप्रत्या
त्मानं प्रकृतिरित्याह भुक्तभोगेति भुक्तः भोगो यस्याः नित्यशः सदा दृष्टो दोषो यस्याः अत एव परित्यक्ता सती प्रकृतिरीश्वर
स्याकर्मवश्यस्य स्वे महिम्नि स्थितस्यापहतपाप्मत्वादि गुणाष्टकलक्षणमाहिमवत आत्मन अशुभं संसारं न धत्ते न संपादयती
त्यर्थः २४ अज्ञस्य प्रकृतिसंबंधः ज्ञानवतस्तु न संबंध इत्यत्र दृष्टांतमाह यथेति यथा प्रतिबुद्धस्य निद्रामुपगतस्य पुंसः प्रस्वा

प्रकृतिः पुरुषस्येह दह्यमाना त्वहर्निशं तिरोभवित्री शनकैरग्नेर्योनिरिवारणिः २३ भुक्तभोगा परित्यक्ता दृष्टदोषा च नि
त्यशः नेश्वरस्याशुभं धत्ते स्वे महिम्नि स्थितस्य च २४ यथा ह्यप्रतिबुद्धस्य प्रस्वापो बह्वनर्थभृत् स एव प्रतिबुद्धस्य न वै
मोहाय कल्पते २५ एवं विदिततत्वस्य प्रकृतिर्मयि मानसं युंजतो नापकुरुत आत्मारामस्य कर्हिचित् २६ यदैवमध्या
त्मरतः कालेन बहुजन्मना सर्वत्र जातवैराग्य आब्रह्मभुवनान्मुनिः २७ मद्भक्तः प्रतिबुद्धार्थो मत्प्रसादेन भूयसा निःश्रे
यसं स्वसंस्थानं कैवल्याख्यं मदाश्रयं २८

पः स्वप्नः बह्वनर्थकृत् स्वशिरश्छेदादिबह्वनर्थकारी स एव प्रस्वापः प्रबुद्धस्य जागतः
न१ मोहायानर्थाय न कल्पते न समर्थो भवेत् अनर्थस्यास्थिरत्वाय स्वप्नदृष्टांतः २५ एवं विदिततत्वस्य विदितप्रकृतिपुरुषेश्वरतत्वस्य
यस्य मयि मानसं युंजतः आत्मारामस्यात्मन्येव रममाणस्य प्रकृतिविलक्षणस्वात्मपरमात्मानुभवपरस्य कर्हिचित्कदाचिदपि
प्रकृतिर्नापकुरुते न बंधं करोतीत्यर्थः २६ उक्तमुपसंहरति यदेति यदैवं उक्तरीत्याध्यात्मरतः आत्मारामः बहूनि जन्मानि यस्मिन्
तेन कालेन प्रतिबुद्धार्थः विदिततत्वहितपुरुषार्थः आब्रह्मभुवनान्सत्यलोकपर्यंतेषु लोकेषु जातवैराग्यः सातिशयत्वक्षयित्वमत्त्व
बुद्ध्या भोग्यताबुद्धिरहितः २७ मद्भक्तः निरतिशयप्रीतिरूपमद्भक्तियुक्तः भूयसा मत्प्रसादेन निःश्रेयसं पुरुषार्थरूपं मदाश्रयं
अनेन निकृष्टजीवस्वरूपस्य भगवद्रूपत्वमुक्तं २८ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

पद्म

भा॰ त॰ टी॰
१३५

...नादीनि प्रपंचयति शुचाविति विजितासनः चिरमुपविश्यापि क्लमरहितः शुचौ देशे आसनं चैलाजिनकुशोत्तरमात्म
नः प्रतिष्ठाप्य तस्मिन्नासने स्वस्तिकः स्वस्तिकासनेन ऋजुकायः अकुटिलदेहः आसीनः समभ्यसेत् प्राणमिति शेषः ऊरुजंघा
तरो पादौ पादाग्रे जानुमध्यगे योगिनोपद्वस्थानं स्वस्तिकासनलक्षणं ८ बाह्यवायोरंतःप्रवेशः पूरकः धारणं कुंभकः ध
तस्य बहिः निःसरणं रेचकः प्र[ति]कूलेन रेचकपूरककुंभकैर्वा यद्वा इडया रेचनं पिंगलया पूरणं पुनः पिंगलया रेचनं इडया पूर
रणं एवं प्रतिकूलेन चित्तं स्थिरं स्यात् पुनरप्यचंचलं यथा स्यात् तथा प्राणस्य मार्गं शोधयेत् प्राणे स्ववशे तद्बंधनं मनोपि स्ववशं
भवेत् तथा च श्रुतौ छांदोग्ये यथा शकुनिः सूत्रेण प्रतिबद्धो दिशं पतित्वान्यत्रायतनमलब्ध्वा बंधनमेवोपश्रयते एवं मनोपि
दूत्वा रम्य प्राणमेवोपश्रयते प्राणबंधनं हि सौम्य मन इति ८ किंच जितश्वासस्य जितप्राणस्य योगिनः मनः अचिराद्शु विरजं विमल

233

शुचौ देशे प्रतिष्ठाप्य विजितासन आसनं तस्मिन्स्वस्तिक आसीन ऋजुकायः समभ्यसेत् ८ प्राणस्य शोधयेन्मार्गं पूररेचक
कुंभकैः प्रतिकूलेन वा चित्तं यथा स्थिरमचंचलं ८ मनोऽचिरात्स्याद्विरजं जितश्वासस्य योगिनः वाय्वग्निभ्यां यथा लोहं ध्मा
तं त्यजति वै मलं १० प्राणायामैर्दहेद्दोषान् धारणाभिश्च किल्बिषान् प्रत्याहारेण संसर्गान् ध्यानेनानीश्वरान् गुणान् ११ य
दा मनः स्वं विरजं योगेन सुसमाहितं काष्ठां भगवतो ध्यायेत्स्वनासाग्रावलोकनः १२ प्रसन्नवदनांभोजं पद्मगर्भारुणेक्ष
णं नीलोत्पलदलश्यामं शंखचक्रगदाधरं १३ रजोगुणेनाविशिष्टं च निर्मलं वा स्यात् १०॥ यथा लोहं वाय्वग्निभ्यां ध्मातं स
तत्संसर्गमलं त्यजति तथा प्राणायामादीनां समाधौ द्वारकार्याण्याह प्राणायामैः प्राणनियमनैः दोषान् वातपित्तकफादीन् दहेत्
धारणाभिः किल्बिषं पापं प्रत्याहारेण संसर्गान् शब्दादिविषयसंसर्गान् ध्यानेनानीश्वरान् गुणान् [illegible] क्लेशादीन् दहेत् मनसः
शुभाश्रये वस्थापनं धारणं ध्येयं तस्य मनसो वृत्तिसंतति ध्यानं सततं तैर्जीतो प्रत्याहारं वहितत्वं समाधिरिति भेदः ११ अथ ध्या
नस्य पूर्वकं ध्यानमाह यदेति यदा स्वं स्वीयं मनः योगेन प्राणायामादियोगेन विरजं सुसमाहितं सम्यक् शुभाश्रये निहितं स्यात् तदा
स्वनासाग्रारोपितदृष्टिः भगवतः काष्ठां विग्रहं ध्यायेत् १२ ध्यानविग्रहमेव विशिनष्टि प्रसन्नेति त्रिभिः प्रसन्नं वदनांभोजं यस्य तं
ध्यायेदिति शेषो नान्वयः पद्मगर्भवदरुणे नेत्रे यस्य नीलोत्पलरत्नवच्छ्यामं शंखादिधरं १३ ॥ ॥ ॥ ॥ ॥

द्रव्यधर्मनिवृत्तिः त्रैवर्गिकधर्मान्निवृत्तिः मोक्षधर्मेषु रतिश्च एवं साधनसम्पन्नोऽन्तर्भूतक्रियोऽस्य अथ विवेकमाह शश्वत्
द्यविविक्तक्षेमसेवनं जात्यात्मनि मिश्रदृष्टे योगादिभिः विविक्तानां पण्डितानां सेमाप्रणास्त्विकानाम आदीनासेवने तदपि
मितमेध्यादनं मितं यथा भवति तथा मेध्यानां जात्यादिभिरदुष्टानामदनरूपं तत्र जातिदुष्टाः कलंजगृंजनादयः आश्रयदुष्ट
चाण्डालपतितादिदुष्टं निमित्तदुष्टं केशोच्छिष्टाद्युपहतं ३ कल्याणमाह अहिंसेति एवं विवेकादिद्वितीये यादयोपि यथासंभव
मंतर्भाव्याः तत्रासेयं यावदर्थपरिग्रहस्तपः शौचं स्वाध्यायपुरुषार्चनादयः क्रियायामन्तर्भाव्याः ब्रह्मचर्यं च ब्रह्म के अंतर्भाव्यं मौन
सभ्यासः शुभाश्रयसंशीलनरूपः एवमन्येऽप्यनवसादयो विवक्षिता इत्यर्थः यावदर्थपरिग्रहः यावता पर्णेनान्नादिना देहयात्राभ
८७ वेन्नावतोऽर्थस्य परिग्रहः ब्रह्मचर्यं जितेन्द्रियत्वं तपः कृच्छ्रचान्द्रायणादि शौचमाचारः स्वाध्यायः वेदाध्ययनादिः पुरुषार्चनं भगव

द्रव्याधर्मनिवृत्तिश्च मोक्षधर्मरतिस्तथा । मितमेध्यादनं शश्वद्विविक्तक्षेमसेवनं ३ अहिंसा सत्यमस्तेयं यावदर्थपरि
ग्रहः ब्रह्मचर्यं तपः शौचं स्वाध्यायः पुरुषार्चनं ४ मौनं सदासनजयः स्थैर्यं प्राणजयः शनैः प्रत्याहारश्चेन्द्रियाणां वि
षयान्मनसा हृदि ५ स्वधिष्ण्यानामेकदेशे मनसा प्राणधारणं वैकुण्ठलीलाभिध्यानं समाधानं तथात्मनः ६ एतैरन्
न्यैश्च पथिभिर्मनो दुष्टमसत्पथं बुद्ध्या युञ्जीत शनकैर्जितप्राणो ह्यतन्द्रितः ७ न्तर्जनं ४ आसनादीनंगान्याह मौनमिति

त्रिभिः सदासनजयेन स्थैर्यं शनैः प्राणजयः प्राणवायोः स्ववशीकरणं इन्द्रियाणां मनसा विषयाद्धृदि प्रत्याहारः मनसा इन्द्रिया
णि विषयेभ्यः प्रत्याहृत्य हृद्यवस्थापनमित्यर्थः ५ तथा स्वधिष्ण्यानां प्राणापानादिस्थानानां मूलाधारादिषु तादृशस्थानानामे
कस्मिन्मनसा सह प्राणानां धारणं वैकुण्ठस्य भगवतो लीलानां जगत्सृष्ट्यादिव्यापाररूपाणां लीलानामभिध्यानं तथा
आत्मनो मनसः समाधानं एकाग्रीकरणं ६ एतैरुक्तैः स्वधर्माचरणादिभिरन्यैश्च व्रततपोदानादिभिः पथिभिरुपायैः असत्पथं
६ दुष्पार्थप्रचरणं अत एव दुष्टं मनः बुद्ध्या शनकैर्युञ्जीत शुभाश्रये प्रवणं कुर्यात् कथंभूतो युञ्जी[illegible]त जितप्राणः अतन्द्रितः
तन्द्रारहितः ७ ॥

भा॰ त॰ ना॰ २३५

किं च चरणारविंदस्य शौचेन प्रक्षालनजलेन निःसृताया सरित्प्रवराया गंगाया उदकेन तीर्थेन संसारतारकेण मूर्ध्न्यधिकृतेन शि
वो रुद्रः शिवः मंगलयुक्तोऽभूदीदृशस्य ध्यातुर्मनसि यः शमलशैलः पापपर्वतः तस्मिन्निसृष्टं निक्षिप्तं वज्रमिव यद्वा शमलशैलेनि
सृष्टं रेखालांछनरूपं वज्रं येन तद्भगवतश्चरणारविंदं ध्यायेत् २२ जानुद्वयमिति अस्याखिलजगतः जनन्या मात्रा निःसेव्या सौ जगन्माता
विष्णोः श्रीजनपापिनी सुरैः करवंदितया ब्रह्मादिभिराराधितया जलज[illegible]लोचनया लक्ष्म्या स्वस्याः ऊर्वोर्निधाय करपल्लवरोचि
षा प्रकाशमानकरपल्लवेन संलालितं स्पर्शनचातुर्येण संसेवितं संसारत्वमिव प्रतीतं आवर्तयति अभवस्येति विधातुर्जगत्कर्तुरोजसः
बलस्योज्ज्वलस्य भागानिधी आश्रयौ अतसिकाकुसुमकांतिवत्कांत्याभासमानावूरू हृदि कुर्यादिति पूर्वेणान्वयः तथा व्यालंबिनि विवरू

२३४

यच्छौचनिःसृतसरित्प्रवरोदकेन तीर्थेन मूर्ध्न्यधिकृतेन शिवः शिवोऽभूत् ध्यातुर्मनःशमलशैलनिसृष्टवज्रं ध्यायेच्चिरं भगवतश्च
रणारविंदं २२ जानुद्वयं जलजलोचनया जनन्या लक्ष्म्याखिलस्य सुरवंदितया विधातुः ऊर्वोर्निधाय करपल्लवरोचिषा यत्संला
लितं हृदि विभोरभवस्य कुर्यात् २३ ऊरू सुपर्णभुजयोरधिशोभमानावोजोनिधी अतसिकाकुसुमावभासौ व्यालंबिपीतवरवा
ससि वर्तमानकांचीकलापपरिरंभि नितंबबिंबं २४ नाभीह्रदं भुवनकोशगुहोदरस्थं यत्रात्मयोनिधिषणाखिललोकपद्मं व्यूढं हरि
न्मणिवृषस्तनयोरमुष्य ध्यायेद्द्वयं विशदहारमयूखगौरं २५ वक्षोऽधिवासमृषभस्य महाविभूतेः पुंसां मनोनयननिर्वृतिमादधा
नं कंठं च कौस्तुभमणेरधिभूषणार्थं कुर्या[illegible]न्मनस्यखिललोकनमस्कृतस्य २६

दि कुर्यात् २४ नाभीह्रदमिति अमुष्य भग
वतो नाभीह्रदं ध्यायेत् कथंभूतं भुवनानां कोशस्य गुहमधिष्ठानं यदुदरं तत्र स्थितं यत्र नाभीह्रदे आत्मयोनेर्ब्रह्मणः धिषणाधिष्ठान
धिष्ठानं अखिललोकात्मकं पद्मं व्यूढं उत्थितं तथा हरिन्मणिवृषौ मरकतमणिश्रेष्ठौ इव यौ स्तनौ तयोर्द्वयं विशदहारस्य मयूखैर्गौरं श्वे
तं ध्यायेत् [illegible] वक्षो विशेषणं वा २५ वक्ष इति महाविभूतेर्लक्ष्म्या अधिवासस्थानं पुंसां ध्यातॄणां म
नोनयनयोर्निर्वृतिमानंदमादधानमृषभस्य श्रेष्ठस्य भगवतः वक्षः ध्यायेत् तथाऽखिललोकैर्ब्रह्मादिभिर्नमस्कृतस्य सेवितस्य भगवतः कंठं
च मनसि कुर्याद्भावयेत् कथंभूतं कौस्तुभमणेरधिभूषणार्थं कृतः तस्याधिकं भूषणमर्थः प्रयोजनं यस्य तं कौस्तुभमणिमेव स्वयमलंकुर्वंत
मित्यर्थः २६

+खि८ २२ राम॰ १३५

त्नसत्पंक[illegible] किंजल्कवत्पीते कौशेये वाससी यस्य श्रीवत्सलांछनं वक्षसि यस्य भ्राजत्कौस्तुभेनामुक्ता संश्लिष्टा कंधरा यस्य १४ मत्तद्विरेफाणां
कलो मधुरो ध्वनिर्यस्यां तया वनमालया परीतं व्याप्तं परार्घ्याणि अमूल्यानि हारादीनि यस्य तं १५ कांचीगुणेन हिरण्मयमेखलासूत्रेण उ
ल्लसंती श्रोणी यस्य भक्तानां हृदयांभोजमेव विष्टरमासनं यस्य भक्तानां मनोनयनानि वर्द्धयति हर्षयतीति तथा १६ अपीच्यमतिसुंदरं भ
क्तिविषयं दर्शनं यस्य तं कैशोरे कौमारे वयसि संतं भृत्यानामनुग्रहे कातरं व्यग्रं १७ कीर्तन्यं कीर्तनार्हं तीर्थं यशो यस्य पुण्यश्लोकानां बु
द्धि भीष्मादयः तेषां यशस्करं समग्राणि अंगानि यस्मिन् तथाभवतीति तथा एवं ध्यायेत् १८ तत्रोपासकस्येच्छानुसारेण स्थितमुत्थितं
तमासीनमुपविष्टं शयानं वा गुहाशयं हृदयकुहरे वसंतं प्रेक्षणीयमीहितं लीला यस्य तं भगवंतं शुद्धः रागाद्यकलुषितो भावः वृत्तिर्यस्य ते

त्नसत्पंकजकिंजल्कपीतकौशेयवाससं श्रीवत्सवक्षसं भ्राजत्कौस्तुभामुक्तकंधरं १४ मत्तद्विरेफकलया परीतं वनमालया परा
र्घ्यहारवलयकिरीटांगदनूपुरं १५ कांचीगुणोल्लसच्छ्रोणिं हृदयांभोजविष्टरं दर्शनीयतमं शांतं मनोनयनवर्द्धनं १६ अपीच्य
दर्शनं शश्वत्सर्वलोकनमस्कृतं संतं वयसि कैशोरे भृत्यानुग्रहकातरं १७ कीर्तन्यतीर्थयशसं पुण्यश्लोकयशस्करं ध्यायेद्देवं
समग्रांगं यावन्न च्यवते मनः १८ स्थितं व्रजंतमासीनं शयानं वा गुहाशयं प्रेक्षणीयेहितं ध्यायेच्छुद्धभावेन चेतसा १९ तस्मिँल्ल
ब्धपदं चित्तं सर्वावयवसंस्थितं विलक्ष्यैकत्र संयुज्यादंगे भगवतो मुनिः २० संचिंतयेद्भगवतश्चरणारविंदं वज्रांकुशध्वजसरोरु
हलांछनाढ्यं उत्तुंगरक्तविलसन्नखचक्रवालज्योत्स्नाभिराहतमहद्धृदयांधकारं २१ नचेतसा ध्यायेत् १८ एवं ध्येयरूपसमुदायमुक्त्वा
अथ दिव्यांगेषु एकैकोपासना कार्येत्याह तस्मिन्निति तस्मिन्विग्रहे लब्धं पदं स्थितिर्येन तत् सर्वावयवेषु सम्यक् स्थितं चित्तं विलक्ष्य विशे
षेण लक्षीकृत्य भगवत एकत्रैकस्मिन्नंगे संयुज्यात् संयोजयेत् २० एतदेव पादादिक्रमेण प्रपंचयति संचिंतयेदिति त्रयोदशभिः भगवत
श्चरणारविंदं सम्यक् चिंतयेत् कथंभूतं पादतललेखात्मकानि वज्रादीनि लांछनानि तैराढ्यं पुष्टं उत्तुंगाश्च विलसंतो ये नखास्तेषां चक्रवा
लं मंडलं तस्य ज्योत्स्नाभिराहतो महतां ध्यातॄणां हृदये अंधकारो येन तं महत्त्वमंधकारविशेषणं वा एतच्च सर्वं सपादेयविशेषणं ध्ये
यत्वेनोच्यते २१

भा॰त॰टी॰
२३६

हासमिति अवनताये ऽखिला लोकास्तेषां तीव्रशोकेन पाप्यश्रूणि तेषां सागरं विशोषयतीति तथा हरेर्हासं ध्यायेत् अस्य सुदारं भ्रूमंडलं ध्यायेत् कथंभूतं मुनिसंमोहनाय प्रवृत्तस्य मकरध्वजस्य कामस्य संमोहनाय निजमायया आत्मीयसंकल्पेन रचितं परिगृहीतं ३२ मंदहासध्यानमुक्त्वा स्पष्टहासध्यानमाह ध्यानायनमिति विष्णोः प्रहसितमुच्चैर्हसितं ध्यायेत् कीदृशमतिसुंदरतया प्रयत्नं विनैव ध्यानविषयभूतं सौंदर्यमिवाह बहुलया अधिकया ऽधरोष्ठस्य भासा अरुणीभूता स्तनवः सूक्ष्मा द्विजा दंता एव कुंदमुकुला[illegible]नि तेषां पंक्तिर्यस्मिंस्तत्परं ध्यानमुक्त्वा समाधिमाह स्वदेहकुहरे हृदयविवरे वसितस्य ध्यातस्य विष्णोः प्रेमरसेनार्द्रया भक्त्यार्पितमनाः सन्नन्यत्किमपि नेक्षेत भगवद्विग्रहमपि तिरस्कृ[illegible]न दिदृक्षेदित्यतीप्रसपनं कुर्यादित्यर्थः ३३ एवं दिव्यविग्रहचिंतावसाने दिव्यात्मस्वरूपचिंतातत्प्रकारत्वेन प्रसंगात्संचिं

हासं हरेरवनताखिललोकतीव्रशोकाश्रुसागरविशोषणमत्युदारं संमोहनाय रचितं निजमाययास्य भ्रूमंडलं मुनिकृते मकरध्वजस्य
३३ ध्यानायनं प्रहसितं बहुलाधरोष्ठभासारुणायिततनुद्विजकुंदपंक्ति ध्यायेत्स्वदेहकुहरे वसितस्य विष्णोर्भक्त्यार्द्रयार्पितमना न पृथग्दिदृक्षेत ३३ एवं हरौ भगवति प्रतिलब्धभावो भक्त्या द्रवद्धृदय उत्पुलकः प्रमोदात् औत्कंठ्यबाष्पकलया मुहुरर्द्यमानस्तच्चापि चित्तबडिशं शनकैर्वियुंक्ते ३४ मुक्ताश्रयं यर्हि निर्विषयं विरक्तं निर्वाणमृच्छति मनः सहसा यथार्चिः आत्मानमत्र पुरुषोऽव्यवधानमेकमन्वीक्षते प्रतिनिवृत्तगुणप्रवाहः ३५

ताच कार्येत्याह एवमिति द्वाभ्यां एवमुक्तविधया हरौ भगवति प्रतिलब्धः भावः प्रेमा तिशयो येन भक्त्या द्रवद्धृदयं यस्य प्रमोदाद्रुद्गतानि पुलकानि यस्य औत्कंठ्यप्रवृत्तानामश्रूणां कलया मुहुरर्द्यमानः आनंदसंप्लवे निमज्जमानः चित्तबडिशं मत्स्यवेधनं दुर्ग्रहस्य भगवतो ग्रहणे मत्स्यवेधनमिव तोपायभूतं चित्तमपि ध्येयादृगावृद्धिग्रहात् शनकैर्वियुंक्ते वियुजात् यद्वा छिन्नस्य बडिशं चित्तापहरं भगवद्विग्रहं प्रतिश्रुपादानस्यैव कर्मत्वविवक्षया द्वितीया तत्त्वज्ञ्रितं वियुंक्ते इत्यर्थः ३४ ततः यथार्चिः निर्धूमदीपशिखेव विरक्तं शब्दाद्यविश्रवणं श्रुत एव निर्विषयं भूत्वा यर्हि यदा मुक्ताश्रयं मुक्तविग्रहचिंतनं मनः निर्वाणं वाच्यव्यापारोपरतिमृच्छति तदा अत्र परमात्मनि अव्यवधानं साक्षादेव प्रकारतया संबंधं एकं देहादिभेदरहितमात्मानं विशुद्धस्वरूपं प्रति[illegible] निवृत्तगुणप्रवाहः अपगतदेहः अपगतदेहात्माभिमानस्तत्राभिमानः सन्नन्वीक्षते परमात्मप्रकारतया जीवस्वरूपं चिंतयेदित्यर्थः ३५ ॥ ॥ ॥ ॥ ॥

वि॰२
शुभ
२३६

विषय२

वाहूनिति मंदरगिरेः परिवर्त्तनेन परिभ्रमणेन निर्णिक्ती कृता अनुज्वली कृतानि वाहुवलयानि अंगदानि येषु अधिश्रिता लोकपाला येषु तान् वाहून् संचिंतयेत् तथा दशशतारं सहस्रारं न सहते ओजो यस्य तत् चक्रं तस्य भगवतः करसरोरुहस्य राजहंसमिव स्थितं शंखं च संचिंतय २७ कौमोदकीमिति तथा भगवतो दयितां प्रियां अरातयः शत्रवो ये योधारस्तेषां शोणितमेव कर्दमस्तेन दिग्धां लिप्तां कौमोदकीं गदां स्मरेत तथा भगवतः कंठे मालां मणिं च स्मरेत कथंभूतां मालां मधुव्रतानां भृंगाणां वरूथस्य संघस्य गिरा उपघुष्टां नादितां मणिं कथंभूतं ममलं चेतस्यात्मा जीवस्य तत्त्वं स्वस्वरूपं जीवस्य उपाधित्वात् देवतारूपमित्यर्थः तदुक्तं वै ममेव पुराणे आत्मानमस्य जगतो निर्लेपमगुणामलं यं बिभर्त्ति कौस्तुभमणिस्वरूपं भगवान्हरिरिति २८ भत्तेष्वनुकंपिता कृतानुकंपा या धीस्तया गृहीता मूर्त्तिर्येन तस्य भक्तानुग्रहाय स्वेच्छो

वाहूंश्च मंदरगिरेः परिवर्त्तनेननिर्णिक्तबाहुवलयानधिलोकपालान् संचिंतयेद्दशशतारमसह्यतेजः शंखं च तत्करसरोरुहराजहंसं २७ कौमोदकीं भगवतो दयितां स्मरेत दिग्धामरातिभटशोणितकर्दमेन मालां मधुव्रतवरूथगिरोपघुष्टां चैत्यस्य तत्त्वममलं मणिमस्य कंठे २८ भत्यानुकंपितधियेह गृहीतमूर्त्तेः संचिंतयेद्भगवतो वदनारविंदं यद्विस्फुरन्मकरकुंडलवल्गितेन विद्योतितामलकपोलमुदारनासं २९ यच्छ्रीनिकेतमलिभिः परिसेव्यमानं भूत्या स्वया कुटिलकुंतलवृंदजुष्टं मीनद्वयाश्रयमधिक्षिपदब्जनेत्रं ध्यायेन्मनोमयमतंद्रित उल्लसद्भ्रु ३० तस्यावलोकमधिकं कृपयातिघोरतापत्रयोपशमनाय निसृष्टमक्ष्णोः स्निग्धस्मितानुगुणितं विपुलप्रसादं ध्यायेच्चिरं विपुलभावनया गुहायां ३१

पात्ततनोरित्यर्थः भगवतः यद्वदनारविंदं संचिंतयेत् कथंभूतं विस्फुरंतौ यौ मकरकुंडले तयोर्वल्गितेन प्रचलितेन विद्योतितौ अमलौ कपोलौ यस्मिन् उदारा उन्नता नासा यस्मिन् २९ यच्च स्वया विभूत्या शोभया अलिभिः परिषेव्यमाणं मीनद्वयाश्रयं च श्रीनिकेतनं पद्ममधिक्षिपत् तिरस्कुर्वत् ध्यायेत् तत्र कुंतलैरलीनामधिक्षेपः नेत्रद्वयेन मीनद्वयस्येति द्रष्टव्यं अब्जवन्नेत्रे यस्मिन् उल्लसमाना तरंगवत् संक्षोभकौ भ्रुवौ यस्मिन् मनोमयं योगपरिशुद्धमनोग्राह्यं वदनारविंदमतंद्रितो व्याहतमना ध्यायेत् ३० तस्येति तस्य [illegible] ततः अवलोकनं रहितं विततभावनया विस्तृतभावनया चिरं ध्यायेत् पाकपर्वतीति वै भावनया ध्यायेदिति निर्देशः भावनाकृपादित्यर्थः [illegible] तमवलोकनं अधिकं मत्यर्थं कृपया अक्ष्णोः रश्मिभ्यामतिदुःसहाध्यात्मिकादिकादितापत्रयोपशमनायेनिसृष्टं

भा.तृ.टी.
१३७

एवंभक्तियोगनिष्ठस्य कदा मुक्तिः किंविमुक्तस्य पुनरावृत्तिः स्यादित्याशंकां शमयन्नाह देहोपीति दैववशगः ईश्वरसंकल्परूपपुण्य
पुण्यपापयत्तः देहोपि स्वारंभकं स्वसत्तानिमित्तं कर्म यावद्यावन्न नश्यति तावत् सासुरिंद्रियप्राणसहितः प्रतिसमीक्षत एव खलु यावत् स्वार
भकं कर्म प्रतिसमीक्षत इत्यन्वयः [illegible] खलुशब्देन श्रुतिप्रसिद्धिर्द्योत्यते तथा च श्रुतिः तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य
इति प्रारब्धावसानावधि विलंब इत्यर्थः अधिरूढः समाधियोगो येन सः ततः प्रतिबुद्धमाविर्भूतं वस्तु गुणत्रयकविशिष्टमात्मस्व
रूपं यस्य सः प्रारब्धावसाने मुक्तिं प्राप्त इत्यर्थः स्वाप्नं [illegible] स्वप्नपदार्थतुल्यं तद्दहनिसं इत्यर्थः सप्रपंचं पुत्रकलत्रादिस
हितं तं देहं पुनर्न भजनेन प्राप्नोति न च पुनरावर्त्तते योगिनो पजायंते प्रलयेन यथायंति चेत्याद्यत्रानुसंधेयं ३८ एवंकावत्वप्यचित्ता
भक्तिः कीदृशी मम गोचरे तस्योत्तरमुक्तं अथ पुरुषप्रकृतिर्ब्रह्मण्याविमुंचतीति प्रश्नस्य यदुत्तरमुक्तं प्रकृतिविलक्षणात्मस्वरूपचिंतन
पूर्वकस्ववर्णाश्रमधर्माद्यनुगृहीतभगवद्भक्तियोगात्प्रकृतिसंबंधराहित्यरूपकैवल्यसिद्धिरिति तदुपसंहर्तुं पूर्वोक्तमेव प्रकृतिपुरुष

२३६

देहोपि दैववशगः खलु कर्म यावत्स्वारंभकं प्रतिसमीक्षत एव सासुः तं सप्रपंचमधिरूढसमाधियोगः स्वाप्नं पुनर्न भजते प्रतिबु
द्धवस्तु ३८ यथा पुत्राच्च वित्ताच्च पृथग्मर्त्यः प्रतीयते अप्यात्मत्वेनाभिमताद्देहादेः पुरुषस्तथा ३९ यथोल्मुकाद्विस्फुलिंगा
द्धूमाद्वापि स्वसंभवात् अप्यात्मत्वेनाभिमताद्यथाग्निः पृथगुल्मुकात् ४० भूतेंद्रियांतःकरणात्प्रधानाज्जीवसंज्ञितात् आत्मा त
था पृथग्द्रष्टा भगवान्ब्रह्मसंज्ञितः ४१ स्वरएणांमिथोतत्त्ववैलक्षण्यं सदृष्टांतमनुवदति यथेति पंचभिः तत्रैकेन देहात्मनोर्वैलक्ष
ण्यं ततो द्वाभ्यां प्रकृतिपुरुषाभ्यां परमात्मनः ततः एकेन जीवानां परस्परसाम्यं ततः एकेन जीवानां देहकृतो देवाभिभेदः न स्वतः इति च
ते इति विवेकः यथा संतप्रीतिविषयात्पुत्रादेर्वित्ताच्च मर्त्यः पृथगेव प्रतीयते तथा संतताप्रियत्वेन स्वाभिन्नत्वेनाभिमताद्देहादेरपि पुरुषः
प्रत्यगात्मा पृथगेवेत्यर्थः ३९ यथेति आत्मत्वेनाभिमतादपि तत्त्वाविवेकेनाभिन्नत्वेनाभिमतात् स्वसंभवादग्नेरुत्पन्नादुल्मु
काद्विस्फुलिंगाद्वाप्यग्निर्यथा पृथगुच्यते ४० तथा भूतेंद्रियांतःकरणरूपात्प्रधानाज्जीवसंज्ञितात्क्षेत्रज्ञाद्वात्मा ततः प्रविश्य प्रशा
सनेन धारकः द्रष्टा सर्वज्ञः भगवान्षाड्गुण्यपूर्णो ब्रह्मसंज्ञितः साक्षाद्ब्रह्मपदवाच्यः पृथगेवेत्यर्थः अत्र दृष्टांतः धूमः प्रधानस्थाने
उल्मुकादिकं जीवस्थाने इति वेदितव्यं ४१

राम.
१३७

सा१ एवं प्रपंचभक्तियोगमुपपाद्य ध्यानप्रयाभक्तेः आप्रायणादनुवृत्तिरूपां आरब्धावसाने परमात्मानं प्राप्तस्य न पुनः संसार इत्याह सोपी
ति चरमया प्रत्याहाराद्यपेक्षया भक्त्या सर्वथा मनःस्येति छेदे मनसो नवृत्त्यानविधानात्तेः शास्त्रादिविषयाऽपस्थानया एतया भक्त्या उ
पलब्धा परात्मनः परमात्मनः काष्ठा स्वरूपं प्राप्य ससः परमात्मप्राप्तिपूर्वकोऽहं स्वस्वरूपाविर्भाविः तथा च श्रूयते एष संप्रसादोऽस्माच्छरी
रात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत इति स्वात्मन्यात्मनि पर्वदुःखयोः स्म खदुःखयो यो हेतुर्देहात्माभिमान
स्तं त्राभिमानादि स्वस्य भावस्तत्त्वं तत्कर्त्तृरिगमनादि वा यथा पारार्थ्यपेक्षेति देहनिमित्तभूतेऽविधनेकं योति कर्माय तत्र प्रकृति-
सिमा६ परिणामरूपदेहसंबंधापनमेव स्म खदुःखादिहेतुर्देहात्मानत्वादिकं पश्यतीत्यर्थः देहात्माभिमानादिकं पुनर्न भजतीति भावः देहादि
मुवक्ष्यं पूर्वसिद्धदेहात्माभिमानादिकं न करोतीति यतः आक्रन्दे हमापनस्मर्तीत्याह देहमिति चरमः प्रारब्धावसानपर्यंतमनुवृत्त
सोप्येतया चरमया मनसोनवृत्यात स्मिन्मह्यवसितः स्म खदुःखवाद्य हेतुत्वमप्यासत्तिकं दीयिदुःखपोर्यत्वात्मन्विधत्तेऽप
लब्धपरात्मकाष्ठः ३६ देहं च तंन चरमः स्थितमुत्थितं वा सिद्धो विपश्यति यतोऽध्यागमत्स्वरूपं दैवादुपेतमथ दैववशादपेतं वा
सो यथा परिकृतं मदिरामदांधः ३७

तप्रत्ययः सिद्धः परमात्मोपसंपत्याविर्भूतस्वरूपः दैवादीश्वरसंकल्पादुपेतं प्राप्तं पुनर्दैवाद्यपेतं अपगतं स्थितं दाहादिसंस्काररहितत्वे
नास्थितं उत्थितं दाहादिभिः संस्कृतं वा उत्थानमप्युपलक्षणं देहं च न पश्यति न स्मरतीति अत्र यद्वा स्मिन्नस्यर्थः कुर्वति यदुत्तं नोपजनं स्म
रन्निदं शरीरमित्यादि श्रुत्यर्थोऽभिप्रेतः श्रवणसच्चाधिकमुपजनं स्वजनानां समीपे उपेशोच्यकृतानं पश्यतीति यतः स्वरूपं आनंद
रूपं आविर्भूतगुणाष्टकं स्वस्वरूपं अध्यगमत् प्राप्तवान् नित्यनिरतिशयानंदब्रह्मस्वरूपं तत् तत्कारप्रत्यगात्मानं चानुभवन्नान
दसंप्लवे निमज्जमानः आक्रन्देहादिकं न स्मरतीत्यर्थः न पश्यतीत्यत्र दृष्टांतः मदिरायाः सुरायाः मदेनांधः परवशः परिकृतं परिध
तं वासः वस्त्रं न पश्यति तद्वत् केचित्तु मनोकं उपासनदशायामेव तज्ञानिनामस्यार्थः किमुदितदेहादिकं न स्मरतीति वं परत्वेन याच
स्तेन संदर्पतोऽध्यागमत्स्वरूपमिति हेतुर्यनासात् परंज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत इति परमात्मप्राप्त्यानंतरमवर्णात् १९
स्वस्वरूपप्राप्तेः साक्षात्कृतपरमात्मस्वरूपाणामपि सनकादीनां देहादिदर्शनाच्चातीयथोक्त एवार्थः साधीयान् ३७॥

स्वरूपप्राप्ते

यन्नमंसृत्तिवर्णनेनपुरुषः मुमुक्षुः सर्वत्रइहामुत्रचविरागः भवेत् जीवलोकस्यविविधाःसंसृतीः मा माचस्वकथय
३ तथाईश्वरस्वरूपस्येश्वरशरीरस्यपरेषांब्रह्मादीनामपिपरस्यप्रभोः कालस्यस्वरूपंवदकथयय द्धेतोः यस्मात्कालाद्धे
तोः कुशलंनिवृत्तिप्रवृत्तिधर्मंजनाःकुर्वन्ति यत्कालहेतुकजन्ममरणादिसांसारिकधर्म्मानिवृत्तयेकुशलमनुतिष्ठन्ति
तस्यस्वरूपंकथयेत्यर्थः ४ एवंप्रष्टमप्रसुपत्रंप्रसादयन्तिलोकस्येति मिथ्याभिमत्ते मिथ्याभिमन्तिमानोयस्मिन्
याभूतदेहात्माभिमानस्तत्राभिमानस्येत्यर्थः अत एवाचक्षुषः स्वात्मपरमात्मयाथात्म्यज्ञानरहितस्यात एवकर्म
सुस्वर्गनरकादिसाधनेषुकर्मस्वनुवद्धयाआसक्तयाधियाश्रान्तस्यात एवानाश्रयेपारेचमसिसंसारेप्रसुप्तस्यलोक
स्यप्रबोधायत्वंयोगभास्करः आविरासीराविर्भूतोसिकेत्ल ५ एवमापृष्टः कपिलोभक्तियोगमार्गादीन्कथयितुमाव

विरागोयेनपुरुषोभगवन्सर्वतोभवेत् आचक्ष्व जीवलोकस्यविविधालोकसंसृती ३ कालस्येश्वररूपस्यपरेषांच
परस्यते स्वरूपंवतन्कुर्वन्तियद्धेतोःकुशलंजनाः ४ लोकस्यमिथ्याभिमतेरचक्षुषश्चिरंप्रसुप्तस्यतमस्यनाश्रये
श्रान्तस्यकर्मस्वनुविद्धयाधियात्वमाविरासीःकिलयोगभास्करः ५ मैत्रेयउ० इतिमातुर्वचःश्लक्ष्णंप्रतिनंद्यमह
ामुनिः आवभाषेकुरुश्रेष्ठप्रीतस्तांकरुणार्दितः ६ श्रीभगवानुवाच भक्तियोगोबहुविधोमार्गैर्भामिनिभाव्यते
स्वभावगुणमार्गेणपुंसाभावोविभिद्यते ७ अभिसंधाययद्धिंसांदंभंमात्सर्यमेववसंरंभीभिन्नदृग्भावंमयिकुर्यात्स
सतामसः ८

भाषइत्याहमैत्रेयः इतीति हेकुरुश्रेष्ठविदुरइत्युक्तविधंश्लक्ष्णंकदरंमातुर्वचः प्रतिनंद्यमहामुनिः कपिलःप्रीतःसमी
चीनप्रश्नेनजातानंदःमातरिकरुणयार्दितः परिप्लुतः तांमातरंप्रत्यावभाषे ६ तदेवाहभक्तियोगइति हेभामिनिपुंसांस्व
भावगुणमार्गेणसत्वादिगुणवृत्तिवशेनमार्गैःप्रकारविशेषैर्भक्तियोगोबहुधानानाभाव्यते क्रियते पुंसांभावःमनोवृत्तिः
भिद्यतेतेनतत्तद्धीनोपि भक्तियोगस्तामसराजससात्विकादिभेदेनाभिद्यतइत्यर्थः ७ तानेवभेदानाह अभिसंधाये
ति हिंसादंभमात्सर्याणामन्यतमद्वयंत्रितयंवाभिसंधा यस्यकल्पयन्सरंभीक्रोधीभिन्नदृग्भेददर्शनकस्तत्तत्रैवस्तुद
र्शीमयीश्वरेभावंभक्तिंयद्यपिकुर्यात्सः त्रिविधोपितामसः तामसभक्तियोगयुक्तः तत्रापिहिंसादंभमात्सर्यादिभिरधममध्यमोत्त
मत्वंबोध्यं एवमग्रेपिज्ञेयं ८

राजस
१३८

237

सर्वभूतेषु देवादिचतुर्विधशरीरेष्वात्मानं तेष्वंतः प्रविश्य धारकत्वेनावस्थितं जीवात्मानं समनन्यभावेन सर्वत्रज्ञानैकाकारत्वात्
त्वाद्येकरूपेणेक्षेत आत्मानमित्येकवचननिर्देशः एको ऽपि हि रिक्तः प्रिवज्ञात्माभिप्रायकः तथा आत्मनि धायतया स्थितानि सर्व
भूतानि देवादिचतुर्विधभूतान्यनन्यभावेन कर्मायत्तावांतरवैचित्र्यपरित्यागप्रकृतिपरिपरिणामरूपत्वेनैकरूपतया प्रपूर्तेत भूतेष्वपि
त्वपि शब्दज्ञो जीवेष्वपि तदात्मतां परमात्मात्मकत्वं ईक्षेत ४२ स्वयोनिषु नयनदारादिषु एकमेव ज्योतिरग्नियोनीनां गुणवैषम्याने
निभूतेत्तरणदार्वादिगतह्रस्वत्वदीर्घत्वकुटिलत्वादिगुणकृतवैषम्याद्यथा नानाप्रतीयते तथा प्रकृतौ देवादिशरीरे स्थितः आत्मप्रत
गात्मापि देवादिदेहकृतभेदेन नानाप्रतीयते वस्तुतः सर्वत्र ज्ञानैकाकारतयैकरूप इत्यर्थः ४३ पुरुषप्रकृतिविवेकप्रसंगात्तत्समुपसंहर
ति तस्मादिति दैवीं देवस्य विष्णोः संबंधिनीं सदसदात्मिकां कार्यकारणरूपेणावस्थितां दुर्विभाव्यां दुरत्ययां इमां स्वप्रकृतिं सर्वधिनी

सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि ईक्षेतानन्यभावेन भूतेष्विव तदात्मतां ४२ स्वयोनिषु यथा ज्योतिरेकं नानाप्रतीयते
योनीनां गुणवैषम्यात्तथात्मा प्रकृतौ स्थितः ४३ तस्मादिमां स्वां प्रकृतिं दैवीं सदसदात्मिकां दुर्विभाव्यां पराभाव्य स्वरूपेणा
वतिष्ठते ४४ इति श्रीमद्भा० तृतीयस्कंधे ऽष्टाविंशोध्यायः २८ देवहूतिरु० लक्षणं महदादीनां प्रकृतेः पुरुषस्य च स्वरूपं ल
क्ष्यते ऽमीषां येन तत्पारमार्थिकं १ यथा सांख्येषु कथितं यन्मूलं तत्प्रचक्षते भक्तियोगस्य मे मार्गं ब्रूहि विस्तरशः प्रभो २ ॥

प्रकृतिं पराभाव्य उक्तविधभगवद्भक्तियोगेन तिरोभाव्य स्वरूपेण गुणाष्टकाविशिष्टस्वरूपेणावतिष्ठते न पुनः पुनः संसरतीत्यर्थः ४४
इति तृतीये ऽष्टाविंशः २८ एवं सप्रपंचमुपपादितं सांगमोक्षसाधनभक्तियोगमाकर्ण्य पुनस्तमनुवादपूर्वकं तस्यैव भक्तियो
गस्य भेदान् तदंगवैराग्योपपत्तिहेतुं जीवस्य स्वर्गनरकादिगमनादिरूपसंसृतिकालस्वरूपं च पृच्छति देवहूतिर्लक्षणमिति प्रकृतेः मू
लप्रकृतेः तत्कार्यभूतानां महदादीनां पुरुषस्य प्रत्यगात्मनश्च लक्षणं स्वरूपमात्मलक्षणं यामीषां पारमार्थिकमबाधितस्वरूपं येन लक्ष्यते
ज्ञायते तल्लक्षणं कथितं त्वयेति शेषः १ एवमुक्तानुवादं कृत्वा सांख्येषु सिद्धांते तदुक्तं यादं नालक्षणं यन्मूलं यस्य भक्तियो
गस्य मूलं प्रचक्षते तस्य भक्तियोगस्य मार्गं भेदं यथायथावद्विस्तरतः मे मह्यं ब्रूहि कथय हे प्रभो कपिल २ ॥ ॥

श्री
८

[illegible]धर्मः धर्मो हि धर्मिणा युज्यते समानः युग्यस्य स सयुक् सयुजो भावः सायुज्यं साधर्म्यं तथा च गीतं भगवता मम साध
र्म्य[illegible]गता इति अत्र सालोक्यादिचतुष्टयस्यापि ग्रहणं सायुज्यांतर्भूतत्वज्ञापनाय सालोक्यादीनां भेदेनोपादानं साधर्म्येऽसितेहि
सालोक्यादिकं सर्वं संपद्यत इति सालोक्यादेः सायुज्यांतर्भूतत्वे युक्तं देवतांतरप्राप्तौ हि सालोक्यादिभेदावाप्तिः ब्रह्मप्राप्तौ तु
सायुज्यांतर्भूतत्वेनैव सालोक्यादिप्राप्तिरिति विशेषः यद्वा भगवत्प्राप्तावपि स्त्री विष्णुलोकादिषु द्वारकादिष्विव तथाविध
दोस्तीति तदपेक्षाणां प्राप्यभेदद्योतनाय पृथगुक्तिः ईशः यदाहुः लोके वृत्तिभो निवसंति केचिदन्ये तु रूपसदृशं भजंते सायुज्यमे
के सतमोसग्ने इति तस्मान्मुक्तौ फलतारतम्याशंका न कार्या १३ अस्य भक्तियोगस्य लक्षणं उपसंहरति स एवेति येनात्रिगुणा
न्सत्त्वादीन् तिक्रम्य प्रज्ञाते सर्वबंधनिर्मुक्त इत्यर्थः अनेन नैर्गुण्यस्यापि फलमुक्तं निर्गुणत्वस्वीकृते मद्भावाय मत्स्वभावाय म
साम्यापत्तये इत्यर्थः उपपद्यते योग्यो भवति स एव भक्तियोगः आत्यंतिकः चरमकाष्ठां गत इत्युदाहृतः मत्स्वभावापत्तिरूपफल

238

स एव भक्तियोगाख्य आत्यंतिक उदाहृतः येनातिव्रज्य त्रिगुणं मद्भावायोपपद्यते १४ निषेवितेनानिमित्तेन स्वधर्मेण महीयसा
क्रियायोगेन शस्तेन नातिहिंस्रेण नित्यशः १५ मद्धिष्ण्यदर्शनस्पर्शपूजास्तुत्यभिवंदनैः भूतेषु मद्भावनया सत्त्वेना
संगमेन च १६ महतां बहुमानेन दीनानामनुकंपया मैत्र्या चैवात्मतुल्येषु यमेन च १७ आध्यात्मिकानुश्रवणान्नामसं
कीर्तनाच्च मे आर्जवेनार्यसंगेन निरहंक्रियया तथा १८ व्यवहितसाधनत्वदर्शनेन च मस्य भक्तियोगस्य [illegible] स्वरू
पमुदाहृतमित्यर्थः १४ तत्साधनान्याह पंचभिः निषेविते नानुष्ठितेनानिमित्तेन फलाभिसंधिरहितेन स्वधर्मेण स्ववर्णाश्र
मोचितधर्मेण महीयसा अंगानां मध्ये बलवत्तरेण पूर्वोक्त्वपि शस्तेन प्रशस्तेन क्रियायोगेन पंचरात्राद्युक्तपूजायोगेन १५
मद्धिष्ण्यं मत्प्रतिमायतनादि तस्य दर्शनादिभिः भूतेषु मद्भावनया मदात्मकत्वबुद्ध्या सत्त्वेन धैर्येण असंगेन वैराग्येण १६ राम.
महतां स्वाधिकानां बहुमानेन दीनानां स्वापेक्षयाधमानामनुकंपया विषयेषु आत्मतुल्येषु मैत्र्या तथा च वक्ष्यति गुणा
धिकान्मुदं लिप्सेदनुक्रोशं गुणाधमात् मैत्रीं समानादन्विच्छेन्न यत्रैर्भियते इति यमेन नियमेन च इदमासनादीनामप्युप २३९
लक्षणं १७ आध्यात्मिकस्य वेदांतशास्त्रस्यानुश्रवणात् आर्जवेन मनोवाक्क्रियाणामैकरूप्येण आर्यसंगेन निरहंक्रियया देहात्माभि
मानराहित्येन १८

वि

विषयान् शब्दादिविषयफलाभावं यश ऐश्वर्यं वाऽभिमतं यथारुचि रूपं वाभिसंधाय पृथग्भावः परमात्मनः स्वात्मशरीरकत्वमज्ञात्वा देवता
मात्रबुद्धित्वं पृथग्भावत्वं एवंविधः अर्चादौ मां यो र्चयेत्स राजसः ९ कर्मनिर्हारं पापक्षयं यस्मिन्परमपुरुषे तदर्पणं कर्मसमर्पणं भग
वत्प्रीतिमुद्दिश्येत्यर्थः यष्टव्यमिति शास्त्रविधिरित्यस्यैवार्थः रूपत्वाद्विधेर्वैधमेव यष्टव्यं स्वरूपानुबन्धिकं तद्यजनकरणं भगवता नियमितं स्या
दिति वा अभिसंधाय पृथग्भावः स्वात्मनो ब्रह्मशरीरत्वज्ञानन्यूनो मां यजेत स सात्त्विको भक्तः अत्र पृथग्भाव इति छित्वा भेददर्शित्व
त्रिष्वपि समानमिति केचिद्योतयन्ति तत्र सात्त्विकत्वमसंगतं सत्त्वस्य यथावस्थितवस्तुप्रकाशकत्वस्य सत्त्वात्संजायते ज्ञानं तत्र सत्त्वं निर्म
लत्वात्प्रकाशकमिति भगवता गीतत्वेन पृथग्भावस्य सत्त्वकार्यत्वाभावादतः पृथग्भावस्त्वेवं छेदः अयमपि सात्त्विकः कर्मनिर्हाराद्यभिसंधि
भेदात् अधममध्यमोत्तमभेदेन त्रिविधः १० एवं च तामसादयस्त्रयोप्यवान्तरभेदैर्नवधेति नवमस्यैव भक्तियोगस्य सन्मुमुक्षुपापत्व
विषयाननभिसंधाय यश ऐश्वर्यमेव वा अर्चादावर्चयेद्यो मां पृथग्भावः स राजसः ९ कर्मनिर्हारमुद्दिश्य परस्मिन्वा तदर्पणं यजेद्य
ष्टव्यमिति वा पृथग्भावः स सात्त्विकः १० मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोम्बुधौ ११ लक्ष
णं भक्तियोगस्य निर्गुणस्य ह्युदाहृतं अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे १२ सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत दीय
मानं न गृह्णन्ति विना मत्सेवनं जनाः १३ व्यसनं तस्य फलाव्यवहितत्वं तत्फलस्वरूपलक्षणमाह द्वयेन मद्गुणेति सर्वगुहाशये सर्वेषां हृद
यकुहरे वर्तमाने पुरुषोत्तमे मयि मद्गुणश्रवणमात्रेण गङ्गाम्भसोम्बुनः अविच्छिन्ना विजातीयप्रत्ययान्तराव्यवहिता अहैतुकी फलाद्युपाधि
रहिता अव्यवहिता मोक्षसंप्रत्युपायान्तरव्यवधानरहिता भक्तिः प्रीतिपूर्वकानुस्मरणरूपा मनोवृत्तिः या सा निर्गुणस्य सत्त्वादिनैर्गुण्यसं
पादकस्य मुक्तिसाधनस्येत्यर्थः भक्तियोगस्य लक्षणं स्वरूपमित्यर्थः १२ अहैतुकीत्यनेनोक्तं निर्गुणभक्तियोगनिष्ठानां फलकाम
नाराहित्यं द्रढयति सालोक्येति मत्सेवनं मदनुभवमन्तरेण मया दीयमानं सालोक्यादिरूपं चतुर्विधमपि मोक्षं न गृह्णन्ति जनाः कि
मु [illegible] सांसारिकफलं न गृह्णन्तीति अत्रैकत्वमेकाकारत्वं सायुज्यमित्यर्थः सालोक्यं समानलोकत्वं सार्ष्टिः सामीप्यं निकटवर्तित्वं सारूप्यं स
मा [illegible] नरूपत्वं ननु विकल्पो विशिष्टफलत्वाद्धि तिमुक्तौ फलतारतम्यं प्रतिषिद्धमेवं एते सर्वे सायुज्य एवान्तर्भूताः तत्र सायुज्यं नाम समानगुणयो
गः गुणाष्टकाविर्भावस्वरूपमुच्यते ॥

आत्मनइति स्वात्मनः परमात्मन उदरं उदरमल्पमपि भेदमपीत्यर्थः २६ निर्गुणस्यानुष्ठानप्रकारमाह अथात् सर्वेषु भूतेषु कृतालयं कृ
तवासं तत्र हेतुः भूतात्मानं भूतानामात्मा देवादिदेहविशिष्टजीवपर्यन्तः तस्मात् तथा मामात्मानमन्तर्यामिणं माम् अभिन्नेन समेन चक्षुषा
पाज्ञानेन मैत्र्या दानमानाभ्यां चार्हयेत स्वाधिकेषु बहुमानं समेषु मैत्री अधमेषु दानं सर्वेषु तत्तन्मे काकारत्वं तत्र सर्वात्मकत्वात्
सेवामन्यविशेषेण कर्त्तव्यमित्यर्थः मामर्हयेदित्यनेन मदात्मकत्वबुद्ध्या भूतेषु तदानादिकमतस्तत्तोषकरमिति उक्तं भवति २७ अथ भूतेषु
यथोत्तरं दानमानाद्यतिशयाय तत्तद्वैशिष्ट्यं निर्गुणभक्तस्य सर्वोत्तमत्वं वक्तुं तारतम्यमाह सार्द्धैः षड्भिः जीवा इति जीवाः प्रा
णिनः लतादयः कालास्थितिजीवनाः शरीरिणः तेष्वपि व्याधिश्च तेभ्यः श्रेष्ठाः इत्यर्थः अजीवानां अभिसम्पादनस्य शेषत्वविवक्षया

आत्मनश्च परस्यापि यः करोत्यन्तरोदरं तस्य भिन्नदृशो मृत्युर्विदधे भयमुल्बणं २६ अथ मां सर्वभूतेषु भूतात्मानं कृ
तालयं अर्हयेद्दानमानाभ्यां मैत्र्याभिन्नेन चक्षुषा २७ जीवाः श्रेष्ठा ह्यजीवानां ततः प्राणभृतः शुभे ततः सचित्ताः प्रव
रास्ततश्चेन्द्रियवृत्तयः २८ तत्रापि स्पर्शवेदिभ्यः प्रवरा रसवेदिनः तेभ्यो गन्धविदः श्रेष्ठास्ततः शब्दविदो वराः २९
रूपभेदविदस्तत्र ततश्चोभयतोदतः तेषां बहुपदाः श्रेष्ठाश्चतुष्पादस्ततो द्विपात् ३० ततो वर्णाश्च चत्वारस्तेषां
ब्राह्मण उत्तमः ब्राह्मणेष्वपि वेदज्ञो ह्यर्थज्ञोऽभ्यधिकस्ततः ३१ अर्थज्ञात्संशयच्छेत्ता ततः श्रेयान्स्वकर्मकृत् मुक्त

षष्ठी तत्रापि प्राणभृतः प्राणवन्तः देहभेदतः सचित्ताः ज्ञानवन्तः प्रवराः ततस्तेभ्य इन्द्रियवृत्तयः इन्द्रियाणां वृत्तयो येषु ते वृक्षादयः वृत्ता
णामपीन्द्रियवृत्तयः सन्त्येव न अधिमत्त्वं भारते तस्मात्स्पर्शं तिपादयास्तन्मात्रं प्रतिपादयतीति २८ तेभ्यः स्पर्शवेदिनः
स्पर्शवेदित्वाद्युत्तरभेदास्तिर्यच्छुद्भवाः प्रभृतास्तु स्पर्शनेन्द्रियवृत्तिरेव तेभ्यः स्पर्शवेदिभ्यः रसनेन्द्रियं मत्स्यादयः श्रेष्ठाः गन्धविदो
भ्रमरादयः शब्दविदः सर्पादयः रूपविदः काकादयः तेभ्य उभयतोदताः तेभ्यो बहुपदाः तेभ्यश्चतुष्पदः ततो द्विपान्मनुष्यः ३० द्विपात्स्व
पि चत्वारो ब्राह्मणादयो वर्णाः वर्णेनैभ्य ब्राह्मणः ब्राह्मणेष्वपि वेदाध्यायी वेदाध्यायीतेष्वपि वेदार्थज्ञः अधिकः श्रेष्ठ इत्यर्थः ३१ अर्थ
ज्ञादपि संशयच्छेत्ता मीमांसकः ततः केवलात्स्वकर्मकृच्छ्रेयान्श्रेष्ठः ततो मुक्तसङ्गः भूयान्श्रेष्ठः तस्य फलं तदर्पणमात्मनो धर्मम

एतैर्गुणैर्मद्धर्मिणः भागवतधर्मानुष्ठातुः पुरुषस्याशयश्चित्तं परिसंशुद्धः निर्मलः श्रुतमात्रगुणं यस्य तं मां अंजसा अप्रयत्नेनैवाभ्येति मद्गुणश्रव-
णमात्रेण मय्यासक्तो भवतीत्यर्थः १९ अप्रयत्नेनैवेति तत्र दृष्टांतमाहेति वातः वायुः रथः प्रापको यस्य स गंधः आशयात् पुष्पा-
देः प्रकाशात् घ्राणेंद्रियं प्रयत्नं विनैवावृङ्क्ते प्राप्नोति एवं योगरतमविकारि यच्चेतस्तदात्मानं मामावृङ्क्ते आत्मसात्करोती-
त्यर्थः २० एवं निर्गुणभक्तियोगस्य सांगस्य स्वरूपमभिधाय तमेव भक्त्यंतरेभ्यः प्रतिमादिभक्तियोगान्निंदति अहमिति षड्भिः सर्व-
तारेण सर्वेषु भूतेषु भूतात्मत्वेनावस्थितः भूतानामात्मेत्यवस्थितः अतस्तथावस्थितं तं मामवज्ञाय अभिमानाद्विष्टयेत्यर्थः
मर्त्यः सन् प्रतिमादौ अर्चायां विडंबनं कुरुते ईश्वरत्वमिदं एव धर्मफलमिति ज्ञानरहितानामर्चनं विडंबनमित्युच्यते तेनेत्यर्चा तरावनगमा

मद्धर्मिणो गुणैरेतैः परिसंशुद्ध आशयः पुरुषस्यांजसाभ्येति श्रुतमात्रगुणं हि मां १९ यथा वातरथो घ्राणमावृङ्क्ते गंध=
आशयात् एवं योगरतं चेत आत्मानमविकारि यत् २० अहं सर्वेषु भूतेषु भूतात्मावस्थितः सदा तमवज्ञाय मां मर्त्यः कुरुते ऽर्-
चाविडंबनं २१ यो मां सर्वेषु भूतेषु संतमात्मानमीश्वरं हित्वार्चां भजते मौढ्याद्भस्मन्येव जुहोति सः २२ द्विषतः परकाये मां
मानिनो भिन्नदर्शिनः भूतेषु बद्धवैरस्य न मनः शांतिमृच्छति २३ अहमुच्चावचैर्द्रव्यैः क्रिययोत्पन्नयानघे नैव तुष्ये ऽर्-
चितोऽर्चायां भूतग्रामावमानिनः २४ अर्चादावर्चयेत्तावदीश्वरं मां स्वकर्मकृत् यावन्न वेद स्वहृदि सर्वभूतेष्ववस्थितं

वहिस्कारं रहः क्रियते २१ एतदेव स्पष्टयति य इति सर्वेषु भूतेषु आत्मानं संतं सर्वत्रावस्थितं मां हित्वा दिग्गतो ऽवज्ञात्वोपर्येः
अर्चां भजते यः स भस्मन्येव जुहोति ईश्वरस्य दास्थित इति ज्ञानरहितानामर्चायाम् एवमादिकं भस्महुतं अतोऽर्चावतारे परत्वं ज्ञातव्यमित्यर्थः॥
अन्यथा महद्भिर्भेददर्शनं स्यादिः परकायेति ते भूतेषु च विरोधिता न पापिष्ठस्य दोषो न्यादिप्राकृतेन केन विरोधात् २२ मानिनो देहस्याभिमानिनः अतएव
परकाये स्थितं मां प्रति द्वेषं यतः भिन्नदर्शिनः अर्चादौ भेददर्शिनः भूतेषु निबद्धवैरस्य मनः शांतिं नाप्नोति तत्र प्राप्नोति २३ हे अनघे उच्चावचैः
अनेकरूपैः क्रियया अनुष्ठितया अर्चायामर्चितोऽपि भूतसमूहावमानिनः नैव तुष्यन्तु तोऽस्मि २४ अतएव स्वहृदि सर्वभूतेष्ववस्थितं
ईश्वरं मां यावन्न वेद तावत्स्वकर्मनिष्ठः अर्चादावर्चयेत् अर्चादावर्चनं हृत्प्रसादात् ज्ञानसाधनं अतस्त्यक्तुं निंद्यः प्राग्चार्या

[illegible]

चेष्टितं ॥

श्रीभा. त्रु. टी. १४५

॥ एवं च तत्त्वजीवलोकस्य विविधा मम संसृतिरिति प्रश्नस्योत्तराध्यायत्रयेण उत्तरं विवक्षुः कालस्येश्वररूपस्येति प्रश्नस्योत्तरमाह यावदध्याय समाप्ति एतदिति प्रधानं प्रकृतिः पुरुषो जीवः दैवमीश्वरः सकल्पं कर्मादि एवं प्रधानादिभ्यः परमित्यर्थः दैवकर्मात्मचेष्टितमिति पाठे दैव कर्मात्मं स्वस्वभावानुगुणं चेष्टितं प्रधानपुरुषाभ्यां परं विलक्षणं कालाख्यं भगवतः एतदेव स्वरूपं परो रमभिधीयते भगवानेव कालस्वरूपेण कल्पेनावस्थित इति भावः प्रधानं पुरुषमित्यार्षत्वात् प्रत्ययेनस्यं चम्यर्थे द्वितीया दैवं कर्मविचेष्टितं इति पाठे कर्मणां विचेष्टितं स फलितलक्षणं यस्मात् तत्प्रधानादिभ्यः परं भगवतो रूपं कालइत्यर्थः उक्तं हि कालात् गुणव्यतिकरः इति वक्ष्यति च गुणव्यतिकराकारा

का० ६

लइति ३६ भिन्नदृशां सर्वत्रैव ज्ञानैकात्म्यात्मनि देवमनुष्यादि वैचित्र्यं पश्यतां देहात्माभिमानिनामित्यर्थः यतः कालरूपाद्भगवतः

एकं भगवतो रूपं ब्रह्मणः परमात्मनः परं प्रधानं पुरुषं दैवं कर्मविचेष्टितं ३६ रूपभेदास्पदं दिव्यं कालइत्यभिधीयते भूतानां महदादीनां यतो भिन्नदृशां भयं ३७ योन्तः प्रविश्य भूतानि भूतैरत्त्यखिलाश्रयः स विष्ण्वाख्योधियज्ञोसौ कालः कालयतां प्रभुः ३८ न चास्य कश्चिद्दयितो न द्वेष्यो न च बांधवः आविशत्यप्रमत्तोसौ प्रमत्तं जनमंतकृत् ३९ यद्भयाद्वाति वातोयं सूर्यस्तपति यद्भयात् यद्भयाद्वर्षते देवो भगणो भाति यद्भयात् ४० यद्वनस्पतयो भीता लताश्चौषधिभिः सह स्वेस्वे कालेभिगृह्णंति पुष्पाणि च फलानि च ४१ ॥

240

भयं जन्ममरणादिभयं भवति ३७ यः कालरूपी भगवानंतः प्रविश्य भूतैरेव भूतान्यत्ति संहरति असौ कालः यो विश्वाश्रयः अखिलाधारो विष्ण्वाख्यो भगवान् स एव शरीरशरीरिभावनिर्वचनापि देशामानाधिकरण्यं पूर्ववद्भगवतो रूपमिति पृथक्करणे सिद्धे [illegible] यज्ञात्मकः कालेन हि कर्मबोध्य बोध्यते कलयतां सर्वविषयीकुर्वतां ब्रह्मादीनामपि प्रभुः स्ववशीकर्ता ३८ अस्य कालात्मनो भगवतः + न च शरीरात्म[illegible] [illegible] स्त्रियो द्वेष्यो बांधवो वा न विद्यते स्वयमप्रमत्तः सो कालात्मको भगवान् प्रमत्तं जनमंतकृत् संहर्ता सन्नाविशति पश्चिनति ३९ एवं भूतात् यस्मात् कालात्मनो भगवतो भयात् वातो वाति प्रसरति भीषास्माद्वातः पवते इति श्रुतेः सर्वत्राभिप्रेतः देवः पर्जन्यः भगणो नक्षत्रगणः

राम ४२

+ न च शरीरात्मभावस्य निवर्तत्वे विवक्षितं शरीरत्वाद्विशिष्ट[illegible] शरीरिपर्यंताभिधानमाकृत्याधिकरणसिद्धमित्यन्यत्र विस्तरः ॥

तस्मात्त्वपि मय्यर्पिताशेषक्रियार्थात्मा अर्पिताः अशेषाः क्रियार्थाः क्रियाफलानि आत्मा देहः स्वात्मा च येन उभिस्यात्मानं जीवेत्युक्तरीत्या स्वात्म

२२ रलाभं इत्यर्थः अत एव निरन्तरः भेदरहितः ज्ञानेत्वात्मैवमे मतमित्युक्तरीत्या ममात्मत्वेनाभिमत इत्यर्थः एतस्मात्कश्चिन्नाधिको लोभस्या

द्रमयीति मयि येषां चित्तस्वं केन यो मिताप्यर्पितात्मनः सुखात्मरत्नाभरस्य मर्यप्रयोजककर्तरि क्रियाफलप्रदे सन्यस्तकर्मयेन सः म

यि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा निराशीर्निर्ममो भूत्वेत्युक्तरीत्या सर्वेषामात्मनामात्मभूते सर्वक्रियाप्रवर्तके मय्येवानुसं

हितक्रियाकर्तृत्वादित्यर्थः अत एवाकर्तुः स्वस्मिन्कर्तृत्वाभिमानरहितत्वात् समदर्शनात् चेतनाचेतनात्मकं कृत्स्नं जगद्धि सात्म

कमित्येवंविधज्ञानवतः परमसंतुष्टं भद्रं तेन पश्यामि ३३ मम दुर्विज्ञमेवेदं स्पष्टयन्नाह मनसेति ईश्वरो भगवान् जीवकलया परिकल्

मैकलात्मकः प्रवेशेन जीवानां कलया जीवो मयाभिमित्यर्थः प्रविष्ट इति मनसा सुष्याएतानि चराचराणि भूतानि बहुमानयन्प्रणमेत् ३४

तस्मान्मय्यर्पिताशेषक्रियार्थात्मा निरन्तरः मय्यर्पितात्मनः पुंसो मयि संन्यस्तकर्मणः न पश्यामि परं भद्रं तमः कर्तुः समद
र्शनात् ३३ मनसैतानि भूतानि प्रणमेद्बहु मानयन् ईश्वरो जीवकलया प्रविष्टो भगवानिति ३४ भक्तियोगश्च यो
गश्च मया मानव्युदीरितः ययोरेकतरेणैव पुरुषः पुरुषं व्रजेत् ३५

एवं सांगस्य साधनान्तरभेदस्य भक्तियोगस्य स्वरूपं प्र

ननु एवं । तिपादितं तदंगभूतप्रकृतिविविक्तब्रह्मात्मकप्रत्यगात्मानुचिंतनरूपज्ञानयोग स्य भक्तियोगांगत्वमुक्तं अत्र तु साक्षाज्ज्ञानस्ये

व मुक्तिसाधनत्वमुच्यते इति विरोध इति चेदुच्यते द्विविधं हि प्रत्यगात्मोपासनं ब्रह्मात्मकत्वेनात्मोपासनं भगवदुपासनांगतया

गुणप्राधान्येनोपासनं सब्रह्मात्मकत्वात्मोपासनं चेति तत्राद्यस्य भगवत्प्राप्तिसाधनत्वं [illegible] तत्राद्यस्य

भगवत्प्राप्तिसाधनत्वं सर्वेश्वरधर्माणः प्रतिबन्धकस्तु मोक्षभागित्वं तत्र लिप्स्यस्य चावतरणं अर्थतो लोके अप्राधान्येनात्मानुचिंतनं

तु भगवद्भक्तिनिर्वर्तकमिति शेषः प्राधान्येन ब्रह्मात्मकप्रकृतिविप्रयुक्तात्मस्वरूपोपासनं तु तस्मादेव मुक्तिसाधनमित्यत्रोच्य

ते तथा हि छांदोग्ये पंचाग्निविद्यायां परब्रह्मोपासीनान् ब्रह्मात्मकत्वात्मानं चोपासीनांश्च तद्य इत्थं विदुर्ये चामी अरण्ये श्रद्धा तप इत्युपास

ते इति निर्दिश्य तेऽर्चिषमभिसंभवन्तीत्यर्चिरादिगत्या ब्रह्मप्राप्तिराम्नायते ३५ ॥

यत्निमित्तं पुमान् शोचति शोकं करोति १४९ स्यात्

ग्रं पुनरावृत्तिरिति त्रिंशेऽध्याये नर्चदान्नतिष्ठाविकारिणां केवलपापकारिणां यावद्देहसंबन्धमेगिरं दूरकलत्रपुत्रादिपोषणा रतितं च तत्क्लेशांस्ततो मनामतां यमयातनाभुभयप्रकारं च नर्गर्भजन्मादिक्लेशान् भववप्रकारं चोपपादयन्नध्यायमुपक्षि पतीति तस्य भगवद्रूपस्य बलिनः कालस्य उरुविक्रममप्ययं जनः काल्यमानोऽपि त्वयं तेन परिच्छिद्य मनोऽपि नैव स्वजनेऽभ्रवायोर्विक्रमं यथा मेघपंक्तिर्न वेद तद्वत् १ किं च ममेवास्य यं पुरुषोऽयं दुःखेन प्रयासेन सुखहेतवे सुखार्थं यं यमर्थमुपादत्ते संपादयति तं तमर्थं कालो भगवान् धुनोति विहतं करोति यत्कृते २ [illegible] देहस्य सानुबन्धस्य कलत्रादिसहितस्याध्रुवस्य देहस्य संबन्धीनि गृहादीनि वसूनि धनं च अन्यैः सह मद्यपायिप्रकारः ३ मतिरयं जनः मोहात् ध्रुवाणि मन्य

श्रीकपिल उ० तस्यैतस्य जनो नूनं नायं वेदोरुविक्रमं काल्यमानोऽपि बलिनो वायोरिव घनावलिः १ यं यमर्थमुपादत्ते दुःखेन सुखहेतवे तं तं धुनोति भगवान्पुमाञ्छोचति यत्कृते २ यदध्रुवस्य देहस्य सानुबंधस्य दुर्मतिः ध्रुवाणि मन्यते मोहाद्गृहक्षेत्रवसूनि च ३ जंतुर्वै भव एतस्मिन्यां यां योनिमनुव्रजेत् तस्यां तस्यां स लभते निर्वृतिं न विरज्यते ४ नरकस्थोऽपि देहं वै न पुमांस्त्यक्तुमिच्छति नारक्यां निर्वृतौ सत्यां देवमायाविमोहितः ५ आत्मजायासुतागारपशुद्रविणबंधुषु निरूढमूलहृदय आत्मानं बहु मन्यते ६ संदह्यमानसर्वांग एषामुद्वहनाधिना करोत्यविरतं मूढो दुरि

तेत्तत्सिद्धिदत्तो शोचतीत्यर्थः ३ दुर्मतिस्तद्दर्शयन् यौवनजरयोः शोकं प्रपंचयति जंतुरिति चतुर्दशभिः एतस्मिन्भवे संसारे यं जंतुर्जीवः यां यां देवमनुष्यादियोनिमाप्नुयात्तस्यां तस्यां योनौ निर्वृतिं सुखं न लभते न विरज्यते न विरक्तो भवति च ४ नरकस्थोऽपि पुमान्भगवन्मायया मोहितः नारक्यां नरके [illegible] निर्वृतौ सत्यां देहं नारकदेहमपि त्यक्तुं नेच्छति ५ आत्मा देहः अगारं गृहं द्रविणं बंधवः कुटुंबिनः आत्मादिषु निरूढमूलं प्ररूढमनोरथं हृदयं यस्य सः आत्मानं बहु मन्यते मोहात् [illegible] कश्चित्सुखी नास्तीति [illegible] ६ एषामात्मादीनामुद्वहनादिना पोषणचिंतया परितप्तसर्वांगः अत एव मूढः दुराशयः दुष्टचित्तः दुरितान्यविविरतं करोति ७ ॥

कालात्मनो भगवतो भयात्स्वस्वव्यापारेषु जागरूकाः कुर्वन्तीत्यर्थः ४४ ८६

यतो भीताः सरितः स्रवन्ति भीतश्च उदधिः समुद्रो नोत्सर्पति नष्टविधीं लावयति यतो भीतोऽग्निरिन्धे दीप्यति सह गिरिभिः भूश्च न निमज्जति ४२ अदो नभः यन्नियमात् श्वसतां प्राणिनां मार्गमवकाशं ददाति महत्स्वरूपतामपि सप्तभिः कालात्मको भगवान् सप्तभिः पृथिव्यादिसप्तावरणैरावृतं स्वदेहं शरीरस्थितं ब्रह्माण्डं तनुते उत्पादयति यद्वा नियमादितो नुवर्तते महान् महत्तत्वं सप्तभिः पृथिव्यप्तेजोवाय्वाकाशाहंकारेन्द्रियैरावृतं स्वदेहं स्वपरिणामरूपं जगत्तनुते विस्तारयति यद्वा सप्तभिर्धातुभिरावृतं ४३ गुणाभिमानिनः सत्वरजस्तमोगुणप्रधाना देवा ब्रह्मादयः अस्य विश्वस्य सर्गादिषु अनुयुगं प्रतिकल्पं वर्तन्ते येषां वशे एतच्चराचरात्मकं जगत् वर्तते चराचरात्मकं जगत् शोकुर्वतापि ब्रह्मादयः अस्य सर्गादिषु अनुयुगं प्रतिकल्पं वर्तन्ते तत्कालात्मनो वशाः स कालात्मा भगवाननन्तः अन्येषामपरिच्छिन्नः जनेनापित्रादिना जनादिकं जनयन्नादिकृत् मृत्युनामृत्योरपि मृत्युना स्वेनान्तकं मृत्युमपि मारयन्

स्रवन्ति सरितो भीता नोत्सर्पत्युदधिर्यतः अग्निरिन्धे सगिरिभिर्भूर्न मज्जति यद्भयात् ४२ नभो ददाति श्वसतां पदं यन्नियमाददः लोकं स्वदेहं तनुते महान् सप्तभिरावृतम् ४३ गुणाभिमानिनो देवाः सर्गादिष्वस्य यद्भयात् वर्तन्तेऽनुयुगं येषां वश एतच्चराचरम् ४४ सोऽनन्तोऽन्तकरः कालोऽनादिरादिकृदव्ययः जनं जनेन जनयन्मारयन्मृत्युनान्तकम् ४५

इति श्रीभागवते तृतीयस्कन्धे एकोनत्रिंशोऽध्यायः २९ ॥

न्तकरः स्वयं त्वनादिरनन्तोऽव्ययश्चेत्यर्थः ४५ इति तृतीये एकोनत्रिंशोऽध्यायः २९ एवं कालस्य स्वरूपमुक्त्वा प्रश्नस्य उत्तरमुक्तम् अथ कालप्रभाववर्णनपूर्वकं माध्यमिकपरब्रह्मव्यतिरिक्तवस्तुषु वैराग्यमुपदेष्टुमाह आर्हितोपासिकृत्यं इहामुत्र संसरतो जीवस्य गर्भे जन्म बाल्य कौमार पौगण्ड यौवन जरामरणाद्यस्वरूपभूतानि कर्मादीनि तत्कर्मफलानि च यथा जीवलोकस्य विविधा मम संसृतिरिति निर्दिष्टा नैव प्रपञ्चयन्नाह धर्माद्यर्थयेन कपिलः तत्र जीवास्त्रिविधाः केचन ऐहिकसुखदल्पाद्यकारिणः केवलपापकर्मिणः अन्ये पुनरिष्टादिकारिणः प्रत्यक्कर्माण्यपरे त्विष्टादिपूर्वकं ब्रह्मोपासकाः तत्र केवलेष्टकारिणो भगवदुपासका नो च यावज्जीवं स्वानुष्ठेयपराणां भगवद्भक्तियुक्तानामिदं मनसः स्थाने भगवल्लोकं च प्राप्तानां तत्र भोगाननुभवं तत्र भगवन्तं प्राप्तानां पुनरावृत्तिः चेदमनसः स्वर्गे प्राप्य

दि

श्रीभा० टी० १४३

कफेन श्लेष्मणा संरुद्धा नाड्यो यस्य तेन वायुना कफनिरुद्धनाडीरूपमार्गेण वायुना उत्क्रमितेव बहिर्निर्गते तदा रेने नेयस्य कासश्वा-
साभ्यां कृतः आयासो यस्य सः कण्ठे घुरघुरायते घुरघुरशब्दं करोति १६ शयानः परितः शोचद्भिः स्वजनैः परिवेष्टितः वाच्यमानोपि
ध्यमानः तातेत्यादि तातेत्याहूतोपि किंचिदपि न ब्रूते यतः कालपाशवशं मृत्युपाशं गतः प्राप्तः १७ एवं यौवनजरयोः स्त्रीणां कुटुम्बभरणे
व्यापृतात्मा व्यापारितः आत्मा अन्तःकरणं देहेन्द्रियादि येन सः अत एव अजितेन्द्रियः उरुवेदनया बहुलया
मरणवेदनया अस्ता धीर्नष्टा मतिः स्वानां स्वबन्धूनां रुदतां सतां म्रियते १८ तदा मरणसमये प्राप्तौ सरभसं सक्रोधं ईक्षणं ययो-

वायुनोत्क्रमितोत्तारः कफसंरुद्धनाडिकः। कासश्वासकृतायासः कण्ठे घुरघुरायते ॥१६॥ शयानः परिशोचद्भिः परिवी-
तः स्वबन्धुभिः। वाच्यमानोपि न ब्रूते कालपाशवशं गतः ॥१७॥ एवं कुटुम्बभरणे व्यापृतात्माजितेन्द्रियः। म्रियते रुद-
तां स्वानामुरुवेदनयास्तधीः ॥१८॥ यमदूतौ तदा प्राप्तौ भीमौ सरभसेक्षणौ। स दृष्ट्वा त्रस्तहृदयः शकृन्मूत्रं विमुञ्च-
ति ॥१९॥ यातनादेह आवृत्य पाशैर्बद्ध्वा गले बलात्। नयतो दीर्घमध्वानं दण्ड्यं राजभटा यथा ॥२०॥ तयोर्निर्भिन्न-
हृदयस्तर्जनैर्जातवेपथुः। पथि श्वभिर्भक्ष्यमाण आर्तोऽघं स्वमनुस्मरन् ॥२१॥ क्षुत्तृट्परीतोऽर्कदवानलानिलैः सं-
तप्यमानः पथि तप्तवालुके। कृच्छ्रेण पृष्ठे कशया च ताडितश्चलत्यशक्तोऽपि निराश्रयोदके ॥२२॥ तत्र तत्र पतन्
श्रान्तो मूर्छितः पुनरुत्थितः। यथा पापीयसा नीतस्तमसा यमसादनम् ॥२३॥

ः भीमौ भयंकरौ यमस्य दूतौ दृष्ट्वा सः
यमाणः त्रस्तहृदयः शकृन्मूत्रं च विमुंचति १९ ततः पाप्यां तत्र पायुगतिमाह यावत्समाप्ति तयोर्दूतयोः
यातनादेहं आवृत्य निरुध्य केवलात् पाशैर्बध्वा दीर्घमध्वानं नयतः गमयतः यथा लोके दण्डनार्हं राजभटास्तद्वत् २० तयोर्दूत-
योस्तर्जनैर्निर्भिन्नं हृदयं यस्य सः अत एव संजातकंपः पथि श्वभिर्भक्ष्यमाणः दह्यमानशरीरः आर्तः स्वीयमघं पापमनु-
स्मरन् स्खलन् तितिक्षितोयेनान्वयः २१ क्षुत्तृड्भ्यां परीतो व्याप्तः तथा वालुकायां तप्तायां सूर्यदावाग्निभ्यामनिलेन च सं-
तप्यमानः पृष्ठे कशया चर्ममय्या ताडितः अशक्तोऽपि गन्तुं समर्थोऽपि निराश्रयोदके निर्गत आश्रयः विश्रामादिस्थान

१४३

उपायत्वमाह आक्षिप्तेति स्त्रीणां मायया असतीनां च वश्यलोभनामपि रहसि रचितया संभोगादिरूपया मायया कलभाषिणां मधुरभा
षिणां शिशूनामालापैश्चाक्षिप्ता आसक्तमना मे इन्द्रियाणि मनस्कानीन्द्रियाणि यस्य सः ८ गृहेषु कूटधर्मेषु [illegible]
धर्मा येषु दुःखमयानि भगवद्[illegible] दुःखप्रतीकारं [illegible] किंचित्कर्म कुर्वन् तत्सुखमिव मन्यते ९ [illegible]
[illegible] आपादितैर्[illegible] कलत्रादीन् पुष्णाति [illegible]
[illegible] स्वयमधो निरयं याति १० वार्त्तायां जीविकायां पुनः
पुनरारब्धायां लुप्यमानायां दैवेन निष्फलायां सत्यां लोभेनाभिभूतः व्याप्तः निःसत्त्वः आसत्त्वः [illegible] परार्थे परस्वे स्पृहां कुरुते

आक्षिप्तात्मेन्द्रियः स्त्रीणामसतीनां च मायया । रहो रचितयालापैः शिशूनां कलभाषिणाम् ८ गृहेषु कूटधर्मेषु दुःखतन्त्रेष्वतन्द्रितः । कुर्वन्दुःखप्रतीकारं सुखवन्मन्यते गृही ९ अर्थैरापादितैर्गुर्व्या हिंसयेतस्ततश्च तान् । पुष्णाति येषां पोषेण शेषभुग्यात्यधः स्वयम् १० वार्त्तायां लुप्यमानायामारब्धायां पुनः पुनः । लोभाभिभूतो निःसत्त्वः परार्थे कुरुते स्पृहाम् ११ कुटुम्बभरणाकल्पो मन्दभाग्यो वृथोद्यमः । श्रिया विहीनः कृपणो ध्यायञ्छ्वसिति मूढधीः १२ एवं स्वभरणाकल्पं तत्कलत्रादयस्तथा । नाद्रियन्ते यथा पूर्वं कीनाशा इव गोजरम् १३ तत्राप्यजातनिर्वेदो भ्रियमाणः स्वयम्भृतैः । जरयोपात्तवैरूप्यो मरणाभिमुखो गृहे १४ आस्तेऽवमत्योपन्यस्तं गृहपाल इवाहरन्

हृते ११ कुटुम्बभरणे अकल्पः असमर्थः मन्दभाग्यः भाग्यहीनः अत एव वृथोद्यमः व्यर्थप्रयत्नः श्रिया विहीनः संपत्तिरहितः कृपणो
दीनः ध्यायन् [illegible] मूढधीः श्वसिति १२ एवं स्वभरणे विकलं [illegible] तत्कलत्रादयः पूर्ववत् [illegible]
तथा नाद्रियन्ते [illegible] कीनाशाः कृषीवलाः [illegible] गोजरमिति पाठान्तरं [illegible]
[illegible] १३ तत्रापि अजातनिर्वेदः [illegible] स्वयं पालितैः [illegible] भ्रियमाणः पोष्यमाणः
जरया उपात्तं वैरूप्यं पलितवलितादि यस्य सः मरणाभिमुखः सन् गृहे आस्ते १४ अवमत्या उपन्यस्तं [illegible]
[illegible] गृहपाल इव श्वा इव आहरन् [illegible]

स्वकुटुम्बपोषणं न विधेयमित्याह केवलेनेति केवलेन ईश्वरविमुखेनाधर्मेण कुटुम्बभरणोत्सुकः जीवः तमसो नरकस्य चरमं पदं स्थानं अन्धतामिस्रं याति ३३ एवमत्रैव शरीरप्राप्तिमाह अधस्तादिति नरलोकस्य मनुष्यदेहप्राप्तेरधस्तादर्वाग्यावत्यो यातनास्ताः [illegible] क्रमशः समनुक्रम्य भोगेन कर्मक्षयाच्छुचिः सन्नत्र पुनर्नरत्वं प्राप्नोतीत्यर्थः ३४ इति तृतीये त्रिंशः ३० एवं पौनःपुन्येन जन्ममरणानन्तरं [illegible] जन्मादिक्लेशमाह कपिलः तत्र पुनरत्राव्रजेदित्युक्तं तदेव विशेषतो दर्शयति कर्मणेति दैवमीश्वरः स एव नेत्रं प्रवर्तकं [illegible] तेन कर्मणा जन्तुर्जीवो देहोपपत्तये देहप्राप्तये पुंसः रेतःकणाश्रयः रेतःकणमाश्रितः रेतःकणाश्रयो यस्य [illegible] उदरं प्रविष्टो भवति ननु भोगेन सर्वकर्मणां विनष्टत्वात्कर्मणा दैवनेत्रेणेति कथमेतदुच्यते अतिरिक्तफलोपभोगशब्दस्याप्यनुष्ठ[illegible] त्वात्रापि तमेवाख्यानं पुनर्निवर्तत इति संपन्नं स्वेन स्वर्गनरकादिकमिति संपातः कर्माण्यतेऽस्मात्तत्रं च प्राप्यं तं कर्मणा [illegible] स्याज्ञिर्दिष्ट

केवलेन ह्यधर्मेण कुटुम्बभरणोत्सुकः याति जीवोऽन्धतामिस्रं चरमं तमसः पदं ३३ अधस्तान्नरलोकस्य यावतीर्यातनादयः क्र-
मशः समनुक्रम्य पुनरत्राव्रजेच्छुचिः ३४ इति श्रीमद्भागवते महापुराणे तृतीयस्कन्धे कर्मविपाकवर्णनं नाम त्रिंशोऽध्यायः ३० श्री
भगवानुवाच कर्मणा दैवनेत्रेण जन्तुर्देहोपपत्तये स्त्रियाः प्रविष्ट उदरं पुंसो रेतःकणाश्रयः १ ॥

कर्मशेष [illegible] करोत्ययं तस्माल्लोकाद्धान्तरे

त्यस्मै लोकाय कर्मण इति श्रुतेः देवि प्रतिसिद्धं तत्तत्कर्मोपभोगेन शुचित्वं पुनरत्रागमनं चेति मैवं अभुक्तफलानां हि [illegible]
ष्ठितानां च कर्मणां कर्मान्तरफलानुभवेन नाशासंभवात्तेभ्यः पुनरत्रागमनोपपत्तेः शुचित्वस्योपभुक्तफलकर्मविषयत्वात् तथा
चानुशयफलैः कर्मभिर्विशिष्टः पुनरायातीति श्रुतिः स्मृतिश्चाह अतिस्तावत् य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमाप
द्येरन्ब्राह्मणयोनिं क्षत्रिययोनिं वैश्ययोनिं वा अथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरञ्श्वयोनिं सूकरयोनिं चाण्डा
लयोनिं वेति अथ स्मृतिः वर्णा आश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततः शेषेण विशि[illegible] तेषां मध्ये रमणीयकर्माणः ते रमणीयां ब्राह्मणादियोनिं कपूयचरणाः कुत्सि
तकर्माणः कुत्सितां च सूकरादियोनिं पद्यन्त इत्यर्थः स्मृतिरिति वर्णाश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततः शेषेण विशि

प्र॰१

पं॰३

ते तत्रैव विशेषमाह योजनानां इति अध्वनस्तेवपिनां योजनानां नवतिं नवच तदस्नानि त्रिभिर्मुहूर्तैः पापाधिकोदाभ्यां मुहूर्ताभ्यां
नीतः यातनाः प्राप्नोति २४ संदेहे पलोद्दर्शयति चतुर्भिः आदीपनं इति उल्मुकादिभिर्दग्ध्यित्वा चांगना मारीप नं प्रज्वालनं
तं त्विनक्ति यत्स्वमांसं तस्यादंश नं २५ यम सादने स्वर्गभ्रंशो जीवन एव स्वस्या नाम स्व स्वहारं वदति निःक्रामन दुष्कृतिः
सर्पादिभिः स्वत्वं वशसमालपीडां अवयवशरुं लनंछेद नगजादिभ्यः भिरायनं भेदनापणं मंत्रगर्भयो निरोधनं तिलं चन
पाः २७ यात्वतामिस्रादयः पंचमे स्कंधे विस्तरेण वर्णमाणत्वात्रौ उरुबोवापरस्परसंगेनन निर्मिताः संयादिताः यातनाः

योजनानां सहस्राणि नवतिं नवचाध्वनः त्रिभिर्मुहूर्तै द्वाभ्यां वा नीतः प्राप्नोति यातनाः २४ आदीपनं स्वगात्राणां वेष्टयि
त्वोल्मुकादिभिः आत्ममांसादनं क्वापि स्वकृत्तं परतोपि वा जीवतः स्वान्त्राभ्युद्धारः स्वगृध्रैर्यमसादने सर्पवृश्चिकदं
शाद्यैर्दंशश्चिस्वात्मवैशसं २६ कृंतनं चावयवशो गजादिभ्यो भिदापनं पातनं गिरिशृंगेभ्यो रोधनं चांबुगर्तयोः २७ या
स्तामिस्रांधतामिस्रारौरवाद्याश्च यातनाः भुंक्ते नरो वा नारी वा मिथः संगेन निर्मिताः २८ अत्रैव नरकः स्वर्ग इति मातः प्रच
क्षते या यातना वै नारक्यस्ता इहाप्युपलक्षिताः २९ एवं कुटुंबं बिभ्राण उदरंभर एव वा विसृज्येहोभयं प्रेत्य भुंक्ते तत्फलमीदृ
शं ३० एकः प्रपद्यते ध्वांतं हित्वेदं स्वकलेवरं कुशलेतरपाथेयो भूतद्रोहेण यद्भृतं ३१ दैवेनासादितं तस्य शमलं निरये पुमान् भुं

ले नुभवति ३२ न चैतदसंभावितमिति मन्तव्यमत्रापि दृश्यमानत्वादित्याह अत्रैवेति हे मातः स्वर्गोपि नरकश्चात्रैव लोके वर्तेते इत्याचक्षते
नारकाः नरकसंबंधिन्यो याया तनास्ताः इहाप्युपलक्षिताः दृष्टाः वैनिष्कृतिं ३२ एवं कुटुंबभरणः कुटुंबपोषणपरः उदरंभरः स्वदेहपोषण
पणमात्रपरो वा उभयं कुटुंबं स्वदेहं च विसृज्य प्रेत्य परलोकं प्राप्य ईदृशं फलं विंथके वलं कुटुंबपोषणादिफलं भुंक्ते ३ पापार्जितं धनं
वनरकं यातीत्याह एक इति भूतद्रोहेण यद्भृतं तत्स्व कलेवरं चैहैव हित्वा कुशलात् मुक्तादितरत् पापं तदेव पाथेयं भोग्यं यस्यास्य
निरयमार्गे एक एव प्रपद्यते ३१ नतु पापमपि विहाय गच्छतुत्याह दैवेनेति तत्स्य कुटुंबपोषणस्य शमलं पापं दैवेन ईश्वरेणार्पितं निरये नरके भुं

श्री

सप्तमान्मासादारभ्य लब्धो बोधः सुखदुःखादिज्ञानं येन सः सूतिर्देहतुभिर्वा [...] प्रेरितैर्वेपितः अतिदुःखितः सोदरः समानो-
दरजन्मा विष्ठाभुक् कृमिरिव नैकत्रास्ते १० नाथमानः उपलभ्यमानः याचमान इति वा ऋषिर्जीवः सप्तवध्रिः सप्तभिर्वा सप्तधातुभिर्बद्धो वन्धनस्य-
तथालब्धोपसर्गः भीतः उक्तविधगर्भवासाद्भयमापन्नः विक्लवया वाचा कृतयाचायेन उदरेऽर्पितः तं भगवन्तं कृताञ्जलिः सन् स्तौ-
ति ११ स्तुतिमेवाह तस्येति उपपन्नं स्वेनैव सह जगदवितुं रक्षितुं इच्छया गृहीता नानातनवो येन तस्य भगवतो भुवि चलच्चरणारविं-
दमकुतोभयं सोऽहं शरणं व्रजामि असतो मम अनुरूपा योग्या ईदृशी गतिर्येनादर्शि दर्शिता तस्य चरणारविन्दं इत्यन्वयः नन्वेवं
शरणागतं कथं भ्रान्यरित्यजतीति शंक्य सदाचार्योपदिष्टहीतभावानुरूपकारणानेवाभावाच्छेति द्रष्टव्यं १२ कोसौ यं शरणं

आरभ्य सप्तमान्मासाल्लब्धबोधोऽपि वेपितः। नैकत्रास्ते सूतिवातैर्विष्ठाभूरिव सोदरः १० नाथमान ऋषिर्भीतः
सप्तवध्रिः कृताञ्जलिः। स्तुवीत तं विक्लवया वाचा येनोदरेऽर्पितः ११ जीव उवाच जीवोपसन्नमवितुं जगदिच्छया-
त्तनानातनोर्भुवि चलच्चरणारविंदं सोऽहं व्रजामि शरणं ह्यकुतोभयं मे येनेदृशी गतिरदर्श्यसतोऽनुरूपा १२
यस्त्वत्र बद्ध इव कर्मभिरावृतात्मा भूतेन्द्रियाशयमयीमवलम्ब्य मायां आस्ते विशुद्धमविकारमखण्डबोधमातप्यमा-
नहृदयेऽवसितं नमामि १३॥

भजामि कोऽसावस्य तव च विशेषः येन शरणं गतस्त्वभाव इत्याकांक्षायामाह यस्त्विति
अत्र मातुर्देहे भूतेन्द्रियाशयमयीं भूतादिरूपेण परिणतां मायामवलम्ब्य स्थित्वा कर्मभिरावृतात्मा कर्मरूपाविद्यया तिरोहि-
तस्वस्वरूपः बद्धो जीव इव सर्वथा स्वयमप्यास्ते तेन सह मत्कृतेव सतीत्यर्थः एवं जीवेन सह वर्तमानमपि विशुद्धं मत्कृतिगत-
दोषैरस्पृष्टमनेनापहतपाप्मत्वमुक्तं अविकारं जरामरणशोकक्षुत्पिपासादिविकाररहितं अनेन हृद्यङ्गतारादिसत्य-
कं कल्याणगुणजातमोह अखण्डबोधं नित्यासंकुचितज्ञानस्वरूपं आतप्यमानहृदयेऽवसितं प्रतीतमातप्यमाना-
हमिति वा नमामि कर्मबद्धो जीवः स्वयमशुचि देहेऽवसन्नपि तद्दोषैरस्पृष्टो यस्तं नमामीत्यर्थः अतो भगवतोऽकर्मबद्धत्वेसत्य-
पि नानाविधाशुचिदेहसंबन्धोऽपुरुषार्थ एव अतो यथापि जगद्देवकारणं सर्वज्ञानादिकल्याणगुणः ॥

ग

२४४

तज्जीवेनाधिष्ठितं रेतः स्त्रिया उदरं प्रविश्य एकरात्रेण कलिलं शोणितमिश्रं भवति पंचरात्रेण बुद्बुदं वर्तुलं भवति दशाहेन कर्कंधुः बदरीफलाका
रं किंचित्कठिनं च पेशी मांसपिंडाकारमंडं तिर्यगादीनां च लेन पेश्यण्डयोर्वा पाठः १ ततो मासेन शिरः द्वाभ्यां मासाभ्यां बाह्वंघ्र्याद्यंगानां विग्रहः
विभागो भवति ततस्त्रिभिर्मासैर्नखादीनि लिंगच्छिद्राणि चोद्भवन्ति २ ततश्चतुर्भिर्मासैः सप्त धातवः ततः पंचभिः क्षुत्तृडुद्भ
२४ वः ततः षड्भिर्मासैर्जरायुणा गर्भवेष्टनेन वीतः प्रावृतः कुक्षौ दक्षिणपार्श्वे भ्राम्यति सर्वत्र पुंस्त्वादृशः सप्तमासादि संख्या उदरप्र
वेशकालमारभ्य षोडशादिनाधिकमवान्तरविशेषतिमासगणना ... तिवेदितव्यः ४ मातुर्जग्धैर्भक्षितैरन्नपानाद्यैरेधमानः एधन्ते वर्धमाना
नामग्रधातवो यस्य सः जन्तूनां संभवो यस्मिंस्तस्मिन्नसंमते विण्मूत्रयोर्गर्ते शेते ५ तत्रत्यैः क्षुधितैः कृमिभिः क्षतानि वा यस्मांगा

कलिलं त्वेकरात्रेण पंचरात्रेण बुद्बुदं दशाहेन तु कर्कंधुः पेश्यंडं वा ततः परं १ मासेन तु शिरो द्वाभ्यां बाह्वंघ्र्याद्यंगवि
त्रिभिः ३ ग्रहः नखलोमास्थिचर्माणि लिंगछिद्रोद्भवः षड्भिर्जरायुणा वीतः कुक्षौ भ्राम्यति दक्षिणे सप्तमेऽस्य क्रमाणि गतानि स्म
रते ऋषिः ४ मातुर्जग्धान्नपानाद्यैरेधद्धातुरसंमते शेते विण्मूत्रयोर्गर्ते स जंतुर्जंतुसंभवे ५ कृमिभिः क्षतसर्वांगः
सौकुमार्यात्प्रतिक्षणं मूर्छामाप्नोत्युरुक्लेशस्तत्रत्यैः क्षुधितैर्मुहुः ६ कटुतीक्ष्णोष्णलवणरूक्षाम्लादिभिरुल्बणैः ।
मातृभुक्तैरुपस्पृष्टः सर्वांगोत्थितवेदनः ७ उल्बेन संवृतस्तस्मिन्नंत्रैश्च बहिरावृतः आस्ते कृत्वा शिरः कुक्षौ भुग्नपृष्ठ
शिरोधरः ८ अकल्पः स्वांगचेष्टायां शकुंत इव पंजरे तत्र लब्धस्मृतिर्दैवात्कर्म जन्मशतोद्भवं स्मरन्दीर्घमनुच्छ्वासं शर्म
किं नाम विंदते ९॥

ति सर्वाण्यंगानि यस्य सः सौकुमार्याद्धेतोरुरुरधिकः क्लेशो यस्य सः प्रतिक्षणं मूर्छामाप्नोति ६ उल्बणैरुत्क
टैः मातृभुक्तैः कट्वादिभिरुपस्पृष्टः अत एव सर्वेष्वंगेषूत्थिता वेदना यस्य सः आस्ते इत्युत्तरेणान्वयः ७ उल्बेन जरायुणा वीतः ब
हिरंत्रैरावृतः शकुंतः पक्षी वा कल्पः असमर्थः सन्नास्ते तत्र गर्भे दैवात्पूर्वकर्मवशात् लब्धा स्मृतिर्येन सः जन्मशतोद्भवं जन्म
संचितं कर्म स्मरन् दीर्घं यथा भवति तथा अनुच्छ्वासं यथा भवति तथा तत्र स्थितः सन् किं नाम शर्म सुखं विंदते लभते न किंचिदित्यर्थः ९॥

श्रीभा॰
स्त॰ टी॰

वरणे

…करणैनसंसृतिर्निवर्त्तिष्यतीत्यपेक्षायां सएव बंधकः सएव मोचक इति न्यायेन त्वत्से… कल्पाय ताविवं बंधमोक्षाविति
यन्मायये ति अयं जीवः यन्मायया यस्य भगवतः संकल्परूपज्ञानेन उत्पत्तित्वादिगुणानिमित्तकानि कर्माणि देहसा…
…यस्मिन् सांसारिके संसारसंबंधिनि पथि प्रवृत्तिमार्गे चरन् तदभिश्रमेण तत्संचारक्रमेण न ह्वरति इति दिव्यजीवपरयाथा
त्म्यज्ञानं प्रवर्ष्यदृत्तु अर्दमंतरेण महतस्तस्य भगवतोनुग्रहं विना कया पुत्त्या केनोपायेन पुनर्लोके स्वलोकमाविर्भवत्गुणाश्र
कत्वं रूपं भरूपेणेत्यर्थः प्राप्नुयात् यत्रालोके स्वपरयाथात्म्यज्ञानलक्षणं स्वरूपं प्राप्नुयात् कया उपायादि त्यर्थः २४ भगवानेव ज्ञानप्र
दानद्वारा स्वस्य मोचकः न ब्रह्मादिरन्यतमो जीवः नहि स्वयं निगलितोन्यान्निगलितान्मोचयेदिति वदन्नाह ज्ञानमिति
यदेतत् त्रैकालिकं त्रिधापि कालेष्वसंकुचितं जीवपरयाथात्म्यज्ञानं महदनुग्रहमंतरेण कतमो जीवः … दयो … किंतुस

यन्मायया यो करणकर्मनिबंधने अस्मिन् सांसारिके पथि चरंस्तदभिश्रमेण न ह्वरति इत्यन्वयः प्रवृत्तिलोके पुत्त्या
कया महत्त्वदनंतरेण २४ ज्ञानं यदेतददधात् कतमः सदैवं त्रैकालिकं स्थिरचरे ष्वनुवर्त्तितांशः नजीवकर्मप
दवीमनुवर्तमानास्तापशमनाय वयं भजेम २५ देहस्य देहविवरे जठराग्निनासृग्विण्मूत्रकूपपतितो भृशतप्त
देहः इच्छन्निती विवसितुं गणयन्स्वमासान्निर्वास्यते कृपणधीर्भगवान्कदा नु २६॥ एवं देवः ईश्वर एव नान्यस्तत्त
तः प्रकृष्टो जीवो विद्यानुवेसाद न भि ति … ब्रह्मादयो वयं जीवभ्रमात्मानं यानि कर्माणि संसारिकराणि तेषां पदवीं परंप
रामनुवर्तमाना … सर्वे वयं कर्मरूप विद्यालिरोदितु ज्ञानं इत्यर्थः अतस्तव्यतिरेकेण कोपि न समर्थ इत्यर्थः अन्यस्यासंभ
वमुक्त्वा तस्य संभवमाह स्थिरचरेषु शरीरेष्वनुवर्त्तिनः अनुगतात्मतयांशस्यांशभूतो जीवो येन सः जीवांतरात्मतयावस्थितस्य
संकुचितज्ञानस्वरूपज्ञानगुणैक स्तं भजेम २५ एवंतं … तरात्मतयात्र स्थितस्य सर्वज्ञस्य भगवतः ज्ञानप्रदानद्वारा
मोचकत्वात् तस्यैव भजनीयत्वं नान्यस्येत्यभिधाय … स्वार्थं विज्ञापयन्नाह देहीति हे भगवन्नस्य देहविवरे मातुरुदरकुहरे यः अस
अस्रमूत्रविण्मूत्रकूपः तस्मिन् पतितः तत्र जठराग्निना भृशं तप्तो देहो यस्य सः अतएव कृपणधीर्यस्य सः … इतोऽस्माद्विवा

245

लक्ष्मी
त्यर्थः ९

एम
१६६

ण कर्तृत्वं चात्र तत्प्राप्तियः पृथिव्यां तिष्ठन्पृथिव्या अन्तर इति तिष्ठन्योरेतसि तिष्ठन्नित्यादि वचनात्तत्र तत्रावस्थितस्यान्तःसेवमेव
श्रीरस्त्व निखिलदोषत्वस्य समस्त कल्याण कर्तृत्वस्या ऽत्रैवोक्त्या ऽपुरुषार्थप्रतिवेधात्तं जीवस्य तु तत्त्वत्र ऽकर्मणा तिरोहितमिस्व
पार्थसंबंधो ऽवर्जनीयः जीवस्य कर्मवश्यत्वात्तत्कर्मानुगुण्येन तत्तत्वस्तु संबंध एवापुरुषार्थः परस्य तु स्वाधीनस्य स एव संबंधस्त
द्विचित्रनियमनरूपलीलारसायैवस्यात् ननु स्वेच्छया नियमनं कुर्वतोपि तत्तद्वस्तु स्वभावायत्तो ऽपुरुषार्थसंबंधो ऽवर्जनीयः स्येव
नतत्त्विहत्त्वपि स्वभावतो ऽपुरुषार्थस्वरूपकमेव स्यान्नातु कर्मस्वभावानुगुण्येन परमपुरुषसंकल्पादेकमेव वस्तुकालभेदेन
पुरुषभेदेन च दुःखाय च सुखाय च भवति वस्तु स्वरूपमप्रकृतेनाश सर्वं सर्वस्य सुखायैव दुःखायैव वा स्यात् न चैवं दृश्यते
तथा चोक्तं नरकस्वर्गसंज्ञेवै पापपुण्ये द्विजोत्तम वस्त्वेकमेव दुःखाय सुखायेर्ष्यागमाय च कोपाय च यतस्तस्माद्वस्त्वात्मकं कु

॥वस्त्वेकमेकमेव दुःखाय सुखायेर्ष्यागमाय च कोपाय च यतस्तस्माद्वस्तु वस्त्वात्मकं कुतः तदेव प्रीतये भूत्वा पुनर्दुःखो
पजायते॥ यः पंचभूतरचितैरहितः शरीरैश्छन्नो यथेन्द्रियगुणार्थचिदात्मकोऽहं तेनाविकुंठमहिमानमृषिं तमेव
मेने वदे परमप्रकृतिपुरुषयोः प्रमासं॥२२॥ तदेव कोपाय यतः प्रसादाय च जायते तस्माद्दुःखात्मकं नास्ति न च किं
चित्सुखात्मकमिति तस्मात्कर्मवश्यत्वेन्याधीनत्वस्य प्रतिभटत्वात् द्विविधजीवपरयोर्वैलक्षण्यं प्रतिपादितमेव २२ एतदेवं वे
लक्षण्यं स्पष्टयन्नमस्करोति य इति पंचभूतरचितैः पंचभिराकाशादिभिरारब्धैः शरीरैर्यथा दैवछन्नः आरतः शरीरेणावृ
तः तथा छन्नोपि यो भगवान्नहितः शरीरसंबंधायन्तदोषरस्पृष्टः तत्र हेतुः इन्द्रियगुणार्थचिदात्मकः इन्द्रियाणि ज्ञानक
र्मोभयेन्द्रियाणि गुणाः गुणाश्चो गुणपरिणामरूपाः शब्दादय गुणाः सत्वादयः अर्थाः शब्दादयः चिज्जीवः एतन्मात्मा शरी
रंयस्य सन्नदचितो नियंतृत्वेनावस्थितः नन्वत्र पिवकर्मसंकुलितस्वभावः प्रकृतिपारवश्येन नियाम्यतयावस्थित इत्यर्थः
यद्वा इन्द्रियगुणार्थचिदात्मक इत्य दृमित्यस्य विशेषणं इन्द्रियाणां गुणपरिणामरूपेषु शब्दादिष्वेव चिज्ज्ञानं यस्यावि
पयासक्तचित्तोऽहं इत्यर्थः तेन शरीरेण विकुंठमहिमानं नित्यासंकुचितज्ञानैश्वर्यं प्रतिसर्वेनं प्रकृतिपुरुषयोः परं विलक्ष

स्पष्टमेव=)

श्रीभा॰ तृ॰ टी॰ २८८

७२

...ष्णाद्वैगत्य विक्कवः विगततथा स्थे अहमात्मानं सुहृदात्मनैव सर्वेभ्यस्तमसः हृदात्मना त्वयैवेहेतुभूतेन तमसः संसृतेरुद्धरिष्ये अनेकरंध्रं नाना...
...द्वारम् एतद्व्यसनं दुःखं पुनः यथा मा भविष्यत् किमत्र साधनं तत्राह उपसादितौ प्राप्तौ विष्णोः पादौ येन सोहं २१ एवंसम्प्राप्तमासा
...द्दशमासे तं गर्भस्थजीवं निर्वेदमभिधायानंतरावस्थामाह एवमिति गर्भे कृतनिश्चयं सद्य एव दशमास्यं दशमासपरिमितं सन्तं
जीवं सद्यस्तत्क्षणमेवावाचीनमवाङ्मुखं तं प्रसूत्यै सूतिमारुतः प्रसूत्यै क्षिपति प्रेरयति बहिर्निःसारयितुं चालयतीत्यर्थः २२ तेनसूतिवायुना
अवसृष्टः स्वस्थानाच्चालितः शिरः अवाग् अधःकृत्वा आतुरः दुःखितः उच्छ्वासरहितः हतस्मृतिः विनष्टगर्भस्थपूर्वस्मृतिः तिः कृच्छ्रेण तिर्य
क्तेन निष्क्रामति २३ असृजा लोहितेन दिग्धो लिप्तो भुवि पतितः विष्ठाभूः कृमिरिव चेष्टते ज्ञाने गर्भवासकालिके ज्ञाने गते सति विपरीतां ग

तस्मादहं विकलविक्लव उद्धरिष्य आत्मानमाशु तमसः सुहृदात्मनैव भूयो यथा व्यसनमेतदनेकरंध्रं मा मे भविष्यदुपसादितवि
ष्णुपादः २१ कपिलउवाच एवं कृतमतिर्गर्भे दशमास्यः स्तुवन्नृषिः सद्यः क्षिपत्यवाचीनं प्रसूत्यै सूतिमारुतः २२ तेनावसृष्टः स
हसा कृत्वावाक्शिर आतुरः विनिष्क्रामति कृच्छ्रेण निरुच्छ्वासो हतस्मृतिः २३ पतितो भुव्यसृङ्मिश्रो विष्ठाभूरिव चेष्टते रोरूयति
गते ज्ञाने विपरीतां गतिं गतः परच्छंदमविदुषा पुष्यमाणो जनेन सः अनभिप्रेतमापन्नः प्रत्याख्यातुमनीश्वरः २५ शायितोऽशुचि
पर्यंके जंतुः स्वेदजदूषिते नेशः कंडूयनेंगानामासनोत्थानचेष्टने २६ तुदंत्यामत्वचं दंशा मशका मत्कुणादयः रुदंतं विगतज्ञा
नं कृमयः कृमिकं यथा २७ इत्येवं शैशवं भुक्त्वा दुःखं पौगंडमेव च अलब्धाभीप्सितोऽज्ञानादिद्धमन्युः शुचार्पितः २८॥

तिं प्राप्तः रोरूयति रोरूयते भृशं रोदिति २४ परस्य शिशोः छंदमभिप्रायमविदुषा जनेन सः शिशुः पुष्यमाणः अनभिप्रेतं स्तन्यार्थे रोदने उदरव्यथां परि
कल्प्य पाययित्वा तां निवारयामिति उदरव्यथया रोदिति यमानस्तन्यादिकं चापन्नः प्राप्तः २५ जंतवः दंशकमत्कुणादयः स्वेदजाः तैर्दूषिते अशुचिपर्य
के शायितः शयनं कारितः अंगानां कंडूयने आसनादौ च नेशः असमर्थः रोरूयती त्यनुषंगः २६ आमा कोमला त्वक् यस्य तं दंशाः दंशनस्वभावाः मत्कु
णादयः विगतं गर्भज्ञानं यस्य तं तुदंति व्यथयंति यथा कृमिं २७ शैशवं पंचवर्षपरिमितं वयः शिशुत्वे तत्र दुःखं तत्ततः पौगंडं यौवनात्प्रागवस्थात दुःखं
च भुक्त्वा प्रियं संकरोतीत्युत्तरत्रान्वयः पौगंडदुःखमाह अलब्धमभीप्सितं येन इद्धमज्ञानान्मन्युः मन्युः क्रोधो यस्य सः शुचार्पितः व्याप्तः शोकं प्राप्तः

तो॰३ प्रकारे२

एवं स्वदेहमात्रे यज्ज्ञानं तद्रूपं भगवत्तत्त्वं मदीयप्रकारं स्मरन्नस्य प्रत्युपकृतिमाह येनेति हे ईश भवादृशेन तत्त्वस्वभावेन निरुपमेन नाथ पुरुदयेन निरति
शयकृपेण ईदृशीं मनुजत्व्यादवे मास्य दशमासपरिमितो सौ जीवः ईदृशीं गतिं विवेकं सङ्ग्राहितः स दीननाथो भगवान्स्वेनैव ... एतं तु प्रत्युपकृतिमञ्जलि
विना को नाम उपमानं तस्यास्मि कुर्यादित्यर्थः १९ एवं भगवद्विवेकादिसम्पत्तिं स्वस्य मदोपकर्तृत्वं चोक्त्वा इमामेव भगवतो विवेकादिसंपत्तिं विवे
किजननिदर्शनेन स्वस्मिन्नपि प्रार्थयते पश्यतीति शारीरके शारीरः परमपुरुषः तं सप्तवधिं परमपुरुषाधिष्ठितं ब्रह्मण्डं इति यावत् त
स्मिन्स्वदेहे स्वस्य जीवस्य देहे जीवः कर्मायत्त इत्यर्थः अयं परः शारीरो हि सप्तवधिः सप्त च ता वेष्टितं ... अशरीरो शमदमादिशील
जीवः योगीति यावत् यत्सृष्टयाय ... सयायेन ... धिषणया उपासनात्मिकया बुद्ध्या तं ईश्वरं ... ततः स दृष्ट्या कल्पितमेतिवा

येनेदृशीं गतिमसौ दशमास्य ईश संग्राहितः पुरुदयेन भवादृशेन स्वेनैव तुष्यतु कृतेन स दीननाथः को नाम तत्प्र
ति विनाञ्जलिमस्य कुर्यात् १९ पश्यत्ययं धिषणया ननु सप्तवध्रिः शारीरके दमशरीर्यपरः स्वदेहे यत्सृष्टया
सं तमहं पुरुषं पुराणं पश्ये बहिर्हृदि च चैत्यमिव प्रतीतं १९ सोऽहं वसन्नपि विभो बहुदुःखवासं गर्भान्न निर्जिग
मिषे बहिरन्धकूपे यत्रोपयातमुपसर्पति देवमाया मिथ्या मतिर्यदनु संसृतिचक्रमेतत् २० ॥

अनेन तिरश्चां यथा पासनाति ... इति शपि परमपुरुषप्रसादे वेत्युक्तं यं पश्यति साक्षात्कु ... रोतीति तं चैतं योगपरिशुद्धचित्तया
... पराणं पुरुषं स्वदमशरीरी ... अपि बहिर्हृदि च प्रतीतं प्रतीतिविषयं यत्सृष्टया धिषणया पश्यामि साक्षात्करोमीत्य
र्थः १९ किं विशेषेणाप्युपासनातो मत्साक्षात्कारे ... प्रार्थयसे यथा सर्वगर्भो लिङ्गत्यग्न्यादि धर्मेन ... गर्भान्निर्गत
स्यानर्थं ... निवेदयन्नुपसंहरति सोऽहमिति हे विभो बहुदुःखवासो वसन्नपि ... तस्माद्गर्भ प्रतिवस
... सोऽहं गर्भाद्बहिर्न निर्जिगमिषे निर्गन्तुमिच्छामि कुतः यत्र गर्भाद्बहिः रथकूपे अन्धकूपवत्स्वपरयाथात्म्यज्ञाननिरोधायके गार्हे
उपयातं उपगतं देवस्य भगवतः संबन्धिनी माया देवी ... विधा दे... भि मानस्व तत्राहं तां अभिमानकारिणी माया अस
... यस्याः मायाया अनु पश्चात् मिथ्या मतिः देहाद्यभिमानः स्वरूपमिथ्याभिमानः तन्मूलकं सुखदुःखानुभव ... जन्मादि

स्त्रीरूपायाम्ममायाया बलं मे दृष्ट्वा तत्त्वरूपमात्मानं पश्य पश्य यास्त्री केवलं भ्रूविक्षेपेणैव दिशां जयिनः पुरुषान्स्वाधीनान्करोति ३७ अतः योगस्य परं पारं मोक्षं भक्तियोगफलं मत्पदमित्यर्थः आरोढुमिच्छुः मत्सेवया प्रतिलब्ध आत्मबोधः प्रकाशो विवेकलक्षणो यस्य सः प्रमदासु कदाचिदपि सङ्गं न कुर्यात् याः प्रमदा अस्य मुमुक्षोर्निरयद्वारं नरकद्वारं वदन्ति अतस्तासु सङ्गं न कुर्यादित्यर्थः ३८ योषिन्मायाः शनैः शुश्रूषादिव्याजेन देवेन भगवता निर्मिता या योषित् मायारूपा उपयाति तां योषितं आत्मनो मृत्युमीक्षेत अर्थकरीमिति तृणैरावृतं कूपमिव ३९ एवं मुमुक्षूणां पुरुषाणां स्त्रीप्रसङ्गो न कार्य इत्युक्तं अथ मुमुक्षोः स्त्रिया अपि पुरुषसङ्गो न कार्य इत्याह यामिति द्वाभ्यां अयमात्मा अस्त्री सङ्गादन्तकाले स्त्रियमेव ध्यायन् यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेवरं इत्युक्तेः स्त्रीत्वं प्राप्तः स्त्रीतिमन्यमानः ऋषभं वाचरन्तीं मद्रूपां स्त्रियमित्यर्थः यं मायामोह

बलं मे पश्य मायायाः स्त्रीमय्या जयिनो दिशां या करोति पदाक्रान्तान्भ्रूविजृम्भेण केवलं ३७ सङ्गं न कुर्यात्प्रमदासु जातु योगस्य पारं परमारुरुक्षुः मत्सेवया प्रतिलब्धात्मलाभो वदन्ति या निरयद्वारमस्य ३८ योपयाति शनैर्माया योषिद्देवविनिर्मिता तामीक्षेतात्मनो मृत्युं तृणैः कूपमिवावृतं ३९ यां मन्यते पतिं मोहान्मन्मायामृषभायतीं स्त्रीत्वं स्त्रीसङ्गतः प्राप्तो वित्तापत्यगृहप्रदं ४० तामात्मनो विजानीयात्पत्यपत्यगृहात्मकं दैवोपसादितं मृत्युं मृगयोर्गायनं यथा ४१ देहेन जीवभूतेन लोकाल्लोकमनुव्रजन् भुञ्जान ए

कृत्वादि प्रदर्श्यतीति मन्यते पत्युरपि मोहकत्वादेव मायात्वम् तं वित्ताद्याश्रयं पतिमात्मनो दैवेनोपसादितं मृत्युं जानीयात् यथा मृगयोर्व्याधस्य गायनं गीतं मृगस्य मृत्युकरं तद्वदित्यर्थः ४० ४१ एवं गर्भजन्मादियोगतां लाः क्लेशा उक्ताः जरामरणादिक्लेशस्तु पूर्वस्मिन्नेवाध्याये प्रपञ्चिताः तत्र नित्यस्यात्मनः कथं जन्ममरणसंभवः संभवे वा लयः स्वतःपि विभोगेन सर्वकर्मक्षये सति कथं शरीरादिशरीरान्तरगमनं तत्संभवे पि विभोक्तृत्वे भक्तस्येतो संपरिधन्को गच्छति उनिविश्यगच्छतीति शङ्कां निराकुर्वन् वैराग्यसिध्यर्थं देहस्यानात्मत्वप्रतिपादनाय तदेकदेशस्येन्द्रियस्यात्मत्वमाह देहेनेति च तुर्भिः देहेन जीवः जीवभूतेन जीवाभिन्नत्वेनाभिमतेन देहेन भूतेन्द्रियमनआत्मकेन सूक्ष्मपरिणामरूपास्थूलाच्छरीराल्लोकान्तरं तत्परिणामरूपं देहान्तरमनुव्रजन्कर्माणि प्राक्तनस्थूलशरीरनिष्पादितकर्मफलानि

राम
१४८

॥३॥११२

त

यौवनं तु ऽस्य माह सहेति देहेन सह वर्धमानेनाभिमानेन मन्युना चात्मनोऽन्ताय नाशाय कामिषु विग्रहं विरोधं करोति स्वयं कामी सन् कामिष्वविरोधिषु विग्रहं करोतीत्यर्थः २९ यौवनावस्थामेव प्रपञ्चयति भूतैरिति तद्देवाद्यो देहेऽहमविद्याकर्मबन्धनः अविद्याकर्मसंबन्धात् तेषां क्लेशं ददाति ३० कर्मान्याविद्याबन्धः ददत्क्लेशं बद्धमनुयाति पुनः पुनरनुवर्तते ३१ असद्भिः शिश्नोदराभिमानिभिः आस्थितः तेषां पन्थानं सन्मार्गे स्थितः शिश्नोदरार्थं कृतप्रयत्नः यदि रमते वैषयिकेषु सुखेषु तर्हि पूर्ववत्तमः यातनादेहमारभ्यमाणादिरवीचिप्रकारेण नरकं प्रविशति ३२ असत्संगं निन्दति सत्यमिति त्रिभिः यत्संगाद्येषां मध्ये सत्यादयः क्षयं याति नाशं याति ३३ अशान्ते

सहदेहेन मानेन वर्धमानेन मन्युना करोति विग्रहं कामी कामीष्वन्ताय चात्मनः २९ भूतैः पञ्चभिरारब्धे देहे देह्यबुधोऽसकृत् अहं ममेत्यसद्ग्राहः करोति कुमतिर्मतिं तदर्थं कुरुते कर्म यद्बद्धो याति संसृतिं योऽनुयाति ददत्क्लेशमविद्याकर्मबन्धनः ३१ यद्यसद्भिः पथि पुनः शिश्नोदरकृतोद्यमैः आस्थितो रमते जन्तुस्तमो विशति पूर्ववत् ३२ सत्यं शौचं दया मौनं बुद्धिः श्रीर्ह्रीर्यशः क्षमा शमो दमो भगश्चेति यत्संगाद्याति संक्षयं ३३ तेष्वशान्तेषु मूढेषु खण्डितात्मस्वसाधुषु संगं न कुर्याच्छोच्येषु योषित्क्रीडामृगेषु च ३४ न तथास्य भवेन्मोहो बन्धश्चान्यप्रसंगतः योषित्संगाद्यथा पुंसो यथा तत्संगिसंगतः ३५ प्रजापतिः स्वां दुहितरं दृष्ट्वा तद्रूपधर्षितः रोहिद्भूतां सोऽन्वधावदृक्षरूपी हतत्रपः ३६ तत्सृष्टसृष्टसृष्टेषु को न्वखण्डितधीः पुमान् ऋषिं नारायणमृते योषिन्मय्येह मायया ३७॥

तेषु विषयवैतृष्ण्यादिहीनेषु खण्डितात्मसु देहाद्यभिमानिषु योषितां क्रीडामृगवद्वश्येषु अत एव शोच्येषु विवेकिभिरिति शेषः तेषु असाधुषु संगं न कुर्यात् ३४ योषितां संगाद्योषित्संगिसंगाद्यथा मोहो बन्धश्च भवेत् तथान्यप्रसंगतो मोहादिर्न भवेत् ३५ योषित्संगस्यानर्थहेतुतां प्रपञ्चयति प्रजापतिर्ब्रह्मा स्वां दुहितरं सरस्वतीं दृष्ट्वा दुहितुः रूपेण शरीरसौन्दर्येण धर्षितः मोहितः रोहिद्भूतां मृगीभूतां तां ऋक्षरूपी स्वयमपि मृगरूपी सन् अगमत् मोहितः लज्जां त्यक्त्वा अन्वधावदित्यर्थः ३६ तेन तत्र सृष्टाः मरीच्यादयः तैः सृष्टाः कश्यपादयः तैरपि सृष्टा देवमनुष्यादयः तेषु मध्ये कः पुमान् नारायणमृषिं विना योषिन्मय्या मायया अखण्डितधीः स्यान्न कोऽपि सर्वेऽपि खण्डितधीरेव भवन्तीत्यर्थः मोहं कृत्वा ... योषिता ... योके

भा १ पा १

तद्दृश्यादिविनाशस्वरूपमुपपादितं अथ देहादेर्द्वयस्य साक्षात्कृतमिति विनाशयोगिद्रष्टृदेहस्यानात्मत्वं वक्तुं तदेकदेशस्य दृष्टान्तेन साधयति चक्षुरिन्द्रियाधिष्ठानं गोलकं गत्वा गच्छतीत्यादित्यश्च चक्षुर्भूत्वा अक्षिणी प्राविशदिति श्रुतेः इहापि निरभिधेयत्वाच्चक्षुर्गोलकयोर्दर्शनायोग्यता यथा तथैव चक्षुरिन्द्रियस्यापि दर्शनायोग्यता सिद्धा काचतिमिरादि पटलादेश्चक्षुर्गोलकभावेऽदर्शनाभावादिन्द्रियगोलकस्यानुदृष्टत्वं एवं शोभनदृष्टेश्च पिण्डरूपस्यापि नानात्वेनापि तत्तत्स्वरूपतोऽलिनमपि च चक्षुर्नेयपश्यतीति च चक्षुषो दृष्टृत्वायोग्यताभवति तस्माच्चेतनस्यैव द्रष्टृत्वं द्रष्टुत्वायोग्यतानयोरिति पाठान्तरं तत्र द्रष्टुश्चेतनस्यैव द्रष्टृतादृष्टृत्वमनयोश्चक्षुर्द्रष्टोः योग्यतासंबन्धयोग्यताकारणत्वकारणत्वरूपसंबन्धयोग्यतेत्यर्थः एवं च यथा च चक्षुषः अनात्मत्वं तथा देहस्याप्यनात्मत्वं सिद्धं अत्र तल्लिरोधोस्य मरणमाविर्भावस्तु संभव इत्यस्यान्तरं द्रव्योपलब्धिस्थानस्य द्रव्ये योग्यता यथा तथैव

यथाक्षोर्दृश्यावयवदर्शनेयोग्यतायथा तथैव चक्षुषो द्रष्टुर्द्रष्टृत्वमयोग्यतानयोः ४५ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

चक्षुषो द्रष्टुर्द्रष्टृत्वायोग्यतानयोरिति कश्चिदधिकापपाठे तच्चैवं केचिद्व्याचक्षते द्रव्योपलब्धिस्थानस्य नेत्रगोलकादेर्द्रव्ये यथा यां रूपादिदर्शनेकाचकामलादिदोषेण यथायोग्यताभवति तथैव चक्षुष इन्द्रियस्यायोग्यता अनयोः स्थानेच चक्षुषोर्यथायोग्यतान्तथैव द्रष्टृत्वायोग्यतेति निरोधाविर्भावयोरेव जन्ममरणत्वदृष्टान्त इति तत्र स्थानेच चक्षुषो रिव द्रष्टुर्जीवस्याप्यदृष्टत्वकस्य तर्हि द्रष्टृत्वमिति दृष्टत्वमाह तच्च नचेतद्द्रष्टुर्द्रष्टत्वमितिदृष्टान्तोप्यसंगतः नचात नदृष्टोतदाष्टीन्तिकगतं किंचित्साधर्म्यमुच्यते तस्मादेवं व्याख्येयं दितल्लिरोध एव मरणं तर्हि तस्यावस्थावस्थितस्य देहस्यो पलंभः स्यात्तत्राह द्रव्येति द्रष्टुः शोभनदृष्टेर्जीवस्य चक्षुषश्चानयोर्द्रव्योपलब्धिस्थानस्य प्रदृष्टियोग्यादिभूतोपलब्धिस्थानस्य देहस्य द्रव्ये यायोग्यता पार्थिवाप्यतेजसादिद्रव्यदर्शनविषयतास्वभावसिद्धि यथा तथा तस्यापि शरीरे अनयोश्चक्षुरात्मनोर्द्रष्टृत्वायोग्यता सत्त्वात्तस्य दर्शनविषयत्वयोग्यतानास्तीत्यर्थः इति ४५ ॥

तुल्यत्वं देहेन लोकालोकांतरगमनं जायते इत्यत्राह सद्भो यो भूतेंद्रियमनोमय आस्पदं देहस्यानुगो जीवः आत्मस्वरूपं गतो देहेन सदृशो नेत्य
र्थः यदा [illegible] जीवत्वेनाभिमतः भूतेंद्रियात्मको देहः आ स्यात्मनो नुगो हीति श्रुतिस्मृतिप्रसिद्धिं योलयति श्रुतिस्तावत् संवन्धो भाऽत्मा कायः
(उरुणवचरो भवतीत्यादिकाः स्मृतिरपि मनःषष्ठानींद्रियाणि प्रकृतिस्थानि कर्षति शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः गृहीत्वैतानि
संयातीत्यादिका अत्राविरतं कर्माणि कुर्वतो जीवस्य नैव कर्मणामसमाप्तिकृता अभ्युपगतप्रारब्धानां भोगेन विनाशे प्रकृतस्य पगतप्रारब्धाना
मविनष्टत्वात् नन्वेवमपि कर्मणि त्यस्यात्मनो जन्ममरणे संभवतः इत्यत्राह तल्लिरोधः इति लिसिन सूक्ष्मे शरीरे स्थूलस्य निरोधः सूक्ष्मः सूक्ष्म
वस्या दृश्यावस्थापरित्यज्य सूक्ष्मा प्राप्तिरेवास्य जीवस्य मरणमाविर्भाव उन्नः सूक्ष्मावस्थाप्रहाणे न स्थूलावस्थाप्राप्तिरेवास्य संभवः देहहोरेकेउत्प
ति [illegible] प्राणेवसतत्वमर्थः ४३ ननु देवो पपादयन् जन्ममरणास्वरूपमाह दृष्टमिति दृष्योपलब्धिस्थानस्य चक्षुरादिभिः तो पलब्धि [illegible] स्थानस्य
देहस्य यदा द्रव्येषु योग्यता पार्थिवाप्यतेजसादिद्रव्यांश निरीक्षणयोग्यता सूक्ष्मावस्थेत्यर्थः यस्यः संभवति तदेवास्य मरणं चक्षुरादिद्रष्य

जीवो ऽनुस्यानुगो देहो भूतेंद्रियमनोमयः तन्निरोधो ऽस्य मरणं [illegible] माविर्भावस्तु संभवः ४३ दृष्योपलब्धिस्थानस्यादृ
ष्टद्रव्येष्वयोग्यता यदा तत्तेनैवाथ मरणमाद्यत्वेनोत्पत्तिर्द्रव्यदर्शनं ४४ ॥ त्वेनज्ञायमाने देहस्यात्माभिमान विषयत्वात् तस्य द्रव्यांशनिरीक्षणा
योग्यतैव पुंसो मरणमित्यर्थः अहमनादृष्टयदर्शनमहमिति मिथाने नद्रव्यदर्शनमेव देहस्य उत्पत्तिः सैव पुंस उत्पत्तिरित्यर्थः अत्रेदमव
धेयं तदेतद्द्वयं नित्यं जगत्स्थावरं जंगमं प्रकृतिपुरुषं चैव विष्णुनादि उभाव पीत्याद्युक्तरीत्या प्रकृति पुरुषयो उभयोरपि नित्यत्वान्नो
त्पत्तिविनाशौ यद्यपि संभवतः तथाप्यात्मनो ऽपरिणामित्वात् सत्तादुत्पत्यादि संभवः केवलं प्रकृति विकारासंभवत्येव उत्पत्यादि प्रकृतेस्तु
सांख्य उत्पत्यादयः संभवंत्येव न चैवं तस्यानित्यताशंका द्रव्यस्यानित्यत्वात् उत्पत्तिविनाशादयो हि सतो द्रव्यस्यावस्था विशेषाः तत्तु
अभ्युपगमिनि हि द्रव्याणि संत्येव स्तनाविशेष [illegible] पूर्वकानि पराद्युत्पत्तेन्ते सत्कार्यवादिना चेतदेवोपलभ्यते तदिदं तत्संतानविशेषा
तिरेके एकान्यपेक्षया तेरपतीयते कारकव्यापारनामुपजात स्य द्रव्यस्य तद्विरोधावस्थान्तरप्राप्तिर्विनाश इत्युच्यते मृद्द्रव्यस्य पिंडत्वघटत्वक
पालत्वचूर्णत्वादिवत्परिणामि द्रव्यस्या [illegible] द्रव्यस्योत्तरावस्थाप्राप्तिर्विनाशः सैव तद्द्रव्यस्य उत्प
परिणामपरंपराः दर्शनीयां तत्र चूर्णावस्थावस्था

ये धीराः कामार्थहेतवे स्वधर्मान्दुह्यंति फलानि न प्रार्थयंति ४

पं॰२

श्रीभा॰ स्कं॰ ३ टी॰ १५०

कल्पांतस्थायित्वं ब्रह्मादिलोकगतानां क्षयिफलत्वमुक्तं अथ केवलं स्वादिकातिमात्यानां लोकानां क्षयिष्णुत्वमाह यदा कल्पांतेऽनंतासनः शे
षासनो भगवान् अदीश्वः शेषः स एव शय्या तस्यां शेते तदा ये केवलं गृहमेधिनां प्राप्या लोकाः लयं ते नाशं यांति ४ अथ परब्रह्मोपास
कानां गतिं रहितान्युक्त्वा निभगवति समर्पितानि कर्माणि स्ववर्णाश्रमोचितकर्माणि ये तु प्रशांतात्मानः मदमादि संपन्नाः शुद्धेनसः
स्वधर्मानुष्ठानेन निर्मलांतःकरणाः ५ निवृत्तिधर्मा भगवद्गुणश्रवणकीर्तनादयः तेषु निरताः सत्त्वेन त्यागोऽपि द्विविधस्तद्धा
द्विविधः संप्रकीर्तितः यस्तु कर्मफलत्यागः स त्यागः परिकीर्तितः इत्युक्तसात्त्विकत्यागबलेन स्वधर्मत्वेन पंत्र मदाद्यहंतादिनाय
धा स्वधर्मत्वेन सत्त्वेन इत्युक्ते स्वधर्मजन्येनेत्यर्थः परिशुद्धेन चेतसा भगवत्स्तवनेन चेतसा अहंकारममकाररहिताः ६ ते सूर्यद्वारेण
सूर्यद्वारेणेत्यर्चिरादिनामलदांतं अर्चिरहः सितपक्षोत्तरायणनाम संवत्सरदेवविद्युद्वरुणेंद्राप्रजापत्यंतं परं
गच्छंतीति अभवनं तीर्थ तत्त्वसत्त्वनाथमनुविशिनष्टि अस्य विश्वस्य परावरेशं धर्मोत्पादकारणं परमपुरुषं संकल्पादेव द्विविधो मोक्ष

यदा चार्चिरादिमार्गेण प्राप्य ब्रह्मलोकं तेन सह नारायणे पुरे तदा लोकालयं यांति न पुनरेते गृहमेधिनां ४ ये स्वधर्मान्दुह्यंति धीराः कामार्थहेतवे
निःसंगा न्यस्तकर्माणः प्रशांताः शुद्धचेतसः ५ निवृत्तिधर्मनिरताः निर्ममा निरहंकृताः स्वधर्माख्येन सत्त्वेन परिशुद्धेन चेतसा
६ सूर्यद्वारेण ते यांति पुरुषं विश्वतोमुखं परावरेशं प्रकृतिमस्योत्पत्त्यंतभावनं ७ द्विपरार्धावसाने यः प्रलयो ब्रह्मणस्तु ते तावद

अस्य विश्वस्योत्पत्तिस्थितिसंहारमभावयति करोतीति तथा विश्वतोमुखं सर्वज्ञं परब्रह्मस्वादयोऽवरे यस्मात् तच्चासावीश्वरश्चेति तेन विशेष
णजालेन स्वसंकल्पमात्रेण जगदुदयविभवलयमोक्षलीलत्वात् लीलारतिप्रयत्नविषयान् सम्भवात् स्वपदप्राप्यं नावतीर्यते सम इत्युक्तं न
वृत्तिप्रतिपादितं चेतस्सु रक्ता न अत्र सूर्यद्वारेणेत्यनेन सूर्यद्वारेण तेविरजामयं यांति यत्प्राप्नुवंति पुरुषो यस्मिन्नव्ययात्मेति श्रुत्यर्थ उक्तः ७ एवंभूत
दिरर्चिरादिमार्गेणोपगतं अथ योगिमात्रेण चतुर्दशलोकगतानामपि ब्रह्मलोकसहमहाप्रलयपर्यंतं मुक्तिरुच्यते द्विपरार्धसादिना ज्ञेय
देवमार्गेण योगियानस्तु मध्यमः दक्षिणः पितृयानस्तु तत्रत्यानां गावोऽपि केचिद्भुज्यंते द्विपरार्धावसानः यः द्वे वर्षे रत्नो रविताननं.
नो यस्मिन् द्विपरार्धावसानरूपः यः ब्रह्मणश्चतुर्मुखस्य प्रलयः तावत्तत्रस्वधिपरस्य परमात्मनः परिचिंतकाः योगिनः लोकब्रह्मलोक

साधनात्मकं
भाग॰ ३ भगवदुपासनं ४

उपसंहरति तस्मादिति जन्ममरणादिभाजो देहस्य नात्मनः । अतः संत्रासः देहप्रयुक्तागामिजन्ममरणादिदुःखविषयस्त्रासः न कार्यः कार्पण्यं दे-
हं मंस्यतीत्येव जन्ममरणादिस्वनिमित्तः संतोषश्च न कार्यः किंतु धीरः मुक्तसंगः सन् जीवगतिं त्रासात्मकप्रकृतिविलक्षणात्मस्वरूपं बुद्ध्वा मुक्तसं-
गः देहपुत्रकलत्रादिष्वनासक्तः इह लोके चरेत् ४६ तत्र सम्यग्दर्शनया सम्यगबाधितं दर्शनं यस्यास्तया ज्ञानं यस्या इति विविक्तात्मया धि-
या ज्ञानं वैराग्यं कामानभिष्वंगः सच सा परब्रह्मप्रियेति रिक्तवस्तुवेत्त्यस्य तस्या योगयुक्तया धिया विवेकाद्युक्तया भगवदुपासनात्मिकया
बुद्ध्या मायाविरचिते अस्मिन् लोके कलेवरं न्यस्य त्यक्त्वा कलेवरे अनासक्तिमुक्तश्चेत्यर्थः चरेन्निवृत्तिधर्ममिति दोषा ४७ इति टीकायां एकत्रिंशः
एवमतीताध्यायद्वये वैराग्यसिद्ध्यर्थं गर्भजन्मजरामरणादिक्लेशाः अनिष्टादिकारिणां गतिश्चोपपादिता अथ इष्टादिकारिणां ब्रह्म-

तस्मान्न कार्यः संत्रासो न कार्पण्यं न संभ्रमः बुद्ध्वा जीवगतिं धीरो मुक्तसंगश्चरेदिह ४६ सम्यग्दर्शनया बुद्ध्या योगवैराग्ययुक्तया
मायाविरचिते लोके चरेन्न्यस्य कलेवरं ४७ इति श्रीभागवते महापुराणे तृतीयस्कंधे जीवगतिनिरूपणं एकत्रिंशः ३१ श्रीक-
पिल उ॰ अथ यो गृहमेधीयान् धर्मानेवावसन् गृहे काममर्थं च धर्मांश्च दोग्धि भूयः पिपर्ति तान् १ स चापि भगवद्धर्मात्काममूढः
पराङ्मुखः यजते क्रतुभिर्देवान् पितॄंश्च श्रद्धयान्वितः २ तच्छ्रद्धयाक्रान्तमतिः पितृदेवव्रतः पुमान् गत्वा चान्द्रमसं लोकं सोमपाः

का॰ १ एवं सनैः चरतीत्याह तत्रेष्टादिकारिणां गतिमाह अथेति चतुर्भिः अथ यो गृहमेधीयान् गृहमेधोचितान्
२ निवृत्तिधर्म भूत्वा धर्मानेवानुतिष्ठन्निति शेषः एवकारेण निवृत्तिः धर्मानावसन् कुर्वन्निति वा काममर्थं च दोग्धि प्रचरयति लभत इति यावत् अयं
तान् धर्मान् पिपर्ति पूरयति धर्माननुतिष्ठन् कामार्थौ लभत इत्यर्थः १ एवकारेण सूचितमर्थमाह स इति स चापि केवलं गृहमेधीयधर्म- [illegible]
कामेन विषयासंगेन मूढः अतएव भगवद्धर्मात् पराङ्मुखः प्रतिनिवृत्तः श्रद्धया प्रतिनिवृत्तिधर्मेष्वप्युक्तः [illegible]
[illegible] देवान् पितॄंश्च यजते तच्छ्रद्धया पितृदेवयजनश्रद्धया आक्रान्ता मतिर्यस्य पितृदेवार्थं व्रतं नियमो यस्य सः पुनः
सोमपा जीवमानं चान्द्रमसं लोकं गत्वा धर्मराज्यपरपक्षे क्षीणे एव पुनरायाति
[illegible] पुनरेष्यत्यायास्यति ३ ॥

व

चान्वितः २

२९२

भा॰
तृ॰ टी॰
१५१

आद्य इति चतुर्भिः। स्थिरचराणामाद्यः कारणभूतः स्रष्टेत्यर्थः। सपुरुषः समष्टिपुरुषः वेदगर्भो ब्रह्मापि सनत्कुमारप्रभृतिभिर्मरीच्यादिभिः ऋषिभि-
स्तथा योगप्रवर्तकैरन्यैश्च सिद्धैः सह भेददृष्टिरब्रह्मात्मकत्वेनावस्थानं तया अभिमानः शरीरात्माभिमानस्तेन निःसंगेनापि कर्मणा सगुणं साभ्याव-
स्थायत्रगुणत्रयविशिष्टं ब्रह्म स्वस्मात्किंचिद्विशिष्टं पुरुषं परमात्मानं प्राप्नुयात् स्वस्मात्किंचिद्विशिष्टत्वेनाभवेत् १३ कुतः कर्तृत्वाद्भेददृष्ट्याभि-
मानपूर्वकं निःसंगं कर्मकर्तृत्वात् स एवं स्वस्मात्किंचिद्विशिष्टं ब्रह्माणि संसर्गं प्राप्य पुनरीश्वरमूर्तिना कालेन तदेव तत्पदं स्यामिति [illegible] बहुभ-
वनसंकल्पदशायां गुणव्यतिकरे गुणवैषम्ये जाते सति पुनः सृष्टिद्वारायामित्यर्थः यथापूर्वं [illegible] पूर्ववत्प्रजायते १४ पारमेष्ठ्यमैश्वर्यं

आद्यः स्थिरचराणां यो वेदगर्भः सहर्षिभिः योगेश्वरैः कुमाराद्यैः सिद्धैर्योगप्रवर्तकैः १२ भेददृष्ट्याभिमानेन निःसंगेनापि
कर्मणा कर्तृत्वात्सगुणं ब्रह्म पुरुषं पुरुषर्षभ १३ स संसृत्य पुनः काले कालेनेश्वरमूर्तिना जाते गुणव्यतिकरे यथापू-
र्वं प्रजायते १४ ऐश्वर्यं पारमेष्ठ्यं च तेपि धर्मविनिर्मितं निषेव्य पुनरायांति गुणव्यतिकरे सति १५ ये त्विहासक्तमनसः क-
र्मसु श्रद्धयान्विताः कुर्वंत्यप्रतिषिद्धानि नित्यान्यपि च कृत्स्नशः १६ रजसा कुंठमनसः कामात्मानोजितेंद्रियाः पितॄन्यजंत्य-
नुदिनं गृहेष्वभिरताशयाः १७ त्रैवर्गिकास्ते पुरुषा विमुखा हरिमेधसः कथायां कथनीयोरुविक्रमस्य मधुद्विषः १८ नूनं दैवेन विहता ये
चाच्युतकथासुधां हित्वा शृण्वंत्यसद्गाथाः पुरीषमिव विड्भुजः १९ ॥

कर्मैव यज्ञमेव [illegible] तदपि निषेव्यानंतरं पुनः परमात्मनि लीनं गुणव्यतिकरे सत्यायांतीत्यर्थः १५ एवं निष्कामकर्मणामपि साभिमा-
नानां पुनः संसार उक्तः [illegible] साभिमानाः सकामकर्माणस्तु संसरंत्येवेति किं वक्तव्यमिति वदंस्तानाह ये त्विति चतुर्भिः इह
पारमेष्ठ्यैश्वर्यादिषु असक्तचित्तास्तत्साधनेषु कर्मसु तत्पराः श्रद्धयायुक्ता अप्रतिषिद्धानि काम्यानि नित्यान्यपि च कर्माणि स्वर्गाद्यर्थितया कुर्वंति
१६ रजोगुणेन विह्वलमनसः कामासक्तचित्ताः अत एवाजितेंद्रियास्तत एव गृहेष्वासक्तांतःकरणाः अनुदिनं पितॄन्यजंति १७ कथनीय-
निरतिशयकीर्तेर्हरिमेधसः संसृतिनाशकोपासनात्मकमेधा विषयस्य मधुद्विषो भगवतः कथायां विमुखाः संतो ये त्रैवर्गिकाः धर्मार्थ-
कामपरायणास्ते १८ ये चाच्युतकथासुधां हित्वा विड्भुजः सूकरादयः पुरीषमिवा [illegible] असद्गाथाः शृण्वंति ते च नूनं दैवेन विहताः १९

हिरण्यगर्भमनुष्य
विष्णुस्थितिदशा
दीनितापि ५

विक्रमस्य ५

राम
१५१

250

स्वांभइति स्वारीनि वियदादीनि पंचमहाभूतानि मनश्चेन्द्रियाणि चार्थो स्वपाठादय भूतादिस्तामसाहंकारः एवमादिभिः परिवृतं उक्तं ब्रह्माण्डं स हि
र्षः स हर्षेभिरुत्तरोत्तरं पंचसप्तका द्विगुणं ... अगृहस्यात्मापरी रस्थूल चिद्वि विधि २४ सर्वः गुणत्रयस्यात्मेति वा स भगवान्यदिमदाऽव्याकृतो विशतीनाम
न्यविभागात्मदेनिरतिशायसुक्ष्म चिदविशिष्टत्वाव स्थांप्रविशति प्राप्नोति तदा परः इन्द्रादिभ्यउत्कृष्टः स्वयं भवंभेसगवे परार्द्धकालमनुभूय नष्ट
यतिरणेव रूपं यातीति विभक्ति विपरिणामेनोक्तस्त्वान्वयः ९ एवंमदायोगिनः भगवंतं हिरण्यगर्भमनुप्रविष्टाः माप्तास्तेपितत्र जितमतस्य
तसः जितप्राणेन्द्रियाः विरागाः आप्यपरं ब्रह्म स्वतिरिक्तार्णे माघ ... स्वयंवेतस्यभक्ताः विगतदेहात्माभिमानस्वतन्त्रात्माभिमानात्ते
नैवसाकं ब्रह्मणा सह प्रयान्ति सर्वे तत्र पक्षस्ततयोगणैस्वति ... हिरण्यगर्भ पुरा ... प्रविष्टस्पर मण्डमुत्तर पर्यंतिर्व्यनसन्यासयो
गाद्यलय ... सत्वास्ते ब्रह्मलोके तु परान्तकाले परामृता परिमुच्यन्ति सर्वे ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे परस्यान्ते कृतात्मानः प्र

स्वांभोजतानिल वियन्मन इन्द्रियार्थभूतादिभिः परिवृतं प्रतिसंजिहीर्षुः अव्याकृतं विशति यर्हि गुणत्रयात्मा कालं परार्द्धमनु
भूय परः स्वयंभूः ९ एवं परेत्य भगवन्तमनुप्रविष्टा ये योगिनो जितमरुन्मनसो विरागाः तेनैव साकममृतं पुरुषं पुराणं ब्रह्मप्र
धानमुपयान्त्यगताभिमानाः १० अथ तं सर्वभूतानां हृत्पद्मेषु कृतालयं श्रुतानुभावं शरणं व्रज भावेन भामिनि ११

विशति परं पदमित्यादिश्रुतिस्मृत्यर्थ उक्तः १० एवमत्रापरिनिष्पन्नभगवद्भक्तियोगानां केषांचिद्धिरण्यगर्भलोकप्राप्तिरुक्ता भगवद्भक्ति
निष्पादने भगवत्प्राप्तिरुक्ता अथापि त्वं पर भक्तियोगानामविलम्बेनाचिराद्गत्वा भगवंतं शरणभावेन मातापितृभ्रातादिवत्सुहृत्
सुहृदिसाधुक्तभावेन व्रज भजस्वेत्सोमः सपरिकरो भक्तियोग उक्तः अत्र तदंगम्भ सप्रागुणेत्युक्ता एवं चरमश्लोकोक्तरीत्या शरणेभगवा
भक्तियोगाविरोधीनि पापानि निरस्य भक्तियोगं निवर्तयतीति हृदयं ११ उपयान्तिगताभिमाना इति ब्रह्मलोकवासिनां मुक्तिर्देहात्माभिमानत्व
नेनाभिमानरहितानामेव भगवत्प्राप्तिरुक्ता अयथकेनचित्सुकृतविशेषेण ब्रह्मलोकं प्राप्ताः फलोसेनार्द्धे नरकं मार्गेणापि देहात्माभिमा
नाद्युक्ताश्चेत्तेपुनः संसरेयुरस्थेपुनः साभिमाना ते सर्वे तेति किमुवक्तव्यं ब्रह्मणापियदि साभिमानश्चेत्सोपि नरकादिभिः संसरेदि
त्याह ॥

भगवत्प्राप्तिर्पूर्वोक्तां स्वच्छंयंत्तदंगभूतां शरणागतिमाह अथेति

शेनृत्मात्मेन कापि जउं इत्यर्थः परंब्रह्मपरमात्मादिशब्दवाच्यः ज्ञानमात्रस्वरूपः परमपुरुषो भगवानेक एव दृश्यादिभिः पृथ आदिभिः पृथग्भावैः परस्परविलक्ष
णधर्मैः रैः बहुलेन प्रतीयमानो भगवानेक एव पृथिव्यादिपंचभूतसंघातात्मकदेवादिरूपभेदेन प्रतीयते ऽतः सर्वं जगदात्मकमित्यर्थः २६ ननु ज्ञातव्यत्वात् किमस्य भक्तियो
गस्य फलमित्यत आह एतावानिति योगिनां समग्रेण सांगेन भक्तियोगेनाभिमतोर्थः पुरुषार्थः युज्यते निरतिशयसुखरूपः परमपुरुषार्थः यदसंगत्वपा
क्ष त्वादिगुणाष्टकविशिष्टस्वरूपेण युक्तो भवति कृत्स्नशः कार्त्स्न्येन असंगतः प्रकृतिसंबंधराहित्यं चेत्येतावानेवाति दृष्टहृतिरिष्टप्राप्तिरेतत्स्म
क्तियोगफलमित्यर्थः २७ दृश्यादिभिरिति परमात्मनः पृथिव्यादिविशिष्टत्वमुक्तं जीवस्य पृथिव्यादिविशिष्टत्वे विरोधमाह ज्ञानमिति निर्गु
णं सत्वादिगुणरहितमेकं ज्ञानस्वरूपं ब्रह्म जीवः ब्रह्मणो दृश्यतिरहमिति जीवेपि कश्चिद् ब्रह्मशब्दप्रयोगात् पराचीनैः परस्यैव प्रकाशकैरिंद्रि

252 ज्ञानमात्रं परं ब्रह्म परमात्मेश्वरः पुमान् दृश्यादिभिः पृथग्भावैर्भगवानेक ईयते २६ एतावानेव योगेन समग्रेणेह योगिनः युज्यतेभि
मतो ह्यर्थो यदसंगस्तु कृत्स्नशः २७ ज्ञानमेकं पराचीनैरिंद्रियैर्ब्रह्म निर्गुणं अवभात्यर्थरूपेण भ्रांत्या शब्दादिधर्मिणा २८ यथा महा
नहंरूपस्त्रिवृत्पंचविधः स्वराट् एकादशविधस्तस्य वपुरंडं जगद्यतः २९ एतद्वै श्रद्धया भक्त्या योगाभ्यासेन नित्यशः समाहितात्मा
निःसंगो विरक्त्या परिपश्यति ३० इत्येतत्कथितं गुर्वि ज्ञानं तद्ब्रह्मदर्शनं येनानुबुध्यते तत्वं प्रकृतेः पुरुषस्य च ३१॥

येः शब्दादिधर्मिणा

का॥

र्थरूपेण शब्दादिधर्मेणौपादिपंचभूतात्मकदेहादिरूपेण भ्रांत्या ऽवभातिपरस्य सर्वविशिष्टस्यापि सर्वज्ञत्वान्न भ्रांतिः जीवस्य तु ज्ञानस्वरूपस्यत्वादे
रागरहितस्यस्थूलाकाशादिदेहाकारे भ्रांतिरित्यर्थः २८ परमप्रस्तुतं सर्वस्य ब्रह्मात्मकत्वमुपपादयति यथेति महान् महत्तत्वमहंरूपमहंकारः स्व
त्रिवृद् वैकारिकादिभेदेन त्रिधा वर्तमानः पुनश्च भूततन्मात्ररूपेण पंचविधः इंद्रियरूपेण एकादशविधः एतत्तत्वात्मकं यदंडं स्वराट् ब्रह्मा उच्यते उ सन्नेतस्यैव त
त्सर्वं जगद्वपुः शरीरं यथा यथावस्य परमार्थ इत्यर्थः २९ केनोपायेनायं सर्वात्मकत्वेन ब्रह्मसाक्षात्कार्यादित्येः ३० अध्यायस्यार्थं प्रतिपादितमर्थमुपसं
हरं सुखप्रतिपत्तये संक्षेपेणानुवदति इतीति गुर्वि पूज्ये इत्युक्तरीत्या एतत्कथितं किं तदित्यत आह येन प्रकृतेरचेतनायाः भूम्यादिलक्षणायाः भूमिरापो
नलो वायुरित्याद्युक्तायाः तथा अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे परामित्युक्तायाः जीवात्मकप्रकृतेः पुरुषस्य परमपुरुषस्य च तत्वं याथात्म्यं बुध्यते

स्यापि२

२१ अहरताद्दिति स्पष्टोर्थः २.

तेषां कां गतिरित्यत्राह अर्यम्णो दक्षिणेन पथा धूमादिमार्गेण पितृलोकं व्रजंति पितृलोकात्पुनः प्रजामनु पुत्रादिषु जायंते २०
ततो गर्भाधानादिश्मशानांतसंस्कारिणः पुनरिमं लोकं प्राप्य तत्र भोगेन क्षीणसुकृताः तत्र देवैः सद्य एव विभ्रंशिता उदया भोगो
येषां तेः हर्षाद्यैर्विवशाः कर्मवश्याः पुनरिमं लोकं प्रतिपतंति २१ एवं काम्यकर्मणां गतिमभिधाय ... तः प्रवृत्तिमार्गं वर्जयित्वा योगाद्यविकल्पाय श्रोतृत्वं
स्यति तस्मात्सकामकर्मणां गतेरेवंविधत्वात्त्वं सर्वभावेन येषां मदादिप्रियत्वात्मासुहृच्चेतसा युक्तः सर्वभावेन परमेष्ठिनं परमव्योमाधिपतिं भज यत्
तेतस्य ५ तं भजनीयसुखरास्पदं पदांबुजं यस्य भगवतो गुणाः ज्ञानशक्तिबलादयस्त एवाश्रयो विषयो यस्यास्तया स्वतत्त्वगुणादिविषयया इत्यर्थः भक्त्या ... मशवान्
ध्यानात्मिकया भज २२ कथं भक्तियोगाद्वैराग्यं हि तो याथवैराग्यमंतरेण मम भक्तियोगो कथमित्यत्राह वासुदेव इति भगवति वासुदेवे भक्तियो

दक्षिणेन पथार्यम्णः पितृलोकं व्रजंति ते प्रजामनु प्रजायंते श्मशानांतक्रियाकृतः २० ततस्ते क्षीणसुकृताः पुनर्लोकमिमं सति
पतंति विवशा देवैः सद्यो विभ्रंशितोदयाः २१ तस्मात्त्वं सर्वभावेन भजस्व परमेष्ठिनं तद्गुणाश्रयया भक्त्या भजनीयपदांबुजं २२
वासुदेवे भगवति भक्तियोगः प्रयोजितः जनयत्याशु वैराग्यं ज्ञानं यद्ब्रह्मदर्शनं २३ यदास्य चित्तमर्थेषु समेष्विंद्रियवृत्तिभिः
न विगृह्णाति वैषम्यं प्रियमप्रियमित्युत २४ स तदैवात्मनात्मानं निःसंगं समदर्शनं हेयोपादेयरहितमारूढं पदमीक्षते २५

गः प्रयोजितः यद्यस्माद्ब्रह्मस्वरूपस्य तेऽने नेति ब्रह्मसदर्शनं ब्रह्मसाक्षात्कारोपायभूतं भक्तियोगात्मकं ज्ञानं उत्पद्यते तद्वैराग्यमाशु जनयति अतः स्वा
भक्तियोग एव वैराग्यमपि जनयतीत्यर्थः २३ कदाय प्रारब्धभक्तियोगो ब्रह्मसाक्षात्कुर्यादित्यत्राह यदेति अस्योपासकस्य चित्तं यदा इंद्रियवृत्ति
भिरर्थेषु शब्दादिविषयेषु समेषु समं तुल्यं प्रतिफलं शब्दादिविषयावाप्त्यर्थविकल्पं सदनुकूलादिविषयं वैषम्यं प्रियाप्रियरूपं वैषम्यं न गृह्णाति
२४ यदेति यदा च चित्तं निःसंगं शब्दादिविषयासंगरहितं तन्मात्रं एव हेयोपादेयरहितं तदेष्याद्युपाधिविषयरहितं समदर्शनं समं दर्शनं यस्य
तत्परत्रब्रह्मात्मकत्वानुसंधानपरं ... भूमाख्यं प्रत्यारूढं भवति स तदैवात्मना उक्तविधेन चित्तेनात्मानं ईश्वरे ईक्षते साक्षात्करोति तेनात्मनः
२ समदर्शनमित्यनेन सर्वस्य जगतो ब्रह्मात्मकत्वेनानुसंधानमुक्तं अथ कथं विश्वस्य ब्रह्मात्मकत्वमित्यत्राह ज्ञानमात्रमिति ॥

श्रीभा॰
तृ॰ टी॰
१५३

तस्मादात्मतत्वावबोधेनात्मयाथात्म्यज्ञानयोगेन दृढेन वैराग्येण चरणैः क्रियाभिश्च सद्गुणैः मंगलगुणैः निर्गुणः स्वगुणैर्हीनः स्वदृक्तत्त्वप्रकाशः भगवाने
कएवेयते प्राप्यते तत्र कृत्वादिभिरिद्वादिरूपेण राध्यमानो तत्र सकलमेवं साक्षाज्ज्ञानयोगभक्तियोगादिभिराराधितस्तु निरतिशयमोक्षाख्यफलप्रदइति
भावः ३६ आत्मदर्शनयोगभक्तियुक्तं पृष्टमिति प्राप्य ते भक्तियोगस्य चतुर्विधं तामसादिभेदेन सात्विकावांतरभेदैर्गुणभेदात्मकैः चतुर्विधं स्वरूपं ने
गुणभक्तियोगस्य सात्विकभक्तस्य तर्भूतत्वेयितस्य सर्वोत्कृष्टत्वाभिप्रायेण चतुर्विधमित्युक्तं तु यस्तर्यो धावति परिनन्ति तस्माव्यक्तगतेः व्य
क्तेरिंद्रियैर्न लक्ष्यते इत्यव्यक्ता गतिर्यस्य कालस्य स्वरूपं ३७ तथा देहस्वंवन्ध्यात्माजीवस्यापासृष्टविज्ञानात्मनो गतिः प्रकाराः याप्यात्ममिरपर्यः
तत्र वेदन्ध्याविद्याख्यकर्मनिर्मितजीवस्यवक्तीः संसृतीश्चप्रावोचत्वानेव ३८ मयोक्तमिदं सर्वं वेदान्तार्थरूपमतिगोप्यमधिकारिणेऽवोपदेष्टव्य
मि॰

आत्मतत्वावबोधेन वैराग्येण दृढेन च ईयते भगवानेभिः सगुणो निर्गुणः स्वदृक् ३६ प्रावोचं भक्तियोगस्य स्वरूपं ते चतुर्विधं कालस्याव्यक्तग
तेर्योतर्धावति जंतुषु ३७ जीवस्य संसृतीर्बह्वीरविद्याकर्मनिर्मिताः यास्वंगप्रविशन्नात्मा न वेद गतिमात्मनः ३८ नैतत्खलायोपदिशेन्नावि
नीताय कर्हिचित् न स्तब्धाय न भिन्नाय नैव धर्मध्वजाय च ३९ न लोलुपायोपदिशेन्न गृहारूढचेतसे नाभक्ताय च मे जातु न मद्भक्तद्विषामपि ४० श्रद्दधानाय भक्ताय विनीतायानसूयवे भूतेषु कृतमैत्राय शुश्रूषाभिरताय च ४१ बहिर्जातविरागाय शांतचित्ताय दीयतां निर्मत्सराय
शुचये यस्याहं प्रेयसां प्रियः ४२ य इदं शृणुयादंब श्रद्धया पुरुषः सकृत् यो वाभिधत्ते मच्चित्तः स ह्येति पदवीं च मे ४३ इति श्री॰ तृतीये द्वात्रिंश॰
प॰

मिति वदन्नेतच्छ्रवणकीर्तनादिफलं च दर्शयन्नुपसंहरति नैतदिति खलायशठाय देहजकायस्तब्धाय मत्तायभिन्नाय दुराचाराय धर्मध्वजाय दांभिकाय ३९
४० अधिकारिणमाह श्रद्दधानाय शुश्रूषाभिरतायेतिदमुक्तः ४१ [illegible] ४१ शांतचित्तायेति शमः इदं च शमदमादिगुणजातं श्रव
णेऽपूर्णलं तायेति केम अतः तस्य श्रवणानंतरभावि न स्ततः पूर्वं तत्वा संभवान्मशांतचित्ताय शमान्विताय त्यादिव शुचये सदाचारनिष्ठाय शुश्रूषय
सां प्रीतिविषयाणां पुत्रनामध्येऽहं प्रियः निरतिशयप्रीतिविषयः तस्मै ४२ य इति हेअंब इदं मदुक्तं मच्छास्त्रं यो मत्कृतं यच्छृणुयात् श्रद्धया सकृदपि श्रद्धया पुनः
याभिधत्ते सोऽपि मच्चित्तः आत्मवैराग्योपासननिष्ठो भूत्वा मत्पदवीं मार्गं मुक्तिमेति प्राप्नोति ४३ इति तृतीये द्वात्रिंशत्तमोऽध्यायः ३२॥

नन्द

प्रावोचं ३
ष्टि॰ ४

राम
१५३

तथा ज्ञानयोगः प्रकृतिविलक्षणब्रह्मात्मकप्रत्यगात्मोपासनरूपो ज्ञानयोगः नैर्गुण्यः सत्वादिगुणत्रयरहितसुसंपादकोमन्निष्ठो मद्वि षयं भक्तिलक्षणः भक्तिरूपो योगश्च कथितः द्वयोर्ज्ञानयोगभक्तियोगयोरपि भगवच्छब्दोलक्षणोऽनन्तरूपपदोक्तिपरिभाषासमन्वितनर सुलक्षोऽस्यानुपचारेणेवार्थकोयस्य स एव परमपुरुषः एक एवार्थः प्रयोजनं फलमिति मुक्तियोगश्च मयामान्नउदीरितइतिकथितः ३२ क पं ज्ञानयोगभक्तियोगाभ्यां भगवानेव प्राप्यइत्यत्राह यथेति पृथग्द्वारैः पृथग्भिन्नानि द्वाराणि रूपरसादिग्रहणानि येषां तैरिन्द्रियैर्बहुगु णाश्रयः क्षीरादिरूपोऽर्थः एक एव नानेयते प्रतीयते रूपयादिके शुक्लवर्णो दृग्गुणविशिष्टत्वेन रसनेन्द्रियेण म धुरादिरसविशिष्टतया त्वगिन्द्रियेण शीतस्पर्शविशिष्टतया यथागृह्यते इत्यर्थः तथा भगवानेक एव शास्त्रोक्तनानामार्गविशि

ज्ञानयोगश्च मन्निष्ठो नैर्गुण्यो भक्तिलक्षणः द्वयोरप्येक एवार्थो भगवच्छब्दलक्षणः ३२ यथेन्द्रियैः पृथग्द्वारैरर्थो बहुगुणा श्रयः एको नानेयते तद्वद्भगवान्शास्त्रवर्त्मभिः ३३ क्रियया क्रतुभिर्दानैस्तपःस्वाध्यायमर्शनैः आत्मेन्द्रियजयेनापि संन्यासे नच कर्मणां ३४ योगेन विविधाङ्गेन भक्तियोगेन चैव हि धर्मेणोभयचिह्नेन यः प्रवृत्तिनिवृत्तिमान् ३५ ॥

ष्टतया प्राप्यः शास्त्रोक्तरूपेण प्राप्यत्वाकारेणाभिमुखो भवतीत्यर्थः ३३ शास्त्रीयमार्गविशेषान्प्रपंचयति क्रियाभिः क्रियया पंचरात्रोदितभगवदाराध नेन क्रतुभिर्वेदपूर्वभागोदितयज्ञैः दानैः स्मृतिचोदितैः तपः कृच्छ्रचान्द्रायणादि स्वाध्याय वेदाध्ययनं मर्शनं वेदार्थमर्शनम् आत्मजयः शमः इन्द्रियजयो दमः कर्मणां फलसंगत्यागादि संन्यासेनानुष्ठानं ३४ विविधाङ्गेन यमनियमाद्यष्टाङ्गेन भक्तियोगेन भगवद्भक्तियो गेन यथाविधेन योगेन प्रकृतिविविक्तात्मयाथात्म्यज्ञानयोगेन उभयचिह्नेन सकामनिष्कामलक्षणेन धर्मेण तमेवाह यः प्रवृत्ति ल क्षणधर्मः प्राप्यस्वर्गादिफलनिमित्तोभगवानेव इष्टव्यस्तैरेव पुंजात जायमानं विश्वं विभर्ति भुवनस्य नाभिः तदेवाग्निस्तद्वायुस्तत्सू र्यस्तदुचन्द्रमा आहुः सर्वयज्ञानां भोक्ता यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहं स तया श्रद्ध याऽयुक्तस्तस्याराधनमीहते लभते च ततः कामान्मयैव विहितान्हितान् अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसां फलमन्तउपहेतोरित्या

तपः स्वाध्यायमर्शनैः

भा० तृ० ... ३४ ॥

पाप्मनां दुष्कृतां विनाशाय निदेशभाजां भवदाज्ञानुवर्तिनां विभूतये पदप्राप्तये च त्वं देहतन्त्रः देहपरिकरः परिगृहीतदेहोऽसि यथाऽन्ये तव सूकरा-
द्योऽवतारास्तथायमप्यवतारः साक्षान्मात्ममार्गज्ञापनायामुद्दिति विभक्त्यर्थः ५ किं वो भवतोऽवतारप्रयोजनं नाम्नैव सर्वदोषनिरासेनेनाति-
रिति श्रवणपापघ्नः कृतार्थेयं तव दर्शनात् कृतार्थो भवतीति कैमुत्यन्यायेनाह यन्नामेति क्वचिदपि यस्य तव नाम्नः श्रवणात् कीर्तनात् प्रह्वणात्
स्मरणान्नामस्मरणाद्वा श्वादः श्वपचोऽपि सद्यः सवनाय यज्ञाय कल्पते योग्यो भवति हे भगवन् तव दर्शनाद् ये कृतार्था इति कुतः पुनः
किं पुनर्वक्तव्यमित्यर्थः एवं विधेन नामस्मरणादिना पापिनोऽपि कृतार्थता प्रतिपादिता निर्वचनान्तरं नामस्मरणविषयाणि दुष्कृतानि तथा चोक्तं
परस्तात्त्वयस्यावतारस्य कर्म विदुषा नामानि श्रुत्वा विगमे विवशा गृणन्तीति इति ६ एतदेव देहावसाने भगवन्नामस्मरणे सर्वेषां तपआदि

त्वं देहतन्त्रः प्रशमाय पाप्मनां निदेशभाजां च विभो विभूतये यथावतारास्तव सूकरादयस्तथायमप्यात्मपथोपलब्धये ५ यन्ना-
मधेयश्रवणानुकीर्तनाद्यत्प्रह्वणाद्यत्स्मरणादपि क्वचित् श्वादोऽपि सद्यः सवनाय कल्पते कुतः पुनस्ते भगवन्नु दर्शनात् ६
अहो बत श्वपचोऽतो गरीयान्यज्जिह्वाग्रे वर्तते नाम तुभ्यं तेपुस्तपस्ते जुहुवुः सस्नुरार्या ब्रह्मानूचुर्नाम गृणन्ति ये ते ७ तं त्वाम-
हं ब्रह्म परं पुमांसं प्रत्यक्स्रोतस्यात्मनि संविभाव्यं स्वतेजसा ध्वस्तगुणप्रवाहं वन्दे विष्णुं कपिलं वेदगर्भम् ८॥

नां कर्म जन्मोपार्जितानां फलमित्याह अहो इति ये तुभ्यं तव नाम यस्य जिह्वाग्रे वर्तते स श्वपचोऽपि गरीयान् कुत इत्यत आह ये ते तव नामग्रहणं सं-
तकाले ते पूर्वजन्मनि अतिस्मरणे तेऽर्याः श्रेष्ठाः तपस्तेपुः जुहुवुः होमं कृतवन्तः सस्नुः तीर्थेषु स्नाताः ब्रह्म वेदमनूचुः अधीतवन्तः अनूचुरिति
वर्णश्रेष्ठपुत्रादिजन्मना भावपि पूर्वजन्मसु तप आदिभिर्निर्गतपापा एव नामग्रहणं कुर्वन्तीत्यर्थः इति भावः ७ स्तुतिमुपसंहरति तमिति प्र-
त्यक्स्रोतसि प्रत्यग्गते प्रत्यक्प्रकाशे स्वप्रकाशमाने इति यावत् तस्मिन्नात्मनि जीवे अन्तःकरणे तया भावितव्यं चिन्तनीयं सम्यक्त्व
हं हरिं त्वा दिगुणयुक्तं स्वतेजसा स्वप्रकाशेन ध्वस्तः गुणानां सत्त्वादीनां प्रवाहः प्रवृत्तिः संसारः यस्य स जीवोऽपि तस्य तथा वस्तुतोऽपि निरस्तकु-
चिदानन्दस्वप्रकाशेन हेयप्रतिभटमित्यर्थः वेदा गर्भे यस्य तं कपिलाख्यं विष्णुं परमपुरुषं तमहं विधं त्वां वन्दे नमस्करोमीति ॥८॥

एवं श्रुतत्तत्त्वदित्तपरुषा यो देवहूतिः किमकरोदित्यत्राह मैत्रेयः एवमिति सा कर्दमस्य दयिता भार्या कपिलस्य माता देवहूतिः कपिलस्य
वचो निशम्य श्रुत्वा विस्रस्तः ध्वस्तः मोहः अज्ञानं स एव पटलमावरकं यस्याः सा सती तत्त्वविषयांकितसिद्धभूमिं तुष्टाव ...... प्रकृति
पुरुषेभ्यः स्वरूपाणि तानि विषयो यस्य तत्त्वज्ञानं तेनांकिताः प्रसिद्धाः सिद्धयोगिनः तेषां भूमिम् आश्रयं तत्त्वविषयांकितसिद्धिरिति पाठे त
त्वविषये ज्ञाने अंकिता ज्ञापिता सिद्धिर्येषां तेषामाश्रय इत्यर्थः तं कपिलं प्रणम्य तुष्टाव स्तुतवती १ स्तुतिमेवाह अथेति हे भगवन् यस्य तव
जठराज्जाताभिकमलाज्जातोऽजो ब्रह्मापि ते तव वपुर्विग्रहं दध्यौ ध्याने न साक्षात्कृतवान् वपुः कथंभूतं अन्तःसलिले शयानं भूतानीन्द्रियाणि
थार्थविषया आत्मा मनः तदात्मकं शब्दादयस्तन्मात्रा आत्मानो जीवाः ...... तन्मयं तत्स्वरूपं अशेषगतत्त्वं रचितस्समुदायमित्यर्थः अतएवाशे

मैत्रेय उवाच एवं निशम्य कपिलस्य वचो जनित्री सा कर्दमस्य दयिता किल देवहूतिः विस्रस्तमोहपटला तमभिप्रणम्य तुष्टाव तत्त्ववि
षयांकितसिद्धभूमिं १ देवहूतिरुवाच अथाप्यजोन्तः सलिले शयानं भूतेन्द्रियार्थात्ममयं वपुस्ते गुणप्रवाहं सदशेषबीजं दध्यौ स्वयं
यज्जठराब्जजातः २ स एव विश्वस्य भवान्विधत्ते गुणप्रवाहेण विभक्तवीर्यः सर्गाद्यनीहोवितथाभिसंधिरात्मेश्वरोऽतर्क्यसहस्रशक्तिः
३ स त्वं भृतो मे जठरेण नाथ कथं नु यस्योदर एतदासीत् विश्वं युगान्ते वटपत्र एकः शेते स्म मायाशिशुरंघ्रिपानः ४ ॥

षस्य कार्यजातस्य बीजं कारणं सद्गुणप्रवाहं सत्त्वाद्यखिलप्रवृत्तिगलसत्त्वादिगुणप्रवृत्तिहेतुत्वाद्गुणप्रवाहमित्यर्थः २ स एव भगवान् गुणप्रवाहेण
ब्रह्मादीनां रजआदिगुणभेदेन विभक्तवीर्यः ब्रह्मादिगुणभेदेन गुणं प्रविभक्तसर्गादिशक्तिर्यन्नेति यावत् स्वयमनीहोव्यापारोपि अवितथा
भिसंधिः सत्यसंकल्पः संकल्पमात्रकृतजगदुदयादिलील इत्यर्थः आत्मेश्वरः स्वयमीश्वरः नत्वन्यदित्तः पतिविश्वस्यात्मेश्वरं इति श्रुतेः कथं संकल्प
मात्रनिर्वर्तितजगदुदयादिलील इत्यत्राह अतर्क्यसहस्रशक्तिः अनन्ताः शक्तयो यस्य स भगवान् तस्य विश्वस्य सर्गादिसृष्ट्यादीनि विधत्त ३ यस्य
ते कल्पान्ते इदं विश्वं उदरे आसीत् लीनमासीत् यश्च तदा भवान्मायाशिशुः स्वसंकल्पेन शिशुभावं प्राप्तः अंघ्रिपादांगुष्ठं पिबतीति चेष्टवतीत्यंघ्रिपानः एक
एव वटपत्रे शेते स त्वं मम मोदरेण कथं भृतः तत्र कारणेन विद्मः अस्मज्जन्ममेवेति भावः ४ इदं तु प्रसिद्धं सर्वावतारसाधारणं कारणं जानीमहस्याह

श्रीभा॰
त॰टी॰
१५५

बहुभिरमरद्रुमैः पारिजातादिभिः कुसुमितैः रम्यं गृहोद्यानं हित्वा उत्तरेणान्वयः गृहोद्यानं विशिनष्टि कूजंति विहंगानां मिथुनानि यस्मिन् गायं-
तो मधुपानमत्ता भ्रमरा यस्मिन् १८ यत्र यस्मिन् गृहोद्याने प्रविष्टमात्मानं देवहूतिं विबुधानुचराः किन्नरादयः जगुः उत्पलगंधि यां वाप्यां कर्दमे-
नोपलालितं आत्मानं च हित्वा आखंडलस्येंद्रस्य योषितामपीप्सिततमम् अभीष्टतमं यत्स्थानं तत्त्वा हं मम ता ममत्व त्यक्त्वा पुत्रस्य विश्लेषणेनातुरा
[illegible] विलासती वदनं किंचित्स्रेकुचितं चकार २० सुतस्यापत्ये पतिपुत्राभ्यां वियोगदुःसहतामाह वनमिति [illegible] कर्दमे वनं प्रति [illegible] प्रव्रजिते तु [illegible]
न्यस्य गते सति निरंतरं पुत्रविश्लेषणातुरा विलापं ज्ञाततत्त्वा विदन्विरमा यथा [illegible] सापि वत्सेन [illegible] वत्सला गौः [illegible]

स्कं॰४

गृहोद्यानं कुसुमितै रम्यं बह्वमरद्रुमैः कूजद्विहंगमिथुनं गायन्मत्तमधुव्रतं १८ यत्र प्रविष्टमात्मानं विबुधानुचराः
जगुः वाप्यामुत्पलगंधिन्यां कर्दमेनोपलालितं १९ हित्वा तदीप्सिततममप्याखंडलयोषितां किंचिच्चकार वदनं पु-
त्रविश्लेषणातुरा २० वनं प्रव्रजिते पत्यावपत्यविरहातुरा ज्ञाततत्त्वाप्यभून्नष्टे वत्से गौरिव वत्सला २१ तमेव ध्यायती दे-
वमपत्यं कपिलं हरिं बभूवाचिरतो वत्स निस्पृहा तादृशे गृहे २२ ध्यायती भगवद्रूपं यदाह ध्यानगोचरं सुतः प्रसन्नवद-
नं समस्तव्यस्तचिंतया २३ भक्तिप्रवाहयोगेन वैराग्येण बलीयसा युक्तानुष्ठानजातेन ज्ञानेन ब्रह्महेतुना २४ ॥ ऽऽ

२१ तमेवापत्यं कपिलाख्यं हरिं देवं हे वत्स विदुर ध्यायंती अचिरतः बहुकालपर्यंतं ध्यायंती तादृशेऽत्युत्कृष्टे गृहेऽपि निस्पृहा विगतस्पृहा
अभूदित्यर्थः २२ तत्सुतः कपिलो भगवान् ध्यानयोग्यं यद्भगवतो रूपं प्रसन्नवदनांभोजमित्यादिनाऽऽह तत् देवप्रसन्नवदनादि समस्तं भग-
वद्रूपं कार्त्स्न्येन अवयवचिंतया २३ भक्तेर्यः प्रवाहः प्रवृत्तिः स एव योगः तेन बलीयसा वैराग्येण तथा युक्तं यत्स्वोचितं यज्ञादि कर्म
अनुष्ठानं तेन ज्ञानेनात्मयाथात्म्यज्ञानेन योगेन ब्रह्मप्राप्तिहेतुना ज्ञानयोगकर्मयोगवैराग्यादिभिरनुगृहीतेन मुक्त्युपायभूतेन भक्तियो-
गेनेत्यर्थः २४ ॥ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ ॥

राम
१५५

154

कपिलाख्यः परः पुमान् भगवानेवं ईडितः स्तुतः पितृवत्सलः पित्रोर्वत्सलः अविक्लवया गंभीरया वाचा मातरं प्रतीति वक्ष्यमाणप्रकारेण उवाच ६
क्षेमानत उदितेन कथितेन मया सुसेव्येन सुखसेव्येन मार्गेण स्थितेन त्वया अचिरेणैवापवर्गाख्यं फलं पर्यन्तं यत्प्राप्स्यसि मुक्तिमितियावत् अवरोधु
सेमातः उदितेन कथितेन मया सुसेव्येन सुखसेव्येन येनात्मनो मार्गेण स्थितेन त्वया अचिरेण अपवर्गाख्यं फलं पर्यन्तं ... ब्रह्मवादिभिः सेविते सोपदेशेमिः जुष्टं पुनः प्रयोरुपे
सेप्राप्स्यसि ९ एतन्मतं मम मतं श्रद्धस्व एतस्मिन्मते श्रद्धां कुरु इत्यर्थः मतं विशिनष्टि यन्मतं ब्रह्मवादिभिः सेवितं सोपदेशेमिः जुष्टं ... योगितां
तं येन मतेनाभयं मां यायात् आगुयात् अतद्विदः यन्मतानभिज्ञाः मृत्युसंसारमिच्छन्तीति १० एवं भगवान्कपिलः आत्मनो मनीषां आत्मनो गतिं ज्ञा
नमार्गं मातुः प्रदर्श्य तया ब्रह्मवादिन्या मात्रा अनुमतः आज्ञापितः प्रयोगतवान् १२ साचापि देवहूतिरपि पुत्रोपदिष्टेन योगानुष्ठानेन अस्मि
नमार्गे मा... प्रदर्श्य तयाब्रह्मवादिन्या मात्रा अनुमत आज्ञापितः प्रयोगतवान् १२

कपिल उ॰ मार्गेणानेन मातस्ते सुसेव्येनोदितेन मे

मैत्रेय उ॰ इति लोके भगवानेवं कपिलाख्यः परः पुमान् वाचाविक्लवयेत्याह मातरं मातृवत्सलः ६ कपिल उ॰ मार्गेणानेन मातस्ते सुसेव्येनोदितेन मे
आस्थितेन परां काष्ठामचिरादवरोत्स्यसि ९ श्रद्धत्स्वैतन्मतं मह्यं जुष्टं यद्ब्रह्मवादिभिः येन मामभयं याया मृत्युमृच्छन्त्यतद्विदः ११ मैत्रेय उ॰ इ
ति प्रदर्श्य भगवान्सतीं तामात्मनो गतिं स्वमात्रा ब्रह्मवादिन्या कपिलोऽनुमतो ययौ १२ साचापि तनयोक्तेन योगादेशेन योगयुक्तस्मि
न्नाश्रमे आपीडे सरस्वत्याः समाहिता १३ अभीक्ष्णावगाहकपिशान् जटिलान्कुटिलालकान् आत्मानं चोग्रतपसा बिभ्रती चीरिणं कृ
१४ प्रजापतेः कर्दमस्य तपोयोगविजृम्भितं स्वगार्हस्थ्यमनौपम्यं प्रार्थ्यं वैमानिकैरपि १५ पयःफेननिभाः शय्या दान्ता रुक्मपरिच्छदाः आस
नानि च हैमानि सुस्पर्शास्तरणानि च १६ स्वच्छस्फटिककुड्येषु महामारकतेषु च रत्नप्रदीपा आभान्ति ललनारत्नसंयुताः १७ ॥

स्रोतः सरस्वत्याः आपीडे अलंकारभूते आश्रमे समाहितचित्ता अभवत् १३ कथंभूता सती समाहिता साऽभीक्ष्णावगाहः त्रिषवणस्नानं तेन कपिलान् पिशंगान्
ते व सरस्वत्याः आपीडे अलंकारभूते आश्रमे समाहितचित्ताभवत् १३ कथंभूता सती समाहितासाऽभीक्ष्णावगाहः त्रिषवणस्नानं तेन कपिलान् पिशंगान् जटिलान्
नतान् कुटिलान् अलकान् केशान् उग्रतपसा कृशं चीरिणं वल्कलधारिणं चात्मानं देहं बिभ्रती १४ कर्दमस्य प्रजापतेः तपोयोगाभ्यां विजृम्भितं प्रतिपादितं वैमानिके
रपि प्रार्थ्यं स्वगार्हस्थ्यं गृहस्थस्य भावः ... किंचित्कारेति शेषेनान्वयः १५ गार्हस्थ्यं विशिनष्टि यत्र गार्हस्थ्ये दोरफेनवत्
उज्ज्वलाः शय्याः दान्ताः ... सुवर्णमयाः परिच्छदाः ... निसुखस्पर्शान्यास्तरणानि १६ मरकतस्य नवोत्तिमरकतानि इन्द्रनीलानि ... १७ ॥
भत्तेषु स्वच्छस्फटिकमयकुड्येषु ललनारत्नसंयुताः रत्नान्येव प्रदीपाः आभान्ति

श्रीभा० स्क० टी० १५६

योगप्रवृत्तं विमुक्तकेशं विकीर्णशिरो विगतवस्त्रमपि स्वांगं देहं दैवगुप्तं दैवेन रक्षितं न बुबुधे न बुद्धवती तत्र हेतुः वासुदेवे भगवति प्रवि-
ष्टा धीर्यस्याः सा भगवदनुभव[illegible] जनितानंदसंप्लवे तन्मग्नत्वात् देहं [illegible] न बुबुधे इत्यर्थः २९ एवं कपिलोपदिष्टेन ज्ञानमार्गेणाचिरतः
देवहूतिः परं ब्रह्मनिर्वृतिप्रायानंदरूपं भगवंतमवाप हेति विस्मये ३० हे वीर विदुर यत्र सा मुक्तिमवाप तत्पुण्यतमं क्षेत्रं नाम्ना त्रैलोक्य-
विश्रुतं प्रसिद्धमासीत् किं तन्नामेत्यत्राह यत्र क्षेत्रे सिद्धिपदं सिद्धिस्थानं भवतीति सिद्धाश्रमः इत्युच्यते इत्यर्थः सिद्धपदमिति क्षेत्रनाम-
माह यत्र क्षेत्रे सा देवहूतिः संसिद्धिं मुक्तिं उपेयुषी प्राप्तवती अतस्तत् सिद्धक्षेत्रमिति प्रसिद्धमित्यर्थः ३१ तस्या इति हे सौम्य तस्या दे-

स्वांगं तपोयोगमयं मुक्तकेशं गतांबरं दैवगुप्तं न बुबुधे वासुदेवप्रविष्टधीः २९ एवं सा कपिलोक्तेन मार्गेणाचि-
रतः परं आत्मानं ब्रह्मनिर्वाणं भगवंतमवाप ह ३० तद्वीरासीत्पुण्यतमं क्षेत्रं त्रैलोक्यविश्रुतं नाम्ना सि-
द्धपदं यत्र सा संसिद्धिमुपेयुषी ३१ तस्यास्तद्योगविधुतमार्त्यं मर्त्यमभूत्सरित् स्रोतसां प्रवरा
सौम्या सिद्धिदा सिद्धसेविता ३२ कपिलोपि महायोगी भगवान्पितुराश्रमात् मातरं सम-
नुज्ञाप्य प्रागुदीचीं दिशं ययौ ३३ सिद्धचारणगंधर्वैर्मुनिभिश्चाप्सरोगणैः स्तू-
यमानः समुद्रेण दत्तार्हणनिकेतनः ३४ ॥ ॥ ॥

255

वहूत्याः मर्त्यं शरीरं तद्योगविधुतमार्त्यं [illegible] तस्या देवहूत्याः योगेन विधुता विनाशिताः मार्त्याः पलितवलितादयो
देहधर्मा यस्मिन् तथाभूतं सत् यास्यति शरीरं स्रोतसां नदीनां मध्ये प्रवरा सिद्धादिभिः सेविता नदी अभूत् सरिद्रूपेण प्रावह-
दित्यर्थः ३२ कपिलोऽनुमतो यया विसृष्टः क्व ययौ इत्यत आह हे विदुर महायोगी भगवान्कपिलो मातरं देवहूतिं समनुज्ञाप्य
मात्रानुज्ञातः प्रागुदीचीं ईशानदिशं प्रति ययौ ३३ तत्र सिद्धचारणादिभिः स्तूयमानः समुद्रेण दत्तमर्हणं समर्हणं नि-
केतनं निवासस्थानं च यस्मै सः यस्मै ३४ ॥

राम १५६

विमुक्तेनात्मना मनसात्मानं विश्वतोमुखं सर्वज्ञं स्वानुभूत्या स्वप्रकाशेन तिरोहिता निमायागुणाः सत्त्वादयः तेषां विशेषणं निरोकर्मोत्सादीनि यस्य तं अश्रान्ता यावद्योगिभिद्रक रदितमात्मानं परमपुरुषं ध्यायन्तौ २५ आत्मनो जीवात्मनःसे अयेआश्रयभगवति ब्रह्मण्येवस्थिता मतिर्यस्याः सा निवृत्त जीवापत्तित्वात् निवृत्ता जीवापत्ति जीवस्यापत्तिः क्लेशाः पापहितार्यतः सा प्रकृतिः यदात्मापत्तिरापत्ते क्लेशादिरूपायतः सा प्रकृतिः निवृत्ता निवृत्त मायाजीवापत्तिर्यस्याः सा तस्या भावस्तत्त्वं तस्मात् निवृत्तत्रयप्रकृतिः संबंधत्वादित्यर्थः क्षीणक्लेशा विगतपीतो क्लादिक्लेशा आत्मा प्राप्ता परमात्मानुभवरूपा निर्वृतिरानंदो यया सा २६ नित्यमारूढः समाधि

विमुक्तेन ततात्मानमात्मना विश्वतोमुखं स्वानुभूत्या तिरोभूतमायागुणविशेषणं २५ ब्रह्मण्येवस्थितमतिर्भगवत्यात्मसंश्रये निवृत्तजीवापत्तित्वात् क्षीणक्लेशाप्तनिर्वृतिः २६ नित्यारूढसमाधित्वात् परावृत्तगुणभ्रमा न सस्मार तदात्मानं स्वप्ने दृष्टमिवोत्थितः २७ तद्देहं परतः पोष्योप्यसौ [illegible] स्वाप्यसंभवात् बभौ मलैरवच्छन्नः सधूम इव पावकः २८ ॥

र्यया तस्याः भावस्तत्त्वं तस्मात् निरस्तप्रकृतिविलक्षणप्रत्यगात्मशरीर कपरमात्मनि समाधिनत्वादित्यर्थः परावृत्ताः निवृत्ताः तमःआदिप्रकृतिगुणकार्यदेहात्माभिमानादिविपरीतभ्रमो यस्याः सा सती आत्मानं शरीरं न सस्मार स्वप्ने दृष्टमिवोत्थित इव प्रबुद्धः स्वप्ने दृष्टं वस्तुजातमिव यथा स्वप्नाद् उत्थितः पुरुषः स्वाप्नं वस्तु अनित्यमिति निश्चित्य स्वाप्नवस्त्वापन्नसुखदुःखादिभिरनास्पृष्टः तद्वदित्यर्थः एवं देहानुबंधसर्वकर्माण्यपि न स्थिरमिति मत्वा तत्पोषणादिनिमित्तसुखदुःखैरनभिभूता सती देहं उपेक्षांचकार इत्यर्थः २७ अत एव तस्या देहः परतः परैः पोष्योपि परायत्तपोषणोप्यकृश कुतः आध्यंभवात्पोषण संर
निजसंस्मारेत्यर्थः । २७ अत एव तस्या देहः परतः परैः पोष्योपि परायत्तपोषणोप्यकृश कुतः आध्यंभवात्पोषण
भावप्रयुक्तमनःपीडया अभावात् मलैरवच्छन्नः अभ्यंगोद्वर्तनाभावात् मलैर्युक्तोपि सधूमः पावक इव बभौ २८ ॥

आस्ते इति सांख्याचार्यैः कपिलो लक्ष सांख्यप्रवर्त्तकः योगिभिरभिष्टुतः लोकानामुपशान्त्यै देवमाय समाहितमनाः स्वयमपि योगमा स्थाय आस्ते इत्यर्थः ३५ स्वायंभुवस्य च मनो वंश इत्यादिना कृतस्य प्रश्नस्य यदुत्तरमुक्तं तदुपसंहरति एतदिति हेऽनघ विदुर अहं यत्त्वया पृष्टः एतत्तव निगदितं मया तत्प्रसंगात्कपिलस्य देवहूत्याश्च लोकपावनः श्रुण्वतां कथ नपराणां च लोकानां पावनः संवादोऽपि निगदितः ३६ कपिलदेवहूतिसंवादश्रवणकीर्त्तनादिफलमाह य इति कपिलेन दर्शितफल

भुक्त

257

आस्ते योगं समास्थाय सांख्याचार्यैरभिष्टुतः त्रयाणामपि लोकानामुपशान्त्यै समाहितः ३५ एतन्निगदितं तात यत्पृष्टोऽहं तवानघ कपिलस्य च संवादो देवहूत्याश्च पावनः ३६ य इदमनुशृणोति योऽभिधत्ते कपिलमुनेर्मतमा त्मयोगगुह्यं भगवति कृतधीः सुपर्णकेतावुपलभते भगवत्पदारविंदं ३७ इति श्रीभागवते महापुराणे तृतीयस्कंधे कपिलोपाख्याने नाम त्रयस्त्रिंशोऽध्यायः ३३ ॥ समाप्तोऽयं तृतीयस्कंधः ३ ॥ ३३ ॥

भक्तमन्त्रतु मैत्रेयेणेति वक्ता ... भेदाल्पो न कृत्यं इदमात्मयोगगुह्यं यत्तमं कपिलमुनेर्मतं यः शृणोति वक्ति सति यो वाभिधत्ते श्रोतृषु सत्सु स ... सुपर्णकेतौ गरुडध्वजे भगवति कृतधीः निष्पन्नभक्तियोगो भूत्वा भगवत्पदा रविंदं लभते प्राप्नोति ३७ ॥ इति श्रीवत्सान्वयपयःपारावारराकासुधाकरस्य सर्वविद्यानिधेः श्रीमल्लगुरोः सुतेन तच्चरणकमलपरिचर्याप्रसन्नतत्त्वसमधिगतश्रीमद्भागवतार्थहृदयेन श्रीवैष्णवदासेन श्रीवीरराघवविदुषा विलिखि तायां श्रीमद्भागवतचंद्रिकायां श्रीमद्भागवतव्याख्यायां तृतीयस्कंधे त्रयस्त्रिंशोऽध्यायः ३३ ॥